



लिखतं गरोए पा श्री श्री १... पंडित
शिवराम मैं चे ग्यम पा टेकरा वाला
होरजी पुस्तक माहा भारत दा मे जया है
जो कु दघर था दान धरम १
सभपरब १
स्री १
बिसोक १
मोसल १
अस्वमेध १
विराट १
उं... १
संऊ...
खंड...

द्रो०
१

श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् जन
मेजय उवाच तमप्रतिमसत्वौजो बलवीर्यसमन्वितं हतं देवव्रतं श्रुत्वा पांचाल्येन शिखंडिना धृतराष्ट्र
स्ततो राजा शोकव्याकुललोचनः किमचेष्टत विप्रर्षे हते पितरि वीर्यवान् तस्य पुत्रो हि भगवन् भी
ष्मद्रोणमुखै रथैः पराजित्य महेष्वासान् पांडवान् राज्यमिच्छति तस्मिन् हते तु भगवन् केतौ सर्वधनुष्म
तां यदचेष्टत कौरव्यस्तन्मे ब्रूहि तपोधन वैशंपायन उवाच निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः
लेभे न शांतिं कौरव्यश्चिंता शोकपरायणः तस्य चिंतयतो दुःखमनिशं पार्थिवस्य तत् आजगाम विशुद्धा
त्मा पुनर्गावल्गणिस्तदा व्यासप्रसादाद्धि तापसदेवव्रतान्तमुक्तमे से तिकर्ये नांबसर्वैष्वासेन यो रुमयोस्त
दा शिबिरात्संजयं प्राप्तं निशि नागाह्वयं पुरं आंबिकेयो महाराज धृतराष्ट्रोन्वपृच्छत श्रुत्वा भीष्मस्य निधनमप्रहृष्टम
नाभृशं पुत्राणां जयमाकांक्षन् विललापातुरो यथा धृतराष्ट्र उवाच संशोच्य तु महात्मानं भीष्मं भीमपराक्रमं
किमकार्षुः परं तात कुरवः कालचोदिताः तस्मिन् विनिहते शूरे दुराधर्षे महात्मनि किं नु स्वित्कुरवोकार्षु
र्निमग्नाः शोकसागरे तदुदीर्णं महत्सैन्यं त्रैलोक्यस्यापि संजय भयमुत्पादयेत्तीव्रं पांडवानां महात्मनां देव
व्रते तु निहते कुरूणामृषभे तदा किमकार्षुर्नृपतयस्तन्ममाचक्ष्व संजय संजय उवाच शृणु राजन्नेकमना व
चनं ब्रुवतो मम यत्ते पुत्रास्तदाकार्षुर्हते देवव्रते मृधे निहते तु तदा भीष्मे राजन् सत्यपराक्रमे तावकाः पांडवेयाश्च
प्राध्यायंत पृथक् पृथक् विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं निशाम्य ते स्वधर्मं निंदमानास्ते प्रणिपत्य महात्मने शय्य

श्रीराम०
१

नंकस्त्वयमासुर्भीष्मायामितकर्मणे यो सोपधानं नरव्याघ्र शरैः संततपर्वभिः विधाय रक्षां भीष्माय समाभाष्य परस्परं अनुमान्य च गां
गेयं कृत्वा चापि प्रदक्षिणं क्रोधसंरक्तनयनाः समवेत्य परस्परं पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचोदिताः ततस्तूर्यनिनादैश्च भे
रीणां निनदेन च तावकानामनीकानि परेषां च विनिर्ययुः व्याहते ह्यतिराजेन्द्र पतिते जाह्नवीसुते अमर्षवशमापन्नाः कालोपहतचे
तसः अनादृत्य वचः पथ्यं गांगेयस्य महात्मनः निर्ययुर्भरतश्रेष्ठाः शस्त्राण्यादाय सत्वराः मोहात्तव च पुत्रस्य वधाच्छांतनवस्य च
कौरव्या मृत्युना हृताः सहिताः सर्वराजभिः अजावय इवागोपाः वने श्वापदसंकुले भृशमुद्विग्नमनसो हीना देवव्रतेन ते पतिते भ
रतश्रेष्ठे बभूव कुरुवाहिनी द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना विपन्नसस्येव मही वाक्चैवासंस्कृता यथा आसुरीव यथा
सेना निगृहीते नृपे बलौ विधवेव वरारोहा शुष्कतोयेव निम्नगा वृकैरिव वने रुद्धा पृषती हतयूथपा शरभाहतसिंहेव
महती गिरिकंदरा भारती भरतश्रेष्ठ पतिते जाह्नवीसुते विष्वग्वाताहता रुग्णा नौरिवासीन्महार्णवे बलिभिः पां
डवैर्वीरैर्लब्धलक्षैर्भृशार्दिता सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा विपन्नभूयिष्ठनरा कृपणा ध्वस्त
मानसा तस्यां त्रस्ता नृपतयः सैनिकाश्च पृथग्विधाः पाताल इव मज्जंतो हीना देवव्रतेन ते कर्णं हि कुरवो
स्मार्षुः स हि देवव्रतोपमः सर्वशस्त्रभृतां श्रेष्ठं रोचमानमिवातिथिं बंधुमापद्गतस्येव तमेवोपागमन्मनः चु
क्रुशुः कर्ण कर्णेति तत्र भारत पार्थिवाः राधेयं हितमस्माकं सूतपुत्रं तनुत्यजं स हि नायुध्यत तदा दशाहानि महाय
शाः सामात्यबंधुः कर्णो वै तमाह्वयत माचिरं भीष्मेणाहि महाबाहुः सर्वक्षत्रस्य पश्यतः रथेषु गण्यमानेषु बलविक्रमशालिषु
संख्यातोर्द्धरथः कर्णो द्विगुणः सन्नरर्षभः रथातिरथसंख्यायां योग्रणीः शूरसंमतः सासुरानपि देवेशान्रणे यो ॥ ७

द्रो०
२
योऽस्मद्युद्धे हतः सतु तेनैव कोपेन राजन् गांगेयमुक्तवान्। त्वयि जीवति कौरव्य नाहं योत्स्ये कथंचन। त्वया तु पांडवेयेषु निहतेषु महा
मन्यो दुर्योधन मनुज्ञाप्य वनं यास्यामि कौरव। पांडवैर्वा हते भीष्मे त्वयि स्वर्गमुपेयुषि। हंतास्म्येकरथेनैव कृत्स्ना[...]न्मन्यसे रथा
न्। एवमुक्त्वा महाबाहुर्दशाहानि महायशाः। नायुध्यत ततः कर्णः पुत्रस्य तव संमते। भीष्मः समरविक्रांतः पांडवेयस्य भारत। ज
घान समरे योधानसंख्येयपराक्रमः। तस्मिंस्तु निहते शूरे सत्यसंधे महौजसि। त्वत्सुताः कर्णमस्मार्षुस्तर्तुकामा इव प्लवं।
तावकास्तव पुत्राश्च सहिताः सर्वराजभिः। हा कर्ण इति चाक्रंदन् कालोयमिति चाब्रुवन्। कुरवः सहिता योधास्तत्र महा
बलाः। जामदग्न्याभ्यनुज्ञातमस्त्रे दुर्वारपौरुषं। अगमन्नो मनः कर्णं बंधुमात्ययिकेष्विव। स हि शक्रोऽर्णवो राजं स्त्रातुमस्मान्म
हाभयात्। त्रिदशानिव गोविंदः सततं सुमहाभयात्। वैशंपायन उवाच। तथा कर्णं युधि वरं कीर्तयंतं पुनः पुनः।
आशीविषवदुच्छ्वसं धृतराष्ट्रोऽब्रवीदिदं। धृतराष्ट्र उ०। यत्तद्वैकर्तनं कर्णमगमद्वो मनस्तदा। अप्यपश्यत राधेयं सूत
पुत्रं तनुत्यजं। अपि तन्न मृषाकार्षीत् कच्चित्सत्यपराक्रमः। संभ्रांतानां तदार्तानां त्रस्तानां त्राणमिच्छतां। अपि त
त्पूरयांचक्रे धनुर्धरवरो युधि। यत्तद्विनिहते भीष्मे कौरवाणामुपाश्रये। तत्खंडं पूरयन्कर्णः परेषामा
दधद्भयं। स हि वै पुरुषव्याघ्रो लोके संजय कथ्यते। आर्तानां बांधवानां च क्रंदतां च विशेषतः। परित्यज्य रणे प्रा
णान्तत्त्राणार्थं च शर्म च। कृतवान्मम पुत्राणां जयाशां सफलामपि। इति श्रीमहाभारते द्रोणपर्वणि संजय उवाच
हतं भीष्ममथाधिरथिर्विदित्वा भिन्नां नावमिवात्यगाधे कुरूणां। सोदर्यवद्व्यसनात्सूतपुत्रः संतारयिष्यंस्तव पुत्रस्य सेनाम् एम०
२

नां श्रुत्वा तु कर्णः पुरुषेंद्रमच्युतं निपातितं शांतनवं महारथं अथोपयायात्सहसारिकर्षणो धनुर्द्धराणां प्रवरस
स्तदा प हते तु भीष्मे रथसत्तमे परैर्निमज्जंतीं नावमिवार्णवे कुरून् पितेव पुत्रांस्त्वरितोभ्ययात्ततः संतारयिष्यं
स्तान्कपुत्रस्य सेनां कर्ण उवाच यस्मिन्धृतिर्बुद्धिपराक्रमौजः सत्यं स्मृतिर्वीरगुणाश्च सर्वे अस्त्राणि दिव्या
न्यथ संनतिर्ह्रीः प्रिया च वागनसूया च भीष्मे सदा कृतज्ञे द्विजशत्रुघातके सनातनं चंद्रमसीव लक्ष्मीः स
चेत्प्रशांतः परवीरहंता मन्ये हतानेव च सर्ववीरान् नेह ध्रुवं किंचन जातु विद्यते लोके ह्यस्मिन्कर्मणो नि
त्ययोगात् सूर्योदये को हि विमुक्तसंशयो भावं कुर्वीताद्य महाव्रते हते वसुप्रभावे वसुवीर्यसंभवे गते वसू
नेव वसुंधराधिपे वसूनि पुत्रांश्च वसुंधरां तथा कुरूंश्च शोचध्वमिमां च वाहिनीं संजय उवाच महाप्र
भावे वरदे निपातिते लोकेश्वरे शास्तरि चामितौजसि पराजितेषु भरतेषु दुर्मनाः कर्णो भृशं न्यश्वसदश्रु
वर्तयन् इदं तु राधेयवचो निशम्य सूताश्च राजंस्तव सैनिकाश्च ह परस्परं चुक्रुशुरार्तिजं भृशं तदाश्रु नेत्रै
र्मुमुचुश्च शब्दवत् प्रवर्त्तमाने तु पुनर्महाहवे विगाह्यमानासु चमूषु पार्थिवैः अथाब्रवीद्धर्षकरं तदा च
वो रथर्षभान् सर्वमहारथर्षभः जगत्यनित्ये सततं प्रधावति प्रचिंतयन्नास्थिरमद्य लक्षये भवत्सु तिष्ठ
त्स्विह पातितो मृधे गिरिप्रकाशः कुरुपुंगवः कथं निपातिते शांतनवे महारथे दिवाकरे भूतलमास्थिते
यथा न पार्थिवाः सोढुमलं धनंजयं गिरिप्रवोढारमिवानिलं द्रुमाः हतप्रधानं त्विदमार्त्तरूपं परैर्हतोत्सा
हमनाथमद्य वै मया कुरूणां परिपाल्यमाहवे बलं यथा तेन महात्मना तथा समाहितं चात्मनि भारमीदृशं जगत्त

दे० छानित्यमिदं च लक्ष्ये निपातितं चाहवशौण्डा आहवे कथं नु कर्ष्णो महमीदृशो भयं अहं त्वत्पादकुरुदर्षभानतिलगैः
३ प्रवेशयनयमसदनं च स्त्ररणो यशः परं जगति दिमान्त्व वर्त्तितापरै हृतो मु विशपितास्थका पुनः पुष्टिाद्वि रेजगति
वसत्यसंघवान् हृको दरोमजश तज्जुत्यविज्ञमर तथार्जुनस्त्वि दशावराम्मजो पुवाननतद्रू लं सुजयमिहा मरैरपि य
मौरणोपत्रयमोपवोचलेससात्पाकिर्यत्रचदेवकीसुतः मतद्रूलंकापुरुषोत्पुपेयिवान् निवर्त्ते तेम्तसुमुरवान्त्र
चासुभद्र तयोम्पुदीर्णतपसैववाध्यते वटं वले नैवत्तथो मनास्विभिः मनश्च मे शत्रुनिवारणो ध्वंस्वरक्षणो वा
चलवच्चवस्थितं एवं चैषां बाधमानः प्रभावं गत्त्वे वाहृतान् जयाम्पघसत्त मित्रद्रोहो मर्षणी योन मे यं मयत्रे सैन्येषुः
समेषात्म मित्रः कत्रौस्येतत्सत्पुरुषार्थे कर्म्मेत्य क्लाशराणनजयास्याभिमोक्षं सर्वोसंख्येशत्रुसंघान् हनिष्ये
हतस्ते वीरा रलोकं प्रपत्स्ये संप्राकुर्षे रुद्दत स्त्रीकुमारे पराहतेपौरुषे धार्त्तराष्ट्रे मयान्त्य त्यमिति जानामि सू
ततस्माद्रात्तस्त्व यशानुत्विजेष्ये कुरुवनरक्षन् पांडुपुत्रान् जिघांसन त्यक्त्वा शंप्राणान् घोररूपेरणे स्मिन् स
र्वान्संख्ये शत्रुसंघान्निहत्य दास्याम्यहं धार्त्तराष्ट्राय राज्यं निवध्यतामेकवचं विचित्रं हेमं शुभ्रं मणिरत्नावभा
सि शिरस्त्राणं चार्कसमानभासं धनुः शरांश्चाग्निविषाहिकल्पान् उपासंगान् षोडशयोजयंतु धनूंषि दि
व्यानि तथाहरंतु असीश्च शक्तिश्च गदाश्च गुर्वीः शंखं च जांबूनदचित्रभासं इमां सैकीं नागकक्षां विचि
त्रां ध्वजं चित्रं दिव्यमिंदीवराभं श्लक्ष्णैर्वस्त्रैर्विप्रमृज्यानयंतु चित्रां मालां चात्र रूववद्दासताजो अश्वानग्र्यान्पांडुराभ्र
प्रकाशान्पुष्टांस्नातान्मंत्रपूताभिरद्भिः तप्तैर्भांडैः कांचनैरभ्युपेतान् शीघ्रान् शीघ्रं सूतपुत्रानयस्व रथं चाग्र्यं हेममालावनं राम०
द्धं रत्नैश्चित्रं ३

सर्पेवं द्रप्रकाशैः द्रक्ष्येऽहमेकं संप्रहारोपपन्नैर्वोढेह्यैकं तद्रणे माधवस्येयस्य चित्रारीचापानिव वेगवंतिज्याश्चोत्तमाः संहननोपप
न्नाः द्रूणाश्च पूर्णा महांतः शराणां मासाद्यगात्रावरणानि चैव प्रायात्रिकं चानपताश्च सर्वे दक्षाः पूर्णा वीरकाः स्यंचहे मं
आनीयमाला मवबध्य चांगे प्रवादपं त्वाशुजयाय मेरो प्रयाहि सूत ताश्च यतः कीरीटी वृकोदरो धर्मसुतो यमौ च ता
नाहं निष्यामि समेत्य संख्ये भीष्माय गच्छामि हतो द्विषद्भिः यस्मिन्राजा सत्यधृतिर्युधिष्ठिरः समास्थितो भीमसेनार्जुनौ
च वासुदेवः सात्यकिः संजयाश्च मन्ये बलं तद् दुर्जयं महीपैः तं चेन्मृत्युः सर्वहरो भिरक्षते सदाप्रमत्तः समरे किरीटिनं
तथापि हंतास्मि समेत्य संख्ये यास्यामि वा भीष्मपथा यमाय नत्वेवाहं नगमिष्यामि तेषां मध्ये शूराणां तत्र चाहं ब्रवीमि
मित्रद्रुहो दुर्बलशक्तयो ये पापात्मानो न ममैते सहायाः संजयउवाच समृद्धिमंतं रथमुत्तमं दृढं सकूबरं हेमपरिष्कृतं शु
भं पताकिनं वातजवैर्हयोत्तमैर्युक्तं समारुह्याय ययौ जयाय सः संपूज्यमानः कुरुभिर्महात्मा रथर्षभो देवगणैर्यथेंद्रः
ययौ तदायोधनमुग्रधन्वा यत्रावसानं भरतर्षभस्य वरूथिना महता सध्वजेन सुवर्णमुक्तामणिरत्नमालिना स
दश्वयुक्तेन रथेन कर्णो मेघस्वनेनार्क इवामितौजाः हुताशनाभासहुताशनप्रभः शुभः शुभे वैसुरथे धनुर्द्धरः
स्थितो रराजाधिरथिर्महारथः स्वयं विमाने सुरराडिवास्थितः इति श्रीमहाभारते द्रोणपर्वणि संजयउवा
च शरतल्पे महात्मानं शयानममितौजसं महावातसमूहेन समुद्रमिव शोषितं दिव्यैरस्त्रैर्महेष्वासं पातितं
सव्यसाचिना जयाशां तव पुत्राणां संभग्नां शर्म च अपाराणामिव द्वीपमगाधे गाधमिच्छतां स्रोतसा यामुनेनेव शरौ
घेन परिप्लुतं महेंद्रेणेव मैनाकमसह्यं

वर्म २

द्रो० ४

भुविपातितं नभश्च्युतमिवादित्यंपतितंधरणीतले शतक्रतुमिवाचिंत्यंपुरावृत्रेणनिर्जितम् मोहनंसर्वसैन्यस्ययुधिभीष्मस्यपा
तनंककुदंसर्वसैन्यानांलक्ष्मसर्वधनुष्मतां धनंजयशरैर्व्याप्तं पितरंतेमहाव्रतं तंवीरशयनेवीरंशयानंपुरुषर्षभं भी
ष्ममाधिरथिर्दृष्ट्वाभरतानांमहाद्युतिः अवतीर्यरथादार्त्तोबाष्पव्याकुलिताक्षरं अभिवाद्यांजलिंबध्वावंदमानोभ्य
भाषत कर्णोहमस्मिभद्रंतेवदमामभिभारत पुण्ययाक्षेमयावाचाचक्षुषावावलोकय नन्नूनंसुकृतस्येहफलंक
श्चित्समश्नुते यत्रधर्मपरोवृद्धः शेतेभुविभवानिह कोषसंचयनेमंत्रेव्यूहेप्रहरणेषुचं नाथमन्यंनपश्यामिकु
रूणांकुरुपुंगव बुद्ध्याविशुद्धयायुक्तोयः कुरूंस्तारयेद्भयात् योधांस्तुबहुधाहत्वापितृलोकंगमिष्यसि अ
द्यप्रभृतिसंक्रुद्धाव्याघ्राइवमृगक्षयं पांडवाभरतश्रेष्ठकरिष्यंतिकुलक्षयं अद्यगांडीवघोषस्यवीर्यज्ञाःसव्य
साचिनः कुरवःसंत्रसिष्यंतिवज्रपाणेरिवासुराः अद्यगांडीवमुक्तानामशनीनामिवस्वनः त्रासयिष्यति
बाणानांकुरून्अन्यांश्चपार्थिवान् समिद्धोग्निर्यथावीरमहाज्वालोद्रुमान्दहेत् धार्तराष्ट्रान्प्रधक्ष्यंतितथाबा
णाःकिरीटिनः येनयेनप्रसरतोवायुरग्निःसहितोवने तेनतेनप्रदहतोभूरिगुल्मतृणद्रुमान् यादृशोग्निः
समुद्भूतस्तादृक्पार्थोनसंशयः यथावायुर्नरव्याघ्रस्तथाकृष्णोनसंशयः नदतःपांचजन्यस्यरसतोगांडिवस्य
च श्रुत्वासर्वाणिसैन्यानित्रासंयास्यंतिभारत कपिध्वजस्यचोत्पातेरथस्यामित्रकर्षिणः शब्दंसोढुं
नशक्ष्यंतित्वामृतेवीरपार्थिवाः कोह्यर्जुनंयोधयितुंत्वदन्यःपार्थिवोर्हति यस्यदिव्यानिकर्माणिप्रवदं
तिमनीषिणः अमानुषश्चसंग्रामस्त्र्यंबकेनमहात्मना तस्माच्चैववरःप्राप्तोदुष्प्रापमकृतात्म

एम० ४

मिः कोन्यः शक्तो रणे जेतुं पूर्वं येन न जितस्त्वया जितो येन रणे रामो भवता वीर्यशालिना क्षत्रियांतकरो घोरो देवदानव
दर्पहा सोम्प्यघतिहतः शतैः शरैः प्रोक्तः किरीटिना तमद्याहं पांडवं युद्धे शौंडं अमृष्यमाणो भवताद्यानुशिष्टः
आशीविषं दृष्टिहरं सुघोरं शक्ष्याम्यस्त्रबलान्निहंतुं इति द्रोणपर्वणि संजयः ॥ तस्य लालप्यमानस्य
कुरुवृद्धः पितामहः देशकालोचितं वाक्यमब्रवीत्प्रीतमानसः समुद्र इव सिंधूनां ज्योतिषामिव भास्करः सत्य
स्य च यथा संतो बीजानामिव चोर्वरा पर्जन्य इव भूतानां प्रतिष्ठा सुहृदां भव बांधवास्त्वानुजीवंतु सहस्राक्ष
मिवामराः मानहा भव शत्रूणां मित्राणां नंदिवर्द्धनः कौरवाणां भव गतिर्यथा विष्णुर्दिवौकसां स्वबाहुबलवी
र्येण धार्त्तराष्ट्रजयैषिणा कर्ण राजपुरं गत्वा कांबोजा निर्जितास्त्वया गिरिव्रजगताश्चापि नग्नजित्प्रमुखा नृ
पाः अंबष्ठाश्च विदेहाश्च गांधाराश्च जितास्त्वया हिमवद्दुर्गनिलयाः किराता रणकर्कशाः दुर्योधनस्य व
शगास्त्वया कर्ण पुरा कृताः उत्कला मेकलाः पौंड्राः कलिंगांध्राश्च संयुगे निषादाश्च त्रिगर्त्ताश्च बाह्लीकाश्च
जितास्त्वया तत्र तत्र च संग्रामे दुर्योधनहितैषिणा बहवश्च जिताः कर्ण त्वया वीर महौजसा यथा दुर्योधनः
स्वानां सज्ञातिकुलबांधवः तथा त्वमपि सर्वेषां कौरवाणां गतिर्भव शिवेनाभिवदामि त्वां गच्छ युध्यस्व श
त्रुभिः अनुशाधि कुरून्संख्ये धत्स्व दुर्योधने जयं भवान्पौत्रसमोस्माकं यथा दुर्योधनस्तथा तवापि धर्मतः
सर्वे यथा तस्य वयं तथा यौनात्संबंधकाल्लोके विशिष्टं संगतं सतां सद्भिः सह नरश्रेष्ठ प्रवदंति मनीषिणः
स सत्यसंगतो भूत्वा ममेदमिति निश्चितं कुरूणां पालय बलं यथा दुर्योधनस्तथा निशम्य वचनं तस्य चरणाव
भिवाद्य च ययौ वैकर्त्तनः कर्णः समीपं स

क॰ देवधन्विनां सोऽभिवीक्ष्य नरैर्घाराणां स्थानमप्रतिमं महत् व्यूढप्रहरणोरस्कं सैन्यं तत्समदृश्यत हर्षिताः कुरवः सर्वे
५ दुर्योधनपुरोगमाः उपागतं महाबाहुं सर्वानीकपुरस्सरं कर्णं दृष्ट्वा महात्मानं युद्धाय समुपस्थितं क्ष्वेडितास्फो
टितरवैः सिंहनादरवैरपि धनुःशब्दैश्च विविधैः कुरवः समपूजयन् इतिश्रीमहाभारते कर्णपर्वणि संजयउ॰
रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितं हृष्टो दुर्योधनो राजन्निदं वचनमब्रवीत् सनाथमिव मन्येऽहं भव
ता पालितं बलं अत्र किं तु समर्थं यद्धितं तत्संप्रधार्यतां कर्ण उवाच ब्रूहि नः पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृप य
था चार्थपतिः कृत्यं पश्यते न तथेतरः ते स्म सर्वे तव वचः श्रोतुकामा नरेश्वर नान्याय्यं हि भवान्वाक्यं ब्रूयादि
ति मतिर्मम दुर्योधन उवाच भीष्मः सेनाप्रणेतासीद्वयसा विक्रमेण च श्रुतेन चोपसंपन्नः सर्वैर्योधगुणै
स्तथा तेनातियशसा कर्ण घ्नता शत्रुगणान्मम सुयुद्धेन दशाहानि पालितास्मो महात्मना तस्मिन्न सु
करं कर्म कृतवत्यास्थिते दिवं कृतं सेनाप्रणेतारं मन्यसे तदनन्तरं न विना नायकं सेना मुहूर्तमपि तिष्ठति
आहवेष्वाहवश्रेष्ठ कर्णहीनेव नौर्जले यथा ह्यकर्णधारा नौ रथश्चासारथिर्यथा द्रवेद्यथेष्टं तद्वत्स्यादृते से
नापतिं बलं अदैशिको यथा सार्थः सर्वः कृच्छ्रं समृच्छति अनायका तथा सेना सर्वान्दोषान्समृच्छति स भवा
न्वीक्ष्य सर्वेषु मामकेषु महात्मसु पश्य सेनापतिं युक्तमनु शान्तनवादिह यं हि सेनाप्रणेतारं भवान्वक्ष्यति संयुगे
तं वयं सहिताः सर्वे करिष्यामो न संशयः कर्ण उवाच सर्व एव महात्मान इमे पुरुषसत्तमाः सेनापतित्वमर्ह
ति नात्र कार्या विचारणा कुलसंहननज्ञानैर्बलविक्रमबुद्धिभिः युक्ताः कृतज्ञा धीमन्त आहवेष्वनिवर्तिनः एम॰
युगपन्न तु ते शक्याः कर्तुं सर्वे पुरस्सराः एक एव तु कर्तव्यो य ५

स्मिन्नेवशेषिकागुणाः अन्योन्यस्पर्द्धिनोह्येषांयद्येकंपृथक्करिष्यति शेषाविमनसोव्यक्तंनयोत्स्यंतिहितास्तव अथपंचसर्व
योधानामाचार्यःस्थविरोगुरुः युक्तःसेनापतिंकर्त्तुंद्रोणःशस्त्रभृतांवरः कोहितिष्ठतिदुर्द्धर्षेद्रोणेशस्त्रभृतांवरे से
नापतिःस्याद्यन्योस्माच्छुक्रांगिरसदर्शनात् नचसोप्यस्तितेयोधःसर्वराजसुभारत द्रोणंयःसमरेयांतमनुयास्यतिसंयुगे
एषहिसेनाप्रणेतृणामेषशस्त्रभृतामपि एषबुद्धिमतांचैवश्रेष्ठोराजन्गुरुस्तव एवंदुर्योधनाचार्यमाशुसेनापतिंकुरु
जिगीषंतोसुरान्संख्येकार्त्तिकेयंइवामराः संजयउवाच कर्णस्यवचनंश्रुत्वाराजादुर्योधनस्तदा सेनामध्यगतंद्रोण
मिदंवचनमब्रवीत् दुर्योधनउवाच वर्णश्रैष्ठ्यात्कुलोत्पत्त्याश्रुतेनवयसाधिया वीर्याद्दाक्ष्याद्धृष्यत्वादर्थज्ञा
नान्नयाज्जयात् तपसाचकृतज्ञत्वाद्वृद्धःसर्वगुणैरपि युक्तोभवत्समोगोप्ताराज्ञामन्योनविद्यते सभवान्पातुनः
सर्वान्देवानिवशतक्रतुः भवन्नेत्राःपरान्जेतुमिच्छामोद्विजसत्तम रुद्राणामिवकापालीवसूनामिवपाव
कः कुबेरइवयक्षाणांमरुतामिववासवः वसिष्ठइवविप्राणांतेजसामिवभास्करः पितृणामि
वधर्मेन्द्रोयादसामिवांबुराट् नक्षत्राणामिवशशीदितिजानामिवोशनाः श्रेष्ठःसेनाप्रणेतृणांसनः
सेनापतिर्भव अक्षौहिण्योदशैकाचवशगाःसंतुतेनघ ताभिःशत्रून्प्रतिव्यूह्यजहीन्द्रोदानवानिव
प्रयातुनोभवानग्रेदेवानामिवपावकिः अनुयास्यामहेत्वाजौसौरभेयाइवर्षभं उग्रधन्वामहेष्वासोदि
व्यंविस्फारयन्धनुः अग्रेभवंतंतुदृष्ट्वानार्जुनःप्रहरिष्यति ध्रुवंयुधिष्ठिरंसंख्येसानुबंधंसबांधवं जेष्यामिपुरु
षव्याघ्रभवान्सेनापतिर्यदि संजयउवाच एवमुक्तेततोद्रोणंजयेत्यूचुर्नराधिपाः सिंहनादेनमहताहर्षयंतस्तवात्मजं से
निकाश्चमुदायुक्तं

वर्द्धयंतिद्विजोत्तमं दुर्योधनंपुरस्कृत्यप्राब्रवीत्ततोमहद्यशाः इतिद्रोणपर्वणिद्रोणाभिषेके द्रोणउवाच वेदंषडंगंवेदाहमर्थ
विद्यांचमानवीं त्रैयंबकमथेष्वस्त्रंशस्त्राणिविविधानिच येचाप्युक्तामयिगुणाभवद्भिर्जयकांक्षिभिः चिकीर्षुस्तान
हंसर्वान्योधयिष्यामिपांडवान् पार्षतंतुरणेराजन्नहनिष्येकथंचन सहिसृष्टोवधार्थायममैवपुरुषर्षभः योध
यिष्यामिसैन्यानिनाशयन्सर्वसोमकान् नचमांपांडवायुद्धेयोधयिष्यंतिहर्षिताः संजयउवाच सएवमभ्यनुज्ञा
तश्चक्रेसेनापतिंततः द्रोणंतवसुतोराजन्विधिदृष्टेनकर्मणा अथाभिषिषिचुर्द्रोणंदुर्योधनमुखान्नृपाः सेना
पत्येयथास्कंदंपुराशक्रमुखाःसुराः ततोवादित्रघोषेणशंखानांचमहास्वनैः प्रादुरासीत्कृतेद्रोणेहर्षःसेना
पतौतदा ततःपुण्याहघोषेणस्वस्तिवादस्वनेनच संस्तवैर्गीतशब्दैश्चसूतमागधवंदिनां जयशब्दैर्द्विजाग्र्या
णांसुभगानर्तितैस्तथा सत्कृत्यविधिनाद्रोणंमेनिरेपांडवान्जितान् इतिश्रीमहाभारतेद्रोणपर्वणि
द्रोणाभिषेकः संजयउ० सेनापत्यंतुसंप्राप्यभारद्वाजोमहारथः युयुत्सुर्व्यूह्यसैन्यानिप्रायात्तवसुतैःस
ह सैंधवश्चकलिंगश्चविकर्णश्चतवात्मजः दक्षिणंपार्श्वमास्थायसमतिष्ठंतदंशिताः प्रपक्षःशकुनिस्तेषां
प्रवरैर्हयसादिभिः ययौगांधारकैःसार्द्धंविमलप्रासयोधिभिः कृपश्चकृतवर्माचचित्रसेनोविविंश
तिः दुःशासनमुखायत्ताःसव्यंपक्षमपालयन् तेषांप्रपक्षाःकांबोजाःसुदक्षिणपुरस्सराः ययुरश्वैर्म
हावेगैःशकाश्चयवनैःसह मद्रास्त्रिगर्त्ताःसांबष्ठाःप्रतीच्योदीच्यमालवाः शिबयःशूरसेनाश्चशूद्राश्चमलदैःसह
सौवीराःकितवाःप्राच्यादाक्षिणात्याश्चसर्वशः तवात्मजंपुरस्कृत्यसूतपुत्रस्यपृष्ठतः हर्षयंतःस्वसैन्यानिप्रायात्तव
सुतैस्सह प्रवरःसर्व

योधानांबलेमुख्यमादधत् पर्यौवैकर्तनःकर्णःप्रमुखेसर्वधन्विनां तस्यदीप्तोमहाकायःस्वान्यनीकानिहर्षयन् ह
स्तिकक्ष्योमहाकेतुर्बभौसूर्यसमद्युतिः नभीष्मस्यसनंकश्चिद्ददृशाकर्णममन्यत विशोकाश्चाभवन्सर्वेराजानः
कुरुभिःसह हृष्टाश्चबहवोयोधास्तत्राजल्पंतसंगताः नहिकर्णंरणेदृष्ट्वायुधिष्ठास्यंतिपांडवाः कर्णोहि
समरेशक्तोजेतुंदेवान्सवासवान् किमुपांडुसुतान्युद्धेहीनवीर्यपराक्रमान् भीष्मेणतुरणेपार्थाःपालि
तावाहुशालिना तांस्तुकर्णःशरैस्तीक्ष्णैर्नाशयिष्यतिसंयुगे एवंब्रुवंतस्तेन्योन्यंहृष्टरूपाविशांपते राधेयं
पूजयंतश्चप्रशंसंतश्चनिर्ययुः अस्माकंमकरव्यूहोद्रोणेनविहितोऽभवत् परेषांक्रौंचव्यासीव्यूहोराज
न्महात्मना प्रीयमाणेनविहितोधर्मराजेनभारत व्यूहप्रमुखतस्तेषांतस्थतुःपुरुषर्षभौ वानरध्वजमुच्छ्रि
त्यविष्वक्सेनधनंजयौ ककुदंसर्वसैन्यानांधामसर्वधनुष्मतां आदित्यपथगःकेतुःपार्थस्यामिततेजसः
योधानामर्जुनःश्रेष्ठोगांडीवंधनुषांवरं वासुदेवश्चभूतानांचक्राणांचसुदर्शनं चत्वार्येतानितेजांसि
वहन्श्वेतहयोरथः परेषामग्रतस्तस्थौकालचक्रमिवोद्यतं एवंतौसुमहात्मानौबलसेनाग्रगावुभौ
तावकानांमुखेकर्णः परेषांचधनंजयः ततोजाताभिसंरंभौपरस्परवधैषिणौ अवेक्षेतांतदान्योन्यंस
मरेकर्णपांडवौ ततःप्रयातेसहसाभारद्वाजेमहारथे आर्तनादेनघोरेणवसुधासमकंपत ततस्तुमुलमा
काशमावृणोत्सदिवाकरं वातोद्धूतंरजस्तीव्रंकौशेयनिकरोपमं ववर्षद्यौरनभ्रापिमांसास्थिरुधिराण्युत गृध्राःश्येनावलाः

द्रो०
७

कंकावायसाश्च सहस्रशः उपर्युपरिसैन्यानां तेतदापर्यपतन्नृप गोमायवश्चप्राक्रोशन् भयदान्दारुणान्रवान् अकार्षुर
पसव्यंच बहुशः पृतनांतव विरवादिव तोमांसानि पिपासंत अशोणितं अपतद्दीप्यमानाच सनिर्घाता सकंपना उ
ल्काज्वलंती संग्रामे पुच्छेनावृत्य सर्वशः परिवेषो महांश्चापि सविद्युत्स्तनयित्नुमान् भास्करस्याभवद्राजन्प्रया
ते वाहिनीपतौ एतेचान्येच बहवः प्रादुरासन्सुदारुणाः उत्पाता युधि वीराणां जीवितक्षयकारिणः ततः प्रववृते यु
द्धं परस्परवधैषिणां कुरुपांडवसैन्यानां शब्देनापूरयज्जगत् तेत्वन्योन्यं सुसंरब्धाः पांडवाः कौरवैः सह अभ्यघ्न
न्निशितैः शस्त्रैः जयगृध्राः प्रहारिणः सपांडवानां महतीं महेष्वासो महाद्युतिः वेगेनाभ्यद्रवत्सैन्यं किरन्शरशतैः
शितैः द्रोणमभ्युद्यतं दृष्ट्वा पांडवाः सह संजयैः प्रत्यगृह्णंस्तदा राजन्छरवर्षैः पृथक्पृथक् विक्षोभ्यमाणा
नेव द्रोणः पांडवसंजयान् तेवध्यमाना द्रोणेन वासवेनेव दानवाः पांचालाः समकंपंत धृष्टद्युम्नपुरोगमाः त
तोदिव्यास्त्रविच्छूरो याज्ञसेनिर्महारथः अभिनच्छरवर्षेण द्रोणानीकमनेकधा द्रोणस्य शरवर्षेण शरवर्षाणि
पार्षतः संनिवार्य ततः सर्वान्कुरूनप्यवधीद्बली संयम्य तु ततो द्रोणः समवस्थाप्य चाहवे स्वमनीकं महेष्वा
सः पार्षतं समुपाद्रवत् सबाणवर्षं सुमहदसृजत्पार्षतं प्रति मघवानिव संक्रुद्धः सहसा दानवेष्विव तेकंप्य
माना द्रोणेन बाणैः पांडवसंजयाः पुनः पुनरभज्यंत सिंहेनैवेतरे मृगाः तथा पर्यचरद्द्रोणः पांडवानां बलं बली आ
लातचक्रवद्राजंस्तदद्भुतमिवाभवत् खचरनगरकल्पं कल्पितं शास्त्रदृष्ट्या चलदनिलपताकं ह्लादितं वाल्गिताश्वं स्फ राम०
+ राद्रोणेनाभिघ्नमाना महाचमूः अशीर्यत सपांचाला वातेनेव बलाहकाः बहूनि हि विकुर्वाणो दिव्यान्यस्त्राणि संयुगे अपीडयत्क्षणेनै ।। ७

टिकाविमलकेतुंत्रासनंशात्रवाणांप्रथवरमेधिस्तदः संजहारारिसेनां॥ ॥इतिश्रीमहाभारतेद्रोणपर्वणियुद्धे संजयउवा
च तथाद्रोणमभिघ्नंतंसाश्वसूतरथद्विपान् व्यथिताः पांडवा दृष्ट्वा न चैनंपर्यवारयन् ततोयुधिष्ठिरोराजाधृष्ट
द्युम्नधनंजयौ अब्रवीत्सर्वतोयत्तैः कुंभयोनिर्निवार्यतां तत्रैनमर्जुनश्चैव पार्षतश्च सहानुगाः पर्यगृह्णंस्ततः सर्वे
समापेतुर्महारथाः केकयाभीमसेनश्च सौभद्रोथघटोत्कचः युधिष्ठिरोयमौमत्स्याद्रुपदस्यात्मजास्तथा द्रौपदे
याश्च संहृष्टाधृष्टकेतुः ससात्यकिः चेकितानश्च संक्रुद्धोयुयुत्सुश्च महारथः येचान्येपार्थिवाराजन्पांडवस्यानुयायि
नः कुलवीर्यानुरूपाणिचक्रुः कर्माण्यनेकशः संरक्ष्यमाणांतां दृष्ट्वापांडवैर्वाहिनीं रणे व्यावृत्यचक्षुषीकोपाद्भा
रद्वाजोन्ववैक्षत सतीव्रंकोपमास्थायरथेसमरदुर्जयः व्यधमत्पांडवानीकमभ्राणीवसदागतिः रथानश्वान्नरा
न्नागांश्चाभिधावन्नितस्ततः चचारोन्मत्तवद्द्रोणोवृद्धोपितरुणोयथा तस्यशोणितदिग्धांगाः शोणास्तेवातरंहस
: आजानेयाहयाराजन्नविश्रांताध्रुवंययुः तमंतकमिवक्रुद्धमापतंतंयतव्रतं दृष्ट्वासंप्राद्रवन्योधाः पांडवस्यय
तस्ततः तेषांप्राद्रवतांभीमः पुनरावर्ततामपि श्रूयतांतिष्ठतां चासीच्छब्दःपरमदारुणः शूराणांहर्षजननोभीरू
णांभयवर्द्धनः द्यावापृथिव्योर्विवरंपूरयामाससर्वतः ततः पुनरपिद्रोणोनामविश्रावयन्युधि अकरोद्रौद्रमा
त्मानंकिरञ्छरशतैः शरान् सतथातेष्वनीकेषुपांडुपुत्रेषुमारिष कालवच्चचरन्द्रोणोयुवेवस्थविरोबली उ
त्कृत्यचशिरांस्युग्रान्बाहूनपिसुभूषणान् कृत्वाशून्यान्रथोपस्थानुदक्रोशन्महारथान् तस्यहर्षप्र
णादेनबाणवेगेनचाविभो प्राकंपंतरणेयोधागावःशीतार्दिताइव द्रोणस्यरथघोषेणमौर्वीनिष्पेषणेनच धनुः

पा२

द्रो० ८ शब्देनचाकाशेशब्दः सममवन्महान् यथास्यधनुषोबाणानिश्चरंतः सहस्रशः आप्यसर्वादिशःपेतुर्नागाश्वरथपत्तिषु तं
कार्मुकमहावेगमस्त्रज्वलितपावकं द्रोणमासादयांचक्रुः पांचालाः पांडवैः सह तान्सकुंजरपत्त्यश्वान्प्राहिणोद्यम
सादने चक्रेचिरेणच द्रोणोमहीं शोणितकर्दमां तन्वता परमास्त्राणि शराणांशततमस्यता द्रोणेनविहितं दिक्षुश
रजालमदृश्यत पदातिस्यंदनाश्वेषु रथेष्वपिचशरा ह्येशः तस्यविद्युदिवाभ्रेषु चरन्केतुरदृश्यत सकेकयानांप्रव
रांश्चपंचपंचालराजंचशरैः प्रमथ्य [redacted] :युधिष्ठिरानीकमदीनसत्वं द्रोणोभ्ययात्
त्कार्मुकबाणपाणिः तंभीमसेनश्चधनंजयश्चशिनेश्चनेता द्रुपदात्मजाश्च शैब्यात्मजः काशिपतिः शिबिश्च दृष्ट्वान
दंतोव्यकिरंछरौघैः तेषामथद्रोणधनुर्विमुक्ताः पतत्रिणः कांचनचित्रपुंखाः भित्वाशरीराणिगजाश्वपूनांजग्मुर्म
हींशोणितदिग्धवाजाः सायोधसंघैश्चरथैश्चभूमिःशरैर्विभिन्नैर्गजवाजिभिश्च प्रछाद्यमानापतितैर्बभूव समाहृता
द्यौरिवकालमेघैः शैनेयभीमार्जुनवाहिनीशांसौभद्रपांचालसकाशिराजं अन्यांश्चवीरान्समरेसमर्द्य द्रोणःसु
तानांतवभूतिकामः एतानिचान्यानिचकौरवेंद्र कर्माणिकृत्वासमरेमहात्मा प्रताप्यलोकानिवकालसूर्यो
द्रोणोगतः स्वर्गमितोहिराजन् एवंरुक्मरथः शूरो हत्वाशतसहस्रशः पांडवानांरणेयोधान्पार्षतेननिपाति
ताः अक्षौहिणीमभ्यधिकांशूराणामनिवर्तिनां निहत्यपश्चाद्धृतिमानगच्छत्परमांगतिं पांडवैःसहपांचा
लैरशिवैः क्रूरकर्मभिः हतोरुक्मरथोराजन्कृत्वाकर्मसुदुष्करं ततोनिनादोभूतानामाकाशेसमजा
यत सैन्यानांचततोराजन्नाचार्येनिहतेयुधि द्यांधरांखंदिशोवापिप्रदिशश्चानुनादयन् ॥ ७ एम० ८

ततः क्लोमहत्सु मर्दितः परवत्सादिनः ४

न अहो धिगिति भूतानां शब्दः समभवद्भृशं देवताः पितरश्चैव पूर्वे ये चास्य बांधवाः ददृशुर्निहतं तत्र भारद्वाजं महारथं पां
डवास्तु जयं लब्ध्वा सिंहनादान्प्रचक्रिरे सिंहनादेन महता समकंपत मेदिनी ॥ ॥इति श्री महाभारते द्रोणपर्वणि
॥ ॥धृतराष्ट्र उवाच किं कुर्वाणं रणे द्रोणं जघ्नुः पांडवसंजयाः तथा निपुणमस्त्रेषु सर्वशस्त्रभृतामपि रथभं
गो बभूवास्य धनुर्वाशीर्यतास्यतः प्रमत्तो वाभवद्द्रोणस्ततो मृत्युमुपेयिवान् कथं नु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणं
किरंतमिषुसंघातान्रुक्मपुंखाननेकशः क्षिप्रहस्तं द्विजश्रेष्ठं कृतिनं चित्रयोधिनं दूरेषुपातिनं दांतमस्त्रयु
द्धेषु पारगं पांचालपुत्रो न्यवधीद्दिष्ट्यास्त्रधरमच्युतं कुर्वाणं दारुणं कर्म रणे यत्तं महारथं व्यक्तं हि दैवं बलव
त्पौरुषादिति मे मतिः यद्द्रोणो निहतः शूरः पार्षतेन महात्मना अस्त्रं चतुर्विधं वीरे यस्मिन्नासीत्प्रतिष्ठितं
तमिष्वस्त्रधराचार्यं द्रोणं शंससि मे हतं श्रुत्वा हतं रुक्मरथं वैयाघ्रपरिवारितं जातरूपपरिष्कारं नाद्य
शोकमुपाददे न नूनं परदुःखेन म्रियते कोपि संजय यत्र द्रोणमहं श्रुत्वा हतं जीवामि मंदधीः दैवमेव प
रं मन्ये नन्वर्थं न हि पौरुषं यत्र द्रोणं हतं श्रुत्वा हतो जीवामि मंदभाक् अश्मसारमयं नूनं हृदयं सुदृढं मम यच्छ्रुत्वा नि
हतं द्रोणं शतधा न विदीर्यते ब्राह्म्ये दैवे तथेष्वस्त्रे यमुपासन्गुणार्थिनः ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हतः
शोषणं सागरस्येव मेरोरिव विसर्पणं पतनं भास्करस्येव नमर्षे द्रोणपातनं दुष्टानां प्रतिषेद्धासीद्धार्मिकानां च र
क्षिता यो हासीत्कृपणस्यार्थे प्राणानपि परंतपः मंदानां मम पुत्राणां जयाशा यस्य विक्रमे बृहस्पत्युशनसोर्बुद्धा

द्रो० ८

सनिहतः कथं तेवश्योयानहन्द्रोणंछन्नान्जालैर्हिरण्मयैः रथेवातजवायुक्ताः सर्वशस्त्रातिगारणे बलिनोघोषिणोदान्ताः सैंध
वाः साधुवाहिनः दृढाः संग्राममध्येषुकच्चिदासन्नविह्वलाः करिणांबृंहतांयुद्धेशंखदुंदुभिनिस्वने ज्याक्षेपशरवर्षाणांश
स्त्राणांचसहिष्णवः आशंसंतपराञ्जेतुंजितश्वासाजितव्यथाः हयाः पराजिताः शीघ्राभारद्वाजरथोद्वहाः तेस्मरुक्मरथेयु
क्तानरवीरसमाहिताः कथंनाभ्यतरंस्तातपांडवानामनीकिनीं जातरूपपरिष्कारमास्थायरथमुत्तमं भारद्वाजःकिमक
रोच्छूरःसंक्रंदनोयुधि विद्यांयस्योपजीवंतिसर्वलोकधनुर्धराः ससत्यसंधोबलवान्द्रोणःकिमकरोद्युधि दिविशक्रमि
वश्रेष्ठंमहामात्रंधनुर्भृतां केतुतंरौद्रकर्माणंयुद्धेप्रत्युदियूरथाः ननुरुक्मरथंदृष्ट्वाप्रद्रवंतिस्मपांडवाः दिव्यमस्त्रं
विकुर्वाणंरणेतस्मिन्महाबलं उताहोसर्वसैन्येनधर्मराजःसहानुजः [illegible] पांचाल्यप्रग्रहोद्रोणंसर्वतःसमवारयत्
नूनमावारयत्पार्थोरथिनोन्यानजिह्मगैः ततोद्रोणंसमारोहत्पार्षतःपापकर्मकृत् नह्यहंपरिपश्यामिवधेकंचनशु
ष्मिणः धृष्टद्युम्नादृतेरौद्रात्पाल्यमानात्किरीटिना तैर्वृतःसर्वतःशूरैःपांचाल्यापसदस्ततः केकयैश्चेदिका
रूषैर्मत्स्यैरन्यैश्चभूमिपैः व्याकुलीकृतमाचार्यंपिपीलैरुरगंयथा कर्मण्यसुकरेसक्तंजघानेतिमतिर्मे
म योधीत्यचतुरोवेदान्सांगानाख्यानपंचमान् ब्राह्मणानांप्रतिष्ठासीत्स्रोतसामिवसागरः क्षत्रंचब्रह्मचै
वहयोभ्यतिष्ठत्परंतपः सकथंब्राह्मणोवृद्धःशस्त्रेणवधमाप्तवान् अमर्षणोमर्षितवान्क्लिश्यमानःसदामया अनर्हमा
णःकौंतेयान्कर्मणस्तस्यतत्फलं यस्यकर्मा जीवंतिलोकेसर्वधनुर्भृतः ससत्यसंधःसुकृतीश्रीकामैर्निहतःकथं दिवि श्रीराम० ८

ज१

शक्र इव श्रेष्ठो महासत्वो महाव्रतः सकथं निहतः पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः ।क्षिप्रहस्तश्च बलवान् दृढधन्वारिमर्दनः न
यस्य विजयाकांक्षी विषयं प्राप्य जीवति यं द्वौ न जहतः शब्दौ जीवमानं कदाचन ब्राह्मश्च वेदकामानां ज्याघोषश्च धनु
ष्मतां अदीनं पुरुषव्याघ्रं ह्रीमंतमपराजितं नाहं मृष्ये हतं द्रोणं सिंहद्विरदविक्रमं कथं संजय दुर्धर्षमनाधृष्यय
शोबलं पश्यतां पुरुषेंद्राणां समरे पार्षतोवधीत् के पुरस्ताद युध्यंत रक्षंतो द्रोणमंतिकात् के नु पश्चादवर्तंत गच्छतो
दुर्गमां गतिं केरक्षन् दक्षिणं चक्रं सव्यं के च महात्मनः पुरस्तात्के च वीरस्य युध्यमानस्य संयुगे के च तस्मिंस्तनुं त्यक्त्वा
प्रतीपं मृत्युमाव्रजन् द्रोणस्य समरे वीराः केकुर्वंत परां गतिं कच्चिन्नैनं भयान्मंदाः क्षत्रिया व्यजहन् रणे रक्षितारस्ततः
शून्ये कच्चिन्नैव हतः परैः नस पृष्ठमरेस्त्रासाद्रणे शौर्यात्प्रदर्शयेत् परमप्यापदं प्राप्य स कथं निहतः परैः
एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु संजय पराक्रमेद्यथाशक्त्या तच्च तस्मिन्प्रतिष्ठितं मुह्यते मे मनस्तात क
था तावन्निवार्यतां भूयस्तु लब्धसंज्ञस्त्वां परिपृच्छामि संजय॥ ॥इति श्री भारते द्रोणपर्वणि वैशंपायन उ
वाच एतत्पृष्ट्वा सूतपुत्रं हृच्छोकेनार्दितो भृशं जये निराशः पुत्राणां धृतराष्ट्रोपतत्क्षितौ तं विसंज्ञं निप
तितं सिषिचुः परिचारिकाः जलेनात्यर्थशीतेन वीजंत्यः पुण्यगंधिना पतितं चैनमालोक्य समंताद्भरत स्त्रि
यः परिवव्रुर्महाराजमस्पृशंश्चैव पाणिभिः उत्थाप्य चैनं शनकै राजानं पृथिवीतलात् आसनं प्रापयामा
सुर्बाष्पकंठ्यो वरांगनाः आसनं प्राप्य राजा च मूर्छयाभिपरिप्लुतः निश्चेष्टोतिष्ठत तदा वीज्यमानः समं
ततः सलब्ध्वा शनकैः संज्ञां वेपमानो महीपतिः पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथं धृतराष्ट्र उ०

द्रो० यः सत्यधर्मविदित्योऽसौ तिष्ठां प्रत्युद्गतक्षमः अजातशत्रुमायान्तं के संश्रेराणादवारयन् प्रभिन्नमिव मातंगं यथा क्रु
१० द्धं तरस्विनं प्रसन्नवदनं दृष्ट्वा प्रतिद्विरदगामिनं वाग्मिता संगमे यद्वत् अजय्यं प्रतियूथपैः निजघान रणे
वीरान्वीरः पुरुषसत्तमः यो ह्येको हि महावीर्यो निर्दहेद्घोरचक्षुषा कृत्स्नं दुर्योधनबलं धृतिमान्सत्यसंग
रः चक्षुर्हणं जयेसक्तमिष्वासधरमच्युतं दान्तं बहुमतं लोके के शूराः पर्यवारयन् . के दुःप्रधर्षं राजानमिष्वा
सधरमच्युतं समासेदुर्नरव्याघ्रं कौन्तेयं तत्र मामकाः तरसैवाभिपद्याथ यो वै द्रोणमुपाद्रवत् यः करोति मह
त्कर्म शत्रूणां चैव महाबलः महाकायो महोत्साहो नागायुतसमो बले तं भीमसेनमायान्तं के शूराः पर्यवारयन्
यदायात्जलदप्रख्यो रथः परमवीर्यवान् पर्जन्य इव बीभत्सुस्तुमुलामशनीमिव विसृजं छरजालानि वर्षाणि
मघवानिव अवस्फूर्जन्दिशः सर्वास्तलनेमिस्वनेन च चापविद्युत्प्रभो घोरो रथगुल्मबलाहकः रथनेमिघो
षस्तनितः शरशब्दातिबन्धुरः रोषनिर्जितजीमूतो मनोभिप्रायशीघ्रगः मर्माति गो बाणधारस्तुमुलः शोणि
तोदकः संप्लावयन्दिशः सर्वा मानवैरास्तरन्महीं भीमनिस्वनितो रौद्रो दुर्योधनपुरोगमान् युद्धेऽभ्यषिंचद्विजयो
गार्ध्रपत्रैः शिलाशितैः गाण्डीवं धारयन्धीमान्कीदृशं वो मनस्तदा इषुसंबाधमाकाशं कुर्वन्कपिवरध्वजः यदा
यात्कथमासीत्तु तदा पार्थं समीक्ष्य तं कच्चिद्गाण्डीवशब्देन न प्रणश्यत वै बलं युद्धः स भैरवं कुर्वन्नर्जुनो भृशमन्व
यात् कच्चिन्नापानुदन्प्राणानिषुभिर्वो धनंजयः वातो वेगादिवाविध्यन्मेघाच्छरगणोर्नृपान् को हि गाण्डीवधन्व
ध्वानं रणे सोढुं नरोऽर्हति यमुपश्रुत्य सेनाग्रे जनः सर्वो विदीर्यते यत्सेना समकंपन्त यद्वीरान्स्पृशद्भयं के राम०
१०

तत्र नाजकुल्हैर्णां केऽक्षुरःप्राद्रवन्मथात् केवान्त्रत स्यत्काप्रतीपं मृत्युमाव्रजन् अमानुषाणां जेतारं युद्धेष्वपि धनंजयं
नववेगाभितास्वस्य दिसहिष्यंति मामकाः गांडीवस्य च निर्घोषं प्रावृड्जलदनिःस्वनं विष्वक्सेनो यस्य यंता यस्य यो
द्धा धनंजयः अशक्यः सरथो जेतुं मन्ये देवासुरैरपि सुकुमारो युवा शूरो दर्शनीयश्च पांडवः मेधावी निपुणो धीमान् यु
धि सत्यपराक्रमः आरावं विपुलं कुर्वन् व्यथयन् सर्वसैनिकान् आयांतं नकुलं द्रोणं के शूराः पर्यवारयन् आशीविष
इव क्रुद्धः सहदेवो यदाभ्ययात् कदनं करिष्यन् शत्रूणां जेतासौ दुर्जयो युधि आर्यव्रतममोघेषुं ह्रीमंतमपराजितं सह
देवं तमायांतं के शूराः पर्यवारयन् यस्तु सौवीरराजस्य प्रमथ्य महतीं चमूं आदत्त महिषीं भोज्यां काम्यां सर्वांगशोभनां
सत्यं धृतिश्च शौर्यं च ब्रह्मचर्यं च केवलं सर्वाणि युयुधाने स्मिन् नित्यानि पुरुषर्षभे बलिनं सत्यकर्माणमदीनम
पराजितं वासुदेवसमं युद्धे वासुदेवादनंतरं धनंजयोपदेशेन श्रेष्ठमिष्वस्त्रकर्मणि पार्थेन सममस्त्रेषु कस्तं द्रोणाद्
वारयत् वृष्णीनां प्रवरं वीरं शूरं सर्वधनुष्मतां रामेण सममस्त्रेषु यशसा विक्रमेण च सत्यं धृतिर्मतिः शौर्यं ब्रा
ह्मं चास्त्रमनुत्तमं सात्वते तानि सर्वाणि त्रैलोक्यमिव केशवे तमेवं गुणसंपन्नं दुर्वारमपि दैवतैः समासाद्य महेष्वा
सं के शूराः पर्यवारयन् पांचालेषूत्तमं वीरमुत्तमाभिजनप्रियं नित्यमुत्तमकर्माणमुत्तमौजसमाहवे युक्तं धनंजय
हिते मम्मानर्थाय समुच्छ्रितं यमवैश्रवणादित्यमहेंद्रवरुणोपमं महारथं समाख्यातं द्रोणायोद्यतमाहवे त्यजंतं
तुमुले प्राणान् के शूराः समवारयन् एकोपसृत्य चेदिभ्यः पांडवान् समाश्रितः धृष्टकेतुं तमायांतं द्रोणात्कस्तं न्यवारय

द्रो० त योवृधीत्केतुमान्वीरोराजपुत्रंदुरासदं अपरांतगिरिद्वारे द्रोणात्कस्तंन्यवारयत् यस्मिन्नत्यधिकावीरेगुणाः सर्वेधनंजया
११ त् यस्मिन्नस्त्राणिसत्यंचब्रह्मचर्यंचसर्वदा वासुदेवसमंवीर्ये धनंजयसमंबले तेजसादित्यसदृशं बृहस्पतिसमंमतौ
अभिमन्युंमहात्मानंव्यात्ताननमिवांतकं द्रोणायाभिमुखंयांतंकेशूराः समवारयन् तरुणस्तरुणप्रज्ञः सौभद्रः परवीरहा
यदाभ्यधावद्वैद्रोणंतदासीद्धोमनः कथं द्रौपदेयानरव्याघ्राः समुद्रमिवसिंधवः यद्द्रोणमाद्रवन्संख्येकेशूरास्तान्निवा
रयन् एतेद्वादशवर्षाणिक्रीडामुत्सृज्यबालकाः अस्त्रार्थमवसन्भीष्मेबिभ्रतोव्रतमुत्तमं क्षत्रंजयः क्षत्रदेवः क्षत्रव
र्मोचमानदः धृष्टद्युम्नात्मजावीराः केतान्द्रोणादवारयन् शतादिविशिष्टंयंयुद्धेसममन्यंतवृष्णयः चेकितानंमहेष्वा
संकस्तंद्रोणादवारयत् वार्द्धक्षेमिः कलिंगानांयःकन्यामाहरद्युधि अनाधृष्टिरदीनात्माकस्तंद्रोणादवारयत्
भ्रातरः पंचकैकेयाधार्मिकाः सत्यविक्रमाः इंद्रगोपकसंकाशारक्तवर्मायुधध्वजाः मातृष्वसुः सुतावीराः पांडु
वानांजयार्थिनां तान्द्रोणंहंतुमायातान्केवीराः पर्यवारयन् येयोधयंतोराजानोनाजयन्वारणावते ष
ण्मासानपिसंरब्धाजिघांसंतोयुधांपतिं धनुष्मतांवरंशूरंसत्यसंधंमहाबलं द्रोणात्कस्तंनरव्याघ्रंयुयुत्सुंपर्यवा
रयत् यःपुत्रंकाशिराजस्यवाराणस्यांमहारथं समरेस्त्रीषुगृध्यंतंभल्लेनापाहरद्रथात् धृष्टद्युम्नंमहेष्वासंपार्थानांमंत्र
धारिणं युक्तंदुर्योधनानर्थेसृष्टंद्रोणवधायच निर्दहंतंरणेयोधान्दारयंतंचसर्वतः द्रोणाभिमुखमायांतंकेशूराः पर्यवा
रयन् उत्संगइवसंवृद्धंद्रुपदस्यास्त्रवित्तमं शिखंडिनंशस्त्रगुप्तंकेचद्रोणादवारयन् यइमांपृथिवींकृत्स्नांचर्मवत्समवे एम०
ष्टयत् ११

महतारथघोषेणमुख्यारिघ्नोमहारथः द्रोणाश्वमेधानाजह्रे स्वक्षत्रपानाप्रदक्षिणान निर्गलान्सर्वमेधान्पुत्रवत्पालयन्प्र
जाः गंगास्रोतसियावंत्यः सिकतास्त्रप्रयोधनः तावतीर्गाददौवीर उशीनरसुतोध्वरे नपूर्वेनापरेचक्रुरिदंकेचनमान
वाः इतीदंचुक्रुशुर्देवाः कृतेकर्म्मणिदुष्करे पश्यामस्त्रिषुलोकेषुनतंसंस्थाणुचारिषु जातंवापिजनिष्यंतंद्वितीयंवा
पिसांप्रतं अन्यमौशीनराच्छैव्याद्धुरोवोढारमित्युत गतिंयस्यनयास्यंतिमानुषालोकवासिनः तस्यनप्तारमायांतं
शैव्यंकः समवारयत द्रोणायाभिमुखंयांतंव्यात्ताननमिवांतकं विराटस्यरथानीकंमत्स्यस्यामित्रघातिनः प्रेप्सतं
समरेद्रोणंकेशूराः पर्यवारयन सद्योवृकोदराज्जातोमहाबलपराक्रमः मायावीराक्षसोवीरोयस्मान्मममहद्भयं
[illegible] पार्थोनांजयकामंतंपुत्राणांममकंटकं घटोत्कचं
महात्मानंकस्तंद्रोणादवारयत एतेचान्येचबहवोयेषामर्थायसंजय त्यक्ताःसंयुगेप्राणान किंतेषामजितंयुधि
येषांचपुरुषव्याघ्रः शार्ङ्गधन्वाव्यपाश्रयः हितार्थीचापिपार्थानांकथंतेषांपराजयः लोकानांगुरुरत्यर्थंलोकनाथः
सनातनः नारायणोरणेनाथोदिव्योदिव्यात्मवान्प्रभुः यस्यदिव्यानिकर्म्माणिप्रवदंतिमनीषिणः तान्यहंकीर्त्त
यिष्यामिभक्त्याधर्मार्थमात्मनः द्रोणपर्वणि धृतराष्ट्रउवाच शृणुदिव्यानिकर्माणिवासुदेवस्यसंजय कृतवा
न्यानिगोविंदोयथानान्यःपुमान्क्वचित संवर्द्धतागोपकुलेबालेनैवमहात्मना विख्यापितंबलंबाह्वोस्त्रिषु
लोकेषुसंजय उच्चैःश्रवस्तुल्यबलंवायुवेगसमंजवे जघानहयराजंतंयमुनावनवासिनं दानवंघोरकर्मा
णंगवांमृत्युमिवोत्थितं वृषरूपधरंबाल्येभुजाभ्यांनिजघानह प्रलंबंनरकंजंभंपीठंचापिमहासुरं मु

रुद्रांतकसंकाशमवधीत्पुष्करेक्षणः तथाकंसोमहातेजाजरासंधेनपालितः विक्रमेणैवकृष्णेनसगणःपातितोरणे
सुनामारणविक्रांतः समग्राक्षौहिणीपतिः भोजराजस्यमध्यस्थोभ्राताकंसस्यवीर्यवान् बलदेवद्वितीयेनकृ
ष्णेनामित्रघातिना तरस्वीसमरेदग्धः ससैन्यःशूरसेनराट् दुर्वासानामविप्रर्षिस्तथापरमकोपनः आराधितः
सदारेणसचास्मैप्रददौवरान् तथागांधारराजस्यसुतांवीरःस्वयंवरे निर्जित्यपृथिवीपालानावहत्पुष्करेक्षणः
अमृष्यमाणाराजानोयस्यजात्याहयाइव रथेवैवाहिकेयुक्ताः प्रतोदेनकृतव्रणाः जरासंधंमहाबाहुमुपा
येनजनार्दनः परेणघातयामासमग्राक्षौहिणीपतिः चेदिराजंचविक्रांतंराजसेनापतिर्बली अर्घ्येवि
वदमानंचजघानपशुवत्तदा सौभंदैत्यपुरंखस्थंशाल्वगुप्तंदुरासदं समुद्रकुक्षौविक्रम्यपातयामासमा
धवः अंगान्वंगान्कलिंगांश्चमागधान्काशिकोशलान् वात्स्यगार्ग्यकरूषांश्चपौंड्रांश्चाप्यजयद्र
णे आवंत्यान्दाक्षिणात्यांश्चपार्वतीयान्दशेरकान् काश्मीरकानौरसिकान्पिशाचांश्चसमुद्गलान् कांबो
जान्वाटधानांश्चचोलान्पांड्यांश्चसंजय त्रिगर्त्तान्मालवांश्चैवदरदांश्चसुदुर्जयान् नानादिग्भ्यश्चसंप्राप्तान्व
शांश्चैवशकांस्तथा जितवान्पुंडरीकाक्षोयवनंचसहानुगं प्रविश्यमकरावासंयादोगणनिषेवितं जिगा
यवरुणंसंख्येसलिलांतर्गतंपुरा युधिपंचजनंहत्वापातालतलवासिनं पांचजन्यंहृषीकेशोदिव्यं
शंखमवाप्तवान् खांडवेपार्थसहितस्तोषयित्वाहुताशनं आग्नेयमस्त्रंदुर्धर्षंचक्रंलेभेमहाबलः वैनतेयंस
मारुह्यत्रासयित्वामरावतीं महेंद्रभवनाद्वीरःपारिजातमुपानयत् तच्चमर्षितवान्शक्रोजानंस्तस्यपराक्रमं राज्ञांचाप्यजि

तंकंचित्कृत्स्नेनैकेनस्थितस्तमः पश्चात्तमहदाश्चर्यंसमायांममसंजय कृतवान्पुंडरीकाक्षःकस्तदन्यःकर्हेति यद्यमक्राप्रसन्नो
हमत्साक्षंकृष्णमीश्वरं तन्मेसुविदितंसर्वंप्रत्यक्षमिवचागमात् नीतोविक्रमयुक्तस्यबुध्यायुक्तस्यवापुनः कर्मणाशा
क्यतेगंतुंहृषीकेशस्यसंजय तथागदश्चसांवश्चप्रद्युम्नोथविदूरथः आगावहोनिरुद्धश्चचारुदेष्णःससारणः उल्मु
कोनिशठश्चैवझिल्लीवभ्रुश्चवीर्यवान् पृथुश्चविपृथुश्चैवशमीकोथारिमेजयः एतेन्येवलवंतश्चवृष्णिवीराःप्रहा
रिणः कथंचित्पांडवानीकंश्रयेयुःसमरेस्थिताः आहूतावृष्णिवीरेणकेशवेनमहात्मना ततःसंशयितंसर्वंभ
वेदितिमतिर्मम नागायुतवलोवीरः कैलासशिखरोपमः वनमालीहलीरामस्तत्रयत्रजनार्दनः यमाहुःस
र्वपितरंवासुदेवंद्विजातयः अपिवाह्येषपांडूनांयोत्स्यतेर्थायसंजय सयदातातसंनह्येत्पांडवार्थायसंज
य नतदाप्रतिसंयोद्धाभवितातत्रकश्चन यदिस्मकुरवःसर्वेजयेयुर्नामपांडवान् वार्ष्णेयोर्थायतेषांवैगृह्णीया
च्छस्त्रमुत्तमं ततःसर्वान्नरव्याघ्रोहत्वानरपतीन्रणे कौरवांश्चमहावाहुःकुंत्यैदद्यात्समेदिनीं यस्ययंताहृषीके
शोयोद्धायस्यधनंजयः रथस्यतस्यकःसंख्येप्रत्यनीकोभवेद्रथः नकेनचिदुपायेनकुरूणांदृश्यतेजयः तस्मान्मे
सर्वमाचक्ष्वयथायुद्धमवर्त्तत अर्जुनःकेशवस्यात्माकृष्णोप्यात्माकिरीटिनः अर्जुनेविजयोनित्यंकृष्णेकीर्त्तिश्च
शाश्वती सर्वेष्वपिचलोकेषुवीभत्सुरपराजितः प्राधान्येनैवभूयिष्ठममेयाःकेशवेगुणाः मोहाद्दुर्योधनःकृष्णं
योनवेत्तीहकेशवं मोहितोदैवयोगेनमृत्युपाशपुरस्कृतः नवेदकृष्णंदाशार्हमर्जुनंचैवपांडवं पूर्वदेवौ
महात्मानौनरनारायणावुभौ एकात्मानौद्विधाभूतौदृश्यतेमानवैर्भुवि मनसापिहिदुर्द्धर्षौसेनामेतां

द्रो० यशस्विनो नाशयेतामिहेत्युक्तौ मानुषत्वाच्च नेच्छतः युगस्येव विपर्यासो लोकानामिव मोहनं भीष्मस्य च वधस्तात
१३ द्रोणस्य च महात्मनः न तस्यैव ब्रह्मचर्येण न वेदाध्ययनेन च न क्रियाभिर्न चास्त्रेण मृत्योः कश्चिन्निवार्यते लो
कसंभाविती वीरौ कृतास्त्रौ युद्धदुर्मदौ भीष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि संजय यां तां श्रियमसूयामः पुरा दृष्ट्वा
युधिष्ठिरे अद्य तामनुजानीमो भीष्मद्रोणवधेन ह मत्कृते वाप्यनुप्राप्तः कुरूणामेष संक्षयः पक्वानां हि वधे
सूत वज्रायन्ते तृणान्युत अनन्तमिदमैश्वर्यं लोके प्राप्तो युधिष्ठिरः यस्य कोपान्महात्मानौ भीष्मद्रोणौ निपातितौ
प्राप्तः प्रकृतितो धर्मो न धर्मो मामकान्प्रति क्रूरः सर्वविनाशाय कालो मे न निवर्तते अन्यथा चिन्तिता ह्यर्था नरैस्ता
त मनस्विभिः अन्यथैव प्रपद्यन्ते दैवादिति मतिर्मम तस्मादपरिहार्ये ऽर्थे संप्राप्ते कृच्छ्रउत्तमे अपारणीये दुश्चिन्त्ये
यथाभूतं प्रवक्ष्यमे॥ ॥इति द्रोणपर्वणि॥ संजय उवाच हन्त ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान् यथा स न्यपत
द्द्रोणः सूदितः पाण्डुसृञ्जयैः सेनापतित्वं संप्राप्य भारद्वाजो महारथः मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत्
यत्कौरवाणामृषभादापगेयादनन्तरं सेनापत्येन यद्राजन्मामद्य कृतवानसि सदृशं कर्मणस्तस्य फलं प्राप्नुहि
भारत करोमि कामं कं ते च प्रवृणीष्व यमिच्छसि ततो दुर्योधनो राजा कर्णदुःशासनादिभिः तमथोवा
च दुर्धर्षमाचार्यं जयतां वरं ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरं गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहानय
ततः कुरूणामाचार्यः श्रुत्वा पुत्रस्य ते वचः सेनां प्रहर्षयन्सर्वामिदं वचनमब्रवीत् धन्यः कुन्तीसुतो राजा यस्य ग्रहणमिच्छ श्रीराम०
सि न वधार्थं सुदुर्धर्ष वरमद्य प्रयाचसे किमर्थं च नरव्याघ्र न वधं तस्य काङ्क्षसे नाशंससि क्रियामेतां ततो दुर्योधनो ध्रुवं अ १३

होसिधर्मेराजस्यहेष्यातस्यनविद्यते यदिछसित्वंजीवंतंकुटंरक्षसिचात्मनः अथवाभरतश्रेष्ठ निर्जित्ययुधिपांडवान् राज्यं
संप्रतिदत्वाचसौभ्रात्रंकर्तुमिछसि धन्यःकुंतीसुतोराजासुजातंचास्यधीमतः अजातशत्रुतासत्यातस्ययत्स्निह्यतेभवान्
द्रोणेनचैवमुक्तस्यतवपुत्रस्यभारत सहसानिःसृतोभावोयोस्यनित्यंहृदिस्थितः नाकारोगूहितुंशक्योबृहस्पतिसमैरपि
यएवतेषांशेषःस्यात्सएवा स्मान्नशेषयेत् सत्यप्रतिज्ञेत्वानीतेपुनर्द्यूतेननिर्जिते पुनर्यास्यंत्यरण्यायपांडवास्तम
नुव्रताः सोयंममजयोव्यक्तंदीर्घकालंभविष्यति अतोनवधमिछामिधर्मराजस्यकर्हिचित् तस्यजिह्ममभिप्रायं
ज्ञात्वाद्रोणोर्थतत्ववित् तंवरंसांतरंतस्मैददौसंचिंत्यबुद्धिमान् द्रोणउवाच नचेद्युधिष्ठिरंवीरः पालयत्यर्जुनोयु
धि मन्यध्वंपांडवश्रेष्ठमानीतंवशमात्मनः नहिशक्योरणेपार्थःसेंद्रैर्देवासुरैरपि प्रत्युद्यातुमतस्तातनैतदाम
र्षयाम्यहं असंशयंसमेशिष्योमत्पूर्वश्चास्त्रकर्मणि तरुणःसुकृतैर्युक्तएकायनगतश्चह अस्त्राणीं
द्राच्चरुद्राच्चभूयःससमवाप्तवान् अमर्षितश्चतेराजंस्ततोनामर्षयाम्यहं सचापक्रम्यतांयुद्धाद्येनोपायेनशक्यते
अपनीतेततःपार्थेधर्मराजोजितस्त्वया ग्रहणेहिजयस्तस्यनवधेपुरुषर्षभ एतेनचाप्युपायेनग्रहणंसमुपैष्यति
अहंगृहीत्वाराजानंसत्यधर्मपरायणं आनयिष्यामितेराजन्वशमद्यनसंशयः यदितिष्ठास्यतिसंग्रामेमुहूर्तमपिमेग्रतः
अपनीतेनरव्याघ्रेकुंतीपुत्रेधनंजये फाल्गुनस्यसमीपेतुनहिशक्योयुधिष्ठिरः ग्रहीतुंसमरेराजन्सेंद्रैरपिसुरासुरैः संजय
उवाच सांतरंतुप्रतिज्ञातेराज्ञोद्रोणेननिग्रहे गृहीतंतममन्यंततवपुत्राःसुबालिशाः पांडवेयेषुसापेक्षंद्रोणंजानातितेसुतः

द्रो० १४

ततः प्रतिज्ञास्थे तु पार्थे स मंत्रो व्युद्धीकृतः ततो दुर्योधनेनापि ग्रहणं पांडवस्य तत सैन्यस्थानेषु सर्वेषु सुघोषितमरिंदम ॥ ॥ इ

ति द्रोणापर्वणि संजय उवाच सांतरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे ततस्ते सैनिकाः श्रुत्वा तं युधिष्ठिरनिग्रहे सिंहनादरवांश्च

क्रुर्बाणशंखांश्च कृत्स्नशः तच्च सर्वं यथान्यायं धर्मराजेन भारत आप्तैराशु परिज्ञातं भारद्वाज चिकीर्षितं ततः सर्वान् समा

नाय्य भ्रातॄन् अन्यांश्च सर्वशः अब्रवीद्धर्मराजस्तु धनंजयमिदं वचः श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितं यथा

तन्न भवेत् सत्यं तथा नीतिर्विधीयतां सांतरं तु प्रतिज्ञातं द्रोणेनामित्रकर्षण तच्चांतरं महेष्वासत्वयि तेन समाहितं स त्वम

द्य महाबाहो युध्यस्व मदनंतरं यथा दुर्योधनः कामं नेमं द्रोणादवाप्नुयात् अर्जुन उवाच यथा मे न वधः कार्य्य आचार्य्यस्य

कदाचन तथा तव परित्यागो न मे राजंश्चिकीर्षितः अप्येवं पांडव प्राणान् उत्सृजेयमहं युधि प्रतीपो नाहमाचार्ये भवे

यं वै कथंचन त्वां निगृह्याहवे राज्यं धार्त्तराष्ट्रोऽयमिच्छति न स तं जीवलोकेऽस्मिन् कामं प्राप्तः कथंचन प्रपतेद्द्यौः सनक्ष

त्रा पृथिवी शकलीभवेत् न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रुवं यदि तस्य रणे साह्यं कुरुते वज्रभृत् स्वयं विष्णुर्वा

सहितो देवैः न त्वां प्राप्स्यत्यसौ मृधे मयि जीवति राजेंद्र न भयं कर्तुमर्हसि द्रोणादस्त्रभृतां श्रेष्ठात् सर्वशस्त्रभृतामपि अ

न्यच्च ब्रूयां राजेंद्र प्रतिज्ञां मम निश्चलां न स्मराम्यनृतं तावन्न स्मरामि पराजयं न स्मरामि प्रतिश्रुत्य किंचिदप्यनृतं कृतं संजय

उवाच ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह प्रावाद्यंत महाराज पांडवानां निवेशने सिंहनादश्च संजज्ञे पांडवानां महात्मनां ध

नुर्ज्यातलशब्दश्च गगनस्पृक् सुभैरवः श्रुत्वा शंखस्य निर्घोषं पांडवस्य महौजसः त्वदीयेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे ततो श्रीराम० १४

व्यूढान्यनीकानि तत्र तेषां च भारत शनैरुपेयुरन्योन्यं युध्यमानानि संयुगे ततः प्रववृते युद्धं तुमुलं लोमहर्षणं पांडवानां कुरूणां च द्रो
णपांचाल्ययोरपि यतमानाः प्रयत्नेन द्रोणानीकविशातने नशेकुः संजया युद्धे तद्धि द्रोणेन पालितं तथैव तव पुत्र
स्य रथोदाराः प्रहारिणः नशेकुः पांडवीं सेनां पाल्यमानां किरीटिना आस्तां ते स्तिमिते सेने रक्षमाणे परस्परं संप्रसुप्ते
यथा नक्तं वनराज्यौ सपुष्पिते ततो रुक्मरथो राजन्नर्केणेव विराजता वरूथिना विनिष्पत्य व्यचरत्पृतनामुखे त
मुद्यंतं रथेनैकमाशुकारिणमाहवे अनेकमिव संत्रासान्मेनिरे पांडुसंजयाः तेन मुक्ताः शरा घोरा विचेरुः सर्वतो दि
शो त्रासयंतो महाराज पांडवेयस्य वाहिनीं मध्यंदिनमनुप्राप्तो गभस्तिशतसंवृतः यथादृश्यत घर्मांशुस्तथा द्रोणोप्य
दृश्यत नचैनं पांडवेयानां कश्चिच्छक्नोति भारत वीक्षितुं समरे क्रुद्धं महेंद्रमिव दानवाः मोहयित्वा ततः सैन्यं भारद्वा
जः प्रतापवान धृष्टद्युम्नबलं तूर्णं व्यधमन्निशितैः शरैः सदिशः सर्वतो रुध्वा संवृत्य खमजिह्मगैः पार्षतो यत्र य
त्रैव ममर्द पांडुवाहिनीं॥ ॥इति द्रोणपर्वणि द्रोणयुद्धे संजय उवाच ततः स पांडवानीके जनयंस्तुमहद्भयं
व्यचरत्पृतनां द्रोणो दहन्कक्षमिवानलः निर्दहंतमनीकानि साक्षादग्निमिवोत्थितं दृष्ट्वा रुक्मरथं क्रुद्धं समकंप
त संजयाः सततं कृष्यतः संख्ये धनुषोस्याशुकारिणः ज्याघोषः शुश्रुवेत्यर्थं विस्फूर्जितमिवाशनेः रथिनः सा
दिनश्चैव नागानश्वान्पदातिनः रौद्रा हस्तवता मुक्ताः संमृद्नंति स्म सायकाः नानद्यमानः पर्जन्यः प्रवृद्धः शुचिसंक्षये अ
श्मवर्षमिवावर्षन्परेषामावहद्भयं विचरन्स तदा राजन्सेनां संक्षोभयन्प्रभुः वर्धयामास संत्रासं शात्रवाणाममानु

द्रो०
१५

षं तस्यविधुन्वानस्यरुक्मचापंहेमपरिष्कृतं अभ्रस्थांविद्युतंचास्मिन्नदृश्यतेस्मपुनःपुनः सवीरःसत्यवान्प्राज्ञोधर्मनित्यःसदापु
नः युगांतकालेसंक्रुद्धोरौद्रांप्रावर्तयन्नदीं अमर्षवेगप्रभवांक्रव्यादगणसंकुलां बलौघैःसर्वतःपूर्णांवीरवृक्षापहा
रिणीं शोणितोदांरथावर्त्तांहस्त्यश्वकृतरोधसं कवचोत्पलसंयुक्तांमांसपंकसमाकुलां मेदोमज्जास्थिसिकतामुष्णीष
चयफेनिलां संग्रामजलदापूर्णांप्रासमत्स्यसमाकुलां नरनागाश्वकलिलांशरवेगौघवाहिनीं शरीरदारुसंघट्टांरथ
कच्छपसंकुलां उत्तमांगोपलतलांनिस्त्रिंशझषसंकुलां रथनागह्रदोपेतांनानाभरणभूषितां महारथशतावर्त्तांभू
मिरेणूर्मिमालिनीं महावीर्यवतांसंख्येसुतरांभीरुदुस्तरां शरीरशतसंबाधांगृध्रकंकनिषेवितां महारथसहस्रा
णिनयंतींयमसादनं शूलव्यालसमाकीर्णांप्राणिराजिनिषेवितां छिन्नछत्रमहाहंसांमुकुटांडजसेवितां चक्र
कूर्मांगदानक्रांशरक्षुद्रझषाकुलां बलगृध्रशृगालानांघोरसंघैर्निषेवितां निहतान्प्राणिनःसंख्येद्रोणेनबलिना
रणे वहंतींपितृलोकायशतशोराजसत्तम शरीरशतसंबाधांकेशशैवलशाद्वलां नदींप्रावर्तयद्राजन्भीरूणांभयवर्द्धि
नीं तंजयंतमनीकानितानितानिमहारथं सर्वतोभ्यद्रवन्द्रोणंयुधिष्ठिरपुरोगमाः तानभिद्रवतःशूरांस्तावकादृढविक्रमाः सर्वतःप्र
त्यगृह्णंततदभूल्लोमहर्षणं शतमायस्तुशकुनिःसहदेवंसमाद्रवत् सनियंतृध्वजरथंविव्याधनिशितैःशरैः तस्यमाद्रीसुतः
केतुंधनुःसूतंहयानपि नातिक्रुद्धःशरैश्छित्वाषष्ट्याविव्याधसौबलं सौबलस्तुगदांगृह्यप्रचस्कंदरथोत्तमात् सतस्यगदयाराज
न्रथात्सूतमपातयत् ततस्तौविरथौराजन्गदाहस्तौमहाबलौ चिक्रीडतूरणेशूरौसशृंगाविवपर्वतौ द्रोणःपंचालराजा श्रीराम०
१५

नं विध्वा दशभिराशुगैः बहुभिस्तेन चाप्यस्तस्तं विव्याध ततोधिकैः विविंशतिं भीमसेनो विंशत्या निशितैः शरैः विध्वा
नाकंपयद्धीरस्तदद्भुतमिवाभवत् विविंशतिस्तु सहसा व्यश्वध्वजशरासनं भीमं चक्रे महाराज ततः सैन्यान्यपूजयन्
सतन्नममृषे वीरः शत्रोर्विक्रममाहवे ततोस्य गदया दांतान् हयान् सर्वान पातयत् हताश्वात्स रथाद्राजन् गृह्य चर्म
मे महाबलः अभ्ययाद्भीमसेनं तु मत्तो मत्तमिव द्विपं शल्यस्तु नकुलं वीरः स्वस्रीयं प्रियमात्मनः विव्याध प्रहसन्बाणैर्ला
लयन्कोपयन्निव तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः निपात्य नकुलः संख्ये शंखं दध्मौ प्रतापवान् धृष्टकेतुः कृपेणा
स्तान्छित्वा बहुविधांछरान् कृपं विव्याध सप्तत्या लक्ष्म चास्याहरत्त्रिभिः तं कृपः शरवर्षेण महता समवारयत् निवार्य
च रणे विप्रो धृष्टकेतुमयोधयत् सात्यकिः कृतवर्म्माणं नाराचेन स्तनांतरे विध्वा विव्याध सप्तत्या पुनरन्यैः स्मयन्नि
व तं भोजः सप्तसप्तत्या विध्वाशु निशितैः शरैः नाकंपयत् शैनेयं शीघ्रो वायुरिवाचलं सेनापतिः सुशर्म्माणं भृशं
मर्मस्वताडयत् स चापि तं तोमरेण राजन् जत्रुदेशेऽभ्यताडयत् वैकर्त्तनं तु समरे विराटः प्रत्यवारयत् सह मत्स्यैर्म
हावीर्यैस्तदद्भुतमिवाभवत् तत्पौरुषमभूत्तत्र सूतपुत्रस्य दारुणं यत्सैन्यं वारयामास शरैः सन्नतपर्वभिः द्रुपद
स्तु स्वयं राजा भगदत्तेन संगतः तयोर्युद्धं महाराज चित्ररूपमिवाभवत् भगदत्तस्तु राजानं द्रुपदं नतपर्वभिः सनियंतृध्व
जरथं विव्याध पुरुषर्षभः द्रुपदस्तु ततः क्रुद्धो भगदत्तं महारथं आजघानोरसि क्षिप्रं शरेणानतपर्वणा युद्धं युद्धवरौ लोके
सौमदत्तिशिखंडिनौ भूतानां त्रासजननं चक्रातेऽस्त्रविशारदौ भूरिश्रवा रणे राजन् याज्ञसेनिं महारथं महता सायकौघे

द्रो० नच्छादयामासवीर्यवान् गिरिवंतमिवांबुदः ततः क्रुद्धःसौमदत्तिर्विशांपते नवत्यासायकानांतुकंपयामासभारत राक्षसौरौद्रकर्माणौ
१६ हैडिंबालंबुषावुभौ चक्रातेत्यद्भुतंयुद्धंपरस्परजयैषिणौ मायाशतसृजौदृप्तौमायाभिरितरेतरं अंतर्हितौभृशंविस्मयका
रिणौ चेकितानोनुविंदेनयुयुधेचातिभैरवं यथादेवासुरेयुद्धेबलिशक्रौमहाबलौ लक्ष्मणःक्षत्रदेवेनविमर्दमकरोद्भृशं
यथाविष्णुःपुराराजन्हिरण्याक्षेणसंयुगे ततःप्रचलिताश्वेनविधिवत्कल्पितेनच रथेनाभ्यपतद्राजन्सौभद्रंपौर
वोनदत ततोभ्यधावत्त्वरितोयुद्धाकांक्षीमहाबलः तेनचक्रेमहद्युद्धमभिमन्युररिंदमः पौरवस्त्वथसौभद्रंशरव्रा
तैरवाकिरत तस्यार्जुनिर्ध्वजंछत्रंधनुश्चोर्व्यामपातयत् सौभद्रःपौरवंत्वन्यैर्विध्वासप्तभिराशुगैः पंचभिस्तस्यवि
व्याधहयान्सूतंचसायकैः ततःप्रहर्षयन्सेनांसिंहवद्विनदन्मुहुः समादत्तार्जुनिस्तूर्णंपौरवांतकरंशरं तंतुसंधि
तमाज्ञायसायकंघोरदर्शनं द्वाभ्यांशराभ्यांहार्दिक्यश्चिछेदसशरंधनुः तदुत्सृज्यधनुश्छिन्नंसौभद्रःपरवीरहा
उद्बवर्हसितंखड्गमाददानःशरावरं सतेनानेकतारेणचर्म्मणाकृतहस्तवत् भ्रांतासिनाचरन्मार्गान्दर्शयन्वीर्यमा
त्मनः भ्रामितंपुनरुद्भ्रांतमाधूतंपुनरुच्छ्रितं चर्म्मनिस्त्रिंशयोराजन्निर्विशेषमदृश्यत सपौरवरथस्येषामा
प्लुत्यसहसानदत पौरवंरथमास्थायकेशपक्षेपरामृशत् जघानास्यपदासूतंअसिनापातयद्ध्वजं विक्षोभ्यांभो
निधिंतार्क्ष्यस्तन्नागमिवचाक्षिपत् तमाकुलितकेशांतंददृशुःसर्वपार्थिवाः उक्षाणमिवसिंहेनपात्यमानमचेत
सं तमार्जुनिवशंप्राप्तंकृष्यमाणमनाथवत् पौरवंपतितंदृष्ट्वानामृष्यतजयद्रथः सवर्हिणंमहाराजकिंकिणीश

तज्ञालवत्र चर्म्मेचादायपरखड्गंचननदन्पर्य्यपतद्रथात ततः सैंधवमालोक्यकार्ष्णिरुत्सज्यपौरुषं उत्पपातरथात्तूर्णंश्येनवन्नि
पपातच प्रासपट्टिशनिस्त्रिंशाञ्छत्रुभिःसंप्रचोदितान चिच्छेदचासिनाकार्ष्णिश्चर्मणासंरुरोधच सदर्शयित्वासैन्या
नांस्वबाहुवलमात्मनः तमुद्यम्यमहाखड्गंचर्मचाथपुनर्वली वृद्धक्षत्रस्यदायादंपितुरत्यंतवैरिणां ससाराभिमुखःशू
रःशार्दूलइवकुंजरं तौपरस्परमासाद्यखड्गदंतनखायुधौ हृष्टवत्संप्रजह्नातेव्याघ्रकेसरिणाविव संपातेष्वभिघातेषु
निपातेष्वसिचर्मणोः नतयोरंतरंकश्चिद्ददर्शनरसिंहयोः अवक्षेपोसिनिर्ह्रादःशस्त्रांतरनिदर्शनं वाह्यांतरनिपा
तश्चनिर्विशेषमदृश्यत वाह्यमाभ्यंतरंचैवचरंतौमार्गमुत्तमं ददृशातेमहात्मानौसपक्षाविवपर्वतौ ततोविक्षिपतः
खड्गंसौभद्रस्ययशस्विनः शरावरणपक्षांतेप्रजहारजयद्रथः रुक्मपत्रांतरेसक्तस्तस्मिंश्चर्मणिभास्वरे सिंधुराज
वलोद्धूतःसोभज्यतमहानसिः भग्नमाज्ञायनिस्त्रिंशमवप्लुत्यपदानिषट् अदृश्यतनिमेषेणस्वरथंपुनरास्थितः
तंकार्ष्णिंसमरान्मुक्तमास्थितंरथमुत्तमं सहिताःसर्वराजानःपरिवव्रुःसमंततः ततश्चर्मचखड्गंचसमुत्क्षिप्यमहा
वलं ननादार्जुनदायादःप्रेक्षमाणोजयद्रथं सिंधुराजंपरित्यज्यसौभद्रःपरवीरहा तापयामासतत्सैन्यंभुवनंभा
स्करोयथा ततःसर्वायसींशक्तिंशल्यःकनकभूषणां चिक्षेपसमरेघोरांदीप्तामग्निशिखामिव तामवप्लु
त्यजग्राहविकोशंचाकरोदसिं वैनतेयोयथाकार्ष्णिःपतंतमुरगोत्तमं तस्यलाघवमाज्ञायसत्वंचामिततेजसः
सहिताःसर्वराजानःसिंहनादमथानदन् ततस्तामेवशल्यस्यसौभद्रःपरवीरहा मुमोचभुजवीर्येणवैडूर्यविकृताजिरां

द्रो० सातस्यरथमासाद्य निर्मुक्तभुजगोपमा जघानैनंसूतंशल्यस्यरथाच्चैनमपातयत ततोभिरुद्द्रुपदोधृष्टकेतुर्युधिष्ठिरः सात्य
२ किः कैकयाभीमोधृष्टद्युम्नःशिखंडिनौ यमौचद्रौपदेयाश्चसाधुसाध्विति चुक्रुशुः बाणशब्दाश्चविविधाः सिंहनादाश्चपुष्क
लाः प्रादुरासन्हर्षयंतः सौभद्रमपराजितं तत्रामन्यंतपुत्रास्तेशत्रोर्विजयलक्षणं अथैनंसहसासर्वेसमंतान्निशितैः
शरैः अभ्यकिरन्महाराजजलदाइवपर्वतं तेषांचप्रियमन्विच्छन्सूतस्यचपराभवं आर्त्तायनिरमित्रघ्नःक्रुद्धः सौ
भद्रमभ्ययात द्रोणपर्वणिप्रथमदिनयुद्धं धृतराष्ट्रउवाच बहूनि सुविचित्राणि द्वंद्वयुद्धानिसंजय त्वयोक्तानि
निशम्याहंस्पृहयामिसचक्षुषां आश्चर्यभूतंलोकेषुकथयिष्यंतिमानवाः कुरूणांपांडवानांचयुद्धंदेवासुरोपमं न
२७ हिमेतृप्तिरस्तीहशृण्वतोयुद्धमुत्तमं तस्मादार्त्तायनेर्युद्धंसौभद्रस्यचशंसमे संजयउवाच सादितंप्रेक्ष्ययंतारंशल्यःसर्वाय
सींगदां समुत्क्षिप्यतदाक्रुद्धःप्रचस्कंदरथोत्तमात तंदीप्तमिवकालाग्निंदंडहस्तमिवांतकं जवेनाभ्यपतद्भीमःप्रगृह्यम
हतींगदां सौभद्रोप्यशनिप्रख्यांप्रगृह्यमहतींगदां एह्येहीत्यब्रवीच्छ[illegible]यत्नाद्भीमेनवारितः वारयित्वातुसौभद्रं
भीमसेनःप्रतापवान् शल्यमासाद्यसमरेतस्थौगिरिरिवाचलः तथैवमद्रराजोपिभीमंदृष्ट्वामहाबलः स
साराभिमुखस्तूर्णंशार्दूलइवकुंजरं ततस्तूर्यनिनादाश्चशंखानांचसहस्रशः सिंहनादाश्चसंजज्ञुर्भेरीणां
चमहास्वनाः पश्यतांशतशोह्यासीदन्योन्यमभिधावतां पांडवानांकुरूणांचसाधुसाध्वितिनिःस्वनः न
हिमद्राधिपादन्यः सर्वराजसुभारत सोढुमुत्सहतेवेगंभीमसेनस्यसंयुगे तथामद्रा ॥ ० ॥ श्रीराम०
२७

धिपस्यापि गदावेगं महात्मनः सोढुमुत्सहते तात को युधि कौन्त्याद्वृकोदरात् पट्टैर्जांबूनदैर्बद्धा बभूव जनहर्षणी प्रजज्वाल तदावि
द्धा भीमेन महती गदा तथैव चरतो मार्गान्मंडलानि च सर्वशः महाविद्युत्प्रतीकाशा शल्यस्य शुशुभे गदा तौ वृषाविव
नर्दंतौ मंडलानि विचेरतुः आवर्जितगदाशृंगावुभौ शल्यवृकोदरौ मंडलावर्तमार्गेषु गदाविहरणेषु च निर्विशेषमभू
द्युद्धं तयोः पुरुषसिंहयोः ताडिता भीमसेनेन शल्यस्य महती गदा साग्निज्वाला महारौद्रा तदा तूर्णमशीर्यत तथैव भीमसे
नस्य द्विषताभिहता गदा वर्षाप्रदोषे खद्योतैर्वृतो वृक्ष इवाबभौ गदा क्षिप्ता तु समरे मद्रराजेन भारत व्योम संदीपयमाना
ससृजे पावकं मुहुः तथैव भीमसेनेन द्विषते प्रेषिता गदा तापयामास तत्सैन्यं महोल्का पतती यथा ते गदे गदिनां श्रेष्ठे
समासाद्य परस्परं श्वसंत्यौ नागकन्येव ससृजाते विभावसुं नखैरिव महाव्याघ्रौ दंतैरिव महागजौ तौ विचेरतुरासाद्य
गदाग्र्याभ्यां परस्परं ततो गदाग्राभिहतौ क्षणेन रुधिरोक्षितौ ददृशाते महात्मानौ किंशुकाविव पुष्पितौ शुश्रुवे दि
क्षु सर्वासु तयोः पुरुषसिंहयोः गदाभिघातसंह्रादः शक्राशनिरिवोपमः गदया मद्रराजेन सव्यदक्षिणमाहतः
नाकंपत तदा भीमो भिद्यमान इवाचलः तथा भीमगदावेगैस्ताड्यमानो महाबलः धैर्यान्मद्राधिपस्तस्थौ वज्रैर्गिरि
रिवाहतः आपेततुर्महावेगौ समुच्छ्रितगदावुभौ पुनरंतरमार्गस्थौ मंडलानि विचेरतुः अथाप्लुत्य पदान्यष्टौ संपत
त्यगजाविव सहसा लोहदंडाभ्यामन्योन्यमभिजग्मतुः तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ युगपत्पेततुर्वीरौ क्षिताविंद्र
ध्वजाविव ततो विह्वलमानं तं निःश्वसंतं पुनः पुनः शल्यमभ्यपतत्तूर्णं कृतवर्मा महारथः दृष्ट्वा चैनं महाराज गदयाभि

द्रो० १८ निपीडितं विचेष्टं तं यथा नागं मृगेंद्रिया भिपरिक्षतं ततः स्वरथमारोप्य मद्राणामधिपं रणे अपोवाह रथात्तूर्णं कृतवर्मा महारथः
क्षीववद्विह्वलो वीरो निमेषात्पुनरुत्थितः भीमोपि सुमहाबाहुर्गदापाणिरदृश्यत ततो मद्राधिपं दृष्ट्वा तव पुत्राः पराङ्मुखं
सेनागपत्यश्वरथाः समकंपंत मारिष तेपांडवैरर्द्यमानास्तावका जितकाशिभिः भीतादिशोन्वपद्यंत वातनुन्ना घना इव
निर्जित्य धार्तराष्ट्रांस्तु पांडवेया महारथाः व्यरोचंत रणे राजन्दीप्यमाना यशस्विनः सिंहनादान्भृशं चक्रुः शंखान्दध्मुश्च
हर्षिताः भेरीश्च वादयामासुर्मृदंगांश्चानकैः सह॥ ॥इति द्रोणपर्वणि प्रथमदिनयुद्धे संजय उवाच तद्बलं सु
महद्दीर्णं त्वदीयं प्रेक्ष्य वीर्यवान् दधारैको रणे राजन्वृषसेनोस्त्रमायया शरा दश दिशो मुक्ता वृषसेनेन संयुगे
विचेरुस्ते विनिर्भिद्य नरवाजिरथद्विपान् तस्य दीप्ता महाबाणा विनिश्चेरुः सहस्रशः भानोरिव महाराज घर्मका
लेमरीचयः तेनार्दिता महाराज रथिनः सादिनस्तथा निपेतुरुर्व्यां सहसा वातभग्ना इव द्रुमाः हयौघांश्च रथौघांश्च ग
जौघांश्च महारथः अपातयद्रणे राजंछतशोथ सहस्रशः दृष्ट्वा तमेकं समरे विचरंतमभीतवत् सहिताः सर्वराजा
नः परिवव्रुः समंततः नाकुलिस्तु शतानीको वृषसेनं समभ्ययात् विव्याध चैनं दशभिर्नाराचैर्मर्मभेदिभिः तस्य कर्णा म४
त्मजश्चापं छित्वा केतुमपातयत् तं भ्रातरं परीप्संतो द्रौपदेयाः समंततः कर्णात्मजं शरव्रातैरदृश्यं चक्रुरंजसा तान्न
दंतोभ्यधावंत द्रोणपुत्रमुखा रथाः छादयंतो महाराज द्रौपदेयान्महारथान् शरैर्नानाविधैस्तूर्णं पर्वतान्जलदा इव
तान्पांडवाः प्रत्युद्गच्छन्त्वरिताः पुत्रगृद्धिनः पांचालाः केकया मत्स्याः संजयाश्चोद्यतायुधाः तद्युद्धमभवद्घोरं सुमहद्रो श्रीराम० १८

महर्षीणां त्वदीयैः पांडुपुत्राणां देवानामिव दानवैः एवं युयुधिरे वीराः संरब्धाः कुरुपांडवाः परस्परमुदीक्षंतः परस्परकृता
गसः तेषां ददृशिरे कोपाद्वपूंष्यमिततेजसां युयुत्सूनामिवाकाशे पतत्रिवरभोगिनां भीमकर्णकृपद्रोणद्रौणि
पार्षतसात्यकैः बभासे स रणोद्देशः कालसूर्यैरिवोद्यतैः तदासीत्तुमुलं युद्धं निघ्नतामितरेतरं महाबलानां बलि
भिर्दानवानां यथा सुरैः ततो युधिष्ठिरानीकमुद्धूतार्णवनिस्वनं त्वदीयमवधीत्सैन्यं संप्रद्रुतमहारथं तत्प्रभग्नं
बलं दृष्ट्वा शत्रुभिर्भृशमर्दितं अलं द्रुतेन वः शूरा इति द्रोणोऽभ्यभाषत ततः शोणहयः क्रुद्धः चतुर्दंत इव द्विपः प्र
विश्य पांडवानीकं युधिष्ठिरमुपाद्रवत् तमविध्यच्छितैर्बाणैः कंकपत्रैर्युधिष्ठिरः तस्य द्रोणो धनुश्छित्वा तं द्रुतं
समुपाद्रवत् चक्ररक्षः कुमारस्तु पांचालानां यशस्करः दधार द्रोणमायांतं वेलेव सरितां पतिं द्रोणं निवारि
तं दृष्ट्वा कुमारेण द्विजर्षभं सिंहनादरवो ह्यासीत्साधु साध्विति भाषितं कुमारस्तु ततो द्रोणं सायकेन महाहवे
विव्याधोरसि संक्रुद्धः सिंहवच्चनदन्मुहुः संवार्य च रणे द्रोणं कुमारस्तु महाबलः शरैरनेकसाहस्रैः कृतह
स्तो जितक्लमः तं शूरमार्यव्रतिनं मंत्रास्त्रेषु कृतश्रमं चक्ररक्षः परामृद्नात्कुमारो द्विजपुंगवं स मध्यं प्राप्य सै
न्यानां सर्वाः प्रविचरन्दिशः तव सैन्यस्य गोप्तासीत् भारद्वाजो द्विजर्षभः शिखंडिनं द्वादशभिर्विंशत्या चोत्तमौ
जसं नकुलं पंचभिर्विध्वा सहदेवं च सप्तभिः युधिष्ठिरं द्वादशभिर्द्रौपदेयांस्त्रिभिस्त्रिभिः सात्यकिं पंचभिर्भित्वा
मत्स्यं च दशभिः शरैः व्यक्षोभयद्रणे योधान्यथामुख्यमभिद्रवन् अभ्यवर्तत संप्रेप्सुः कुंतीपुत्रं युधिष्ठिरं युगंध

द्रो० १८

रक्ततोराजन्भारद्वाजंमहारथम् वारयामाससंक्रुद्धंवातोद्धूतमिवार्णवं युधिष्ठिरंसविद्ध्वातुशरैः सन्नतपर्वभिः युगंधरंतुभल्लेन
रथनीडादपातयत् ततोविराटद्रुपदौकैकेयाःसात्यकिःशिविः व्याघ्रदत्तश्चपांचाल्यः सिंहसेनश्चवीर्यवान् एतेचा
न्येचबहवःपरीप्संतोयुधिष्ठिरं आवव्रुस्तस्यपंथानंकिरंतःसायकान्बहून् व्याघ्रदत्तस्तुपांचाल्योद्रोणंविव्याधमार्ग
णैः पंचाशताशितैराजंस्ततउच्चुक्रुशुर्जनाः त्वरितंसिंहसेनस्तुद्रोणंविद्ध्वामहारथं प्राहसंत्सहसाहृष्टस्त्रासयन्वैम
हारथान् ततोविस्फार्यनयनेधनुर्ज्यामवमृज्यच तलशब्दंमहत्कृत्वाद्रोणस्तंसमुपाद्रवत् ततस्तुसिंहसेनस्यशिरः
कायात्सकुंडलं व्याघ्रदत्तस्यचाक्रम्यभल्लाभ्यामाहरद्बली तान्प्रमृज्यशरव्रातैःपांडवानांमहारथान् युधिष्ठिररं
थाभ्यासेतस्थौमृत्युरिवांतकः ततोभवन्महाशब्दोराजन्यौधिष्ठिरेबले हतोराजेतियोधानांसमीपस्थेयतव्रते अब्रु
वन्सैनिकास्तत्रदृष्ट्वाद्रोणस्यविक्रमं अद्यराजाधार्त्तराष्ट्रःकृतार्थोवैभविष्यति अस्मिन्मुहूर्त्तेद्रोणस्तुपांडवंगृह्यहर्षितः आग
मिष्यतिनोनूनंधार्त्तराष्ट्रस्यसंयुगे एवंसंजल्पतांतेषांतावकानांमहारथः आयाज्जवेनकौंतेयोरथघोषेणनादयन् शोणितो
दांरथावर्त्तांकृत्वाविशसनेनदीं शूरास्थिचयसंकीर्णांप्रेतकूलापहारिणीं तांशरौघमहाफेनांप्रासमत्स्यसमाकुलां नदीमुत्तार्यवे
गेनकुरून्विद्राव्यपांडवः ततःकिरीटीसहसाद्रोणानीकमुपाद्रवत् छादयन्निषुजालेनमहतामोहयन्निव शीघ्रमभ्यस्यतोबाणान्
संदधानस्यचानिशं नांतरंददृशेकश्चित्कौंतेयस्ययशस्विनः नदिशोनांतरिक्षंचनद्यौर्नैवचमेदिनी अदृश्यंतमहाराजबाण
भूताइवाभवन् नादृश्यततदाराजंस्तत्रकिंचनसंयुगे बाणांधकारेमहतीकृतेगांडीवधन्वना सूर्येचास्तमनुप्राप्तेतमसाचाभिसं श्रीराम० १८

हते गतोपयजदाशमुर्त्तेसुहृत्त्वचकश्चन ततोवहारंचक्रुस्ते द्रोणदुर्योधनादयः तान्विदित्वापुनस्त्रस्तानयुद्धमनसः परान् स्वान्य
नीकानिवीभत्सुः शनकैरवहारयत् ततोभितुष्टुवुः पार्थंप्रहृष्टाः पांडुसंजयाः ४ पांचालाश्चमनोज्ञाभिर्वाग्भिः सूर्यमिवर्षयः
एवंस्वशिविरंप्रायाज्जित्वाशत्रुंधनंजयः पृष्ठतस्तस्यसैन्यानांमुदितोवैसकेशवः मसारगल्वर्कसुवर्णरूप्यैर्वज्रप्रवाल
स्फटिकैश्चमुख्यैः चित्रेरथेपांडुसुतोवभासे नक्षत्रचित्रेवियतीवचंद्रः॥ ॥इतिश्रीमहाभारतेद्रोणपर्वणिप्रथमाह
युद्धं संजयउवाच तेसेनेशिविरंगत्वान्यविशेतांविशांपते यथाभागंयथान्यायंयथागुल्मंचसर्वशः कृत्वावहारं
सैन्यानांद्रोणः परमदुर्मनाः दुर्योधनमभिप्रेक्ष्यसव्रीडमिदमब्रवीत् उक्तमेतन्मयापूर्वंन तिष्ठति धनंजये श
क्योग्रहीतुंसंग्रामेदेवैरपियुधिष्ठिरः इतितद्वः प्रयततांकृतंपार्थेनसंयुगे माविशंकीर्वचोमत्वमजेयौकृष्ण
पांडवौ अपनीतेतुयोगेनकेनचिच्छ्वेतवाहने तत एष्यतितेराजन्वशमेषयुधिष्ठिरः कश्चिदाहूयतंसंख्येदेश
मन्यंप्रकर्षतु तमजित्वानकौंतेयोनिवर्त्तेतकथंचन एतस्मिन्नंतरेशून्येधर्मराजमहंनृप ग्रहीष्यामिचमूंभि
त्वाधृष्टद्युम्नस्यपश्यतः अर्जुनेनविहीनस्तुयदिनोत्सृजतेरणं मामुपायांतमालोक्यगृहीतंविद्धिपांडवं एवंतेहं
महाराजधर्मपुत्रंयुधिष्ठिरं समानेष्यामिसगणंवशमद्यनसंशयः यदितिष्ठतिसंग्राममुहूर्त्तमपिपांडवः अथापयातिसं
ग्रामाद्विजयात्तद्विशिष्यते संजयउवाच द्रोणस्यतद्वचःश्रुत्वात्रिगर्त्ताधिपतिस्तदा भ्रातृभिःसहितोराजन्निदंवचनमब्रवीत्
वयंविनिकृताराजन्सदागांडीवधन्वना अनागःस्वपिचागस्कृत्कृतमस्मासुतेनवै तेवयंस्मरमाणास्तान्विनिकारान्पृथ

द्रो० विधान क्रोधाग्निनादह्यमानानां नो महीं सदा मिथः सनो दिष्ट्यास्त्रसंपन्नश्चक्षुर्विषयमागतः कर्तारस्म वयं कर्म यच्चि
२० कीर्षाम हृद्गतं भवतश्च प्रियं यत्स्यादस्माकं च यशस्करं वयमेनं हनिष्यामो निकृष्यायोधनाद्बहिः अद्यास्त्वनर्जुना भूमि
रत्रिगर्ताथवा पुनः सत्यं ते प्रतिजानीमो नैतन्मिथ्या भविष्यति एवं सत्यरथश्चोक्त्वा सत्यवर्मा च भारत सहिता भ्रातरः
पंच रथानामयुतेन च न्यवर्तन्त महाराज कृत्वा शपथमाहवे मालवास्तुण्डिकेराश्च रथानामयुतैस्त्रिभिः सुशर्मा च नर
व्याघ्रस्त्रिगर्तः प्रस्थलाधिपः मावेल्लकैर्ललित्थैश्च सहितो मद्रकैरपि रथानामयुतेनैव सोऽगमद्भ्रातृभिः सह
ख६ नानाजनपदेभ्यश्च रथानामयुतेन च समुत्थित विशिष्टानां शपथार्थमुपागमत ततो ज्वलनमानर्च्य कृत्वा सर्वे पृ
थक् पृथक् जगृहुः कुशचीराणि चित्राणि कवचानि च ते च बद्धतनुत्राणा घृताक्ताः कुशचीरिणः मौर्वीमेखलि
नो वीराः सहस्रशतदक्षिणाः यज्वानः पुत्रिणो लोक्याः कृतकृत्यास्तनुत्यजः योक्ष्यमाणास्तदात्मानं यशसा विजयेन च
ब्रह्मचर्यश्रुतिमुखैः क्रतुभिश्चाप्तदक्षिणैः प्राप्यलोकान् सुयुद्धेन क्षिप्रमेव यियासवः ब्राह्मणांस्तर्पयित्वा च निष्का
न्दत्त्वा पृथक् पृथक् गाश्च वासांसि च पुनः समाभाष्य परस्परं प्रज्वाल्य कृष्णवर्त्मानमुपगम्य रणव्रतं तस्मिन्नग्नौ त
दा चक्रुः प्रतिज्ञां दृढनिश्चयाः शृण्वतां सर्वभूतानामुच्चैर्वाचो बभाषिरे धृत्वा धनंजयवधे प्रतिज्ञां चैव चक्रिरे ये वै लोकाश्चानृति
नां ये चैव ब्रह्मघातिनां मद्यपस्य च ये लोका गुरुदाररतस्य च ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः शरणागतं च त्यजतो या
चमानं तथा घ्नतः अगारदाहिनां चैव ये च गां निघ्नतामपि अपकारिणां च ये लोका ये च ब्रह्मद्विषामपि स्वभार्यामृतुकाले वै मो श्री राम०
हाद्वै नाभिगच्छतां
२०

श्रमे मैथुनिकानांच येचात्मापहारिणां न्यासापहारिणांयेच श्रुतंनाशयतांचये क्लीवेनयुध्यमानानांयेचनीचानुसारिणां ना
स्तिकानांचयेलोकायेग्निमातृपितृत्यजां तानाप्नुयामहेलोकान्येचपापकृतामपि यद्यहत्वावयंयुद्धे निवर्त्तेमधनंजयं
तेनचाभ्यर्दितास्त्रासात्भवेमहिपराङ्मुखाः यदित्वसुकरंलोकेकर्मकुर्यामसंयुगे इष्टान्लोकान्प्राप्नुयामोवयमद्यन
संशयः एवमुक्त्वातदाराजंस्तेभ्यवर्त्तन्तसंयुगे आह्वयन्तोर्जुनंवीरापितृजुष्टांदिशंप्रति आहूतस्तैर्नरव्याघ्रैः पार्थःपरपु
रंजयः धर्मराजमिदंवाक्यमपदांतरमब्रवीत् आहूतोननिवर्त्तेयमितिमेव्रतमाहितं संसप्तकाश्चमांराजन्आह्व
यंतेमहामृधे एषचभ्रातृभिः सार्द्धंसुशर्माह्वयतेरणे वधायसगणस्यास्यमामनुज्ञातुमर्हसि नैतच्छक्नोमिसंसोढु
माह्वानंपुरुषर्षभ सत्यंतेप्रतिजानामिहतान्विद्धिपरान्युधि युधिष्ठिरउवाच श्रुतंतेतत्त्वतस्तातयद्द्रोणस्य
चिकीर्षितं यथातदनृतंतस्यभवेत्तत्त्वंसमाचर द्रोणोहिबलवान्शूरः कृतास्त्रश्चजितश्रमः प्रतिज्ञातंचतेनैतद्ग्रह
णंमेमहारथः अर्जुनउवाच अयंवैसत्यजिद्राजन्नद्यत्वांरक्षितायुधि ध्रियमाणेचपांचाल्येनाचार्यः काममाप्स्य
ति हतेतुपुरुषव्याघ्रेरणेसत्यजितिप्रभो सर्वैरपिसमेतैर्वानस्थातव्यंकथंचन संजयउवाच अनुज्ञातस्त
तोराज्ञापरिष्वक्तश्चफाल्गुनः प्रेम्णादृष्टश्चबहुधाह्याशिषश्चास्ययोजिताः विहायैवंततः पार्थस्त्रिगर्त्तान्प्र
त्ययाद्बली क्षुधितःक्षुद्विघातार्थंसिंहोमृगगणानिव ततोदौर्योधनंसैन्यंमुदापरमयायुतं गतेर्जुनंभृशं
क्रुद्धंधर्मराजस्यनिग्रहे ततोन्योन्येनतेसेनेसमाजग्मतुरोजसा गंगासरय्वौवेगेनप्रावृषीवोल्बणोदके

द्रो० २१

॥ [illegible] मूर्धन्यानीकं [illegible] मुदायुताः [illegible] ॥ ॥इतिश्रीमहाभारतेद्रोणपर्वणि संजयउवाच ततः
संसप्तकाराजन्समेदेशेव्यवस्थिताः मूर्धानीकंरथैरेवचंद्राकारंमुदायुताः तेकिरीटिनमायांतंदृष्ट्वाहर्षेणमारिष उद
क्रोशन्नरव्याघ्राः शब्देनमहतातदा सदिशः प्रदिशः सर्वादिशः खंचसमावृणोत आवृतत्वाच्चलोकस्यनासीत्तत्रप्रतिस्व
नः सोतीवसंप्रहृष्टांस्तानुपलभ्यधनंजयः किंचिदभ्युत्स्मयन्कृष्णमिदंवचनमब्रवीत पश्यैतान्देवकीमातर्मुमू
र्षूनद्यसंयुगे भ्रातृंस्त्रैगर्त्तकान्वेवरोदितव्येप्रहर्षितान अथवाहर्षकालोयंत्रैगर्त्तानामसंशयं कुनरैर्दुरवापान्हि
लोकान्प्राप्स्यंत्यनुत्तमान एवमुक्त्वामहाबाहुंहृषीकेशंततोर्जुनः आससादरणेव्यूढांत्रिगर्त्तानामनीकिनीं सदे
वदत्तमादायशंखंहेमपरिष्कृतं दध्मौवेगेनमहताघोषेणापूरयन्दिशः तेनशब्देनवित्रस्तासंसप्तकवरूथिनी
निश्चेष्टावस्थितासंख्येत्वश्मसारमयीयथा वाहास्तेषांविवृत्ताक्षास्तब्धकर्णशिरोधराः विष्टब्धचरणामूत्रं
रुधिरंचप्रसुस्रुवुः उपलभ्यततःसंज्ञामवस्थाप्यचवाहिनीं युगपत्पांडुपुत्रायचिक्षिपुःकंकपत्रिणः तान्यर्जुनःसहस्रा
णिदशपंचैवमाशुगैः अनागतान्येवशरैश्चिच्छेदाशुपराक्रमः ततोर्जुनंशितैर्बाणैर्दशभिर्दशभिःपुनः प्रत्यविध्यंस्ततः
पार्थस्तानविध्यत्त्रिभिस्त्रिभिः एकैकस्तुततःपार्थंराजन्विव्याधपंचभिः सचतान्प्रतिविव्याधद्वाभ्यांद्वाभ्यांपराक्रमी भूयएवतुसंक्रु
द्धास्त्वर्जुनंसहकेशवं आपूरयंश्चरैस्तीक्ष्णैस्तडागमिववृष्टिभिः ततःशरसहस्राणिप्रापतन्नर्जुनंप्रति भ्रमराणामिवव्राताःकु श्रीराम०
ल्लंद्रुमगणांवने ततःसुबाहुस्त्रिंशद्भिरद्रिसारमयैःशरैः आविध्यदिषुभिर्गाढंकिरीटेसव्यसाचिनं तैःकिरीटीकिरीटस्थैर्हेमपुंखै २१

रजिह्मगैः शातकुंभद्रवापीडो वमौ सूर्यदत्तोच्छ्रितः हत्वाश्वपं सुबाहोस्तु भल्लेन युधि पांडवः चिच्छेद तं चैव पुनः शरवर्षैरवाकिरत् ततः
सुशर्मा दशभिः सुरथस्तु किरीटिनं सुधर्मा सुधनुश्चैव सुबाहुश्च समार्पयत् तांस्तु सर्वान् पृथक् कृत्वा वानरप्रवरध्वजः प्रत्य
विध्यद्ध्वजांश्चैषां भल्लैश्चिच्छेद सायकान् सुधन्वनो धनुश्छित्त्वा हयांश्चास्यावधीच्छरैः अथास्य सशिरस्त्राणं शिरः कायादपा
तयत् तस्मिन्निपतिते वीरे त्रस्तास्तस्य पदानुगाः व्यद्रवंत भयाज्जीता यत्र दौर्योधनं बलं ततो जघान संक्रुद्धो वासविस्तां म
हाचमूं शरजालैरविच्छिन्नैस्तमः सूर्य इवांशुभिः ततो भग्ने बले तस्मिन् विप्रलीने समंततः सव्यसाचिनि संक्रुद्धे
त्रैगर्त्तान् भयमाविशत् ते वध्यमानाः पार्थेन शरैः सन्नतपर्वभिः अमुह्यंस्तत्र तत्रैव त्रस्ता मृगगणा इव ततस्त्रिगर्त्तरा
ट् क्रुद्धस्तानुवाच महारथान् अलं द्रुतेन वः शूरा न भयं कर्त्तुमर्हथ शप्त्वाथ शपथान् घोरान् सर्वसैन्यस्य पश्यतः ग
त्वा दौर्योधनं सैन्यं किं वै वक्ष्यथ मुख्यशः नावहास्याः कथं लोके कर्मणानेन संयुगे भवेम सहिताः सर्वे निवर्त्तध्वं य
थाबलं एवमुक्तास्तु ते राजन्नन्योन्यं चुक्रुशुर्मुहुः शंखांश्च दध्मिरे वीरा हर्षयंतः परस्परं ततस्ते संन्यवर्त्तंत सं
शप्तकगणाः पुनः नारायणाश्च गोपाला मृत्युं कृत्वा निवर्त्तनं ॥ ॥ इति द्रोणपर्वणि संजय उवाच दृष्ट्वा तु
संनिवृत्तांस्तान् संसप्तकगणान् पुनः वासुदेवं महात्मानमर्जुनः समभाषत चोदयाश्वान् हृषीकेश संसप्तकगणान् प्रति
नैते हास्यंति संग्रामं जीवंत इति मे मतिः पश्य मेऽस्त्रबलं घोरं बाह्वोरिष्वसनस्य च अद्यैतान् पातयिष्यामि क्रुद्धो रुद्रः पशू
निव ततः कृष्णः स्मितं कृत्वा प्रतिनंद्य शिवेन तं प्रावेशयत दुर्धर्षो यत्र यत्रैच्छदर्जुनः सरथो भ्राजतत्यर्थं मुह्यमानो

रणेतदा दह्यमानमिवाकाशेविमानंपांडुरैर्हयैः मंडलानिततश्चक्रेगतप्रत्यागतानिच यथाशक्ररथोराजन्युद्धे
देवासुरेपुरा अथनारायणाः क्रुद्धाविविधायुधपाणयः छादयंतःशरव्रातैःपरिवव्रुर्धनंजयं अदृश्यंचमुहूर्तेनच
क्रुस्तेभरतर्षभ कृष्णेनसहितंयुद्धेकुंतीपुत्रंधनंजयं क्रुद्धस्तुफाल्गुनःसंख्येद्विगुणीकृतविक्रमः गांडीवंधनुरामृज्य
तूर्णंजग्राहसंयुगे बध्वाचभृकुटींवक्त्रेक्रोधस्यप्रतिलक्षणं देवदत्तंमहाशंखंपूरयामासपांडवः अथास्त्रमरिसंघ
घ्नंत्वाष्ट्रमभ्यस्यदर्जुनः ततोरूपसहस्राणिप्रादुरासन्पृथक्पृथक् आत्मनःप्रतिरूपैस्तेनानारूपैर्विमोहिताः
अन्योन्यमर्जुनंमत्वास्वमात्मानंचजघ्निरे अर्जुनोयंगयंकृष्णइमौपांडवयादवौ इतिब्रुवाणाःसंमूढाजघ्नुरन्योन्य
माहवे मोहिताःपरमास्त्रेणक्षयंजग्मुःपरस्परं अशोभंतरणेयोधाःपुष्पिताइवकिंशुकाः ततःशरसहस्राणितै
र्विमुक्तानिभस्मसात् कृत्वातदस्त्रंतान्वीराननयद्यमसादनं अथप्रहस्यबीभत्सुर्ललित्थान्मालवानपि
मावेल्लकांस्त्रिगर्तांश्चयौधेयांश्चार्दयच्छरैः तेहन्यमानावीरेणक्षत्रियाःकालचोदिताः व्यसृजंछरजाला
निपार्थेनानाविधानिच नध्वजोनार्जुनस्तत्रनरथोनचकेशवः प्रत्यदृश्यतघोरेणशरवर्षेणसंवृताः त
तस्तेलब्धलक्षत्वादन्योन्यमभिचुक्रुशुः हतौकृष्णावितिप्रीतावासांस्यादुधुवुस्तदा भेरीमृदंगशंखांश्चदध्मुर्वी
राःसहस्रशः सिंहनादरवांश्चोग्रांश्चक्रिरेतत्रमारिष ततःप्रसिष्विदेकृष्णःखिन्नश्चार्जुनमब्रवीत् क्वासिपार्थन
पश्येत्वांकच्चिज्जीवसिशत्रुहन् तस्यतद्भाषितंश्रुत्वात्वरमाणोधनंजयः वायव्यास्त्रेणतैरस्तांशरवृष्टिमपाहरत् ततःसंसप्तक

श्रान्तान्साश्वद्विपरथायुधान् उवाह भगवान्वायुः शुष्कपर्णोचयानिव उह्यमानास्तु ते राजन्वहुशो मंदवायुना प्रतीनाः पक्षि
णः कालेस्मिन्क्षेम्य एव मारिष तांस्तथा व्याकुलीकृत्य त्वरमाणो धनंजयः जघान निशितैर्वाणैः सहस्राणि शतानि च
शिरांसि भल्लैरहरद्वाहूनपि च सायुधान् हस्तिहस्तोपमांश्चोरूंश्छरैरुर्व्यामपातयत् पृष्ठच्छिन्नान्विचरणान्बाहु
पार्श्वेक्षणाकुलान् नानांगावयवैर्हीनांश्चकारारीन्धनंजयः गंधर्वनगराकारान्विधिवत्कल्पितान्रथान् शरै
र्विशकलीकृत्याश्वांश्चक्रे व्यश्वरथद्विपान् मुंडतालवनानीव तत्र तत्र चकाशिरे छिन्नारथध्वजव्राताः केचित्तत्र क्वचि
त्क्वचित् सोत्तरायुधिनो नागाः सपताकांकुशध्वजाः पेतुः शक्राशनिहता द्रुमवंत इवाचलाः चामरापीडकवचा
ः स्रस्तांत्रनयनास्तथा सारोहास्तुरगाः पेतुः पार्थवाणहताः क्षितौ विप्रविद्धासिनखरा छिन्नवर्मर्ष्टिशक्त
यः पत्तयश्छिन्नवर्माणः कृपणाः शेरते हताः निहतैर्हन्यमानैश्च पतद्भिः पतितैरपि भ्रमद्भिर्निष्टनद्भिश्च
क्रूरमायोधनं वभौ रजश्च सुमहज्जातं शांतं रुधिरवृष्टिभिः मही चाप्यभवद्दुर्गा कवंधशतसंकुला तद्वभौ रौद्र
वीभत्सं वीभत्सोर्यानमाहवे आक्रीडमिव रुद्रस्य घ्नतः कालात्यये पशून् ते वध्यमानाः पार्थेन व्याकुलाश्वरथद्विपाः त
मेवाभिमुखाः क्षीणाः शक्रस्यातिथितां गताः सा भूमिर्भरतश्रेष्ठ निहतैस्तैर्महारथैः आस्तीर्णा संवभौ सर्वा प्रेतीभूतैः समंत
तः एतस्मिन्नंतरे चैव प्रमत्ते सव्यसाचिनि व्यूढानीकस्ततो द्रोणो युधिष्ठिरमुपाद्रवत् तं प्रत्यगृह्णंस्त्वरिताः व्यूढानीकाः प्र
हारिणः युधिष्ठिरं परीप्संतस्तदासीत्तुमुलं महत् ॥ ॥इति द्रोणपर्वणि द्वितीयदिनयुद्धं संजय उवाच परिणाम्य निशां तां तु

मारद्वाजो महारथः उत्कासुवर्द्धराजेंद्र कवचं वै सुयोधनं विधापयोगं पार्थेन संसप्तकगणैः सह निःक्रांते च तदा पार्थे संसप्त
कवधं प्रति व्यूढानीकस्ततो द्रोणः पांडवानां महाचमूं अभ्ययाद्भरतश्रेष्ठ धर्मराज जिघृक्षया व्यूढं दृष्ट्वा सुपर्णं तु भार
द्वाजेन तं तदा व्यूहेन मंडलार्द्धेन प्रत्यव्यूहद्युधिष्ठिरः मुखमासीत्सुपर्णस्य भारद्वाजो महारथः शिरो दुर्योधनं राजा
सोदर्य्यैः सानुगैर्वृतः चक्षुषी कृतवर्मा सिद्धौतमश्चास्यतां वरः भूतशर्मा क्षेमशर्मा करकाक्षश्च वीर्य्यवान कलिंगाः
सिंहलाः प्राच्याः शूराभीरादशेरकाः शकायवनकांबोजास्तथा हंसपथाश्च ये ग्रीवायां शूरसेनाश्च दरदा मद्रकैक
याः गजाश्वरथपत्त्यौघास्तस्थुः परमदंशिताः भूरिश्रवास्तथा शल्यः सोमदत्तश्च बाह्लिकः अक्षौहिण्या वृता
वीरा दक्षिणं पार्श्वमास्थिताः विंदानुविंदावावंत्यौ कांबोजश्च सुदक्षिणः वामपार्श्वं समाश्रित्य द्रोणपुत्राग्रतः स्थि
ताः पृष्ठे कलिंगाः सांबष्ठा मागधाः पौंड्रमद्रकाः गांधाराः शकुनिः प्राच्याः पार्वती याव शातयः पुच्छे वैक
र्त्तनः कर्णः सपुत्रज्ञातिबांधवः महत्या सेनया तस्थौ नानाजनपदोच्छ्रया जयद्रथो भीमरथः संपातिरथ
भोजयः भूमिंजयो वृषः क्राथो नैषधश्च महाबलः वृता बलेन महता ब्रह्मलोकपरिष्कृताः व्यूहस्योरसि
ते राजन्नास्थिता युद्धविशारदाः द्रोणेन विहितो व्यूहः पदात्यश्वरथद्विपैः वातोद्धूतार्णवाकारः प्रनृत्त इव लक्ष्यते
तस्य पक्षप्रपक्षेभ्यो निःपतंति युयुत्सवः सविद्युत्स्तनिता मेघाः सर्वादिग्भ्य इवोष्मगे तस्य प्राग्ज्योतिषो मध्ये विधिवत्कल्पितं
गजं आस्थितः शुशुभे राजन्नंशुमानुदये यथा माल्यदामवता राजन् श्वेतच्छत्रेण धार्य्यता कृत्तिकायोगयुक्तेन पौर्णमा

स्याभिर्वेदुना नीलांजनचयप्रख्योमदांधोद्विरदोबभौ अतिष्ठत्सोमहामेघैर्य्यथास्यात्पर्वतोमहान् नानारूपतिभौवीरैः वि
विधायुधभूषणैः समुद्यतः पार्वतीयैः शक्रोदेवगणैरिव ततोयुधिष्ठिरः प्रेक्ष्य मूर्हृतमतिमानुषं अजय्यमरि
भिः संख्ये पार्थतंवाक्यमब्रवीत् ब्राह्मणस्यवशंनाहमियामद्ययथाप्रभो पारावतसवर्णाश्वतथानीतिर्विधीय
तां धृष्टद्युम्न उवाच द्रोणस्यवशंनैष्यसिसुव्रत अहमावारयिष्यामिद्रोणमद्यसहानुगं मयिजी
वतिकौरव्यनोद्वेगंकर्तुमर्हसि नहिशक्तोरणेद्रोणोविजेतुंमांकथंचन संजयउवाच एवमुक्त्वाकिरन्बाणान्द्रु
पदस्यसुतोवली पारावतसवर्णाश्वः स्वयंद्रोणमुपागमत् अनिष्टदर्शनंदृष्ट्वाधृष्टद्युम्नमवस्थितं क्षणेनैवाम
वद्द्रोणोनातिहृष्टमनाइव तंतुसंप्रेक्ष्यपुत्रस्तेदुर्मुखः शत्रुकर्षणः प्रियंचिकीर्षुर्द्रोणस्यधृष्टद्युम्नमवारयत्
ससंप्रहारस्तुमुलः सुघोरः समपद्यत पार्षतस्यचशूरस्यदुर्मुखस्यचभारत पार्षतः शरजालेनक्षिप्रंप्रच्छाद्यदुर्मु
खं भारद्वाजंशरौघेणमहतासमवारयत् द्रोणमावारितंदृष्ट्वाभृशायत्तस्तवात्मजः नानालिंगैः शरव्रातैःपार्षतंस
ममोहयत् तयोर्विसक्तयोःसंख्येपांचाल्यकुरुमुख्ययोः द्रोणोयौधिष्ठिरंसैन्यंबहुधाव्यधमच्छरैः अनिलेनयथाभ्रा
णिविच्छिन्नानिसमंततः तथापार्थस्यसैन्यानिविच्छिन्नानिक्वचित्क्वचित् मुहूर्तमिवतद्युद्धमासीन्मधुरदर्शनं
ततउन्मत्तवद्राजन्निर्मर्यादमवर्त्तत नैवस्वेनपरेराजन्नाज्ञायंतपरस्परं अनुमानेनसंज्ञाभिर्युद्धंतत्समवर्त्तत चू
डामणिषुनिष्केषुभूषणेष्वपिवर्मसु तेषामादित्यवर्णाभारश्मयःप्रचकाशिरे तत्प्रकीर्णपताकानांरथवारणवाजि

द्रो० नां वलाकाशबलाभ्रांतं ददर्शोत्सृपमाहवे नराणेवनराजघ्नुर्द्योश्चहयाहयान् रथांश्च रथिनोजघ्नुर्वारणावरवारणान् समुच्छ्रि
२४ तपताकानां [illegible]गजानांपरमद्विपैः क्षणेनतुमुलोघोरःसंग्रामःसमपद्यत तेषांसंसक्तगात्राणांकर्षतामितरेतरं दं
तसंघातसंघर्षात्सधूमोग्निरजायत विप्रकीर्णपताकास्तेविषाणजनिताग्नयः वभूवुःखंसमासाद्यसविद्युतइवांबुदाः
विक्षिपद्भिर्नदद्भिश्चनिपतद्भिश्चवारणैः संबभूवमहीकीर्णामेघैर्द्यौरिवशारदी तेषामाहन्यमानानांवाणतोमरऋ
ष्टिभिः वारणानांरवोजज्ञेमेघानामिवसंप्लवे तोमराभिहताःकेचिद्बाणैश्चपरमद्विपाः वित्रेसुःसर्वनागानांशब्दमेवा
परेव्रजन् विषाणाभिहताश्चापिकेचित्तत्रगजागजैः चक्रुरार्तस्वनंघोरमुत्पातजलदाइव प्रतीपाःक्रियमाणाश्चवा
रणावरवारणैः उन्मथ्यपुनराजघ्नुःप्रेरिताःपरमांकुशैः महामात्रैर्महामात्रास्ताडिताःशरतोमरैः गजेभ्यःपृथिवीं
जग्मुर्मु[illegible]क्तप्रहरणांकुशाः निर्मनुष्याश्चमातंगाः विनदंतस्ततस्ततः छिन्नाभ्राणीवसंपेतुःसंप्रविश्यपरस्परं
तान्परिवृहंतश्चपतितान्पतितान्प्रधाव दिशोजग्मुर्महानागाःकेचिदेकचराइव ताडितास्ताड्यमानाश्चतोमरर्ष्टिपरश्वधैः पे
ग ४ [illegible]संजारोहैः सपताकैः समंततः मातंगैःशुशुभेभूमिर्विकीर्णैरिवपर्वतैः गजस्थाश्चमहामात्रानिर्भिन्नहृदयारणे
रथिभिःपातिताभल्लैर्विकीर्णांकुशतोमराः क्रौंचवद्विनदंतोन्येनाराचाभिहतागजाः परान्स्वांश्चापिमृद्नंतःपरिपेतुर्दिशोदश गजाश्व
रथयोधानांशरीरौघसमावृताः वभूवपृथिवीराजन्मांसशोणितकर्दमा प्रमथ्यचविषाणाग्रैःसमुत्क्षिप्ताश्चवारणैः सचक्राः श्रीराम०
तुरंगैस्वनंकृत्वातदाविशसनेगजाः तेषांशैलोपमैःकायैर्निपतद्भिःसमंततः आहतासहसाभूमिश्चकंपेचननादच सादिनो २४

श्च विचक्राश्च रथैरेव महारथः रथाश्च रथिभिर्हीना निर्मनुष्याश्च वाजिनः हतारोहाश्च मातंगा दिशो जग्मुर्भयातुराः जघानात्र पिता
पुत्रं पुत्रश्चापि पितरं तथा इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किंचन आगुल्फेभ्योवसीदंते नरा लोहितकर्दमैः दीप्यमानैः परिक्षिप्ता दा
वैरिव महाद्रुमाः शोणितैः सिच्यमानानि वस्त्राणि कवचानि च छत्राणि च पताकाश्च सर्वं रक्तमदृश्यत हयौघाश्च रथौघाश्च नरौघाश्च
निपातिताः संक्षुण्णाः पुनरावृत्य बहुधा रथनेमिभिः स गजौघमहावेगः परासुनरशैवलः रथौघतुंगावर्त्तः प्रबभौ सैन्यसागरः
तं वाहनैर्महानौभिर्योधा जयधनैषिणः अवगाह्याथ मज्जंतो नैव मोहं प्रचक्रिरे शरवर्षाभिवृष्टेषु योधेष्वंचितलक्ष्मसु न तेषु
चिन्नितांगेष्वेकश्चिदाहतलक्षणः वर्त्तमाने तथा युद्धे घोररूपे भयंकरे मोहयित्वा परान् द्रोणो युधिष्ठिरमुपाद्रवत्॥ ॥इति
द्रोणपर्वणि संजय उवाच ततो युधिष्ठिरो द्रोणं दृष्ट्वांतिकमुपागतं महता शरवर्षेण प्रत्यगृह्णाद भीतवत् ततो हल
हलाशब्द आसीद्यौधिष्ठिरे बले जिघृक्षति महासिंहे गजानामिव यूथपं दृष्ट्वा द्रोणं ततः शूरः सत्यजित्सत्यविक्रमः युधिष्ठिरम
भिप्रेप्सुराचार्यं समुपाद्रवत् तत आचार्यपांचाल्यौ युयुधाते महाबलौ विक्षोभयंतौ तत्सैन्यमिंद्रवैरोचनाविव ततो द्रोणं म
हेष्वासः सत्यजित्सत्यविक्रमः अविध्यन्निशिताग्रेण परमास्त्रं विदर्शयन् तथास्य सारथेः पंच शरान् सर्पविषो
पमान् अमुंचदंतकप्रख्यान् स मुमोहास्य सारथिः अथास्य सहसा विध्यद्धयान् दशभिराशुगैः दशभिर्दशभिः क्रु
द्ध उभौ च पार्ष्णिसारथी मंडलं तु समावृत्य विचरन् पृतनामुखे ध्वजं चिच्छेद च क्रुद्धो द्रोणस्यामित्रकर्षणः द्रोणस्तु
तत्समालोक्य चरितं तस्य संयुगे मनसा चिंतयामास प्राप्तकालमरिंदमः ततः सत्यजितं तीक्ष्णैर्दशभिर्मर्मभेदिभिः
मभि।

द्रो० अविध्यच्छीघ्रमाचार्यं छित्वास्य सशरं धनुः सशीघ्रतरमादाय धनुरन्यत्प्रतापवान् द्रोणमभ्यहनद्राजंस्त्रिंशता कंकपत्रि
२५ भिः दृष्ट्वा सत्यजिता द्रोणं ग्रस्यमानमिवाहवे वृकः शरशतैस्तीक्ष्णैः पांचाल्यो द्रोणमार्दयत् संछाद्यमानं समरे द्रो
णं दृष्ट्वा महारथं चुक्रुशुः पांडवा राजन्वस्त्राणि दुधुवुश्च ह वृकस्तु परमक्रुद्धो द्रोणं षष्ट्या स्तनांतरे विव्याध बलवान्रा
जंस्तदद्भुतमिवाभवत् द्रोणस्तु शरवर्षेण छाद्यमानो महारथः वेगं चक्रे महावेगः क्रोधादुद्वृत्य चक्षुषी ततः सत्यजितश्चा
पं छित्वा द्रोणो वृकस्य च षड्भिः ससूतं सहयं ध्वजं शरैर्द्रोणो वधीद्वृकं अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरं साश्वं स
सूतं विशिखैर्द्रोणं विव्याध स ध्वजं सतन्न ममृषे द्रोणः शरवर्षैः सहस्रशः ततस्तस्य विनाशाय सत्वरं विससर्जंछरा
न् हयान्ध्वजान्धनुर्मुष्टिमुभौ च पार्ष्णिसारथी अवाकिरत्ततो द्रोणः शरवर्षैः सहस्रशः ततस्तस्य विनाशाय स
त्वरं विससर्जंछरान् हयान्ध्वजान्धनुर्मुष्टिमुभौ च पार्ष्णिसारथी आवाकिरत्ततो द्रोणः शरवर्षैः सहस्रशः त
था संछिद्यमानेषु कार्मुकेषु पुनः पुनः पांचाल्यः परमास्त्रज्ञः शोणाश्वं समयोधयत् स सत्यजितमालोक्य तथोदीर्णं महाहवे
अर्धचंद्रेण चिच्छेद शिरस्तस्य महात्मनः तस्मिन्हते महामात्रे पांचालानां महारथे अपायाज्जवनैरश्वैर्द्रोणात्त्रस्तो युधिष्ठिरः
पांचालाः केकया मत्स्याश्चेदिकारूषकोशलाः युधिष्ठिरमभीप्सन्तो हृष्टा द्रोणमुपाद्रवन् ततो युधिष्ठिरं प्रेप्सुराचार्यः शत्रुपूग
हा व्यधमत्तान्यनीकानि तूलराशिमिवानलः निर्दहंतमनीकानि तानि तानि पुनः पुनः द्रोणं मत्स्यादवरजः शतानीकोऽभ्य श्रीराम०
वर्तत सूर्यरश्मिप्रतीकाशैः कर्मारपरिमार्जितैः षड्भिः ससूतं सहयं द्रोणं विद्ध्वानदद्भृशं क्रूराय कर्मणे युक्तश्चिकीर्षुः २५
कर्म दुष्करं अवाकिरच्छरशतैर्भारद्वाजं महारथं तस्य नानदतो द्रोणः शिरः कायात्सकुंडलं क्षुरेणापाहरत्तूर्णं ततो मत्स्याः प्रदुद्रु

कुः मत्स्यानजित्वाजयच्चेदीन्करूषान्केकयानपि पांचालान्संजयान्पांडून्भारद्वाजः पुनःपुनः तं दहंतमनीकानि क्रुद्धमग्निं
यथा वनं दृष्ट्वा रुक्मरथं वीरं समकंपत संजयाः उत्तमं ह्याददानस्य धनुरस्याशुकारिणः ज्याघोषो निघ्नतो मित्रान्दि
क्षु सर्वासु शुश्रुवे नागानश्वान्पदातींश्च रथिनो गजसादिनः रौद्रा हस्तवता मुक्ताः प्रमथ्नंति स्म सायकाः नानद्यमा
नः पर्जन्यो मिश्रवातो हिमात्यये अश्मवर्षमिवावर्षत्परेषां भयमादधत् सर्वा दिशः समचरत्सैन्यं विक्षोभयन्नि
व वली शूरो महेष्वासो मित्राणामभयंकरः तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतं दिक्षु सर्वासु पश्यामो द्रोण
स्यामिततेजसः शोभमानां ध्वजे चास्य वेदीमद्राक्ष्म भारत हिमवच्छिखराकारां चरतः संयुगे भृशं द्रोणस्तु पांडवानी
के चकार कदनं महत् यथा दैत्यगणे विष्णुः सुरासुरनमस्कृतः स शूरः सत्यवाक्प्राज्ञो बलवान्सत्यविक्रमः म
हानुभावः कल्पांते रौद्रीं भीरुविभीषणीं कवचोर्मिध्वजावर्तां मर्त्यकूलापहारिणीं गजवाजिमहाग्राहामसिमी
नां दुरासदां वीरास्थिशर्करां रौद्रां भेरीमुरजकच्छपां चर्मवर्मप्लवां घोरां केशशैवलशाद्वलां शरौघिणीं धनुः
स्रोतां बाहुपन्नगसंकुलां रणभूमिवहां तीव्रां कुरुसंजयवाहिनीं मनुष्यशीर्षपाषाणां शक्तिमीनां गदो
डुपां उष्णीषफेनवसनां विकीर्णांत्रसरीसृपां वीरापहारिणीमुग्रां मांसशोणितकर्दमां हस्तिग्राहां के
तुवृक्षां क्षत्रियाणां निमज्जनीं क्रूरां शरीरसंघट्टां सादिनक्रां दुरत्ययां द्रोणः प्रावर्तयत्तत्र नदीमंतक
गामिनीं क्रव्यादगणसंजुष्टां श्वशृगालगणायुतां निषेवितां महारौद्रैः पिशिताशैः समंततः तं दहंतमनी
कानि रथोदारं कृतांतवत् सर्वतोभ्यद्रवन्द्रोणं कुंतीपुत्रपुरोगमाः ते द्रोणं सहिताः शूराः सर्वतः प्रत्यवारयन् गभ

द्रो० स्तिमिरिवादित्यं तपंतं भुवनं यथा तं तु शूरं महेष्वासं तावकाभ्युद्यतायुधाः राजानो राजपुत्राश्च समंतात्पर्यवारयन् शिखं
२६ डीतु ततो द्रोणं पंचभिर्नतपर्वभिः क्षत्रवर्मा च विंशत्या वसुदानश्च पंचभिः उत्तमौजास्त्रिभिर्वाणैः क्षत्रदेवश्च सप्तभिः
सात्यकिश्च शतेनाजौ युधामन्युस्तथाष्टभिः युधिष्ठिरो द्वादशभिर्द्रोणं विव्याध सायकैः धृष्टद्युम्नश्च दशभिश्चेकिता
नस्त्रिभिः शरैः ततो द्रोणः सत्यसंधः प्रभिन्न इव कुंजरः अभ्यतीत्य रथानीकं दृढसेनमपातयत् ततो राजानमासाद्य
प्रहरंतमभीतवत् अविध्यन्नवभिः क्षेमं स हतः प्रापतद्रथात् स मध्यं प्राप्य सैन्यानां सर्वाः प्रविचरन् दिशः त्राता ह्य
भवदन्येषां न त्रातव्यः कथंचन शिखंडिनं द्वादशभिर्विंशत्या चोत्तमौजसं वसुदानं च भल्लेन प्रेषयद्यमसादनं अशीत्या क्षत्र
वर्माणां षड्विंशत्या सुदक्षिणं क्षत्रदेवं तु भल्लेन रथनीडादपातयत् युधामन्युं चतुःषष्ट्या त्रिंशता चैव सात्यकिं विध्वा रुक्म
रथस्तूर्णं युधिष्ठिरमुपाद्रवत् ततो युधिष्ठिरः क्षिप्रं कितवो राजसत्तमः अपायाज्जवनैरश्वैः पांचाल्यो द्रोणमभ्ययात् तं द्रो २१
णः सधनुष्कं तु साश्वयंतारमाक्षिणोत् स हतः प्रापतद्भूमौ रथाज्ज्योतिरिवांबरात् तस्मिन्हते राजपुत्रे पांचालानां यशस्क
रे हत द्रोणं हत द्रोणमित्यासीन्निस्वनो महान् तांस्तथा भृशसंरब्धान्पांचालान्मत्स्यकेकयान् संजयान्पांडवांश्चैव
द्रोणो व्यक्षोभयद्बली सात्यकिं चेकितानं च धृष्टद्युम्नशिखंडिनौ वार्द्धक्षेमिं चैत्रसेनिं सेनाबिंदुं सुवर्चसं एतां
श्चान्यांश्च सुबहून्नानाजनपदेश्वरान् सर्वान्द्रोणो जयद्युद्धे कुरुभिः परिवारितः तावकाश्च महाराज जयं लब्ध्वा म २२
हाहवे पांडवेयान्रणे जघ्नुर्द्रवमाणान्समंततः ते दानवा इवेंद्रेण वध्यमाना महात्मना पांचालाः केकया मत्स्याः
समकंपंत भारत ॥ ॥इति द्रोणपर्वणि धृतराष्ट्र उवाच भारद्वाजेन भग्नेषु पांडवेषु महामृधे पांचालेषु च सर्वे श्रीराम•
२६

३४

निरतं दुर्योधनहितैषिणं भारद्वाजं तथानीके दृष्ट्वा सूरमवस्थितं के शूराः सन्यवर्त्तंत तन्ममाचक्ष्व संजय
संजय उवाच तान्दृष्ट्वा चलि ३

पुकाश्चैवान्योन्यवर्त्तंत आर्यां युद्धे मतिं कृत्वा क्षत्रियाणां यशस्करीं असेवितां कापुरुषैः सेवितां पुरुषर्षभैः सहि वीरोन्नतः
शूरो याभग्नेषु निवर्त्तते अहोनासीत्पुमान्कश्चिद् दृष्ट्वा द्रोणं व्यवस्थितं जृंभमाणमिव व्याघ्रं प्रभिन्नमिव कुंजरं त्यजं
तमाहवे प्राणान्संनद्धं चित्रयोधिनं महेष्वासं नरव्याघ्रं द्विषतामयवर्द्धनं कृतज्ञंसत्य निर्तान्संख्ये प्रद्युम्नान्द्रोणमा
यकैः पांचालान्पांडवान्मत्स्यान्सृंजयांश्चेदिकैकयान् द्रोणचापविमुक्तेन शरौघेणासुहारिणा सिंधोरिव महौ
घेणाह्रियमाणान्यथा प्लवान् कौरवाः सिंहनादेन नानावाद्यस्वनेन च रथद्विपनरांश्चैव सर्वतः समवारयन् तान्प
श्यसैन्य[illegible] मध्यस्थो राजा स्वैर्नसंवृतः दुर्योधनोब्रवीत्कर्णं प्रहृष्टः प्रहसन्निव दुर्योधन उवाच पश्य राधेय पां
चालान्प्रद्युम्नान्द्रोणसायकैः सिंहेनेव मृगान्वन्यांस्त्रासितान्दृढधन्विना नैते जातु पुनर्युद्धमीहेयुरिति मे मतिः
यथा वभग्ना द्रोणेन वातेनेव महाद्रुमाः अर्द्यमानाः शरैरेते रुक्मपुंखैर्महात्मना पथा नैकेन गच्छंति घूर्णमानास्त
तस्ततः संनिरुद्धाश्च कौरव्यैर्द्रोणेन च महात्मना एते न्ये मंडलीभूताः पावकेनेव कुंजराः भ्रमरैरिव चाविष्टाँ णस्य नि २५
शितैः शरैः अन्योन्यं समलीयंत पलायनपरायणाः एष भीमो महाक्रोधी हीनः पांडवसंजयैः मदीयैरावृतो योधैः क
र्णतर्जयतीव मां व्यक्तं द्रोणमयं लोकमद्य पश्यति दुर्मतिः निराशो जीविताद्यून मद्य राज्याच्च पांडवाः कर्ण उवाच
नैष जातु महाबाहुर्जीवन्नाहवमुत्सृजेत् न चेमान्पुरुषव्याघ्र सिंहनादान्सहिष्यति न चापि पांडवा युद्धे भज्येर
न्निति मे मतिः शूराश्च बलवंतश्च कृतास्त्रा युद्धदुर्मदाः विषाग्निद्यूतसंक्लेशान्वनवासं च पांडवाः स्मरमाणा नहा

स्पंतिसंग्रामदतिमेमतिः निहत्तोहिमहाबाहुरमितौजावृकोदरः कुरून्वरान्हि कौंतेयोरथोदारान्हनिष्यति अस्मिनाधनु
षाशक्याहयैनोगोभेररथैः आयसेनवदंडेनव्राताव्रातान्हनिष्यति तमेनमनुवर्त्तंतिसात्यकिप्रमुखारथाः
पांचालाकैकयामत्स्याः पांडवाश्चविशोकृताः भूराश्चवलवंतश्चविक्रांताश्चमहारथाः विनिघ्नंतश्चभीमेनसंरब्धेनाभि
चोदिताः तद्रोणानमभिवर्त्तंतेसर्वेतःकुरुपुंगवाः वृकोदरंपरीप्संतःसूर्यंमभ्रगणाइव एकायनगतात्धेतेपांडवेयेपु
येतव्रते अरक्षमाणांशलभायथाद्दीपमुमुर्षवः असंशयंकृतास्त्रश्चपर्याप्ताश्चापिवारणो अतिभारमहंमन्येभारद्वा
जेसमाहितं शीघ्रमनुगमिष्यामोयत्रद्रोणोव्यवास्थितः काकाइवमहानागंमावैहन्युर्यतव्रतं संजयउवाच राधे
यस्यवचःश्रुत्वाराजादुर्योधनस्ततः भ्रातृभिःसहितोराजन्प्रायाद्द्रोणरथंप्रति तत्रारावोमहानासीदेकंद्रोणांजिघां
सतां पांडवानांनिवृत्तानांनानावर्णैर्हयोत्तमैः॥ ॥महाभारतेद्रोणपर्वणि धृतराष्ट्रउवाच सर्वेषामेवमेव्रूहिरथचिह्नानि
संजय येद्रोणमभ्यवर्त्तंतक्रुद्धाभीमपुरोगमाः संजउवाच ऋक्षवर्णैर्हयैर्दृष्ट्वाव्यायच्छंतवृकोदरं रजताश्वस्ततःशूरः
शैनेयःसम्यवर्त्तत सारंगाश्वोयुधामन्युःस्वयंप्रत्वरयन्हयान् पर्यवर्त्ततदुर्धर्षःक्रुद्धोद्रोणरथंप्रति पारावतसवर्णैस्तुहेम
भांडैर्महाजवैः पांचालराजस्यसुतोधृष्टद्युम्नोन्यवर्त्तत पितरंतुपरीप्सुःक्षत्त्रधर्मोयतव्रतः सिद्धिंचास्यपराकांक्षन्शोणाश्वैः
सन्यवर्त्तत पद्मपत्रनिभांश्चाश्वान्मल्लिकाक्षान्स्वलंकृतान् शैखंडिःक्षत्रदेवस्तुस्वयंप्रत्वरयन्ययौ दर्शनीयास्तुकांबोजाःशुक
पत्रपरिच्छदाः वहंतोनकुलंशीघ्रंतावकानभिदुद्रुवुः कृष्णास्तुमेघसंकाशास्त्ववहन्नुत्तमौजसं दुर्धर्षायाभिसंधायक्रुद्धंयुद्धायभार

न तथातित्तिरिकल्माषा हयावातसमाजवे अवहंस्तमुतेपुंडे सहदेवमुदायुधं दंतवर्णास्तु राजानं कालवाला युधिष्ठिरं
भीमवेगा नरव्याघ्रमवहन्वातरंहसः हेमोत्तमप्रतिच्छन्नैर्हयैर्वातसमैर्जवे अभ्यवर्त्तंत सैन्यानि सर्वाण्येव युधिष्ठिरं
राजस्त्वनंतरो राजा पांचाल्यो द्रुपदो भवत जातरूपमयच्छत्रः सर्वैस्तैरभिरक्षितः ललामैर्हरिभिर्युक्तः सर्वशब्दक्षमैर्यु
धि राज्ञां मध्ये महेष्वासः शांतभीरभ्यवर्त्तत तं विराटोन्वयाच्छीघ्रं सह सर्वैर्महारथैः केकयाश्च शिखंडी च धृष्टकेतुस्तथै
व च स्वैः स्वैः सैन्यैः परिवृता मत्स्यराजानमन्वयुः तं तु पाटलिपुष्पाणां समवर्णा हयोत्तमाः वहमाना व्यराजंत मत्स्य
स्यामित्रघातिनः हारिद्रसमवर्णास्तु जवना हेममालिनः पुत्रं विराटराजस्य सत्वरं समुदावहन् इंद्रगोपकवर्णैस्तु
भ्रातरः पंच कैकयाः जातरूपसमाभासाः सर्वे लोहितकध्वजाः ते हेममालिनः शूराः सर्वे युद्धविशारदाः वर्षंत इ
वांबुदा प्रत्यदृश्यंत दंशिताः आमपात्रनिकाशास्तु पांचाल्यममितौजसं दत्तास्तुंबुरुणा दिव्याः शिखंडिनमुदावहन्
तथा द्वादशसाहस्राः पांचालानां महारथाः तेषां तु षट्सहस्राणि ये शिखंडिनमन्वयुः पुत्रं तु शिशुपालस्य नरसिंहस्य
मारिष आक्रीडंतो वहंति स्म सारंगशबला हयाः धृष्टकेतुस्तु चेदीनामृषभोतिबलोदितः कांबोजैः शबलैरभ्यवर्त्त
त दुर्जयः बृहत्क्षत्रं तु कैकेयं सुकुमारं हयोत्तमाः पलालधूमसंकाशाः सैंधवाः शीघ्रमावहन् मल्लिकाक्षाः पद्मवर्णा व
ह्लिजाताः स्वलंकृताः शूरं शिखंडिनः पुत्रं क्षत्रदेवमुदावहन् रुक्मभांडप्रतिच्छन्नाः कौशेयसदृशा हयाः क्षमावं
तोवहन् संख्ये सेनाबिंदुमरिंदमं युवानमवहन् संख्ये क्रौंचवर्णा हयोत्तमाः काश्यस्याभिभुवः पुत्रं सुकुमारं महार
थं श्वेतास्तु प्रतिविंध्यं तं कृष्णग्रीवा मनोजवाः यंतुः प्रेष्यकरा राजन्राजपुत्रमुदावहन् कांचनापिहितैर्यो

द्रो० क्रैमेपृष्ठग्रीवसाच्छिमाः द्रौपदेयं नरव्याघ्रं श्रुतकर्माणमावहन् श्रुतकीर्त्तिं श्रुतनिधिं द्रौपदेयं हयोत्तमाः ऊहुः पा
२८ र्थसमं युद्धे चाषपत्रनिभा हयाः यमाहुरध्यर्द्धगुणं कृष्णात्पार्थाच्च संयुगे अभिमन्युं पिशंगास्तं कुमारमवहन् रणे
एकस्तु धार्त्तराष्ट्रेभ्यः पाण्डवान्यः समाश्रितः तं बृहंतो महाकाया युयुत्सुमवहन् रणे पलालकांडवर्णास्तु वार्द्धक्षेमं तर
स्विनं ऊहुः सुतुमुले युद्धे हयाः कृष्णाः स्वलंकृताः कुमारं शितिपादास्तु रुक्मपत्रैरुरश्छदैः सौचित्तिमवहन्यु
क ५ द्धे यंतुः प्रेष्याश्च रोहयाः रुक्मपृष्ठावकीर्णास्तु कौशेयसदृशा हयाः सुवर्णमालिनः क्षान्ताः श्रेणीमंतमुदावहन् रु
क्ममालाधराः शूराः हेमपृष्ठाः स्वलंकृताः काशिराजं नरश्रेष्ठं श्लाघनीयमुदावहन् अस्त्राणां च धनुर्वेदे ब्राह्मे वे
दे च पारगं तं सत्यधृतिमायांतमरुणाः समुपावहन् यः स पांचालसेनानीर्द्रोणमंशमकल्पयत् पारावत
सवर्णास्तं धृष्टद्युम्नमुदावहन् तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्म्मदः श्रेणीमान्वसुदानश्च पुत्र
:काश्यस्य चाविभुः युक्तैः परमकांबोजैर्यवनैर्हेममालिभिः भीषयंतो द्विषत्सैन्यं यमवैश्रवणोपमाः
प्रभद्रकास्तु कांबोजाः षट्सहस्राण्युदायुधाः नानावर्णैर्हयैः श्रेष्ठैर्हेमवर्णरथध्वजाः शरव्रातैर्विधुन्वं
तः शत्रून्विततकार्मुकाः समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः बभ्रुकौशेयवर्णास्तु सुवर्णवरमालि न ४
नः ऊहुरम्लानमनसश्चेकितानं हयोत्तमाः इंद्रायुधसवर्णैस्तु कुंतिभोजो हयोत्तमैः आयात्सु
दश्वैः पुरुजिन्मातुलः सव्यसाचिनः अंतरिक्षसवर्णास्तु तारकाचित्रिता इव राजानं रोचमानं तो
हयास्तं रणे समावहन् कर्बुराः शितिपादास्तु स्वर्णजालपरिच्छदाः जांसंधिं हयश्रेष्ठाः सहदेवमु श्रीराम०

८१ २८

दावहन् पैतृपुष्करनालस्यसमवर्णाहयोत्तमाः जवेश्येनसमाश्चित्राः सुदामानमुदावहन् शशलोहितवर्णास्तु पांडुरोद्भूत
राजयः पांचाल्यंगोपतेः पुत्रंसिंहसेनमुदावहन् पांचाल्यानांनरव्याघ्रोयः ख्यातोजनमेजयः तस्यसर्षपपुष्पाणांतुल्य
वर्णाहयोत्तमाः माषवर्णास्तुजवनावृहंतोहेममालिनः दधिपृष्ठाश्चित्रमुखाः पांचाल्यमवहन्द्रुतं शूराश्चभद्रकाश्चैव
शरकांडनिभाहयाः पद्मकिंजल्कवर्णाभादंडधारमुदावहन् रासभारुणवर्णाभाः पृष्ठतोमूषिकप्रभाः वलान्तइववसंप
न्नाव्याघ्रदंत्तमुदावहन् हरयःकालकाश्चित्राश्चित्रमाल्यविभूषिताः सुधन्वानंनरव्याघ्रंपांचाल्यंसमुदावहन् इंद्राश
निसमस्पर्शाइंद्रगोपकसंनिभाः कायेश्चित्रांतराश्चित्राश्चित्रायुधमुदावहन् विभ्रतोहेममालास्तुचक्रवाकोदराहयाः
: कोशलाधिपतेःपुत्रंसुक्षत्रंवाजिनोवहन् शवलास्तुवृहंतोश्वाहंताजांबूनदस्रजः युद्धेसत्यधृतिंक्षेमिमवहन्प्रां
शवः शुभाः एकवर्णेनसर्वेणध्वजेनकवचेनच अश्वैश्चधनुषाचैवशुक्लैः शुक्लोन्यवर्त्तत समुद्रसेनपुत्रं
तुसामुद्रारुद्रतेजसं अश्वाः शशांकसदृशाश्चंद्रसेनमुदावहन् नीलोत्पलसवर्णास्तुतपनीयविभूषिताः
शैव्यंचित्ररथंसंख्येचित्रमाल्यावहन्हयाः कलायपुष्पवर्णास्तुश्वेतलोहितराजयः रथसेनंहयःश्रेष्ठाः
समुहूर्युद्धदुर्मदं यंतुसर्वमनुष्येभ्यः प्राहुःशूरतरंनृपं तंपटच्चरहंतारंशुकवर्णावहन्हयाः चित्रायुधं
चित्रमाल्यंचित्रवर्म्मायुधध्वजं ऊहुः किंशुकपुष्पाणांसमवर्णाहयोत्तमाः एकवर्णेनसर्वेणध्वजेन
कवचेनच धनुषारथ्यवाहेश्चनीलैर्नीलोन्यवर्त्तत नानारूपैरत्नचित्रैर्वरूथध्वजकार्मुकैः वाजिध्वजपताका

द्रो० मिश्रैस्त्रैश्चित्रोत्पत्कर्णैर्न येतु पुष्कारपर्णास्यस्तुल्यवर्णा हयोत्तमाः तेरोचमानस्य सुतं हेमवर्णमुदावहन् योधाश्च भद्रकाराश्च
२७ शरदंडानुदंडयः श्वेतांगाः कुक्कुटांडाभा दंडकेतुं हया वहन् केशवेन हतेसंख्ये पितर्यथ नराधिपे भिन्नेकपाटेपांड्यानां विद्रुते
युद्धबंधुषु भीष्मादवाप्य चास्त्राणि द्रोणाद्रामात्कृपात्तथा अस्त्रैः समत्वं संप्राप्य रुक्मिकर्णार्जुनाच्युतैः इयेषद्वारकां हंतुं
कृत्स्नां जेतुं च मेदिनीं निवारितस्ततः प्राज्ञैः सुहृद्भिर्हितकाम्यया वैरानुबंधमुत्सृज्य स्वराज्यमनुशास्ति यः ससागरध्वजः पां
ड्यश्चंद्ररश्मिनिभैर्हयैः वैडूर्यजालप्रतिच्छन्नैर्वीर्यं द्रवणमाश्रितः दिव्यं विस्फारयंश्चापं द्रोणमभ्यद्रवद्बली आटरूषकवर्णा
भा हयाः पांड्यानुयायिनां अवहन्रथमुख्यानामयुतानि चतुर्दश नानावर्णेन रूपेण नानाकृतिमुखाः हयारथचक्रध्वजं
वीरं घटोत्कचमुदावहन् भरतानां समेतानामुत्सृज्यैको मतानि यः गतो युधिष्ठिरं भक्त्या त्यक्त्वा सर्वमभीप्सितं लोहिताक्षं महा
बाहुं बृहंतं तमरिध्वजाः महासत्वा महाकायाः सौवर्णस्यंदनेस्थितं सुवर्णवर्णा धर्मज्ञमनीकस्थं युधिष्ठिरं राजश्रेष्ठं हयश्
श्रेष्ठाः सर्वतः पृष्ठतोन्वयुः वर्णैरुच्चावचैरन्यैः सदश्वानां प्रभद्रकाः संन्यवर्तंत युद्धाय बहवो देवरूपिणः ते
यत्ता भीमसेनेन सहिताः कांचनध्वजाः प्रत्यदृश्यंत राजेंद्र सेंद्रा इव दिवौकसः अत्यरोचत तान्सर्वान्धृष्ट
द्युम्नः समागतान् सर्वाण्यपि च सैन्यानि भारद्वाजोत्यरोचत अतीव शुशुभे तस्य ध्वजः कृष्णाजिनोत्तरः क
मंडलुर्महाराज जातरूपमयः शुभः ध्वजं तु भीमसेनस्य वैडूर्यमणिलोचनं भ्राजमानं महासिंहं राजतं श्रीराम०
दृष्टवानहं ध्वजं तु कुरुराजस्य पांडवस्य महौजसः दृष्टवानस्मि सौवर्णं सोमं ग्रहगणान्वितं मृदंगौ चात्र विपुलौ दि २७

व्यौनंदोपनंदकौ यंत्रेणाहन्यमानौच सुस्वनौ हर्षवर्द्धनौ शरभेपृष्ठसौवर्णो नकुलस्य महाध्वजं अपश्याम रथेऽत्युग्रं
भीषयानमवस्थितं हंसस्तु राजतः श्रीमान् ध्वजे घंटापताकवान् सहदेवस्य दुर्द्धर्षो द्विषतां शोकवर्द्धनः पंचानां द्रौ
पदेयानां प्रतिमा ध्वजभूषणं धर्ममारुतशक्राणामश्विनोश्च महात्मनोः अभिमन्योः कुमारस्य शार्ङ्गपक्षि हिरण्म
यः रथे ध्वजवरो राजंस्तप्तचामीकरोज्वलः घटोत्कचस्य राजेंद्र ध्वजे गृध्रो व्यरोचत अश्वाश्च कामगास्तस्य रावण
स्य पुरा यथा माहेंद्रं च धनुर्दिव्यं धर्मराजे युधिष्ठिरे वायव्यं भीमसेनस्य धनुर्दिव्यमभून्नृप त्रैलोक्यरक्षणार्थाय ब्र
ह्मणा सृष्टमायुधं तद्दिव्यमजरं चैव फाल्गुनार्थाय वै धनुः वैष्णवं नकुलायाथ सहदेवाय चाश्विजं घटोत्कचाय पौ
लस्त्यं धनुर्दिव्यं भयानकं रौद्रमाग्नेयकौबेरं याम्यं गिरिशमेव च पंचानां द्रौपदेयानां धनूरत्नानि भारत रौद्रं धनुर्वरं
श्रेष्ठं लेभे यं रोहिणीसुतः तं तुष्टः प्रददौ रामः सौभद्राय महात्मने एते चान्ये च बहवो ध्वजा हेमविभूषिताः त
त्रादृश्यंत शूराणां द्विषतां शोकवर्द्धनाः तदभूद्ध्वजसंबाधमकापुरुषसेवितं द्रोणानीकं महाराज पटे चित्रमि
वार्पितं शुश्रुवुर्नामगोत्राणि वीराणां संयुगे तदा द्रोणमाद्रवतां राजन् स्वयंवर इवाहवे महाभारते द्रोणपर्वणि
धृतराष्ट्र उवाच व्यथयेयुरिमे सेनां देवानामपि संजयुद्धिषे भवति पूरुषः तस्मिन्नेव च सर्वार्थाः प्रदृश्यंते पृथ
ग्विधाः दीर्घविप्रोषितः कालमरण्ये जटिलोजिनी अज्ञातश्चैव लोकस्य विजहार युधिष्ठिरः स एव महतीं से
नां समावर्त्तयदाहवे किमन्यद्दैवसंयोगान्मम पुत्रस्य चाभवत् युक्त एव हि भाग्येन ध्रुवमुत्पद्यते नरः स यथा क्लिष्ट

प्राप्त इव पेन्मवर्त्तीश्च कोटम् सुरवाय च पाः संप्रयुक्तः क्लिवेवाप [illegible] ६

द्रो० तेनेनन यथास्वपमिछति घूतव्यसनमासाघक्लेशितो हि युधिष्ठिरः सपुनर्भागधेयेन सहायानुपलब्धवान् अधर्मेकैक
२० पालब्धाः काशीकाकोशलाश्च ये चेदयश्चापरे वंगा मामेव समुपाश्रिताः पृथिवी भूयसी तात मम पार्थस्य नो तथा
इति मामब्रवीत्सूत मंदो दुर्योधनः पुरा तस्य सेनासमूहस्य मध्ये द्रोणः सुरक्षितः निहतः पार्षतेनाजौ किमन्यद्भाग
धेयतः मध्ये राज्ञां महाबाहुं सदा युद्धाभिनंदिनं सर्वास्त्रपारगं द्रोणं कथं मृत्युरुपेयिवान् समनुप्राप्तकृच्छ्रोऽहं मोहं प
रमुपागतः भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितुमुत्सहे यन्मां क्षत्ताब्रवीत्तात प्रपश्यन्पुत्रगृद्धिनं दुर्योधनेन तत्
सर्वं प्राप्तं सूत मया सह नृशंसं तु परं तत्स्यात्त्यक्त्वा दुर्योधनं यदि पुत्रशेषं चिकीर्षेयं कृत्स्नं न मरणं व्रजेत् यो हि
धर्मं परित्यज्य भवत्यर्थपरो नरः सोऽस्माच्च हीयते लोकात्क्षुद्रभावं च गच्छति अद्य चाप्यस्य राष्ट्रस्य हतोत्साहस्य संज
य अवशेषं न पश्यामि ककुदे मर्दिते सति कथं स्यादवशेषो हि धुर्ययोरभ्यतीतयोः यौ नित्यमुपजीवामः
क्षमिणौ पुरुषर्षभौ व्यक्तमेव च मे शंस यथा युद्धमवर्तत केऽयुध्यन्के व्यपाकुर्वन्के क्षुद्राः प्राद्रवन्भयात्
धनंजयं च मे शंस यद्यच्चक्रे रथर्षभः तस्माद्भयं नो भूयिष्ठं भ्रातृव्याच्च वृकोदरात् यथासीच्च निवृत्तेषु पांडवेयेषु सं
जय मम सैन्यावशेषस्य संनिपातः सुदारुणः कथं च वो मनस्तात निवृत्तेष्वभवत्तदा मामकानां च ये शूराः के कां
स्तत्र न्यवारयन्॥ ॥महाभारते द्रोणपर्वणि संजय उवाच महद्भैरवमासीन्नः संनिवृत्तेषु पांडवे दृष्ट्वा द्रो
णं छाद्यमानं तैर्भास्करमिवांबुदैः तैश्चोद्धूतं रजस्तीव्रमवचक्रे चमूं तव ततो हतमंमंस्याम द्रोणं दृष्टिपथे हत श्रीराम०
३०

ते तांस्तु शूरान्महेष्वासान्क्रूरं कर्म चिकीर्षतः दृष्ट्वा दुर्योधनस्तूर्णं स्वसैन्यं समचूचुदत यथाशक्ति यथोत्साहं यथासत्त्वं नराधि
पाः वारयध्वं यथायोगं पाण्डवानामनीकिनीः ततो दुर्मर्षणो भीममभ्यगाच्छत्सुतस्तव आरात दृष्ट्वा किरन्बाणैर्दिदृक्षं
स्तस्य जीवितं तं बाणैरवतस्तार क्रुद्धो मृत्युरिवाहवे तं च भीमोनुदद्बाणैस्तदासीत्तुमुलं महत तदीश्वरसमादिष्टाः प्रा
ज्ञाः शूराः प्रहारिणः राज्यं मृत्युभयं त्यक्त्वा प्रत्यतिष्ठन्परान्युधि कृतवर्मा शिनेः पौत्रं द्रोणप्रेप्सुं विशांपते पर्यवार
यदायान्तं शूरः समरशोभिनं तं शैनेयः शरव्रातैः क्रुद्धः क्रुद्धमवारयत कृतवर्मा च शैनेयं मत्तो मत्तमिव द्विपं सैं
धवः क्षत्रधर्माणमायान्तं निशितैः शरैः उग्रधन्वा महेष्वासं यत्तो द्रोणादवारयत क्षत्रधर्मा सिंधुपतेश्छित्वा केतनं
कार्मुके नाराचैर्दशभिः क्रुद्धः सर्वमर्मस्वताडयत अथान्यद्धनुरादाय सैंधवः कृतहस्तवत विव्याध क्षत्रधर्मा
णं रणे सर्वायसैः शरैः युयुत्सुः सितपीताभ्यां क्षुराभ्यामच्छिनद्भुजौ राजानं पाण्डवश्रेष्ठं धर्मात्मानं युधिष्ठि
रं वेलेव सागरं क्षुब्धं मद्रराट् समवारयत तं धर्मराजो बहुभिर्मर्मभिद्भिरवाकिरत मद्रेशस्तं चतुःष
ष्ट्या शरैर्विद्ध्वा ननाद भृशं तस्य नानदतः केतुमुच्चकर्त च कार्मुकं क्षुराभ्यां पाण्डवो ज्येष्ठः स्ततउच्चुक्रुशुर्ज
नाः तथैव राजा बाह्लीको राजानं द्रुपदं शरैः आद्रवन्तं सहानीकः सहानीकं न्यवारयत तद्युद्धमभव
द्घोरं वृद्धयोः सहसेनयोः यथा महायूथपयोर्द्विपयोः संप्रभिन्नयोः विंदानुविंदावावन्त्यौ विराटं मत्स्यमा
र्छेतां सहसैन्यौ महानीकं यथेंद्राग्नी पुरा बलिं तदुत्पिंजलकं युद्धमासीद्देवासुरोपमं मत्स्यानां केकयैः

द्रो० ३१ सान्द्रुममीतास्त्ररथद्विपं नाकुलिंतु शतानीकं भूतकर्मा सभूपतिः अस्यंतमिषुजालानि यांतं द्रोणादवारयत् ततो
नकुलदायादस्त्रिभिर्भल्लैः सुसंशितैः चक्रे विबाहुशिरसं भूतकर्माणमाहवे सुतसोमं तु विक्रांतमायांतं तं शरौ
घिणं द्रोणायाभिमुखं वीरं विविंशतिरवारयत् सुतसोमस्तु संक्रुद्धः स पितृव्यमजिह्मगैः विविंशतिं शरैर्भित्वा
नाभ्यवर्त्तत दंशितः अथ भीमरथं शाल्वमाशुगैरायसैः शितैः षड्भिः शाल्वं नियंतारं मनयद्यमसादनं श्रु
तकर्माणमायांतं मयूरसदृशैर्हयैः चित्रसेनिर्महाराज तव पौत्रमवारयत् तौ पौत्रौ तव दुर्द्धर्षौ परस्परवधै
षिणौ पितृणामर्थसिद्ध्यर्थं चक्रतुर्युद्धमुत्तमं तिष्ठंतमग्रे तं दृष्ट्वा प्रतिविंध्यं महाहवे द्रौणिर्मानं पितुः कुर्वन्मा
र्गणैः समवारयत् तं क्रुद्धः प्रतिविव्याध प्रतिविंध्यः शितैः शरैः सिंहलांगूललक्ष्माणं पितुरर्थे व्यवस्थितं प्रवप
न्निव बीजानि बीजकाले नरर्षभ द्रौणायनिं द्रौपदेयाः शरवर्षैरवाकिरन् आर्जुनिं श्रुतकीर्तिं तु द्रौपदेयं महारथं
द्रोणायाभिमुखं यांतं दौःशासनिरवारयत् तस्य कृष्णसमः कार्ष्णिस्त्रिभिर्भल्लैः सुशंसितैः धनुर्ध्वजं च सूतं च
छित्वा द्रोणांतिकं ययौ यस्तु शूरतमो राजन्नुभयोः सेनयोर्मतः तं पटच्चरहंतारं लक्ष्मणः समवारयत् स लक्ष्मणस्येषुस
नं छित्वा लक्ष्म च भारत लक्ष्मणे शरजालानि विसृजन्बह्वशोभत विकर्णस्तु महाप्राज्ञो याज्ञसेनिं शिखंडिनं पर्यवारयदायां
तं युवानं समरे युवा ततस्तमिषुजालेन याज्ञसेनिः समावृणोत् विधूय तद्बाणजालं बभौ तव सुतो बली अंगदोऽभिमुखं वी
रमुत्तमौजसमाहवे द्रोणायाभिमुखं यांतं शरौघेणाभ्यवारयत् स संप्रहारस्तुमुलस्तयोः पुरुषसिंहयोः सैनिका श्रीराम० ३१

२५ ३४

नांचसर्वेषांतयोश्चप्रीतिवर्द्धनः दुर्मुखस्तुमहेष्वासोवीरंपुरुजितंबली द्रोणायाभिमुखंयांतंवत्सदंतैरवारयत् सदुर्मुखंमु
खेभल्लेनाराचेनाभ्यताडयत् तस्यतद्विबभौवक्त्रंसनालमिवपंकजं कर्णस्तुकैकयान्भ्रातॄन्पंचलोहितकध्वजान् द्रो
णायाभिमुखंयांतः शरवर्षैरवारयन् तेचैनंभृशसंतप्ताः शरवर्षैरवाकिरन् सचतांश्छादयामासुः शरजालैः पुनः
पुनः नैवकर्णोनतेपंचददृशुर्द्रोणसंहताः साश्वसूतध्वजरथाः परस्परशराचिताः पुत्रास्तेदुर्जयश्चैवजयश्चवि
जयश्चह नीलकाश्यपजयत्सेनांस्त्रयस्त्रीन्प्रत्यवारयन् तद्युद्धमभवद्घोरमीक्षितॄप्रीतिवर्द्धनं सिंहव्याघ्रतर
क्षूणांयथाक्षेममहिद्विषभे क्षेममूर्त्तिंबृहंतौतुभ्रातरौसात्वतंयुधि द्रोणायाभिमुखंयांतंशरैस्तीक्ष्णैश्चनक्षतुः त
योस्तस्यचतद्युद्धमत्यद्भुतमिवाभवत् सिंहस्यद्विपमुख्याभ्यांप्रभिन्नाभ्यांयथावने राजानंतुतथांबष्ठमेकंयु
द्धाभिनंदितं चेदिराजः शरानस्यन्क्रुद्धोद्रोणादवारयत् ततोंबष्ठोस्थिभेदिन्यानिरभिद्यच्छलाकया स
त्यक्त्वासशरंचापंरथाद्भूमिमुपागमत् वार्द्धक्षेमिंतुवार्ष्णेयंकृपः शारद्वतः शरैः अक्षुद्रः क्षुद्रकैर्बाणैः क्रु
द्धरूपमवारयत् युध्यंतौकृपवार्ष्णेयौयेपश्यंश्चित्रयोधिनौ तेयुद्धासक्तमनसोनान्यांबुबुधिरेक्रियां सोमदत्तिस्तुराजा
नंमणिमंतमतंद्रितं पर्य्यवारयदायांतंयशोद्रोणस्यवर्द्धयन् ससोमदत्तेस्त्वरितस्तस्येषुसनकेतने पुनः पताकांसू
तंचछत्रंचापातयद्रथात् अथाप्लुत्यरथात्तूर्णंयूपकेतुरमित्रहा साश्वसूतध्वजरथंतंचकर्त्तवरासिना रथंचस्वंसमा
स्थायधनुराद्यायचापरं स्वयंयच्छन्हयान्राजन्व्यधमत्पांडवींचमूं पांड्यमिंद्रइवायांतमसुरान्प्रतिदुर्जयं समर्थः

द्रो० ३२ सायकैर्घोरैर्वृषसेनोऽभ्यवारयत् गदापरिघनिस्त्रिंशपट्टिशायोघनस्वनैः कडंगरैर्भुशुंडीभिः प्रासैस्तोमरसायकैः मुसलैर्मु-
द्गरैश्चक्रैर्भिंडिपालपरश्वधैः पांसुवाताग्निसलिलैर्भस्मलोष्टतृणद्रुमैः आतुदन्प्ररुजन्भंजन्निघ्नन्विद्रावयन्क्षिपन्
सेनां विभीषयन्नायाद्द्रोणप्रेप्सुर्घटोत्कचः तं तु नानाप्रहरणैर्नानायुद्धविशेषणैः राक्षसं राक्षसः क्रुद्धः समाजघ्ने ह्यलं-
बुषः तयोस्तदभवद्युद्धं रक्षोग्रामणिमुख्ययोः तादृक्यादृक्पुरा वृत्तं शंबरामरराजयोः एवं द्वन्द्वशतान्यासन्रथवारणवा-
जिनां पदातीनां च भद्रं ते तदवते यां च संकुले नैतादृशो दृष्टपूर्वः संग्रामो नैव च श्रुतः द्रोणस्याभावभावे तु प्रसक्तानां यथा-
भवत् इदं घोरमिदं चित्रमिदं रौद्रमिति प्रभो तत्र युद्धान्यदृश्यंत प्रततानि बहूनि च॥ ॥महाभारते द्रोणपर्वणि॥ धृतरा-
ष्ट्र उवाच तेष्वेवं संनिवृत्तेषु प्रत्युद्यातेषु भागशः कथं युयुधिरे पार्था मामकाश्च तरस्विनः किमर्जुनश्चाप्यकरोत्संसप्त-
कबलं प्रति संसप्तका वा पार्थस्य किमकुर्वत संजय संजय उवाच तथा तेषु निवृत्तेषु प्रत्युद्यातेषु भागशः स्वयमभ्य-
द्रवद्भीमं नागानीकेन ते सुतः सनाग इव नागेन गोवृषेनेव गोवृषः समाहूतः स्वयं राज्ञा नागानीकमुपाद्रवत् स यु-
द्धकुशलः पार्थो बाहुवीर्येण चान्वितः अभिनत्कुंजरानीकमचिरेणैव मारिष ते गजा गिरिसंकाशाः क्षरंतः सर्व-
तोमदं भीमसेनस्य नाराचैर्विमुखा विमदीकृताः विधमेदभ्रजालानि यथा वायुः समुद्धतः व्यधमत्तान्यनीका-
नि तथैव पवनात्मजः स तेषु विसृजन्बाणान्भीमो नागेष्वशोभत भुवनेष्विव सर्वेषु गभस्तीनुदितो रविः ते भीमबाणैर्निह- श्रीराम
ताः संस्यूता विबभुर्गजाः गभस्तिभिरिवार्कस्य व्योम्नि नानाबलाहकाः तथा गजानां कदनं कुर्वाणमनिलात्मजं क्रुद्धो दुर्योध- ३२

ज्ञा५

नोभ्येत्य प्रत्यविध्यच्छितैः शरैः ततः क्षणेन क्षितिपं क्षतजप्रतिमेक्षणः क्षयं निनीषुर्निशितैर्भीमो विव्याध पत्त्रिभिः सश
रार्पितसर्वांगः क्रुद्धो विव्याध पांडवः नाराचैरर्करश्म्याभैर्भीमसेनं स्मयन्निव तस्य नागं मणिमयं रत्नचित्रध्वजोच्छितं
मद्दाम्भ्याकामुकं चैव क्षिप्रं चिच्छेद पांडवः दुर्योधनं पीड्यमानं दृष्ट्वा भीमेन मारिष क्षुब्धो मयिपुरभ्यागाद्गोमातंगसं
स्थितः तमापतंतं नागेंद्रमंबुदप्रतिमस्वनं कुंभांतरे भीमसेनो नाराचैरर्दयद्भृशं तस्य कायं विनिर्भिद्य न्यमज्जद्धर १४
णीतले ततः पपात द्विरदो वज्राहत इवाचलः तस्यावर्जितनागस्य म्लेच्छस्याधः पतिष्यतः शिरश्चिच्छेद भल्लेन क्षि
प्रकारी वृकोदरः तस्मिन्निपतिते वीरे संप्राद्रवत सा चमूः संभ्रांताश्वद्विपरथा पदातीनवमृद्नती तेष्वनीकेषु भ
ग्नेषु विद्रवत्सु समंततः प्राग्ज्योतिषस्ततो भीमं कुंजरेण समाद्रवत् येन नागेन मघवानजयद्दैत्यदानवान् तद
न्वयेन नागेन भीमसेनमुपाद्रवत् स नागप्रवरो भीमं सहसा समुपाद्रवत् चरणाभ्यामथो द्वाभ्यां संहतेन करेण च
व्यावृत्तनयनः क्रुद्धः प्रमथ्नन्निव पांडवं वृकोदररथं साश्वमविशेषमचूर्णयत् पद्भ्यां भीमोप्यथो धावंस्तस्य गात्रे
ष्वलीयत जानन्नंजलिकावेधं नापक्रामत पांडवः गात्राभ्यंतरगो भूत्वा करेणाताडयन्मुहुः लालयामास तं नागं वध
कांक्षिणमव्ययं कुलालचक्रवन्नागस्तदा तूर्णमथाभ्रमत् नागायुतबलः श्रीमान् कालयानो वृकोदरं भीमोपि निःक्र
म्य ततः सुप्रतीकाग्रतोभवत् भीमं करेणावनम्य जानुभ्यामभ्यताडयत् ग्रीवायां वेष्टयित्वैनं स गजो हंतुमैहत करवे
ष्टं भीमसेनोभ्रमं दत्वाव्यमोचयत् पुनर्गात्राणि नागस्य प्रविवेश वृकोदरः यावत्प्रतिगजायातं स्वबलस्यमवेक्षत भीमोपि

नागमात्रेभ्यो बिनिःसृत्यापययाजवात् ततः सर्वस्य सैन्यस्य नादः समभवन्महान् अहो धिग्निहतो भीमः कुंजरेणेति मारिष
तेन नागेन संत्रस्ता पांडवानामनीकिनी सहसा भ्यद्रवद्राजन् यत्र तस्थौ वृकोदरः ततो युधिष्ठिरो राजा हतं मत्वा वृकोदरं
भगदत्तं सपांचाल्यः सर्वतः समवारयत् तं रथै रथिनां श्रेष्ठाः परिवार्य परंतपाः अवाकिरंछरैस्तीक्ष्णैः शतशोथ सहस्रश
ः सविघातं पृषत्कानामंकुशेन समाचरन् गजेन पांडुपांचालानव्यधमत्पर्वतेश्वरः तदद्भुतमपश्याम भगदत्तस्य संयुगे
तथा वृद्धस्य चरितं कुंजरेण विशांपते ततो राजा दशार्णानां प्राग्ज्योतिषमुपाद्रवत् तिर्यग्यातेन मार्गेन समदेशानु
गामिना तयोर्युद्धं समभवन्नागयोर्भीमरूपयोः सपक्षयोः पर्वतयोर्यथा सद्रुमयोः पुरा प्राग्ज्योतिषपतेर्नागः सं
निवृत्यापसृत्य च पार्श्वे दशार्णाधिपतेर्भित्वा नागमपातयत् तोमरैः सूर्यरश्मिभैर्भगदत्तोथ सप्तभिः जघान द्विरदस्थं
तं शत्रुं प्रचलितासनं उपसृत्य तु राजानं भगदत्तं युधिष्ठिरः रथानीकेन महता सर्वतः पर्यवारयत् स कुंजरस्थो रथिभिः
शुशुभे सर्वतो वृतः पर्वते वनमध्यस्थो ज्वलन्निव हुताशनः मंडलं सर्वतः श्लिष्टं रथिनामुग्रधन्विनां किरतां शरवर्षाणि स
नागः पर्यवर्त्तत ततः प्राग्ज्योतिषो राजा परिगृह्य महागजं प्रेषयामास सहसा युयुधानरथं प्रति शिनेः पौत्रस्य तु रथं परिगृ
ह्य महाद्विपः अभिचिक्षेप वेगेन युयुधानस्त्वथाक्रमत् बृहंतं सैंधवानश्वान्समुत्थाप्याथ सारथिः तस्थौ सात्यकिमासाद्य संप्लु
तस्तं रथं प्रति स तु लब्धांतरं नागस्त्वरितो रथमंडलात् निश्चक्राम ततः सर्वान्परिचिक्षेप पार्थिवान् ते त्वाशुगतिना तेन त्रास्यमाना
नरर्षभाः तमेकं द्विरदं संख्ये मेनिरे शतशो द्विपान् ते गजस्थेन काल्यंते भगदत्तेन पांडवाः ऐरावतस्थेन यथा देवराजेन दानवाः ते श्रीराम०

तेषां प्रद्रवतां भीमः पांचालानामितस्ततः गजवाजिकृतः शब्दः सुमहान्समजायत भगदत्तेन समरे काल्यमानेषु पांडुषु प्राग्ज्योति
षमभिक्रुद्धः पुनर्भीमः समभ्ययात् तस्याभिद्रवतो वाहान्हस्तमुक्तेन वारिणा सिक्त्वा व्यत्रासयन्नागस्ते पार्थमहरंस्ततः
ततस्तमभ्ययात्तूर्णं रुचिपर्वाकृतीसुतः समधंक्षच्छरवर्षेण रथस्थोऽन्तकसंनिभः ततः स रुचिपर्वाणं शरेण नतपर्वणा
सुपर्वा पर्वतपतिर्निन्ये वैवस्वतक्षयं तस्मिन्निपतिते वीरे सौभद्रो द्रौपदीसुताः चेकितानो धृष्टकेतुर्युयुत्सुश्चार्दयन्द्विपं त एनं श
रधाराभिर्धाराभिरिव तोयदाः सिषिचुर्भैरवान्नादान्विनदंतो जिघांसवः ततः पार्ष्ण्यंकुशांगुष्ठैः कृतिना चोदितो द्विपः प्र
सारितकरः प्रापात्स्तब्धकर्णेक्षणो द्रुतं सोऽधिष्ठाय पदा वाहान्युयुत्सोः सूतमारुजत् युयुत्सुस्तु रथाद्राजन्नपक्रम्य त्वरान्वि
तः ततः पांडवयोधास्ते नागराजं शरैर्द्रुतं सिषिचुर्भैरवान्नादान्विनदंतो जिघांसवः पुत्रस्तु तव संभ्रांतः सौभद्रस्याप्लुतो रथं
स कुंजरस्थो विसृजन्निषून्नरिषु पार्थिवः बभौ रश्मीनिवादित्यो भुवनेषु समुत्सृजन् तमार्जुनिर्द्वादशभिर्युयुत्सुर्द
शभिः शरैः त्रिभिस्त्रिभिर्द्रौपदेया धृष्टकेतुश्च विव्यधुः सोऽतियत्नार्पितैर्बाणैराचितो द्विरदो बभौ संस्यूत इव सू
र्यस्य रश्मिभिर्जलदो महान् नियंतुः शिल्पयत्नाभ्यां प्रेरितोऽरिशरार्दितः परिचिक्षेप तान्नागः स रिपून्सव्य
दक्षिणं गोपाल इव दंडेन यथा पशुगणान्वने आवेष्टयत तां सेनां भगदत्तस्तथा मुहुः क्षिप्रं श्येनाभिपन्नानां
वायसानामिव स्वनः बभूव पांडवेयानां भृशं विद्रवतां स्वनः स नागराजः प्रवरांकुशाहतः पुरा सपक्षोऽद्रिवरो यथा नृप
भयं तदा रिपुषु समादधद्भृशं वणिग्जनानां क्षुभितो यथार्णवः ततो ध्वनिर्द्विरदरथाश्वपार्थिवैर्भयाद्द्रवद्भिर्जनितोऽति

५ × नमधुसूदन त्वरमाणो भिनिष्क्रांतो ध्रुवं तस्यैव निःस्वनं। इंद्रादनवरः संख्ये गजयान विशारदः प्रथमो गजयोधानां
पृथिव्यामिति मे म

द्रो० भैरवः क्षितिं वियद्द्यां विदिशो दिशस्तथा समावृणोत्पार्थिव संयुगे ततः स तेन नागप्रवरेण पार्थिवो भृशं जगाहे द्विषताम
३४ नीकिंनी पुरा सुगुप्तां विबुधैरिवाहवे विरोचनो देववरूथिनीमिव भृशं वभौ ज्वलनसमो महाभुजः समावृणोन्मुहु
रपि चैव सैनिकान् नमेकनागं गणशोपयाग्गजाः समंततो द्रुतमथमेनिरेजनाः॥ ॥इति द्रोणपर्वणि भगद
त्तयुद्धे संजय उवाच यन्मां पार्थस्य संग्रामे कर्माणि परिपृच्छसि तच्छृणुष्व महाबाहो पार्थो यदकरोद्रणे रजो दृष्ट्वा
समुद्भूतं श्रुत्वा च गजनिस्वनं भगदत्ते विकुर्वाणे कौंतेयः कृष्णमब्रवीत् यथा प्राग्ज्योतिषो राजा गजेन मतिः सचा
पि द्विरदः श्रेष्ठः सदा प्रतिगजो युधि सर्वशस्त्रातिगः संख्ये कृतकर्मा जितक्लमः सहः शस्त्रनिपातानामग्निस्प
र्शस्य चानघ स पांडवबलं सर्वमद्यैको नाशयिष्यति न चावाभ्यामृतेन्योस्ति शक्तस्तं प्रतिबाधितुं त्वरमाणस्ततो
याहि यतः प्राग्ज्योतिषाधिपः दृप्तं संख्ये द्विपबलाद्वयसा चापि विस्मितं अथैनं प्रेषयिष्यामि बलहंतुः प्रियातिथिं
वचनादथ कृष्णस्तु प्रययौ सव्यसाचिनः दीर्यते भगदत्तेन यत्र पांडववाहिनी तं प्रयांतं ततः पश्चादाह्वयंतो म
हारथाः संसप्तकाः समारोहन् सहस्राणि चतुर्दश दशैव तु सहस्राणि त्रिगर्तानां महारथाः चत्वारि च सह
स्राणि वासुदेवस्य चानुगाः दीर्यमाणां चमूं दृष्ट्वा भगदत्तेन मारिष आहूयमानस्य च तैरभवद्धृदयं द्वि
धा किं नु श्रेयस्करं कर्म भवेदद्येति चिंतयन् इह वा विनिवर्तेयं गच्छेयं वा युधिष्ठिरं तस्य बुद्ध्या वि
चार्यैवमर्जुनस्य कुरूद्वह अभवद्भूयसी बुद्धिः संसप्तकवधे स्थिरा स संनिवृत्तः सहसा कपिप्रवरकेतनः श्रीराम०
३४

एकोरथसहस्राणि निहंतुं वासवीं रणे साहि दुर्योधनस्यासीन्मतिः कर्णस्य चोभयोः अर्जुनस्य वधोपायेते तद्धमकल्पय
न् सतु दोलायमानोभूद्धीमाविनपांडवः बधेनतुनराश्वाणांकरेणूनां मृषा तदा ततः शरसहस्राणि शराणां नतप
र्वणां असृजन्नर्जुनो राजन्संसप्तक महारथाः नैव कुंतीसुतः पार्थो नैव कृष्णो जनार्दनः न हयान रथो राजन् दृश्यंते
स्मशरैश्चिताः तदा मोहमनुप्राप्तः सदेवो वै जनार्दनः ततस्तान्प्रायशः पार्थो ब्रह्मास्त्रेण निजघ्निवान् शतशः पाणा
यश्छिन्नाः सेषुज्यातलकार्मुकाः केतवो वाजिनः सन्ता रथिनश्चापतन्क्षितौ द्रुमाचलाग्रांबुधरैः समकायाः सुकल्पिताः
हतारोहाः क्षितौ पेतुर्द्विपाः पार्थशराहताः विप्रविद्धकुथानागाश्छिन्नभांडाः परासवः सारोहास्तुरगाः पेतुर्म
थितामार्गणैर्भृशं सर्ष्टिप्रासासिनखराः समुद्गरपरस्वधाः विच्छिन्ना बाहवः पेतुर्नृणां भल्लैः किरीटिना वा
लादित्यांबुजेंदूनां तुल्यरूपाणि मारिष संछिन्नान्यर्जुनशरैः शिरांस्युर्व्यां प्रपेदिरे जज्वालालंकृता सेना पत्रिभिः
प्राणिभोजनैः नानारूपैस्तदामित्रान्क्रुद्धे निघ्नति फाल्गुने क्षोभयंतं तदा सेनां द्विरदं नलिनीमिव धनंजयं
भूतगणाः साधुसाध्वित्यपूजयन् दृष्ट्वा तत्कर्म पार्थस्य वासवस्येव माधवः विस्मयं परमं गत्वा प्रांजलिस्तमुवाचह
कर्मैतत्पार्थ शक्रेण यमेन धनदेन च दुष्करं समरे यत्ते कृतमद्येति मे मतिः युगपच्चैव संग्रामे शतशोथसहस्रशः
पतिता एव मे दृष्टाः संसप्तक महारथाः संसप्तकांस्ततो हत्वा भूयिष्ठं ये न च स्थिताः भगदत्ताय याहीति कृष्णं पार्थो
भ्यनोदयत् इति द्रोणपर्वणि संजय उवाच यियासतस्ततः कृष्णः पार्थस्याश्वान्मनोजवान् संप्रैषीद्धेमसंछन्नान्स्ह

द्रो० ३५ राणीकापसव्यत्वरन् तंप्रयांतंकुरुश्रेष्ठं स्वान्भ्रातॄन् द्रोणतापितान् सुशर्माभ्रातृभिःसार्द्धंयुद्धार्थीपृष्ठतोन्वयात् ततः श्वेतहयः
कृष्णमब्रवीदजितंजयः एषमांभ्रातृभिःसार्द्धंसुशर्माह्वयतेच्युत दीर्यतेचोत्तरेणैवतत्सैन्यंमधुसूदन द्वैधीभूतंमनोमेघ
कृतंसंसप्तकैरिदं किंनुसंसप्तकान्हन्मिरक्षाम्यहितार्दितान् इतिमेत्वंमतंवेत्सितत्रकिंसुकृतंभवेत् एवमुक्तस्तुदाशा
र्हःस्यंदनंप्रत्यवर्तयत् येनत्रिगर्त्ताधिपतिःपांडवंसमुपाह्वयत् ततोर्जुनःसुशर्माणंविध्वासप्तभिराशुगैः ध्वजंधनुश्चा
स्यतथाक्षुराभ्यांसमकृंतत त्रिगर्त्ताधिपतेश्चापिभ्रातरंषड्भिराशुगैः साश्वंससूतंत्वरितःपार्थःप्रैषीद्यमक्षयं ततोभु
जगसंकाशांसुशर्माशक्तिमायसीं चिक्षेपार्जुनमादिश्यवासुदेवायतोमरं शक्तिंत्रिभिःशरैश्छित्वातोमरंत्रिभिरर्जुनः
सुशर्माणंशरव्रातैर्मोहयित्वान्यवर्त्तयत् तंवासवमिवायांतंभूरिवर्षशरौघिणां राजँस्तावकसैन्यानांनोग्रंकश्चिदवारय
त् ततोधनंजयोबाणैःसर्वानेवमहारथान् आयाद्विनिघ्नन्कौरव्यान्दहन्कक्षमिवानलः तस्यवेगमसह्यं
तंकुंतीपुत्रस्यधीमतः नाशक्नुवंस्तेसंसोढुंस्पर्शमग्नेरिवप्रजाः संवेष्टयन्ननीकानिशरवर्षेणपांडवः सुपर्णपातव
द्राजन्नायात्प्राग्ज्योतिषंप्रति यत्तदानामयज्जिष्णुर्भरतानामपापिनां धनुःक्षेमकरंसंख्येद्विषतामश्रुवर्द्धनं तदे
वतवपुत्रस्यराजन्दुर्द्यूतदेविनः कृतंक्षत्रविनाशायधनुरायच्छदर्जुनः तथाविक्षोभ्यमाणासापार्थेनतववा
हिनी व्यशीर्यतमहाराजनौरिवासाद्यपर्वतं ततोदशसहस्राणिन्यवर्त्तंतधनुष्मतां मतिंकृत्वार[illegible]
णेक्रूरांवीराजयपराजये व्यपेतहृदयत्रासआपद्धर्म्मातिगोरथौ आर्च्छेन्पार्थागुरुंभारंसर्वभारसहोयुधि पथ्या श्रीराम० ३५

नलवनं क्रुद्धः प्रभिन्नः पथि हायनः मद्गीयान्तह्यायस्तः पार्थो गृह्णन्नभूत्तव तस्मिन्प्रमथिते सैन्ये भगदत्तो नराधिपः तेन
नागेन सहसा धनंजयमुपाद्रवत् तं रथेन नरव्याघ्रः प्रत्यगृह्णाद्धनंजयः स सन्निपातस्तुमुलो बभूव रथनागयोः कल्पि
ताभ्यां यथाशास्त्रं रथेन च गजेन च संग्रामे चेरतुर्वीरौ भगदत्तधनंजयौ ततो जीमूतसंकाशान्नागादिंद्र इव प्रभुः अ
भ्यवर्षच्छरौघेण भगदत्तो धनंजयं स चापि शरवर्षं तच्छरवर्षेण वासविः अप्राप्तमेव चिच्छेद भगदत्तस्य वीर्यवान् ततः
प्राग्ज्योतिषो राजा शरवर्षं निवार्य तत् शरैर्जघ्ने महाबाहुं पार्थं कृष्णं च मारिष ततस्स शरजालेन महतास्यवकीर्य तौ
चोदयामास तं नागं वधायाच्युतपार्थयोः तमापतंतं द्विरदं दृष्ट्वा क्रुद्धमिवांतकं चक्रेऽपसव्यं त्वरितः स्यंदनेन जनार्द
नः तं प्राप्तमपि नेयेष परावृत्तं महाद्विपं सारोहं मृत्युसात्कर्तुं स्मरन् धर्मं धनंजयः स तु नागो द्विपरथान् हयांश्चा
रुज्य मारिष प्राहिणोन्मृत्युलोकाय ततः क्रुद्धो धनंजयः॥ ॥महाभारते द्रोणपर्वणि भगदत्तयुद्धः धृतरा
ष्ट्र उवाच तथा क्रुद्धः किमकरोद्भगदत्तस्य पांडवः प्राग्ज्योतिषो वा पार्थस्य तन्मे संशय यथातथं संजय उवाच प्रा
ग्ज्योतिषेण संसक्तावुभौ दाशार्हपांडवौ मृत्युदंष्ट्रांतिकं प्राप्तौ सर्वभूतानि मेनिरे तथा तु शरवर्षाणि पातयत्य
निशं प्रभो गजस्कंधान्महाराज कृष्णयोः स्यंदनस्थयोः अथ कार्ष्णायसैर्बाणैः पूर्णकार्मुकनिःसृतैः अविध्य
द्देवकीपुत्रं हेमपुंखैः शिलाशितैः अग्निस्पर्शसमाकीर्णा भगदत्तेन चोदिताः निर्भिद्य देवकीपुत्रं क्षितिं जग्मुः सुवाससः
तस्य पार्थो धनुश्छित्वा परिवारं निहत्य च लालयन्निव राजानं भगदत्तमयोधयत् सोऽर्करश्मिनिभांस्तीक्ष्णांस्तोमरान्वै च

द्रो० ३६

र्नुद्दिश्य प्रेरयन्सव्यसाचीतु द्विधैकैकमथाच्छिनत् ततो नागस्य तद्वर्म व्यधमत्पाकशासनिः शरजालेनमहतातच्छीर्यतभूतले
शीर्णवर्मास तु गजः शरैः सुभृशमर्द्दितः बभौ धारानिपाताक्तो व्यभ्रः पर्वतराडिव ततः प्राग्ज्योतिषः शक्तिं हेमदंडामयस्म
यी व्यसृजद्वासुदेवाय द्विधातामर्जुनोच्छिनत् ततश्छत्रं ध्वजं चैव छित्वा राज्ञोर्जुनः शरैः विव्याध दशभिस्तूर्णमुत्स्मयन्प
र्वतेश्वरं सोतिविद्धोर्जुनशरैः सुपुंखैः कंकपत्रिभिः भगदत्तस्ततः क्रुद्धः पांडवस्य जनाधिपः व्यसृजत्तोमरान्मूर्द्धि
श्वेताश्वस्योन्ननादच तैरर्जुनस्य समरे किरीटं परिवर्त्तितं परिहृत्तं कीरीटं तत्स्या[illegible]मयन्नेव पांडवः सुदृष्टः क्रियतां लोक इति
राजानमब्रवीत् एवमुक्तस्तु संक्रुद्धः शरवर्षेण पांडवं अभ्यवर्षत्सगोविंदं धनुरादाय भास्वरं तस्य पार्थो धनुश्छित्वा तूणी
रान्संनिकृत्य च त्वरमाणो द्विसप्तत्या सर्वमर्मस्वताडयत् विद्धस्ततोतिव्यथितो वैष्णवास्त्रमुदीरयत् अभिमंत्र्यांकुशं क्रुद्धो
व्यसृजत्पांडवोरसि विसृष्टं भगदत्तेन तदस्त्रं सर्वघाति वै उरसा प्रतिजग्राह पार्थं संछाद्य केशवः वैजयंत्यभवन्माला
तदस्त्रं केशवोरसि ततोर्जुनः क्लांतमनाः केशवं प्रत्यभाषत अयुध्यमानस्तुरगान्संयंतास्मीति चानघ इत्युक्त्वा पुंडरी
काक्षप्रतिज्ञां स्वां न रक्षसि यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे ततस्त्वयैवं कार्यं स्यान्नतु कार्यं मयि स्थिते सबाणः
सधनुश्चाहं ससुरासुरमानुषान् शक्तो लोकानिमानजेतुं तच्चापि विदितं तव ततोर्जुनं वासुदेवः प्रत्युवाचार्थवद्वचः शृ
णु गुह्यमिदं पार्थ पुरावृत्तं यथानघ चतुर्मूर्त्तिरहं शश्वल्लोकत्राणार्थमुद्यतः आत्मानं प्रतिभज्येह लोकानां हितमादधे
एकामूर्त्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता अपरा पश्यति जगत्कुर्वाणं साध्वसाधुनी अपरा कुरुते कर्म मानुषं लोकमाश्रिता।

श्रीराम०
३६

शेते चतुर्थीं त्वपराणि द्वंद्वं वर्षसहस्रिकीं या सो वर्षसहस्रांते मूर्तिरुत्तिष्ठते मम वरार्हेभ्यो वरान्श्रेष्ठां स्तस्मिकाले ददाति सा
तं तु कालमनुप्राप्तं विदित्वा पृथिवी तदा अयाचत वरं यं मां नरकार्थाय तच्छृणु देवानां दानवानां च अवध्यस्तनयोस्तु
मे उपेतो वैष्णवास्त्रेण तन्मे त्वं दातुमर्हसि एवं वरमहं श्रुत्वा जगत्यास्तनये तदा अमोघमस्त्रं प्रायच्छं वैष्णवं परमं पु
रा अवोचं चैतदस्त्रं वै ह्यमोघं भवतु क्षमे नरकस्याभिरक्षार्थं नैनं कश्चिद्वधिष्यति अनेनास्त्रेण ते गुप्तः सुतः पर
बलार्दनः भविष्यति दुराधर्षः सर्वलोकेषु सर्वदा तथेत्युक्त्वा गता देवी कृतकामा मनस्विनी स चाप्यासीद्दुराधर्षो नर
कः शत्रुतापनः तस्मात्प्राग्ज्योतिषं प्राप्तं तदस्त्रं पार्थ मामकं नास्यावध्योस्ति लोकेषु सेंद्ररुद्रेषु मारिष तन्मया
त्वत्कृते नैतदन्यथा व्यपनापितं विमुक्तं परमास्त्रेण जहि पार्थ महासुरं वैरिणं जहि दुर्धर्षं भगदत्तं सुरद्विषं
यथाहं जघ्निवान्पूर्वं हितार्थे नरकं तथा एवमुक्तस्तदा पार्थः केशवेन महात्मना भगदत्तं शितैर्बाणैः सह
सा समवाकिरत ततः पार्थो महाबाहुरसंभ्रांतो महामनाः कुंभयोरंतरे नागं नाराचेन समार्पयत स समा
साद्य तं नागं बाणो वज्र इवाचलं अभ्यगात्सह पुंखेन वल्मीकमिव पन्नगः स करी भगदत्तेन प्रेर्यमाणो मुहुर्मुहुः न
करोति वचस्तस्य दरिद्रस्येव योषिता स तु विष्टभ्य गात्राणि दंताभ्यामवनिं ययौ नदन्नार्तस्वनं प्राणानुत्ससर्ज महाद्वि
पः अक्ष्णोरुन्मीलनार्थाय बद्धपट्टः सदा नृपः देववाक्यात्प्रचिच्छेद शरेणाशु भृशमर्जुनः छिन्नमात्रे शुके तस्मिन् रुद्ध
नेत्रो बभूव सः ततश्चंद्रार्धबिंबेन बाणेन नतपर्वणा बिभेद हृदयं राज्ञो भगदत्तस्य पांडवः स भिन्नहृदयो राजा भगद

६१

द्रो० न्तः किरीटिना शरासनं शरांश्चैव गतासुः प्रमुमोच च शिरसस्तस्य विभ्रष्टं पपात च वरांशुकं नातिताडनविभ्रष्टं पवाशं नाति
३७ नादिव सहेममालीतपनीयभांडान्यपातनागाद्रिरिसंनिकाशात सपाद्वितो मारुतवेगरुग्णो महीधराग्रादिव कर्णिकार
ः निहत्य तं नरपतिमिंद्रविक्रमं सखायमिंद्रस्य तदैंद्रिराहवे ततोपरांस्तव जयकांक्षिणो नरानवभंजवायुर्वलवान्
द्रुमानिव॥ ॥इतित द्रोणपर्वणि भगदत्तवधः संजय उ० प्रियमिंद्रस्य सततं सखायममितौजसं हत्वा प्राग्ज्यो
तिषं पार्थः प्रदक्षिणमवर्तत ततो गांधारराजस्य सुतौ परपुरंजयौ अर्द्दतामर्जुनं संख्ये भ्रातरौ वृषकाचलौ
सेथ ६ तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च धन्विनौ अविध्येतां महावेगैर्निशितैराशुगैर्भृशं वृषकस्य हयान्सूतं धनुश्छत्रं रथं ध्व
जं तिलशो व्यधमत्पार्थः सौबलस्य शितैः शरैः ततोर्जुनः शरव्रातैर्नानाप्रहरणैरपि गांधारानाकुलांश्चक्रे सौ
बलप्रमुखान्पुनः ततः पंचशतान्वीरान्गांधारानुद्यतायुधान् प्राहिणोन्मृत्युलोकाय क्रुद्धो वाणैर्धनंजयः
हताश्वात्तु रथात्तूर्णमवतीर्य महाभुजः आरुरोह रथं भ्रातुरन्यच्च धनुराददे तावेकरथमारूढौ भ्रातरौ वृषका
चलौ शरवर्षेण बीभत्सुमविध्येतां मुहुर्मुहुः स्यालौ तव महात्मानौ राजानौ वृषकाचलौ भृशं विजघ्नतुः पा
र्थमिंद्रं वृत्रबलाविव लब्धलक्षौ तु गांधारावहतां पांडवं पुनः निदाघवार्षिकौ मासौ लोकं घर्माम्बुभिर्यथा तौ रथस्थौ
नरव्याघ्रौ राजानौ वृषकाचलौ संश्लिष्टांगौ स्थितौ राजन् जघानैकेषुणार्जुनः तौ रथात्सिंहसंकाशौ लोहिताक्षौ महा
भुजौ गतासू पेततुर्वीरौ सोदर्यावेकलक्षणौ तयोर्भूमिं गतौ देहौ रथाद्बंधुजनप्रियौ यशो दश दिशः पुण्यं गमयित्वा व्य
वस्थितौ दृष्ट्वा विनिहतौ संख्ये मातुलावपलायिनौ भृशं मुमुचुरस्राणि पुत्रास्तव विशांपते निहतौ भ्रातरौ दृष्ट्वा श्रीराम०
३७

मायाशतविशारदो कृष्णोसंमोहयन्मायांविदधे शकुनिस्ततः लगुडायोगुडाश्मानः शतघ्न्यः प्रासशक्तयः गदापरिघनिस्त्रिं
शशूलमुद्गरपट्टिशाः संकंपनर्ष्टिनिखरामुसलानिपरश्वधाः क्षुराःक्षुरप्रनालीकावत्सदंतास्थिसंधयः चक्राणिवि
शिखाः प्रासाविविधान्यायुधानिच प्रपेतुःशतशोदिग्भ्यःप्रदिग्भ्यश्चार्जुनंप्रति खरोष्ट्रमहिषाःसिंहाव्याघ्राःसृम
चिल्लिकाःऋक्षाःशालावृकागृध्राःकपयश्चसरीसृपाः विविधानिचरक्षांसिक्षुधितान्यर्जुनंप्रति संक्रुद्धान्यभ्यधा
वंतविविधानिवयांसिच ततोदिव्यास्त्रविच्छूरःकुंतीपुत्रोधनंजयः विसृजन्निषुजालानिसहसातान्यताडयत्
तेहन्यमानाःशूरेणप्रवरैःसायकैर्दृढैः विकुर्वंतोमहारावान्विनेशुःसर्वतोमुखं ततस्तमःप्रादुरभूदर्जुनस्यरं
थंप्रति तस्माच्चतमसोवाचःक्रूराःपार्थमभर्त्सयन् तत्तमोभैरवंघोरंभयकर्तृमहाहवे उत्तमास्त्रेणमहताज्यो
तिषेणार्जुनोवधीत् हतेतस्मिन्जलौघास्तुप्रादुरासन्भयानकाः अंभसस्तस्यनाशार्थमादित्यास्त्रमथार्जुनः
प्रायुंक्तांभस्ततस्तेनप्रायशोस्त्रेणशोषितं एवंबहुविधामायाःसौबलस्यकृताकृताः जघानास्त्रबलेनाशुप्रह
सन्नर्जुनस्तदा तदाहतासुमायासुत्रस्तोर्जुनशराहतः अपायाज्जवनैरश्वैःशकुनिःप्राकृतोयथा ततोर्जुनोस्त्र
विच्छ्रैष्ठ्यंदर्शयन्नात्मनोरिपुः अभ्यवर्षच्छरौघेणकौरवाणामनीकिनीं साहन्यमानापार्थेनतवपुत्रस्यवाहिनी
द्वैधीभूतामहाराजगंगेवासाद्यपर्वतं द्रोणमेवान्वपद्यंतकेचित्तत्रनरर्षभाः केचिद्दुर्योधनंराजन्नर्द्यमानाःकिरीटि
ना नापश्यामततस्त्वेनंसैन्येवैरजसावृतं गांडीवस्यचनिर्घोषःश्रुतोदक्षिणतोमया शंखदुंदुभिनिर्घोषंवादित्राणांच
निःस्वनंगांडीवस्यस्वनोनिर्घोषोव्यतिक्रम्यास्पृशद्दिवं ततःपुनर्दक्षिणतःसंग्रामश्चित्रयोधिनां सुयुद्धंचार्जुनस्यासीदहं

द्रो०
३८

तुद्रोणमन्वयं यौधिष्ठिराण्यनीकानि प्रहरंति ततस्ततः नानाविधान्यनीकानि पुत्राणां तव भारत अर्जुनो व्यधमत्काले दिवीवा
भ्राणि मारुतः तं वासवमिवायांतं भूरिवर्षशरौघिणं महेष्वासा नरव्याघ्रा नोग्रं कश्चिदवारयत् ते हन्यमानाः पार्थे
नात्वदीयाव्यथिता भृशं स्थाने नैव बहवो जग्मुर्विद्रवंतस्ततस्ततः ततस्ते ऽर्जुनेन शरामुक्ताः कंकपत्रास्तनुच्छिदः शलभा इव
संपेतुः संवृण्वाना दिशो दश तुरगं रथिनं नागं पदातिमपि मारिष विनिर्भिद्य क्षितिं जग्मुर्वल्मीकमिव पन्नगाः नच
द्वितीयं व्यसृजत्कुंजरोश्वनरेषु सः पृथगेकशरारुग्णानि पेतुस्ते गतासवः हतैर्मनुष्यैर्द्विरदैश्च सर्वतः शराभिसृष्टै
श्च हयैर्निपातितैः तदाश्वगोमायुबलाभिनादितं विचित्रमायोधशिरो बभूव तत् पिता सुतं त्यजति सुहृद्वरं सुहृत्तथै
व पुत्रः पितरं शरातुरः स्वरक्षणे कृतमतयस्तदा जना स्त्यजंति वाहानपि पार्थपीडिताः॥ ॥महाभारते द्रोणपर्वणि
धृतराष्ट्र उवाच तेष्वनीकेषु भग्नेषु पांडुपुत्रेण संजय चलितानां द्रुतानां च कथमासीन्मनो हि वः अनीकानां प्रभग्नाना
मवस्थानमपश्यतां दुष्करं प्रतिसंधानं तन्ममाचक्ष्व संजय संजय उवाच तथापि तव पुत्रस्य प्रियकामा विशांपते यशः
प्रवीरा लोकेषु रक्षंतो द्रोणमन्वयुः समुद्यतेषु वास्त्रेषु संप्राप्ते च युधिष्ठिरे अकुर्वन्नार्यकर्माणि भैरवे सत्यभीतवत् अं
तरं भीमसेनस्य प्रापतन्नमितौजसः सात्यकेश्चैव वीरस्य धृष्टद्युम्नस्य वा विभो द्रोणं द्रोणमिति क्रूराः पांचालाः समचो
दयन् मा द्रोणमिति पुत्रास्ते कुरून्सर्वानचोदयन् तथा भाग विपर्यासे संग्रामे भैरवे सति वीराः समासदन्वीरानगच्छं
तो भैरवं पुरः अकंपनीयाः शत्रूणां बभूवुस्तत्र पांडवाः अकंपयन्ननीकानि स्मरंतः क्लेशमात्मनः ते त्वमर्षवशं
प्राप्ताः ह्रीमंतः सत्त्वचोदिताः त्यक्त्वा प्राणान्न्यवर्तंत घ्नंतं द्रोणं महाहवे अयसामिव संपातः शिलानामिव चाभवत् दीव्यतां श्री राम०
३८

तुमुले युद्धे द्रोणेरमिततेजसः । न तु स्मरंति संग्राममपि वृद्धास्तथाविधं । दृष्टपूर्वं महाराज श्रुतपूर्वमथापि वा । प्राकंपतेव पृथिवी त
स्मिन्वीरावसादने । निवर्तता बलौघेन महता भारपीडिता । घूर्णतो पि बलौघस्य दिवं स्तब्ध्वेव निःस्वनः । अजातशत्रोस्तत्सैन्य
माविवेश सुभैरवः । समासाद्य तु पांडूनामनीकानि सहस्रशः । द्रोणेन चरता संख्ये प्रभग्नानि शितैः शरैः । तेषु प्रमथ्यमा
नेषु द्रोणेनाद्भुतकर्मणा । पर्यवारयदायांतं द्रोणं सेनापतिः स्वयं । तदद्भुतमभूद्युद्धं द्रोणपांचालयोस्तथा । नैव त
स्योपमा काचिदिति मे निश्चिता मतिः । ततो नीलोनलप्रख्यो दहन्कुरुवाहिनीं । शरस्फुलिंगश्चापार्चिर्दहन्कक्षमि
वानलः । तं दहंतमनीकानि द्रोणपुत्रः प्रतापवान् । पूर्वाभिभाषी सुश्लक्ष्णं स्मयमानोभ्यभाषत । नील किं बहुभिर्द
ग्धैस्तव योधैः शरार्चिषा । मयैकेन हि युध्यस्व क्रुद्धः प्रहर चाशु मां । तं पद्मनिकराकारं पद्मपत्रनिभेक्षणं । काव्याश फो॰
पद्माभमुखो नीलो विव्याध सायकैः । तेनातिविद्धः सहसा द्रौणिर्भल्लैः शितैस्त्रिभिः । धनुर्ध्वजं च छत्रं च द्विषतः सं
न्यकृंतत । स प्लुतः स्यंदनात्तस्मान्नीलश्चर्मवरासिभृत् । द्रोणायनेः शिरः कायाद्धर्तुमैच्छत्पतत्रिवत् । तस्योन्नतांसं
सुनसं सशिरः कायात्सकुंडलं । भल्लेनापाहरद्द्रौणिः स्मयमान इवानघ । संपूर्णचंद्राभमुखः पद्मपत्रनिभेक्षणः ।
प्रांशुरुत्पलपत्राभो निहतो न्यपतद्भुवि । ततः प्रविव्यथे सेना पांडवी भृशमाकुला । आचार्यपुत्रेण हते नीले ज्वलि
ततेजसि । अचिंतयंश्च ते सर्वे पांडवानां महारथाः । कथं नो वासविस्त्रायाच्छत्रुभ्य इति मारिष । दक्षिणेन तु सेनायाः कु
रुते कदनं बली । संसप्तकावशेषस्य नारायण [illegible] बलस्य च ॥ ॥ इति द्रोणपर्वणि संजय ३० प्रति
घातं तु सैन्यस्य नामृष्यत वृकोदरः । सोभ्याहनद्गुरुं षष्ट्या कर्णं च दशभिः शरैः । तस्य द्रोणः शितैर्बाणैस्तीक्ष्णधारैर

तग्र्

द्रो० जिह्मगैः जीवितांतमभिप्रेप्सुर्भीमं एव्याजघानह आनंतर्यमभिप्रेप्सुः षड्विंशत्या समार्पयत् कर्णो द्वादशभिर्बाणैरश्वत्थामा
३९ च सप्तभिः षड्भिर्दुर्योधनो राजा ततएनमथाकिरत् भीमसेनोपि तान्सर्वान्प्रत्यविध्यन्महाबलः द्रोणं पंचाशतेषूणां कर्णं च द
शभिः शरैः दुर्योधनं द्वादशभिर्द्रौणिमष्टभिराशुगैः आरावं तुमुलं कुर्वन्नभ्यवर्त्तत तान्रणे तस्मिन्संत्यजति प्राणान्मृत्युसाधा
रणीकृते अजातशत्रुस्तान्योधान्भीमं त्रातेत्यचोदयत् ते ययुर्भीमसेनस्य समीपममितौजसः युयुधानप्रभृतयो माद्री
पुत्रौ च पांडवौ ते समेत्य सुसंरब्धाः सहिताः पुरुषर्षभाः महेष्वासवरैर्गुप्तं द्रोणानीकं बिभित्सवः समापेतुर्महावी
र्य्या भीमप्रभृतयो रथाः तान्प्रत्यगृह्णादव्यग्रो द्रोणोपि रथिनां वरः महारथानतिबलान्वीरान्समरयोधिनः बा
ह्यं मृत्युभयं त्यक्त्वा तावकाः पांडवान्ययुः सादिनः सादिनोभ्यघ्नंस्तथैव रथिनो रथान् आसीच्छक्त्यसिसंपातो युद्धमा
सीत्परस्वधैः प्रकृष्टमसियुद्धं च बभूव कटकोदयं कुंजराणां च संपाते युद्धमासीत्सुदारुणं अपतत्कुंजरादन्यो ह
यादन्यस्त्ववाक्छिराः नरो बाणविनिर्भिन्नो रथादन्यश्च मारिष तत्रान्यस्य च संमर्दे पतितस्य विवर्म्मणः शि
रः प्रध्वंसयामास वक्षस्याक्रम्य कुंजरः अपरांश्चापरे मृद्नन्वारणाः पतितान्नरान् विषाणैश्चावनिं गत्वा व्यभिंदंत्र रथि
नो बहून् नरांत्रैः कश्चिदपरे विषाणालग्नसंस्रवैः बभ्रमुः समरे नागा मृद्नंतः शतशो नरान् कार्ष्णायसतनुत्राणा
न्नराश्वरथकुंजरान् पतितान्पोथयांचक्रुर्द्विपाः स्थूलनलानिव गृध्रपत्राधिवासांसि शयनानि नराधिपाः ह्रीमंतः कालसं
पक्वाः सुदुःखान्यनुशेरते हंति स्मात्र पिता पुत्रं रथेनाभ्येत्य संयुगे पुत्रश्च पितरं मोहान्निर्मर्य्यादमवर्त्तत रथो भग्नो
ध्वजश्छिन्नश्छत्रमुर्व्यां निपातितं युगार्द्धं छिन्नमादाय प्रदुद्राव तथा हयः सासिबाहुर्निपतितः शिरश्छिन्नं सकुंडलं गजेना श्रीराम०
३९

क्षिप्यवर्तिनारथः संछादितः क्षितौ रथिनाताडितो नागो नाराचेनापतत् क्षितौ सारोहश्चापतद्वाजी गजेनाभ्याहतो भृशं निर्मर्या
दं महयुद्धं समवर्त्तत सुदारुणं हा तात हा पुत्र सखे क्वासि तिष्ठ क्व धावसि प्रहराहर जह्येनं स्मितक्ष्वेडितगर्जितैः इत्येवमुच्च
रन्तिस्म श्रूयन्ते विविधा गिरः नरस्याश्वस्य नागस्य समसज्जत शोणितं उपाशाम्यद्रजो भौमं भीरून्कश्मलमाविशत् च
क्रेणचक्रमासाद्य वीरो वीरस्य संयुगे अतीतेष्वथ पथ्येकाले जहार गदयाशिरः आसीत्केशपरामर्शो मुष्टियुद्धं च दारुणं
नखैर्दन्तैश्च शूराणामद्वीपे द्वीपमिच्छतां तत्राच्छिद्यत शूरस्य सखड्गो बाहुरुद्यतः सधनुश्चापरस्यापि सशरः सांकुशस्त
था आक्रोशदन्यमन्योत्र तथान्यो विमुखो द्रवत् अन्यः प्राप्तस्य चान्यस्य शिरः कायादपाहरत् सशब्दमभ्यधावच्चान्यः श
ब्दादन्योत्रसद्भृशं स्वानन्योथ परानन्यो जघान निशितैः शरैः गिरिशृंगोपमश्चात्र नाराचेन निपातितः मातंगो न्य
पतद्भूमौ नदीरोध इवोष्मगे तथैव रथिनो नागः क्षरन् गिरिरिवासृजत् अभ्यतिष्ठत्पदा भूमौ सहाश्वं सहसा
रथिं शूरान्प्रहरतो दृष्ट्वा कृतास्त्रान्रुधिरोक्षितान् बहून्न्याविशन्मोहो भीरून्हृदयदुर्बलान् सर्वमा
विग्नमभवन्न प्राज्ञायत किंचन सैन्येन रजसा ध्वस्तं निर्मर्यादमवर्त्तत ततः सेनापतिः शीघ्रमयं काल इति ब्रुव
न् कुर्वन्तः शासनं तस्य पांडवा बाहुशालिनः सरो हंसा इवापेतुर्घ्नतो द्रोणरथं प्रति गृह्णीतार्ववतान्योन्यं विभी
ता विनिकृन्तत इत्यासीत्तुमुलः शब्दो दुर्द्धर्षस्य रथं प्रति ततो द्रोणः कृपः कर्णो द्रौणी राजा जयद्रथः विंदा
नुविंदावावन्त्यौ शल्यश्चैतानवारयन् ते त्वार्या धर्मसंरब्धा दुर्निवारा दुरासदाः शरार्त्ता न जहुर्द्रोणं पांचा
लाः पांडवैः सह ततो द्रोणोभिसंक्रुद्धो विसृजञ्छतशः शरान् चेदिपांचालपांडूनामकरोत्कदनं महत् तस्य

द्रो० ज्पातलामिघोषः सुश्रुवे दिक्षु मारिष वसुसंहृदसंकाशस्त्रासयन्मानवान्बहून् एतस्मिन्नंतरे जिष्णुर्जित्वा संसप्त
४० कान्बहून् अभ्ययात्तत्र यत्रासौ द्रोणः पांडवान्प्रमर्दति तांश्च रौद्रान्महावर्त्तान् शोणितोदान्महाह्रदान् तीर्णः संसप्तकान्
हत्वा प्रत्यदृश्यत फाल्गुनः तस्य कीर्त्तिमतो लक्ष्म सूर्यप्रतिमतेजसः दीप्यमानमपश्याम तेजसा वानरध्वजं संसप्त
कसमुद्रं तमुच्छोष्यास्त्रगभस्तिभिः सपांडवयुगांतार्कः कुरूनप्यभ्यतापयत् प्रददाह कुरून्सर्वानर्जुनः शस्त्रतेजसा
युगांते सर्वभूतानि धूमकेतुरिवोत्थितः तेन बाणसहस्रौघैर्गजाश्वरथयोधिनः ताड्यमानाः क्षितिं जग्मुर्मुक्तकेशाः
शरार्दिताः केचिदार्त्तस्वनं चक्रुर्विनेशुरपरे पुनः पार्थबाणहताः केचिन्निपेतुर्विगतासवः तेषामुत्पतितान्कांश्चि
त्पतितांश्च पराङ्मुखान् न जघानार्जुनो योधान्योधव्रतमनुस्मरन् ते विकीर्णरथाश्चित्राः प्रायशश्च पराङ्मुखाः कुरवः क
र्णकर्णेति हाहेति च विचुक्रुशुः तमाधिरथिराक्रंदं विज्ञाय शरणैषिणां मा भैष्टेति प्रतिश्रुत्य ययावभिमुखोऽर्जुनं
स भारत रथश्रेष्ठः सर्वभारतहर्षणः प्रादुश्चक्रे तदाग्नेयमस्त्रमस्त्रविदां वरः तस्य दीप्तशरौघस्य दीप्तचापधरस्य च
शरौघान्शरजालेन विव्याध च धनंजयः तथैवाधिरथिस्तस्य बाणान्ज्वलिततेजसः अस्त्रमस्त्रेण संवार्य प्राणा
दद्विसृजञ्छरान् धृष्टद्युम्नश्च भीमश्च सात्यकिश्च महारथः विव्यधुः कर्णमासाद्य त्रिभिस्त्रिभिरजिह्मगैः अर्जुनास्त्रं
तु राधेयः संवार्य शरवृष्टिभिः तेषां त्रयाणां चापानि चिच्छेद विशिखैस्त्रिभिः ते निकृत्तायुधाः शूरा निर्विषा भुजगा इव
रथान् शक्तीः समुत्क्षिप्य भृशं सिंहा इवानदन् ता भुजाग्रैर्महावेगा निसृष्टा भुजगोपमाः दीप्यमाना महाशक्त्यो जग्मु
राधिरथिं प्रति ता निकृत्य शरव्रातैस्त्रिभिस्त्रिभिरजिह्मगैः ननाद बलवान्कर्णः पार्थाय विसृजञ्छरान् अर्जुनश्चा श्रीराम०
४०

पिराधेयं विव्याध सप्तभिराशुगैः कर्णोदवरजं बाणैर्जघानमनिशितैः शरैः ततः शत्रुंजयं हत्वा पार्थः षड्भिरजिह्मगैः जहार सद्यो भ
ल्लेन विपाठस्य शिरो रथात् पश्यतां धार्तराष्ट्राणामेकेनैव किरीटिना प्रमुखे सूतपुत्रस्य सोदर्या निहतास्त्रयः ततो भीम
ः समुत्पत्य स्वरथाद्वैनतेयवत् वरासिना कर्णपक्षान्जघान दशपंचच पुनस्स्वरथमास्थाय धनुरादाय चापरं विव्या
ध दशभिः कर्णं सूतमश्वांश्च पंचभिः धृष्टद्युम्नोऽथासिवरं चर्म चादाय भास्वरं जघान चंद्रवर्माणं बृहत्क्षत्रं च नैषधं
ततः स्वरथमास्थाय सूतमश्वांश्च पंचभिः धृष्टद्युम्नोऽथासिवरं चर्म चादाय भास्वरं जघान चंद्रवर्माणं पांचाल्यो प
न्यकार्मुकं आदाय कर्णं विव्याध त्रिसप्तत्यानदन्रणे शैनेयोऽप्यन्यदादाय धनुरिंद्रसमद्युतिः सूतपुत्रं चतुःषष्ट्या
विध्वा सिंह इवानदत् भल्लाभ्यां साधुमुक्ताभ्यां छित्वा कर्णस्य कार्मुकं पुनः कर्णं त्रिभिर्बाणैः बाह्वोरुरसि चार्प
यत् ततो दुर्योधनो द्रोणो राजा चैव जयद्रथः निमज्जमानं राधेयमुज्जह्रुः सात्यकार्णवात् पत्यश्वरथमातंगास्त्व
दीयाः शतशोऽपरे कर्णमेवाभ्यधावंत त्रासयानाः प्रहारिणः धृष्टद्युम्नश्च भीमश्च सौभद्रोऽर्जुन एव च नकुलः स
हदेवश्च सात्यकिं जुगुपू रणे एवमेष महारौद्रः क्षयार्थं सर्वधन्विनां तावकानां परेषां च त्यक्त्वा प्राणान भूद्र
णः पदातिरथनागाश्वा गजाश्वरथपत्तिभिः रथिनो नागपत्त्यश्वै रथपत्ती रथद्विपैः अश्वैरश्वा गजैर्नागा रथि
नो रथिभिः सह संयुक्ताः समदृश्यंत पत्तयश्चापि पत्तिभिः एवं सुकलिलं युद्धमासीत्क्रव्यादहर्षणं महद्भि
स्तैरभीतानां यमराष्ट्रविवर्द्धनं ततो हता नररथवाजिकुंजरैरनेकशो द्विपरथपत्तिवाजिनः गजैर्गजा रथिभि
रुदायुधा रथा हयैर्हयाः पत्तिगणोऽस्त्रपत्तयः रथैर्द्विपा द्विरदवरैर्महाहया हयैर्नरा वररथिभिश्च वाजिनः

द्रो० ४१

निरस्तजिह्वा दशनेक्षणाः क्षितौ क्षयं गताः प्रमथितवर्मभूषणाः तथापरे वृकरौर्वैरायुधैर्हता गताः प्रतिभयदर्श
नाः क्षितिं विपोथिता हयगजपाददारिता भृशाकुला रथमुखनेमिभिः क्षताः प्रमोदने श्वापदपक्षिरक्षसां जनक्ष
ये वृत्ते तत्र दारुणे महाबलास्ते कुपिताः परस्परं निषूदयंतः प्रविचेरुरोजसा ततो बले भृशलुलिते परस्परं निरी
क्षमाणे रुधिरौघसंप्लुते दिवाकरेस्तं गिरिमास्थिते शनैरुभे प्रयाते शिबिराय भारत॥ ॥इति श्रीमहाभारते द्रोण
पर्वणि द्वितीयदिनं संजय उवाच पूर्वमस्मासु भग्नेषु फाल्गुनेनामितौजसा द्रोणे च मोघसंकल्पे रक्षिते च युधि
ष्ठिरे सर्वे विध्वस्तकवचास्तावका युधि निर्जिताः रजस्वला भृशोद्विग्ना वीक्षमाणा दिशो दश अवहारं ततः कृत्वा
भारद्वाजस्य संमते लब्धलक्षैः शरैर्भिन्ना भृशावहसि [illegible] ताः रणे श्लाघमानेषु भूतेषु फाल्गुनस्यामितान् गुणान्
न केशवस्य च सौहार्दे कीर्त्यमानेर्जुनं प्रति अभिशस्ता इवाभूवन् ध्यानमूकत्वमास्थिताः ततः प्रभातसमये द्रोणं
दुर्योधनोब्रवीत् प्रणयादभिमानाच्च द्विषद्वृध्या च दुर्मनाः शृण्वतां सर्वयोधानां संरब्धो वाक्यकोविदः नूनं वयं व
ध्यपक्षे भवतो द्विजसत्तम तथा हि नाग्रहीः प्राप्तं समीपे च युधिष्ठिरं इच्छतस्ते न मुच्येत चक्षुःप्राप्तो रणे रिपुः जिघृक्षतो र
क्ष्यमाणः सामरैरपि पांडवैः वरं दत्वा मम प्रीतः पश्चाद्विकृतवानसि आशाभंगं न कुर्वंति भक्तस्यार्याः कथंचन ततोऽ
प्रीतस्तथोक्तः सन् भारद्वाजोब्रवीन्नृप नार्हसे मां तथा ज्ञातुं घटमानं तव प्रिये ससुरासुरगंधर्वाः सयक्षोरगराक्ष
साः नालं लोका रणे जेतुं पाल्यमानं किरीटिना विश्वसृक् यत्र गोविंदः पृतनानीस्तथार्जुनः तत्र कस्य ब
लं क्रामेदन्यत्र त्र्यंबकात्प्रभो सत्यं तात ब्रवीम्यद्य नैतज्जात्वन्यथा भवेत् अद्यैकं प्रवरं कंचित्पातयिष्ये महारथं तं च

श्रीराम० ४१

व्यूहं विधास्यामि योऽमेघोऽत्रिदशैरपि योगेन केनचिद्राजन्नर्जुनस्त्वपनीयतां नह्यज्ञातमसाध्यं वा तस्य संख्येऽस्ति किंच
न तेन ह्युपात्तं सकलं सर्वं ज्ञानमितस्ततः द्रोणेन व्याहृते त्वेवं संसप्तकगणाः पुनः आह्वयन्नर्जुनं संख्ये दक्षिणामभि
तो दिशं ततोऽर्जुनस्याथ परैः सार्द्धं समभवद्रणः तादृशो यादृशो नान्यः श्रुतो दृष्टोपि वा क्वचित् ततो द्रोणेन विहितो
व्यूहो राजन्व्यरोचत चरन्मध्यंदिने सूर्यः प्रतपन्निव दुर्दृशः तं चाभिमन्युर्वचनात्पितुर्ज्येष्ठस्य भारत बिभेद दुर्भिदं संख्ये
चक्रव्यूहमनेकधा स कृत्वा दुष्करं कर्म हत्वा वीरान्सहस्रशः षट्सु वीरेषु संसक्तो दौःशासनिवशं गतः वयं परमसंहृ
ष्टाः पांडवाः शोककर्शिताः सौभद्रे निहते राजन्नवहारमकुर्वत धृतराष्ट्र उवाच पुत्रं पुरुषसिंहस्य संजयाप्राप्तयौव
नं रणे विनिहतं श्रुत्वा भृशं मे दीर्यते मनः दारुणः क्षत्रधर्मोऽयं विहितो धर्मकर्तृभिः यत्र राज्येप्सवः शूरा बा
ले शस्त्रमपातयन् बालमत्यंतसुखिनं विचरंतमभीतवत् कृतास्त्रं बहवो जघ्नुर्ब्रूहि गावल्गणे कथं बिभित्स
ता रथानीकं सौभद्रेणामितौजसा विक्रीडितं यथा संख्ये तन्ममाचक्ष्व संजय संजय उवाच यन्मां पृच्छसि
राजेंद्र सौभद्रस्य निपातनं तत्ते कार्त्स्न्येन वक्ष्यामि शृणु राजन्समाहितः विक्रीडितं कुमारेण यथानीकं बि
भित्सता आरुग्णाश्च यथा वीरा दुःसाध्याश्चापि विप्लवे दावाग्न्यभिपरीतानां भूरिगुल्मतृणद्रुमे वनौकसामि
वारण्ये त्वदीयानामभूद्भयं ॥ ॥ द्रोणपर्वणि संजय उवाच समरेऽत्युग्रकर्माणः कर्मभिर्व्यंजितश्रमाः सकृष्णाः

द्रो०
४२

पांडवाः पंचदैवैरपिदुरासदाः सत्वकर्म्मान्वयैर्बुध्याकीर्त्याचयशसाश्रिय नैवभूतोनभवितानैवतुल्यगुणः पुमान सत्यधर्मरतो
दांतोविप्रपूजादिभिर्गुणैः सदैवत्रिदिवंप्राप्तोराजाकिलयुधिष्ठिरः युगांतेचांतकोराजन्जामदग्न्यश्चवीर्यवान रथस्थो
भीमसेनश्चकथ्यंतेसदृशास्त्रयः प्रतिज्ञाकर्म्मदक्षस्यरणेगांडिवधन्वनः उपमांनाधिगच्छामिपार्थस्यसदृशींक्षितौ
गुरुवात्सल्यमत्यंतंनैभृत्यंविनयोदमः नकुलेप्रातिरूप्यंचनिशौर्यंचनियतानिषट् श्रुतगांभीर्य्यमाधुर्य्यसत्वरूपप
राक्रमैः सदृशोदेवयोर्वीरः सहदेवः किलाश्विनोः येचकृष्णेगुणाःस्फीताः पांडवेषुचयेगुणाः अभिमन्यौकिलैकस्थाः दृ
श्यंतेगुणसंचयाः युधिष्ठिरस्यवीर्येणकृष्णस्यचरितेनच कर्मभिर्भीमसेनस्यसदृशोभीमकर्म्मणः धनंजयस्यरूपेण
विक्रमेणश्रुतेनच विनयात्सहदेवस्यसदृशोनकुलस्यच धृतराष्ट्र उवाच अभिमन्युमहंसूतसौभद्रमपराजितं श्रोतु
मिच्छामिकार्त्स्न्येनकथमायोधनेहतः संजयउ० स्थिरोभवमहाराजशोकंधारयदुर्धरं महांतंबंधुनाशंतेकथयिष्या
मितच्छृणु चक्रव्यूहोमहाराजआचार्य्येणाभिकल्पितः तत्रशक्रोपमाःसर्वेराजानोविनिवेशिताः अवस्थानेषुविन्यस्ता
ःकुमाराःसूर्य्यवर्चसः संघातोराजपुत्राणांसर्वेषामभवत्तदा कृताभिसमयाःसर्वेसुवर्णविकृतध्वजाः रक्तांबरधराःस
र्वेसर्वेरक्तविभूषणाः सर्वेरक्तपताकाश्चसर्वेवैहेममालिनः चंदनागुरुदिग्धांगाःस्रग्विणःसूक्ष्मवाससः सहिताःप
र्य्यधावंतकार्ष्णिंप्रतियुयुत्सवः तेषांदशसहस्राणिबभूवुर्दृढधन्विनां पौत्रंतवपुरस्कृत्यलक्ष्मणंप्रियदर्शनं
अन्योन्यसमदुःखास्तेअन्योन्यसमसाहसाः अन्योन्यंवर्द्धमानाश्चअन्योन्यस्यहितेरताः दुर्योधनस्तु
राजेंद्रसैन्यमध्येव्यवस्थितः कर्णदुःशासनकृपैर्वृतोराजामहारथैः देवराजोपमःश्रीमान ॥ छ

श्रीराम०
४२

श्वेतछत्राभिसंवृतः चामरव्यजनाक्षेपैरुदयन्निव भास्करः प्रमुखे तस्य सैन्यस्य द्रोणोवस्थितनायके सिंधुराजस्तथाति
ष्ठच्छ्रीमान्मेरुरिवाचलः सिंधुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः सुतास्तव महाराज त्रिंशत्त्रिदशसन्निभाः
गांधारराजः कितवः शल्यो भूरिश्रवास्तथा पार्श्वतः सिंधुराजस्य व्यराजंत महारथाः ततः प्रववृते युद्धं तुमुलं लोम
हर्षणं तावकानां परेषां च मृत्युं कृत्वा निवर्त्तनं द्रोणपर्वणि अभिमन्युवधे संजय ३० तदनीकमनाधृष्यं भारद्वाजे
नरक्षितं पार्थाः समभ्यवर्त्तंत भीमसेनपुरोगमाः सात्यकिश्चेकितानश्च धृष्टद्युम्नश्च पार्षतः कुंतिभोजश्च विक्रांतो द्रु
पदश्च महारथः आर्जुनिः क्षत्रधर्मा च बृहत्क्षत्रश्च वीर्यवान चेदिपो धृष्टकेतुश्च माद्रीपुत्रौ घटोत्कचः युधामन्युश्च
विक्रांतः शिखंडी चापराजितः उत्तमौजाश्च दुर्द्धर्षो विराटश्च महारथः द्रौपदेयाश्च संरब्धाः शैशुपालिश्च वीर्यवान
केकयाश्च महावीर्याः संजयाश्च सहस्रशः एते चान्ये च सगणाः कृतास्त्रा युद्धदुर्मदाः समभ्यधावन्सहसा भारद्वा
जं युयुत्सवः समीपे वर्त्तमानांस्तान्भारद्वाजोतिवीर्यवान् असंभ्रांतः शरौघेण महता समवारयत महौघः सलि
लस्येव गिरिमासाद्य दुर्भिदं द्रोणं ते नाभ्यवर्त्तंत वेलामिव जलाशयाः पीड्यमानाः शरै राजन्द्रोणचापविनिःसृतैः
नशेकुः प्रमुखे स्थातुं भारद्वाजस्य पांडवाः तदद्भुतमपश्याम द्रोणस्य भुजयोर्बलं यदेनं नाभ्यवर्त्तंत पांचालाः सं
जयैः सह तमायांतमभिक्रुद्धं द्रोणं दृष्ट्वा युधिष्ठिरः बहुधा चिंतयामास द्रोणस्य प्रतिवारणं अशक्यं तु तम
न्येन द्रोणं मत्वा युधिष्ठिरः अविसह्यं गुरुं भारं सौभद्रे समवासृजत वासुदेवादनवरं फाल्गुनाच्चामितौजसं अब्र
वीत्परवीरघ्नमभिमन्युमिदं वचः एत्य नो नार्जुनो गर्हेद्यथा तात तथा कुरु चक्रव्यूहस्य न वयं विद्म भेदं कथंचन त्वं वा

द्रो० र्जुनो वा कृष्णो वा भिंद्यात्प्रद्युम्न एव वा चक्रव्यूहं महाबाहो पंचमो नोपपद्यते अभिमन्यो वरं तात याचतां दातुमर्हसि पितॄ
४३ णां मातुलानां च सैन्यानां चैव सर्वशः धनंजयो हि नस्तात गर्हयेदेत्य संयुगात् क्षिप्रमस्त्रं समादाय द्रोणानीकं विशात
य अभिमन्युरुवाच द्रोणस्य दृढमव्यग्रमनीकप्रवरं युधि पितॄणां जयमाकांक्षन्नवगाहे विलंबितं उपदिष्टो हि
मे पित्रा योगानीकविशाते [illegible] धनंजयसमं युद्धे त्वां वयं तात संयुगे प्रणिधायानुयास्यामो रक्षंतः सर्वतो
मुखाः भीम उवाच अहं त्वानुगमिष्यामि धृष्टद्युम्नोथ सात्यकिः पां ने नोत्सहे हि विनिर्गंतुमहं कस्यांचिदापदि
युधिष्ठिर उवाच भिंध्यनीकं युधां श्रेष्ठ द्वारं संजनयस्व नः वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि धनंजयसमं
युद्धे त्वां वयं तात संयुगे प्रणिधायानुयास्यामो रक्षंतः सर्वतोमुखाः भीम उवाच अहं त्वानुगमिष्यामि धृष्टद्युम्नो
थ सात्यकिः पांचालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः वयं प्रध्वंसयि
म०१ ष्यामो निघ्नमाना वरान्वरान् अभिमन्युरुवाच अहमेतत्प्रवेक्ष्यामि द्रोणानीकं दुरासदं पतंग इव संक्रुद्धो ज्वलितं जात
वेदसं तत्कर्माद्य करिष्यामि हितं यद्वंशयोर्द्वयोः मातुलस्य च या प्रीतिं करिष्यति पितुश्च मे शिशुनैकेन संग्रामे
काल्यमानानि संघशः द्रक्ष्यंति सर्वभूतानि द्विषत्सैन्यानि वै मया नाहं पार्थेन जातः स्यां न च जातः सुभद्रया यदि मे
संयुगे कश्चिज्जीवितोद्य विमुच्यते यदि चैकरथेनाहं समग्रं क्षत्रमंडलं न करोम्यष्टधा युद्धे न भवाम्यर्जुनात्मजः युधिष्ठि
र उवाच एवं ते भाषमाणस्य बलं सौभद्र वर्द्धतां यस्त्वमुत्सहसे भेत्तुं द्रोणानीकं दुरासदं रक्षितं पुरुषव्याघ्रैर्महेष्वासैर्म
हाबलैः साध्यरुद्रमरुत्कल्पैर्वस्वग्न्यादित्यविक्रमैः संजय उवाच तस्य तद्वचनं श्रुत्वा धर्मराजमचोदयत सुमित्राश्वा
न्रणे क्षिप्रं द्रोणानीकाय चोदय ॥ ॥ इति महाभारते द्रोणपर्वणि अभिमन्युवधे संजय उवाच सौभद्रस्तद्वचः श्रुत्वा धर्मराज श्रीराम०
४३

रस्यधीमतः अचोदयतयंतारंद्रोणानीकायभारत तेनसंचोद्यमानस्तुयाहियाहीतिसारथिः प्रत्युवाचततोराज
न्नभिमन्युमिदंवचः अतिभारोयमायुष्मन्नाहितस्त्वयिपांडवैः संप्रधार्यक्षमंबुद्ध्याततस्त्वंयोद्धुमर्हसि आ
चार्योहिकृतीद्रोणःपरमास्त्रेकृतश्रमः अत्यंतसुखसंवृ[illegible]द्धः त्वंचायुद्धविशारदः ततोभि
मन्युःप्रहसन्सारथिंवाक्यमब्रवीत् सारथेकोन्वयंद्रोणः समग्रंक्षत्रमेववा ऐरावतगतंशक्रंसहामरगणैरहं
अथवारुद्रमीशानंसर्वभूतगणार्चितं योधयेयंरणमुखेनमेक्षत्रेद्यविस्मयः नममैतद्द्विषत्सैन्यंकलामर्हति
षोडशीं अपिविश्वजितंविष्णुंमातुलंप्राप्यसूतज पितरंचार्जुनंयुद्धेनभीर्मामुपयास्यति अभिमन्युश्चतांवाचं
कदर्थीकृत्यसारथेः याहीत्येवाब्रवीदेनंद्रोणानीकायमाचिरं ततःसंचोदयामासहयानाशुत्रिहायनान् नातिहृ
ष्टमनाःसूतोहेमभांडपरिच्छदान् तेप्रेषिताःसुमित्रेणद्रोणानीकायवाजिनः द्रोणमभ्यद्रवन्राजन्महावेगपरा
क्रमं तमुदीक्ष्यतथायांतंसर्वेद्रोणपुरोगमाः अभ्यवर्तंतकौरव्याः पांडवाश्चतमन्वयुः सकर्णिकारप्रवरो
च्छ्रितध्वजःसुवर्णवर्मार्जुनिरर्जुनावरः युयुत्सयाद्रोणमुखान्महारथान्समासदत्सिंहशिशुर्यथाद्विपान् तेवि
शतिपदेयत्ताः संप्रहारंप्रचक्रिरे आसीद्गांगइवावर्तोमुहूर्तमुदधाविव शूराणांयुध्यमानानांनिघ्नतामितरेतरं
संग्रामस्तुमुलोराजन्प्रावर्ततसुदारुणः प्रवर्तमानेसंग्रामेतस्मिन्नतिभयंकरे द्रोणस्यमिषतोव्यूहंभित्वाप्रविश
दार्जुनिः तंप्रविष्टंविनिघ्नंतंशत्रुसंघान्महाबलं हस्त्यश्वरथपत्त्योघाःपरिवव्रुरुदायुधाः नानावादित्रनिनदैःक्ष्वेडितोत्क्रु
ष्टगर्जितैः हुंकारैःसिंहनादैश्चतिष्ठतिष्ठेतिनिस्वनैः घोरैर्हलहलाशब्दैर्मागास्तिष्ठहिमामिति असावहममुत्रेतिप्रव

श्री० दंतिमुद्गरभुशुंडीहस्तैर्नैकैर्जितैर्महोग्रैः क्षुरनेमिस्वर्णैरपि सन्नादयंतो वसुधामभिद्रवरात्रै निं तेषामापततां वीरः शीघ्रयो
४४ धी महाबलः क्षिप्रास्त्रोन्पदधाराराजन्नममेनतामममेसदिभिः तेच्छिद्यमानाविवशानानालिंगैः शितैः शरैः अभिप
तुः सुबहुशोशानमादर्पावर्कं ततस्तेषां शरैरेश्च शरैरावयवैश्चसः आत्मारक्षितिं क्षिप्रं कुशो वेदीमिवाध्वरे व
द्रुगोधांगुलित्राणान्सशरासनसायकान् सासिचर्मांकुशान्मोघ्न्सतोमरपरश्वधान् गदायोहागुड्प्रासान्सष्टितो
मरपट्टिशान् सभिंडिपालैरिघान्सशक्तिवरकंपनान् सप्रतोदमहाशंखान्सकुंतान्सकचग्रहान् समुद्गरक्षेपणी
पान्सपाशपरिघोपलान् सकेयूरान्गदानवाहून्हृद्यगंधानुलेपनान् संचिच्छेदात्रैनितैस्त्रांस्त्वद्दीयानां सहस्रशः
तैः स्फुरद्भिर्महाराजमुक्तमेमहः सुलोहितैः पंकास्यैः पद्मगेच्छिन्नैर्गाप्तैनेवमारिव सुनासाननकेशान्तैरवणैश्चा
रुकुंडलैः संदष्टोष्ठपुटैः क्रोधात्क्षरद्भिः शोणितं बहु सुवाहमुकुटैश्चौषैर्मणिरत्नविराजितैः विनालनलि
नाकारैर्दिवाकारशशिप्रभैः हितप्रियंवदैः कालेवहुभिः पुण्यगंधिभिः द्विषच्छिरोभिः पृथिवीं सवैतस्तार फाल्गु
निः गंधर्वनगराकारान्विधिवत्कल्पितान्रथान् रथाम्सुखान्त्रिवेणून्न्यस्तदंडकवंधुरान् विजघात्रैविचरणान्
विनासादशनानपि दिव्यकोपस्करोपस्थानम्भग्नोपकरणानपि प्रपातितोपस्तरणान्हतायोधान्सहस्रशः
शरैर्विशाकलीकुर्वन्दिक्षुसर्वास्वदृश्यत पुनर्द्विपान्द्विपारोहान्वैजयन्त्यंकुशध्वजान् तूणान्वर्माण्यथ कक्षाग्रै
वेयांम्रूसकंवलान् घंटादंतान्विषाणाग्रौन्छत्रमोताः पदानुगान् शरैर्निशितधाराग्रैः शात्रवाणामशातयत्
वनायुजान्पार्वतीयान्कांवोजान्थ वाह्लिकान् स्थिरवालाधिकोक्षान्यवनान्साधुवाहिनः आरूढान्शिक्षितैर्योधैः श्रीराम०

४४

शस्त्रवृष्टिप्रासपरिघासिभिः विध्वस्तचामरमुखान् विप्रविद्धप्रकीर्णकान् निरस्तजिह्वनयनान्निष्क्रीर्णान्त्रयकृद्घनान् हतारोहान् छिन्न-
घंटान् क्रव्यादगणमोदकान् निकृत्तवर्मकवचान् शकृन्मूत्रासृगाप्लुतान् निपातयन्नश्ववरांस्तावकान्सव्यरोचत
एको विष्णुरिवाचिन्त्यः कृत्वा कर्म सुदुष्करं तथा निर्मथितं तेन त्र्यंगं तव बलं महत् यथासुरबलं घोरं त्र्यम्बकेन महौजसा
कृत्वा कर्म रणे सह्यं परैरार्जुनिराहवे अभिमन्युपदातीघानन्यवधीयानेव सर्वशः एवमेके[illegible]न तां सेनां सौभद्रे-
णाशितैः शरैः भृशं विप्रहतां दृष्ट्वा स्कंदेनेवासुरीं चमूं त्वदीयास्तव पुत्राश्च वीक्षमाणा दिशो दश संशुष्कास्याश्चलन्ने-
त्राः प्रस्विन्ना लोमहर्षिणः पलायनकृतोत्साहा निरुत्साहा द्विषज्जये गोत्रनामभिरन्योन्यं क्रंदंतो विजयैषिणः हता-
न् पुत्रान् पितॄन्भ्रातॄन्बंधून्संबंधिनस्तथा प्रातिष्ठंत समुत्सृज्य त्वरयंतो हयद्विपान्॥ ॥ इति द्रोणपर्वणि अभिम-
न्युवधे संजय उवाच तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रमभ्ययात् ततो रा-
जानमावृत्तं सौभद्रं प्रति संयुगे दृष्ट्वा द्रोणोऽब्रवीद्योधान्परीप्सध्वं नराधिपं पुराभिमन्युर्लक्ष्यं नः पश्यतां हंति वीर्यवान्
तमाद्रवत मा भैष्ट क्षिप्रं रक्षत कौरवं ततः कृतज्ञा बलिनः सुहृदो जितकाशिनः त्रस्यमाना भयाद्वीरं परिवव्रुस्त-
वात्मजं द्रोणो द्रौणिः कृपः कर्णः कृतवर्मा च सौबलः बृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शलः पौरवो वृषसेनश्च
विसृजंतः शितान्बाणान् सौभद्रं शरवर्षेण महता समवाकिरन् संमोहयित्वा तमथ दुर्योधनममोचयन् आस्या-
द्ग्रासमिवाक्षिप्तं ममृषे नार्जुनात्मजः तां छरौघेण महता साश्वसूतान्महारथान् विमुखीकृत्य सौभद्रः सिंहनादमथा-

द्रो० नदत् तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः । नामृष्यन्त सुसंरब्धाः पुनर्द्रोणमुखा रथाः ॥ ततस्तं कोष्ठकीकृत्य रथवं
४५ शेन मारिष विसृजन्त्रिषुजालानि नानालिङ्गानि संघशः । तान्यन्तरिक्षे चिच्छेद सौभद्रस्तु निशितैः शरैः ॥ तांश्चैव प्रति
विव्याध तदद्भुतमिवाभवत् ततस्ते कोपितास्तेन शरैराशीविषोपमैः । परिवव्रुर्जिघांसन्तः सौभद्रमपराजितं समु
द्रमिव पर्यस्तं त्वदीयं तं बलार्णवं दधारैकोऽर्जुनिर्बालो वेलेव भरतर्षभ शूराणां युध्यमानानां निघ्नतामितरेतरं अभि
मन्योः परेषां च नासीत्कश्चित्पराङ्मुखः तस्मिंस्तु घोरे संग्रामे वर्त्तमाने भयंकरे दुःसहो नवभिर्वाणैरभिमन्युमवि
ध्यत दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः विविंशतिश्च सप्त
त्या कृतवर्म्मा च सप्तभिः बृहद्बलस्तथाष्टाभिरश्वत्थामा च सप्तभिः भूरिश्रवास्त्रिभिर्वाणैर्मद्रेशः षड्भिराशुगैः
द्वाभ्यां शराभ्यां शकुनिस्त्रिभिर्दुर्योधनो नृपः स तु तान्प्रतिविव्याध त्रिभिस्त्रिभिरजिह्मगैः नृत्यन्निव म
हाराज चापहस्तः प्रतापवान् ततोऽभिमन्युः संक्रुद्धस्त्रास्यमानस्तवात्मजैः विदर्शयन्वै सुमहच्छिक्षाभ्या
सकृतं बलं गरुडानिलरंहोभिर्यन्तुर्वाक्यकरैर्हयैः दान्तैरश्मकदायादं त्वरमाणोऽभ्यवारयत् विव्याध द
शभिर्वाणैस्तिष्ठ तिष्ठेति चाब्रवीत् तस्याभिमन्युर्दशभिर्हयान्सूतं ध्वजं शरैः बाहू धनुः शिरश्चोर्व्यां स्म
यमानोऽभ्यपातयत् ततस्तस्मिन्हते वीरे सौभद्रेणाश्मकेश्वरे संचचाल बलं सर्वं पलायनपरायणं ततः कर्णः कृ श्रीराम॰

स्त्रिभिस्तानवधीच्छरैः कर्णस्तं पंचविंशत्या नाराचानां समार्पयत् अश्वत्थामा च विंशत्या कृतवर्मा च सप्तभिः सश
रं छितसर्वांगः क्रु ५ ५

यो द्रोणो द्रौणिर्गांधारराट् शलः शल्यो भूरिश्रवाः क्राथः सोमदत्तो विविंशतिः वृषसेनः सुषेणश्च कुंडभेदी प्रतर्दनः वृं
दारको ललित्थश्च प्रबाहुर्दीर्घलोचनः दुर्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन् सोतिविद्धो महेष्वासैरभिमन्युरजि
ह्मगैः शरमादत्त कर्णाय परकायावमर्दनं तस्य भित्वा तनुत्राणं देहं निर्भिद्य चाशुगः प्रविवेश धरणीं वेगाद्वल्मी
कमिव पन्नगः स तेनातिप्रहारेण व्यथितो विह्वलन्निव संचचाल रणे कर्णः क्षितिकंपे यथाचलः तथान्यैर्निशि
तैर्बाणैः सुषेणं दीर्घलोचनं कुंडभेदिं च संक्रुद्धस्त्रिभिस्तानवधीद्बली शाक्रात्मजात्मजः विचरन्ददृशे सैन्ये पाश
हस्त इवांतकः शल्यं च शरवर्षेण समीपस्थमवाकिरत् उदक्रोशन्महाबाहुस्तव सैन्यानि भीषयन् ततः
स विद्धोस्त्रविदा मर्मभिद्भिरजिह्मगैः शल्यो राज... पस्थे निषसाद मुमो... ह च तं हि दृष्ट्वा तथा विद्धं
सौभद्रेण यशस्विना संप्राद्रवच्चमूः सर्वा भारद्वाजस्य पश्यतः संप्रेक्ष्य तं महाबाहुं रुक्मपुंखैः समावृतं
त्वदीयाः प्रपलायंते मृगाः सिंहार्दिता इव स तु रणयशसाभिपूज्यमानः पितृसुरचारणसिद्धयक्षसंघैः
: अवनितलगतैश्च भूतसंघैरतिविबभौ हुतभुग्यथाज्यसिक्तः॥ ॥द्रोणपर्वणि अभिमन्युवधे ॥ धृतरा
ष्ट्र उवाच तथा प्रमथमानं तं महेष्वासमजिह्मगैः आर्जुनिं मामकाः संख्ये के चैनं समवारयन् संजय उ
वाच शृणु राजन्कुमारस्य रणे वि...क्रीडितं महत् बिभित्सतो रथानीकं भारद्वाजेन रक्षितं मद्रेशं सादितं
दृष्ट्वा सौभद्रेणाशुगै रणे शल्यादवरजः क्रुद्धः किरन्बाणान्समभ्ययात् स विध्वा दशभिर्बाणैः साश्वयंतारमा

द्रो० ४६

र्जुनिं उदक्रोशन्महाशब्दं तिष्ठ तिष्ठेति चाब्रवीत् तस्यार्जुनिः शिरो ग्रीवं पाणिपादं धनुर्हयान् छत्रं ध्वजं नियन्तारं त्रिवेणुं
तुल्पमेव च चक्रं युगं चेषां तूणीरं चानुकर्षं च सायकैः पताकां चक्रगोप्तारौ सर्वोपकरणानि च लघुहस्तः प्रचिच्छेद दद्दशे
तं न कश्चन सपपात क्षितौ क्षीणः प्रच्छिन्नाभरणांबरः वायुनेव महाशैलः संभग्नोऽमिततेजसा अनुगास्तस्य वित्रस्ताः प्रा
द्रवन्सर्वतो दिशः आर्जुनेः कर्मतद्दृष्ट्वा संप्रणेदुः समन्ततः नादेन सर्वभूतानि साधु साध्विति भारत शल्यभ्रातर्य
थारुग्णो वहुशस्तस्य सैनिकाः कुलाधिवासनामानि श्रावयंतोऽर्जुनात्मजं अभ्यधावंत संक्रुद्धा विविधायुधपाण
यः रथैरन्यैर्गजैरश्वैरन्ये पद्भिश्चान्ये वलोत्कटाः बाणशब्देन महता रथनेमिस्वनेन च हुंकारैः क्ष्वेडितोत्कृष्टैः सिंह
नादैः सगर्जितैः ज्यातलत्रस्वनैरन्ये गर्जंतोऽर्जुननंदनं ब्रुवंतश्च न नो जीवन्मोक्ष्यसे जीवितादिति तांस्तथा ब्रुव
तो दृष्ट्वा सौभद्रः प्रहसन्निव योऽयः संप्राहरत्पूर्वं तं तं विव्याध पत्रिभिः संदर्शयिष्यन्नस्त्राणि विचित्राणि लघूनि
च आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत वासुदेवादुपात्तं यदस्त्रं यच्च धनंजयात् अदर्शयत तत्कार्ष्णिः कृ
ष्णाभ्यामविशेषयन् दूरतस्तं गुरुं भारं साधयंश्च पुनः पुनः संदधद्विसृजंश्चेषून्निर्विशेषमदृश्यत चाप
मंडलमेवास्य विस्फुरद्दिक्षु दृश्यत सुदीप्तस्य शरत्काले सवितुर्मंडलं यथा ज्याशब्दः शुश्रुवे तस्य तलशब्दश्च दारु
णः महाशनिमुचः काले पयोदस्येव निःस्वनः ह्रीमानमर्षी सौभद्रो मानकृत्प्रियदर्शनः संमिमानयिषुर्वीरा
निष्वस्त्रैश्चाप्ययुध्यत मृदुर्भूत्वा महाराज दारुणः समपद्यत वर्षाभ्यतीतो भगवान् शरदीव दिवाकरः शरान्वि श्रीराम०
४६

चित्रान्सुबहून्रुक्मपुंखाञ्छिलाशितान् मुमोच शातशः क्रुद्धो गभस्तीनिव भास्करः क्षुरप्रैर्वत्सदंतैश्च विपाठैश्च महारथैः
नाराचैरर्द्धनाराचैर्भल्लैरंजलिकैरपि अवाकिरदथानीकं भारद्वाजस्य पश्यतः ततस्तत्सैन्यमभवद्विमुखं शरपीडि
तं ॥ ॥ द्रोणपर्वणि अभिमन्युवधे धृतराष्ट्र उवाच द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च संजय ममपुत्रस्य यत्
सैन्यं सौभद्रः समवारयत् विस्तरेणैव मे शंस सर्वं गावल्गणे पुनः विक्रीडितं कुमारस्य स्कंदस्येवासुरैः सह सं
जय उवाच हंत ते संप्रवक्ष्यामि विमर्दं मतिदारुणं एकस्य च बहूनां च यथासीत्तुमुलो रणः अभिमन्युं कृतो
त्साहः कृतोत्साहानरिंदमान् रथस्थो रथिनः सर्वांस्तावकानभ्यवर्षयत् द्रोणं कर्णं कृपं शल्यं द्रौणिं भोजं बृह
द्बलं दुर्योधनं सौमदत्तिं शकुनिं च महाबलं नानानृपान्नृपसुतान्सैन्यानि विविधानि च अलातचक्रवत्स
र्वांश्चरन्बाणैः समार्पयत् निघ्नन्नमित्रान्सौभद्रः परमास्त्रैः प्रतापवान् अदर्शयत तेजस्वी दिक्षु सर्वासु
भारत तद्दृष्ट्वा चरितं तस्य सौभद्रस्यामितौजसः समकंपत सैन्यानि त्वदीयानि सहस्रशः अथाब्रवीन्महा
प्राज्ञो भारद्वाजः प्रतापवान् हर्षेणोत्फुल्लनयनः कृपमाभाष्य सत्वरं घट्टयन्निव मर्माणि पुत्रस्य तव भारत
अभिमन्युं रणे दृष्ट्वा तदा रणविशारदं एष गच्छति सौभद्रः पार्थानां प्रथितो युवा नंदयन्सुहृदः सर्वान्रा
जानं च युधिष्ठिरं नकुलं सहदेवं च भीमसेनं च पांडवं बंधून्संबंधिनश्चान्यान्मध्यस्थान्सुहृदस्तथा नास्य यु
द्धे समं मन्ये कंचिदन्यं धनुर्द्धरं इच्छन्हन्यादिमां सेनां किमर्थमपि नेच्छति द्रोणस्य प्रीतिसंयुक्तं श्रुत्वा वा

द्रो० ४७ कृपेन वात्मजः आर्जुनिं प्रति संक्रुद्धो द्रोणं दृष्ट्वा स्मयन्निव अथ दुर्योधनः कर्णमब्रवीद्वाह्लिकं नृपः दुःशासनं मद्र
राजं तांस्तथान्यान्महारथान् सर्वे मूर्द्धाभिषिक्तानामाचार्यो ब्रह्मवित्तमः अर्जुनस्य सुतं मूढो नायं हन्तुमिहेच्छति न ह्य
स्य समरे मुच्येदन्तकोप्याततायिनः किमङ्ग पुनरेवान्यो मर्त्यः सत्यं ब्रवीमि वः अर्जुनस्य सुतं त्वेषः शिष्यत्वादभिर
क्षति शिष्याः पुत्राश्च दयितास्तदपत्यं च धर्मिणां संरक्ष्यमाणो द्रोणेन मन्यते वीर्यमात्मनः आत्मसंभावितो मू
ढस्तं प्रमथ्नीत मा चिरं एवमुक्तास्ततो राजा सात्वतीपुत्रमभ्ययुः संरब्धास्ते जिघांसन्तो भारद्वाजस्य पश्यतः दुःशासन
स्ततछ्रुत्वा दुर्योधनवचस्तदा अब्रवीत्कुरुशार्दूलो दुर्योधनमिदं वचः अहमेनं हनिष्यामि महाराज ब्रवीमि ते मि
षतां पाण्डुपुत्राणां पाञ्चालानां च पश्यतां ग्रसिष्याम्यद्य सौभद्रं यथा राहुर्दिवाकरं उत्क्रुश्य चाब्रवीद्वाक्यं कुरुराज
मिदं वचः श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतमानिनौ गमिष्यतः प्रेतलोकं जीवलोकान्न संशयः तौ च श्रुत्वा मृ
तौ व्यक्तं पाण्डोः क्षेत्रोद्भवाः सुताः एकाह्ना ससुहृद्गणाः क्लैब्यात्हास्यन्ति जीवितं तस्मादस्मिन्हते शत्रौ हताः सर्वे
हितास्तव शिवेन मां ध्याहि राजन्नेष हन्मि रिपुं तव एवमुक्त्वा नदन्राजन्पुत्रो दुःशासनस्तव सौभद्रमभ्ययात्क्रु २४
द्धः शरवर्षैरवाकिरत् तमतिक्रुद्धमायान्तं तव पुत्रमरिंदमः अभिमन्युः शरैस्तीक्ष्णैः षड्विंशत्यासमार्पयत् दुः
शासनस्तु संक्रुद्धः प्रभिन्न इव कुंजरः अयोधयत सौभद्रमभिमन्युश्च तं रणे तौ मण्डलानि विचित्राणि रथा
भ्यां सव्यदक्षिणं चरमाणावयुध्येतां रथशिक्षाविशारदौ अथ पणवमृदंगदुन्दुभीनां क्रकचमहानक श्रीराम०
४७

भेरिझर्झराणां निनदमतिभृशं नराः प्रचक्रुर्लब्धवर्णाज्जलोद्भवसिंहनादमिश्रं॥ ॥इति द्रोणपर्वणि अभिमन्यु
वधे संजय उवाच शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितं अभिमन्युः स्मयन्धीमान्दुःशासनमथाब्रवी
त् दिष्ट्या पश्यामि संग्रामे मानिनं शूरमागतं निष्ठुरं त्यक्तधर्माणमाक्रोशनपरायणं यत्सभायां त्वया राज्ञो
धृतराष्ट्रस्य शृण्वतः कोपितः परुषैर्वाक्यैर्धर्मराजो युधिष्ठिरः जयोन्मत्तेन भीमश्च बहुबद्धं प्रभाषितः तच्च
पेदमनुप्राप्तं तस्य कोपान्महात्मनः परवित्तापहारस्य क्रोधस्याप्रशमस्य च लोभस्य ज्ञाननाशस्य द्रोहस्यात्या
हितस्य च पितॄणां मम राज्यस्य हरणस्योग्रधन्विनां तत्त्वयेदमनुप्राप्तं प्रकोपाद्वै महात्मनां सद्यस्योग्रमध
र्मस्य फलं प्राप्नुहि दुर्मते शास्मि त्वाद्य शरैर्वाणैः सर्वसैन्यस्य पश्यतः अद्याहमनृणस्तस्य कोपस्य भवि
तारणे अमर्षितायाः कृष्णायाः कांक्षितस्य च मे पितुः अद्य कौरव्य भीमस्य भविताप्यनृणो युधि नहि
मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणं एवमुक्त्वा महाबाहुर्वाणं दुःशासनान्तकं संदधे परवीरघ्नः का
लाग्न्यनिलवर्चसं तस्योरस्तूर्णमासाद्य जत्रुदेशे विभिद्य तं जगाम सह पुंखेन वल्मीकमिव पन्नगः अथै
नं पंचविंशत्या पुनरेव समार्पयत् शरैरग्निसमस्पर्शैराकर्णसमचोदितैः स गाढविद्धो व्यथितो रथोपस्थ
उपाविशत् दुःशासनो महाराज कश्मलं चाविशन्महत् सारथिस्त्वरमाणस्तु दुःशासनमचेतनं रणमध्या
दपोवाह सौभद्रशरपीडितं पांडवा द्रौपदेयाश्च विराटश्च समीक्ष्य तं पांचालाः केकयाश्चैव सिंहनादमथान

नदन् वादित्राणि वसुषेणेन नानालिंगानि सर्वशः प्रावादयंत संहृष्टाः पांडूनां तत्र सैनिकाः अपश्यन्स्मयमानास्तु सौ
भद्रस्य विचेष्टितं अत्यंत वैरिणां दृप्तं दृष्ट्वा शत्रुं पराजितं धर्ममारुतशक्राणामश्विनोः प्रतिमास्तथा धारयं
तो ध्वजाग्रेषु द्रौपदेया महारथाः सात्यकिश्चेकितानश्च धृष्टद्युम्नशिखंडिनौ केकया धृष्टकेतुश्च मत्स्याः पां
चालाश्च सृंजयाः युक्ता युधिष्ठिरपुरोगमाः अभ्यद्रवंत त्वरितो द्रोणानीकं विभित्सवः ततोऽभवन्महायुद्धं त्वदीयानां
परैः सह जयमाकांक्षमाणानां शूराणामनिवर्तिनां तथा तु सर्वमाने वै संग्रामे तिभयंकरे दुर्योधनो महाराज
राधेयमिदमब्रवीत् पश्य दुःशासनं वीरमभिमन्युवशंगतं प्रतपंतमिवादित्यं निघ्नंतं शात्रवान्रणे अथ
वै तं सुसंरब्धाः सिंहा इव बलोत्कटाः सौभद्रमुद्यतास्त्रातुमभ्यधावत पांडवाः ततः कर्णः शरैस्तीक्ष्णैरभिम
न्युं दुरासदं अभ्यवर्षत संक्रुद्धः पुत्रस्य हितकृत्तव तस्य चानुचरांस्तीक्ष्णैर्विव्याध परमेषुभिः अवज्ञा
पूर्वकं शूरः सौभद्रस्य रणाजिरे अभिमन्युस्तु राधेयं त्रिसप्तत्या शिलीमुखैः अविध्यत्त्वरितो राजन् द्रोणं प्रेप्सु
र्महामनाः तं तथा नाशकत्कश्चिद्द्रोणाद्वारयितुं रथी आरुजंतं रथश्रेष्ठान्वज्रहस्तात्मजात्मजं ततः कर्णो ज
यप्रेप्सुर्मानी सर्वधनुष्मतां सौभद्रं शतशो विध्यदुत्तमास्त्राणि दर्शयन् सोऽस्त्रैरस्त्रविदां श्रेष्ठो रामशिष्यः प्रताप
वान् समरे शत्रुदुर्धर्षमभिमन्युमपीडयत् स तथा पीड्यमानस्तु राधेयेनास्त्रवृष्टिभिः समरेऽमरसंकाशः सौभ
द्रो न व्यसीदत ततः शिलाशितैस्तीक्ष्णैर्भल्लैरानतपर्वभिः छित्त्वा धनूंषि शूराणामार्जुनिः क
र्णमार्दयत धनुर्मंडलनिर्मुक्तैः शरैराशीविषोपमैः सच्छत्रध्वजयंतारं साश्वमाशु स्मयन्निव

पांचालाश्च सृंजयाः पा० ३

कर्णोपिचास्यचिक्षेपवाणान्सन्नतपर्व्वणः असंभ्रान्तश्चतान्सर्वानगृह्णात्फाल्गुनात्मजः ततोमुहूर्त्तात्कर्णस्यवा
णेनैकेनवीर्यवान् सध्वजंकार्मुकंवीरश्छित्वाभूमावपातयत् ततः कृच्छ्रगतंकर्णंदृष्ट्वाकर्णादनंतरः
सौभद्रमभ्ययात्तूर्णंदृढमुद्यम्यकार्मुकं ततउच्चुकुशुः पार्थास्तेषांचानुचराजनाः वादित्राणिचसंज
घ्नुः सौभद्रंचापितुष्टुवुः॥ ॥ द्रोणपर्व्वणिअभिमन्युवधे संजयउवाच सोतिगर्जन्धनुष्पाणिर्ज्यांविक
र्षन्पुनःपुनः तयोर्म्महात्मनोस्तूर्णंरथांतरमवारयत् सोविध्यद्दशभिर्वाणैरभिमन्युंदुरासदं सच्छ
त्रध्वजयंतारंसाश्वमाशुस्मयन्निव पितृपैतामहंकर्म्मकुर्वाणमतिमानुषं दृष्ट्वार्द्दितंशरैःकार्ष्णिंत्व
दीयाहृषिताभवन् तस्याभिमन्युरायम्यस्मयन्नेकेनपत्रिणा शिरः प्रच्यावयामाससतद्रथात्प्रापतद्भुवि
कर्णिकारमिवाधूतंवातेनापतितंनगात् भ्रातरंनिहतंदृष्ट्वाराजन्कर्णोव्यथांययौ विमुखीकृत्य
कर्णंतुसौभद्रः कंकपत्रिभिः अन्यानपिमहेष्वासान्तूर्णमेवाभिदुद्रुवे ततस्तद्विततंसैन्यंहस्त्यश्व
रथपत्तिमत् क्रुद्धोभिमन्युरभिनत्तिग्मतेजामहायशाः कर्णस्तुबहुभिर्वाणैरर्द्यमानोभिमन्युना
अपायाज्जवनैरश्वैस्ततोनीकमभिद्यत शलभैरिवचाकाशंधाराभिरिवचावृते अभिमन्योः श
रैराजन्नप्राज्ञायतकिंचन तावकानांतुयोधानांभारतीभरतर्षभ सकक्षेग्निरिवोत्सृष्टोनिर्द्दहंस्तरसा
रिपून् मध्येभारतसैन्यानामार्जुनिःपर्य्यवर्त्तत रथनागाश्वमनुजानर्द्दयन्निशितैः शरैः सम्प्रविश्य

द्रो०
४९

कृतेऽभूमिं कबंधगणसंकुलं सौभद्रचापप्रभवैर्निकृत्ताः परमेषुभिः स्वानेवाभिमुखान्घ्नंतः प्राद्रवन्जीवितार्थि
नः ते घोरा रौद्रकर्माणो विपाठा बहवः शिताः निघ्नंतो रथनागाश्वान्जग्मुराशु वसुंधरां सायुधाः सांगुलि
त्राणाः सगदाः सांगदा रणे दृश्यंते बाहवश्छिन्ना हेमाभरणभूषिताः शराश्चापानि खड्गाश्च शरीराणि शि
रांसि च सकुंडलानि स्रग्वीणि भूमावासं सहस्रशः सोपस्करैरधिष्ठानैरीषादंडैश्च बंधुरैः अक्षैर्विमथितै
श्चक्रैर्बहुधा पतितैर्युगैः शक्तिचापासिभिश्चैव पतितैश्च महाध्वजैः चर्मचापशरैश्चैव व्यवकीर्णैः समंततः
निहतैः क्षत्रियैरश्वैर्वारणैश्च विशांपते अगम्यरूपा पृथिवी क्षणेनासीत्सुदारुणा वध्यतां राजपुत्राणां क्रं
दतामितरेतरं प्रादुरासीन्महाशब्दो भीरूणां भयवर्द्धनः स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनादयत् सौभद्रश्चा
द्रवत्सेनां घ्नन्वराश्वरथद्विपान् कक्षमग्निरिवोत्सृष्टो निर्दहंस्तरसारिपून् मध्ये भारतसैन्यानामार्जुनिः प्रत्यदृ
श्यत विचरंतं दिशः सर्वाः प्रदिशश्चापि भारत तं तदानीं न पश्यामः सैन्येन रजसावृते आददानं गजाश्वानां नृणां चायू
षि भारत क्षणेन भूयः पश्यामः सूर्यं मध्यंदिने यथा अभिमन्युं महाराज प्रतपंतं द्विषद्गणान् स वासवसमः संख्ये वा
सवस्यात्मजात्मजः अभिमन्युर्महाराज सैन्यमध्ये व्यरोचयत॥ ॥द्रोणपर्वण्यभिमन्युवधे धृतराष्ट्र उवाच बालम
त्यंतसुखिनं स्वबाहुबलदर्पितं युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजं गाहमानमनीकानि सदश्वैस्त्रिहायनैः अपि यौ
धिष्ठिरात्सैन्यात्कश्चिद्दन्वपतद्बली संजय उ० युधिष्ठिरो भीमसेनः शिखंडी सात्यकिर्यमौ धृष्टद्युम्नो विराटश्च द्रुपदश्च स

श्रीराम०
४९

पुत द्द

केकयश्च धृष्टकेतुश्च संरब्धो मत्स्यपाञ्चाल्यपत्तयो तेनैव तु पथा यांतः पितरो मातुलैः सह अभ्यद्रवन्परीप्संतो व्यूढानीकाः
प्रहारिणः तां दृष्ट्वा द्रवतः शूरान्त्वदीया विमुखाभवन् ततस्तद्विमुखं दृष्ट्वा तव सैन्यं महद्बले जामाता तव तेजस्वी संस्तं
भयिपुरा द्रवत् सैंधवस्य महाराजपुत्रो राजा जयद्रथः सपुत्रगृद्धिनः पार्थान्सह सैन्यानवारयत उग्रधन्वा महेष्वासो दिव्यम
स्त्रमुदीरयत् वार्द्धक्षत्रिरुपासेधत्पाण्डवान्द्विपकुंजरः धृतराष्ट्र उ० अतिभारमहं मन्ये सैंधवे संजयाहितं यदेकः पांड
वान्क्रुद्धान्पुत्रप्रेप्सूनवारयत् उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयत अत्यद्भुतमहं मन्ये बलं शौर्यं च सैंधवे तस्य प्र
ब्रूहि मे वीर्यकर्म्मं वाग्र्यं महात्मनः किं दत्तं मे हुतं वा किं सुतप्तमथवा तपः सिंधुराजेन येनैकः पांडवान्समवारयत् संजय उ०
द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः मानात्संतप्तवाञ्राजा वरार्थी सुमहत्तपः इंद्रियाणीन्द्रियार्थेभ्यः प्रियेभ्यः सं
निवर्त्य सः क्षुत्पिपासातपसहः कृशो धमनिसंततः देवमाराधयच्छर्वं गृणन्ब्रह्म सनातनं भक्तानुकंपी भगवांस्त
स्य चक्रे ततो दयां स्वप्नांतेप्यथ चैवाह हरः सिंधुपतेः सुतं वरं वृणीष्व प्रीतोस्मि जयद्रथ किमिच्छसि एवमुक्तस्तु श
र्वेण सिंधुराजो जयद्रथः उवाच प्रणतो रुद्रं प्रांजलिर्नियतात्मवान् पांडवेयानहं संख्ये भीमवीर्यपराक्रमा
न् वारयेयं रथेनैकः समस्तानिति भारत एवमुक्तस्तु देवेशो जयद्रथमथाब्रवीत ददानि ते वरं सौम्य वि
ना पार्थं धनंजयं वारयिष्यसि संग्रामे चतुरः पांडुनंदनान् एवमस्त्विति देवेशमुक्त्वा युध्यत पार्थिवः स तेन वरदा
नेन दिव्येनास्त्रबलेन च एकः संवारयामास पांडवानामनीकिनीं तस्य ज्यातलघोषेण क्षत्रियान्भयमाविशत् परांस्तु

द्रो० ततः सैन्यस्य सर्वस्य परमकोपवत् दृष्ट्वा तु क्षत्रिया भारं सैंधवे सर्वमाहितं उत्क्रुश्याभ्यद्रवन्राजन्येन यौधिष्ठिरं बलं॥ ॥द्रो
५० णपर्वणि श्रीअभिमन्युवधे संजय उवाच यन्मां पृच्छसि राजेंद्र सिंधुराजस्य विक्रमं शृणु तत्सर्वमाख्यास्ये यथा पांडुनयो
धयत् तमूहुर्वाजिनो वश्याः सैंधवाः साधुवाहिनः विकुर्वाणा बृहंतोश्वाः श्वसनोपमरंहसः गंधर्वनगराकारं विधि
ले वत्कल्पितं रथं तस्याभ्यशोभयत्केतुर्वाराहो राजतो महान् श्वेतच्छत्रपताकाभिश्चामरव्यजनेन च स बभौ राजलिं
गैस्तारापतिरिवांबरे मुक्तावज्रमणिस्वर्णैर्भूषितं यदयस्मयं वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृ
तं स विस्फार्य महच्चापं किरन्निषुगणान्बहून् तत्खंडं पूरयामास यद्दारयदर्जुनिः स सात्यकिं त्रिभि
र्बाणैरष्टाभिश्च वृकोदरं धृष्टद्युम्नं तथा षष्ट्या विराटं दशभिः शरैः द्रुपदं पंचभिस्तीक्ष्णैः सप्तभिश्च शि
खंडिनं केकयान्पंचविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः युधिष्ठिरं तु सप्तत्या ततः शेषानपानुदत् इषु
जालेन महता तदद्भुतमिवाभवत् अथास्य सितपीतेन भल्लेनादिश्य कार्मुकं विच्छेद प्रहसन्राजा धर्मपुत्रः
प्रतापवान् अक्ष्णोर्निमेषमात्रेण सोन्यदादाय कार्मुकं विव्याध दशभिः पार्थं तांश्चैवान्यांस्त्रिभिस्त्रिभिः तत्र
स्य लाघवं ज्ञात्वा भीमो भल्लैस्त्रिभिस्त्रिभिः धनुर्ध्वजं च छत्रं च क्षितौ क्षिप्रमपातयत् सोन्यदादाय बलवान्सज्यं
कृत्वा वै कार्मुकं भीमस्यापातयत्केतुं धनुरश्वांश्च मारिष सहतोश्वादवप्लुत्य छिन्नधन्वा रथोत्तमात् सात्यके
राप्लुतो यानं गिर्यग्रमिव केसरी ततस्त्वदीयाः संहृष्टाः साधु साध्विति वादिनः सिंधुराजस्य तत्कर्म प्रेक्ष्या प्र श्रीराम०

५०

द्वैपमद्भुतं संक्रुद्धान्पांडवानेकोयद्धाराशास्त्रतेजसा तत्रस्यकर्मभूतानि सर्वाण्येवाभ्यपूजयन् सौभद्रेणाहते: पू
र्वंमं तराणि निहते दुँपे: पांडुनंदन शीत: पंथा: सैंधवेन निवारिता: यतमानास्तु ते वीरा मत्स्यपांचालकैकया:
पांडवाश्चाभ्यपद्यंत एकैकश्येन सैंधवं यो यो हि यतते भेत्तुं द्रोणानीकं नवाहित: तं तमेव वरं प्राप्य सैंधव: प्रत्यवा
रयत॥ ॥इति द्रोणपर्वणि अभिमन्युवधे संजय उवाच सैंधवेन निरुद्धेषु जयगृद्धिषु पांडुषु सुघोरमभवद्यु
द्धं त्वदीयानां परै: सह प्रविश्य वार्जुनि: सेनां सत्यसंधो दुरासद: अक्षोभयत तेजस्वी मकर: सागरं यथा तं
तथा शरवर्षेण क्षोभयंतमरिंदम यथाप्रधाना: सौभद्रमभ्यपूरयथ सत्तमा: तेषां तस्य च संमर्दो दारुणः सम
पद्यत सृजतां शरवर्षाणि प्रसक्तममितौजसां रथव्रजेन संरुद्धस्तैरमित्रैरथार्जुनि: वृषसेनस्य यंतारं छि
त्वाचिछेद कार्मुकं तस्य विव्याध बलवान् शरैरश्वानजिह्मगै: वातायमानैरथ तैरश्वैरपहृतो रणात् ततो
तरेणाभिमन्योर्यंता वासारयद्रथं रथव्रजास्ततो हृष्टा: साधु साध्विति चुक्रुशु: तं सिंहमिव संक्रुद्धं
प्रमथ्नंतं शरैररीन् आरादायांतमभ्येत्य वशातीयोभ्ययाद्द्रुतं सोभिमन्युं शरै: षष्ट्या रुक्मपुंखैरवाकिर
न् अब्रवीच्च न मे जीवन् जीवतो युधि मोक्ष्यसे तमयस्मयवर्माणमिषुणाहूरपातिना विव्याध युधि सौ
भद्रै: स पपात व्यसु: क्षितौ वीरास्तं निहतं दृष्ट्वा क्रुद्धा: क्षत्रियपुंगवा: परिवव्रुस्तदा राजन्स्तव पौत्रं जिघांसव:
विस्फारयंतश्चापानि नानारूपाण्यनेकश: तद्युद्धमभवद्रौद्रं सौभद्रस्यारिभि: सह तेषां शरान्सेष्वसनान् शरीराणि
शिरांसि च सकुंडलानि स्रग्वीणि क्रुद्धश्चिच्छेद फाल्गुनि: सखड्गा: सांगुलित्राणा: सपट्टिशपरश्वधा:

६२

द्रो० अपरूपंतमुजाश्छिन्नाहेमाभरणभूषिताः स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः वर्मभिश्चर्मभिर्हारैर्मु
५१ कुटैश्छत्रचामरैः अपस्करैरधिष्ठानैरीषादंडकबंधुरैः अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधायुगैः अनु
कर्षैः पताकाभिः रथसारथिवाजिभिः रथैश्च भग्नैर्नागैश्च हतैः कीर्णाभवन्मही नि
हतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः जयगृध्नैर्हताभूमिर्दारुणासमपद्यत दिशोविवरतस्तस्य सर्वा
श्च प्रदिशस्तथा रणेऽभिमन्योः क्रुद्धस्य रूपमन्तरधीयत कांचनंयद्यदस्यासीद्वर्मचाभरणानि च धनु
षश्च शराणां च तन्नापश्याम केवलं तं तदा नाशकत्कश्चिच्चक्षुर्भ्यामभिवीक्षितुं आददानैः शरैर्योधान्मध्ये सू
र्यमवस्थितं द्रोणपर्वणि अभिमन्युवधे संजय उवाच आददानस्तु शूराणामायूंष्यभवदार्जुनिः अंतकः स
र्वभूतानां प्राणान्काल इवागते स शक्र इव विक्रांतः शक्रसूनोः सुतोबली अभिमन्युस्तदानीकं लोडयन्सम
दृश्यत प्रविश्यैव तु राजेंद्र क्षत्रियेंद्रांतकोपमः सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणः सत्यश्रवसि चाक्षि
प्ते त्वरमाणा महारथाः प्रगृह्य विपुलं शस्त्रमभिमन्युमुपाद्रवन् अहं पूर्वमहं पूर्वमिति क्षत्रियपुंगवाः स्पर्द्धमा
नाः समाजग्मुर्जिघांसंतोऽर्जुनात्मजं क्षत्रियाणामनीकानि प्रद्रुतान्यभिधावतां जग्राह तिमिरासाद्य क्षुद्रमत्स्या
निवार्णवे येकेचनागतास्तस्य समीपमपलायिनः नते प्रतिनिवर्तंते समुद्रादिव सिंधवः महाग्राहगृहीते
व वातवेगभयार्दिता समकंपत सा सेना विभ्रष्टा नौरिवार्णवे अथ रुक्मरथो नाम मद्रेश्वरसुतो बली त्र
स्तामाश्वासयन्सेनामत्रस्तो वाक्यमब्रवीत् अलं त्रासेन वः शूरा नैष कश्चिन्मयि स्थिते अहमेनं ग्र
हिष्यामि जीवग्राहं न संशयः एवमुक्त्वा तु सौभद्रमभिदुद्राव वीर्यवान् सुकल्पितेनोह्यमानः स्यंदने श्री राम०
५१

न्वविराजत। सोऽभिमन्युं त्रिभिर्बाणैर्विद्ध्वा वक्षस्यथानदत् त्रिभिश्च दक्षिणे बाहौ सव्ये चानिशितैस्त्रिभिः सत
स्येष्वसनं छित्वा फाल्गुनिः सव्यदक्षिणौ भुजौ शिरश्च तत्स्वक्षि क्षितौ क्षिप्रमपातयत् दृष्ट्वा रुक्मरथं रुग्णं
पुत्रं शल्यस्य मानिनं जीवग्राहं जिघृक्षं तं सौभद्रेण यशस्विना संग्रामदुर्मदा राजन् राजपुत्राः प्रहारिणः
वयस्याः शल्यपुत्रस्य सुवर्णविकृतध्वजाः तालमात्राणि चापानि विकर्षन्तो महाबलाः आर्जुनिं शरवर्षे
ण समन्तात्पर्यवारयन् शूरैः शिक्षाबलोपेतैस्तरुणैरत्यमर्षणैः दृष्ट्वैकं समरे शूरं सौभद्रमपराजितं
छाद्यमानं शरव्रातैर्हृष्टो दुर्योधनोऽभवत् वैवस्वतस्य भवनं गतं ह्येनममन्यत सुवर्णपुंखैरिषुभिर्नाना
लिंगैः सुतेजनैः अदृश्यमार्जुनिं चक्रुस्त्रिभिरेषां ते नृपात्मजाः ससूताश्वध्वजं तस्य स्यंदनं तं च मारिष
आचितं समपश्याम श्वाविधं शलभैरिव स गाढविद्धः क्रुद्धश्च तोत्रैर्गज इवार्दितः गांधर्वमस्त्रमायच्छद्रथ
मायां च भारत अर्जुनेन तपस्तप्त्वा गांधर्वेभ्यो यदाहृतं तुंबुरुप्रमुखेभ्यो वै तेनामोहयताहितान् एकधा शत
धा राजन् दृश्यते स्म सहस्रधा अलातचक्रवत्संख्ये क्षिप्रमस्त्राणि दर्शयन् रथचर्यास्त्रमायाभिर्मोहयित्वा परं
तपः विभेद शतधा राजन् शरीराणि महीक्षितां प्राणाः प्राणभृतां संख्ये प्रेषिता निशितैः शरैः राजन्प्रापुरमुं लोके
शरीराण्यवनीं ययुः धनूंष्यश्वान्नियंतॄंश्च ध्वजान्बाहूंश्च सांगदान् शिरांसि च शितैर्बाणैस्तेषां चिच्छेद फाल्गु
निः चूतारामो यथा भग्नः पंचवर्षः फलोपगः राजपुत्रशतं तद्वत्सौभद्रेण निपातितं क्रुद्धाशीविषसंकाशा

पेषां ४

द्रो० ५२ नसुकुमारान्सुखोचितान् एकेनाभिहतान्दृष्ट्वा भीतोदुर्योधनोभवत् रथिनःकुंजरानश्वान्पदातीनभिनत्ततः
दृष्ट्वादुर्योधनःक्षिप्रमुपायाममर्षितः तयोःक्षणमिवापूर्णःसंग्रामःसमपद्यत अथाभवत्तेविमुखःपुत्रःश
रशताहतः॥ ॥द्रोणपर्वणिअभिमन्युवधे धृतराष्ट्रउवाच यथावदसिमेसूतएकस्यबहुभिःसह संग्रामंतुमु
लंघोरंजयंचैवमहात्मनः अश्रद्धेयमिवाश्चर्यंसौभद्रस्याथविक्रमं किंतुनात्यद्भुतंतेषांधर्मोयेषांव्यपाश्रयः दुर्यो
धनेचविमुखेराजपुत्रशतेहते सौभद्रेप्रतिपत्तिंकांप्रत्यपद्यंतमामकाः संजयउवाच संशुष्कास्याश्चलन्नेत्राः
प्रस्विन्नालोमहर्षिणः पलायनकृतोत्साहानिरुत्साहाद्विषज्जये हतान्भ्रातॄन्पितॄन्पुत्रान्सुहृत्संबंधिबांधवा
न् उत्सृज्योत्सृज्यसमजग्मुस्त्वरयंतोहयद्विपान् तान्प्रभग्नांस्तथादृष्ट्वाद्रोणोद्रौणिर्बृहद्बलः कृपोदुर्योधनःकर्णः
कृतवर्माथसौबलः अभिद्रुताःसुसंक्रुद्धाःसौभद्रमपराजितं तेपिपौत्रेणतेराजन्प्रायशोविमुखीकृताः एकस्तुसु
खसंवृद्धोबाल्याद्दर्पाच्चनिर्भयः इष्वस्त्रविन्महातेजालक्ष्मणोर्जुनिमभ्ययात् तमन्वगेवास्यपितापुत्रगृद्धीन्यवर्तत
अनुदुर्योधनंचान्येन्यवर्तंतमहारथाः तेतमभिषिषिचुर्बाणैर्मेघागिरिमिवांबुभिः सतुतान्प्रममाथैकोविष्वग्वातोयथां
बुदान् पौत्रंतुतवदुर्धर्षंलक्ष्मणंप्रियदर्शनं पितुःसमीपेतिष्ठंतंशूरमुद्यतकार्मुकं अत्यंतसुखसंवृद्धंधनेश्वरसुतो
पमं आससादरणेकार्ष्णिर्मत्तोमत्तमिवद्विपं लक्ष्मणेनतुसंगम्यसौभद्रःपरवीरहा शरैःसुनिशितैस्तीक्ष्णैर्बाह्वोरु
रसिचार्पयत् संक्रुद्धोवैमहाराजदंडाहतइवोरगः पौत्रस्तवमहाराजतवपौत्रमभाषत सुदृष्टःक्रियतां
लोकोमुंलोकंगमिष्यसि पश्यतांबांधवानांत्वांनयामियमसादनं एवमुक्त्वामहाबाहुःसौभद्रःप श्रीराम० ५२

रवीरहा उद्वर्हेमहाबाहुर्निर्मुक्तोरगसन्निभं सततस्यभुजनिर्मुक्तोलक्ष्मणस्यसुदर्शनं सुनसंभ्रमकेशांतंशिरोहृत्वासकुं
डलं लक्ष्मणंनिहतंदृष्ट्वाहाहेत्युच्चुकुशुर्जनाः ततोदुर्योधनःक्रुद्धःप्रियपुत्रेनिपातिते हतैनमितिचुक्रोशक्षत्रिया
न्क्षत्रियर्षभः ततोद्रोणःकृपःकर्णोद्रोणपुत्रोबृहद्बलः कृतवर्माचहार्दिक्यःषड्रथाःपर्यवारयन् तांस्तुविद्ध्वा
शितैर्बाणैर्विमुखीकृत्यचार्जुनिः वेगेनाभ्यपतत्क्रुद्धःसैंधवस्यबृहद्बलं आवव्रुस्तस्यपंथानंगजानीकेनदंशि
ताः कलिंगाश्चनिषादाश्चक्राथपुत्रश्चवीर्यवान् तत्प्रसक्तमिवात्यर्थंयुद्धमासीद्विशांपते ततस्तत्कुंजरानीकंव्यधम
द्दृष्टमार्जुनिः यथावायुर्नित्यगतिर्जलदान्शतशोंबरे ततःक्राथःशरव्रातैरार्जुनिंसमवाकिरत् अथेतरेसंनिवृ
त्ताःपुनर्द्रोणमुखारथाः परमास्त्राणिधुन्वानाःसौभद्रमभिदुद्रुवुः तान्निवार्यार्जुनिर्बाणैःक्राथपुत्रमथार्दय
त् शरौघेणाप्रमेयेनत्वरमाणोजिघांसया सधनुर्बाणकेयूरौबाहूसमुकुटंशिरः सछत्रध्वजयंतारंरथंवा
श्वानपातयत् कुलशीलश्रुतिबलैःकीर्त्यावास्त्रबलेनच युक्तेतस्मिन्हतेवीराःप्रायशोविमुखाभवन्
॥ ॥इतिद्रोणपर्वणिअभिमन्युवधे धृतराष्ट्र उ० तथाप्रविष्टंतरुणंसौभद्रमपराजितं कुलानुरूपंकुर्वा
णंसंग्रामेष्वपराजितं आजानेयैःसुबलिभिर्युक्तमश्वैस्त्रिहायनैः प्लवमानमिवाकाशेकेशूराःसमवारय
न् संजयउवाच अभिमन्युःप्रविश्यैतांस्तावकान्निशितैःशरैः अकरोत्पार्थिवान्सर्वान्विमुखान्पांडुनंदनः तं
तुद्रोणःकृपःकर्णोद्रौणिश्चसबृहद्बलः कृतवर्माचहार्दिक्यःषड्रथाःपर्यवारयन् दृष्ट्वातुसैंधवेभारमतिमात्र

द्रो० समाहितं सैन्यं तव महाराज युधिष्ठिरमथाद्रवत् सोमदत्तिस्तरे वीरम्सम्यवर्षन् शरांबुभिः तालमात्राणि चापानि विक
५३ र्षतो महाबलाः तांस्तु सर्वान्महेष्वासान् सर्वे विद्धा सुनिशितान् व्यंद्भय द्रोणबाणाः सोमदत्तः परवीरहा द्रोणं पंचा
शता विध्यद्विंशत्या चक्ष ह हृदते आशीत्या कृतवर्माणं कृपं षष्ट्या शिलीमुखैः रुक्मपुंखैर्महावेगैः कर्णं समवोदि
तैः अविध्यद्दशभिर्वीरो रथस्थमानमार्जुनिः सकर्णं कर्णिनाकर्णं पीतेन निशितेन च फाल्गुनिर्द्विषतां म
ध्ये विव्याध परमेषुणा पातयित्वा कृपस्याश्वान् तथोभौ पार्ष्णिसारथी अथैनं दशभिर्बाणैः प्रत्यविध्यत्स्तनां
तरे ततो वृंदारकं वीरं कुरूणां कीर्तिवर्द्धनं पुत्राणां तव वीराणां पश्यतामवधीद्बली तं द्रोणः पंचविंशत्या क्षुद्रका
णां समार्पयत् वरं वरममित्राणामारुजंतमभीतवत् स तु बाणैः शितैस्तूर्णं प्रत्यविध्यत मारिष पश्यतां धार्त्तरा
ष्ट्राणामश्वत्थामानमार्जुनिः षष्ट्या शराणां तं द्रौणिस्तिग्मधारैः सुतेजनैः उग्रैर्नाकंपयद्विध्वा मैनाकमिव पर्वतं
स तु द्रौणिं त्रिसप्तत्या हेमपुंखैरजिह्मगैः प्रत्यविध्यन्महातेजा बलवानपकारिणां तस्मिन्द्रोणो बाणशतं पु
त्रगृद्धीन्यपातयत् अश्वत्थामा तथाष्टौ च परीप्सन्पितरं रणे कर्णो द्वाविंशतिं भल्लान् कृतवर्मा च विंशतिं बृहद्बल
स्तु पंचाशत्कृपः शारद्वतो दश तांस्तु प्रत्यवधीत्सर्वान् दशभिर्दशभिः शरैः तैरर्द्यमानः सौभद्रः सर्वतो निशितैः शरैः
तं कोशलानामधिपः कर्णिनाताडयद्धृदि स तस्याश्वान्ध्वजं चापं सूतं चापातयत्क्षितौ अथ कोशलराजस्तु विरथः
खड्गचर्मधृक् इयेष फाल्गुनेः कायाच्छिरो हर्तुं सकुंडलं स कोशलानामधिपं राजपुत्रं बृहद्बलं हृदि विव्याध बाणेन स भि
न्नहृदयोपतत् बभंज च सहस्राणि दश राज्ञां महात्मनां सृजतामशिवा वाचः खड्गकार्मुकधारिणां तथा बृहद्बलं हत्वा सौ श्रीराम० ५३

९१

मद्रेश्वरसुतो विध्वंसमपन्महेष्वासो योधांस्तवशरांबुभिः॥ ॥द्रोणपर्वणि अभिमन्युवधे संजय उवाच सकर्णं
कर्णिनाकर्णपुनर्विव्याधफाल्गुनिः शरैः पंचाशतावैनमविध्यत्कोपयन्भृशं प्रतिविव्याधराधेयस्तावद्भि
रथतंपुनः सतैराचितसर्वांगो बहुशोभतभारत कर्णश्चाप्यकरोत्क्रुद्धो रुधिरोत्पीडवाहिनं कर्णोपि भिन्नवीरः शूरः ति3
शरैश्चित्रो सृगाप्लुतः तावुभौ शरचित्रांगौ रुधिरेणसमुक्षितौ बभूवतुर्महात्मानौ पुष्पिताविवकिंशुकौ अ
थकर्णस्यसचिवान्षट्शूरांश्चित्रयोधिनः साश्वसूतध्वजरथान्सौभद्रो निजघानह तथेतरान्महेष्वासा
न्दशभिर्दशभिः शरैः प्रत्यविध्यदसंभ्रांतस्तदद्भुतमिवाभवत् मागधस्यतथापुत्रं हत्वाषड्भिरजिह्मगैः
साश्वंससूतंतरुणमश्वकेतुमपातयत् मार्त्तिकावतिकंभोजंततःकुंजरकेतनं क्षुरप्रेणसमुन्मथ्यनना
दविसृजनशरान् तस्यदौःशासनिर्विद्ध्वाचतुर्भिश्चतुरोहयान् सूतमेकेनविव्याधदशभिश्चार्जुनात्मजं
ततोदौःशासनिंकार्ष्णिर्विद्ध्वासप्तभिराशुगैः संरंभाद्रक्तनयनोवाक्यमुच्चैरथाब्रवीत् पितातवाहवंत्यक्त्वा
गतःकापुरुषोयथा दिष्ट्यात्वमपिहिजानीषेयोद्धुंनत्वद्यमोक्ष्यसे एतावदुक्त्वावचनंकर्मारपरिमार्जितं ना
राचंविससर्जास्मैतंद्रौणिस्त्रिभिराछिनत् तस्यार्जुनिर्ध्वजंछित्वाशल्यंत्रिभिरताडयत् तंशल्योनवभिर्बाणैर्गा
र्ध्रपत्रैरताडयत् हृदयसंभ्रांतवद्राजंस्तदद्भुतमिवाभवत् तस्यार्जुनिर्ध्वजंछित्वाहत्वोभौपार्ष्णिसारथी तंविव्याधाय
सैःषड्भिःसोपाक्रामद्रथांतरं शत्रुंजयंचंद्रकेतुंमेघवेगंसुवर्चसं सूर्यभासंचपंचैतान्हत्वाविव्याधसौबलं तंसौब
लस्त्रिभिर्विद्ध्वादुर्योधनमथाब्रवीत् सर्वएनंनिमथ्नीमः पुरैकैकंहिनस्तिनः अथाब्रवीत्पुनर्द्रोणंकर्णोवैकर्तनो

रणे पुत्रस्य सर्वांस्त्वमथ्नातिवृत्तस्यस्य वधमाश्रुतः ततो द्रोणो महेष्वासः सर्वास्तानभ्यभाषत अस्ति चास्यांतरं किंचित्कु
मारस्याथ पश्यतः आवंत्यस्यांतरं त्वद्य चरंतः सर्वतो दिशं शीघ्रतां नरसिंहस्य पांडवेयस्य पश्यत धनुर्मंडलमे
वास्य रथमार्गेषु दृश्यते संदधानस्य विशिखान्शीघ्रं चैव विमुंचतः आरुजन्नपि मे प्राणान्मोहयन्नपि सायकैः
प्रहर्षयति मां भूयः सौभद्रः परवीरहा अतिमानंदयत्येष सौभद्रः परवीरहा अंतरं यस्य संरब्धा न पश्यंति महा
रथाः अस्यतो लघुहस्तस्य दिशः सर्वा महेषुभिः न विशेषं प्रपश्यामि रणे गांडीवधन्वनः अथ कर्णः पुनर्द्रोण
माहार्जुनिशराहतः स्थातव्यमिति तिष्ठामि पीड्यमानोभिमन्युना तेजस्विनः कुमारस्य शराः परमदारुणाः क्षि
ण्वंति हृदयं मेद्य घोराः पावकतेजसः तमाचार्योब्रवीत्कर्णं शनकैः प्रहसन्निव अभेद्यमस्य कवचं युवा चाशु
पराक्रमः उपदिष्टा मया चास्य पितुः कवचधारणा तामेष निखिलां वेत्ति ध्रुवं परपुरंजयः शक्यं त्वस्य धनुश्छे
त्तुं ज्यां च बाणैः समाहितैः अभीषूंश्च हयांश्चैव तथोभौ पार्ष्णिसारथी एतत्कुरु महेष्वास राधेय यदि शक्ष्यसे अ
थैनं विमुखीकृत्य पश्चात्प्रहरणं कुरु सधनुष्को न शक्योयमपि जेतुं सुरासुरैः विरथं विधनुष्कं च कुरुष्वैनं य
दीच्छसि तदाचार्यवचः श्रुत्वा कर्णो वैकर्त्तनस्त्वरन् अस्यतो लघुहस्तस्य पृषत्कैर्धनुराच्छिनत् अश्वानस्या
वधीद्भोजो गौतमः पार्ष्णिसारथी शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन् त्वरमाणास्त्वराकाले विरथं षण्महारथा २४
: शरवर्षैरकरुणा बालमेकमवाकिरन् स छिन्नधन्वा विरथः स्वधर्ममनुपालयन् खड्गचर्मधरः श्रीमानुत्पपात वि
हायसा मार्गैः स कैशिकाद्यैश्च लाघवेन बलेन च आर्जुनिर्व्यचरद्व्योम भृशं वै पक्षिराडिव मय्येव निपतत्येषः सासिरित्यूर्द्ध
दृष्टयः विव्यधुस्तं महेष्वासं समरे छिद्रदर्शिनः तस्य द्रोणोच्छिनन्मुष्टौ खड्गं मणिमयत्सरुं क्षुरप्रेण महातेजास्त्वरमाणः सपत्न

स्वर्ए १

त जित्रणे येयो निशितैर्गैः शरौर्व्यधमत् धर्मेचोत्तमं असिचर्मेषु पूर्णाग्रः सोऽन्तरिक्षात्पुनः क्षितिं आस्थितश्चक्रमुद्यम्य द्रो
णं क्रुद्धोऽभ्यधावत सचक्ररेणूज्ज्वलशोभितांगो बभावतीवोज्ज्वलचक्रपाणिः रणेऽभिमन्युः क्षणमास रौद्रः सवासुदेवा
नुकृतिं प्रकुर्वन् स्रुतरुधिरकृतैकरागवस्त्रो भृकुटिपुटाकुटिलोतिसिंहनादः प्रभुरमितबलो रणेऽभिमन्युर्नृपवरम
ध्यगतो भृशं व्यराजत् इति द्रोणपर्वणि अभिमन्युवधे॥ ॥संजय उवाच विष्णोः स्वसुर्नन्दकरः सविष्ण्वायुधभूषण
ः रराजातिरथः संख्ये जनार्दन इवापरः मारुतोद्धूतकेशांतमुद्यतासिवरायुधं वपुः समीक्ष्य पृथ्वीशा दुःसमीक्षं सुरैर
पि तच्चक्रं भृशमुद्विग्नाः संचिच्छिदुरनेकधा महारथस्ततः कार्ष्णिः सजग्राह महागदां विधनुःस्यंदनासिस्तैर्विचक्रश्चा
रिभिः कृतः अभिमन्युर्गदापाणिरश्वत्थामानमार्दयत् सगदामुद्यतां दृष्ट्वा ज्वलंतीमशनीमिव अपाक्रामद्रथो
पस्थाद्विक्रमांस्त्रीन्नरर्षभः तस्याश्वान्गदया हत्वा तथोभौ पार्ष्णिसारथी शराचितांगः सौभद्रः श्वाविद्वत्समदृश्य
त ततः सुबलदायादं कालिकेयमपोथयत् जघान चास्यानुचरान्सप्तसप्ततिभिः पुनर्ब्रह्मवसातीयान्जघान रथि
नो दश केकयानां रथान्सप्त हत्वा च दश वै कुंजरान् दौःशासनिरथं साश्वं गदया समपोथयत् ततो दौःशासनिः क्रु
द्धो गदामुद्यम्य मारिष अभिदुद्राव सौभद्रं तिष्ठ तिष्ठेति चाब्रवीत् तावुद्यतगदौ वीरावन्योन्यवधकांक्षिणौ
भ्रातृव्यौ संप्रजह्राते पुरेव त्र्यंबकांधकौ तावन्योन्यं गदाग्राभ्यामाहत्य पतितौ क्षितौ इंद्रध्वजाविवोत्सृष्टौ रणमध्ये
परंतपौ दौःशासनिरथोत्थाय कुरूणां कीर्तिवर्धनः उत्तिष्ठमानं सौभद्रं गदया मूर्ध्न्यताडयत् गदावेगेन महता
व्यायामेन च मोहितः विचेता न्यपतद्भूमौ सौभद्रः परवीरहा एवं विनिहतो राजन्नेको बहुभिराहवे क्षोभयित्वा चमूं स

द्रो० दीनलिनीमिव कुंजरः अशोभत हतो वीरो व्याधैर्वनगजो यथा तं तथा पतितं शूरं तावकाः पर्यवारयन् दावं दग्ध्वा यथा शां
५५ तं पावकं शिशिरात्यये विमृद्य तरुशृंगाणि संनिवृत्तमिवानिलं अस्तंगतमिवादित्यं तप्त्वा भारतवाहिनीं उपप्लुतं यथा
सोमं संशुष्कमिव सागरं पूर्णचंद्राभवदनं काकपक्षवृताक्षिकं तं भूमौ पतितं दृष्ट्वा तावकास्ते महारथाः मुदा परमया युक्ता
श्चुक्रुशुः सिंहवन्मुहुः आसीत्परमको हर्षस्तावकानां विशांपते इतरेषां तु वीराणां नेत्रेभ्यः प्रापतज्जलं अंतरिक्षे च भूता
नि प्राक्रोशंत विशांपते दृष्ट्वा निपतितं वीरं च्युतं चंद्रमिवांबरात् द्रोणकर्णमुखैः षड्भिर्धार्तराष्ट्रैर्महारथैः एकोयं निह
तः शेते नैष धर्मो मतो हि तः तस्मिंस्तु निहते वीरे बह्वशोभत मेदिनी द्यौर्यथा चंद्रसूर्याभ्यां नक्षत्रगणमालिनी रुक्म
पुंखैश्च संपूर्णा रुधिरौघपरिप्लुता उत्तमांगैश्च शूराणां भ्राजमानैः सकुंडलैः विचित्रैश्च परिस्तोमैः पताकाभिश्च संवृता
चापैश्च विविधैश्छिन्नैः शक्त्यृष्टिप्रासकंपनैः विविधैश्चायुधैश्चान्यैः संवृता भूरशोभत वाजिभिश्चापि निर्जीवैः श्वस
द्भिः शोणितोक्षितैः सारोहैर्विषमा भूमिः सौभद्रे विनिपातिते सांकुशैः समहामात्रैः सवर्मायुधकेतुभिः पर्वतैरिव विध्वस्तै
र्विशिखैर्मथितैर्गजैः पृथिव्यामनुकीर्णैश्च व्यश्वसारथियोधिभिः ह्रदैरिव प्रक्षुभितैर्हतनागै रथोत्तमैः पदा
तिसंघैश्च हतैर्विविधायुधभूषणैः भीरूणां त्रासजननी घोररूपाभवन्मही तं दृष्ट्वा पतितं भूमौ चंद्रार्क
सदृशद्युतिं तावकानां परा प्रीतिः पांडूनां चाभवद्व्यथा अभिमन्यौ हते राजन् शिशुके प्राप्तयौवने संप्राद्रवच्चमूः
सर्वा धर्मराजस्य पश्यतः दीर्यमाणं बलं दृष्ट्वा सौभद्रे विनिपातिते अजातशत्रुस्तान्वीरानिदं वचनमब्रवीत् स्वर्गमेष गतः श्रीराम०
५५

शूरोयोनपराङ्मुखः। संसक्तंमयतमाभैषविजेष्यामोरणेरिपून् इत्येवंसमहातेजादुःखितेभ्योमहाद्युतिः धर्मराजोयुधां
श्रेष्ठोब्रुवन्दुःखमपानुदत् युद्धेत्वाशीविषाकारान्राजपुत्रान्रणेरिपून् पूर्वंनिहत्यसंग्रामेपश्चाद्दार्जुनिरभ्य
गात् हत्वादशसहस्राणिकौशल्यंचमहारथं कृष्णार्जुनसमःकार्ष्णिःशक्रलोकंगतोध्रुवं रथाश्वनरमातंगान्वि
निहत्यसहस्रशः अवितृप्तःससंग्रामेनशोच्यःपुण्यकर्मकृत् गतःपुण्यकृतांलोकान्शाश्वतान्युधिनिर्जितान्
॥ ॥इतिद्रोणपर्वण्यभिमन्युवधे संजयउवाच वयंतुप्रवरंहत्वातेषांतैःशरपीडिताः निवेशायाभ्युपायामःसा
यान्हेरुधिरोक्षिताः निरीक्ष्यमाणास्तुवयंपरेणायोधनंशनैः अपयातामहाराजग्लानिंप्राप्ताविचेतसः ततोनिशा
यांदिवसस्यचाशिवःशिवारुतैः सन्धिरवर्तताद्भुतःकुशेशयापीडनिभेदिवाकरेविलंबमानेस्तमुपेत्यपर्वतं वरा
सिशक्त्यृष्टिवरूथवर्मणांविमुंचताभूषणानांचसमाक्षिपन्प्रभाः दिवंचभूमिंचसमानयन्निवप्रियांतनुंभानुमुपैतिया
वकं महाभ्रकूटाचलशृंगसंनिभैर्गजैरनेकैरिववज्रपातितैः सवैजयंत्यंकुशवर्मयंतृभिर्निपातितैर्नष्टगतिश्चि
ताक्षितिः हतेश्वरैश्चूर्णितपत्त्युपस्करैर्हताश्वसूतैर्विपताककेतुभिः महारथैर्भूःशुशुभेविचूर्णितैःसुरैरि
वामित्रहतैर्नराधिप रथाश्ववृन्दैःसहसादिभिर्हतैःप्रविद्धभांडाभरणैःपृथग्विधैः निरस्तजिह्वादशनान्त्र
लोचनैर्हुराजमौघोरविरूपदर्शनाः प्रविद्धवर्माभरणांवरायुधाविपन्नहस्त्यश्वरथानुगानराः महार्हश
य्यास्तरणोचितास्तदाक्षितावनाथाइवशेरतेयथा अतीवहृष्टाःश्वसृगालवायसाबकाःसुपर्णाश्चवृकास्तर
स्विनः वयांस्यसृक्पान्यथरक्षसांगणाः पिशाचसंघाश्चसुदारुणारणे त्वचोविनिर्भिद्यपिबन्वसामसृक्तथै

द्रो० ५६

वमजाः पिशिताशिनश्च वर्त्म वपां विलुंपंति हसंति गांति च प्रकर्षमाणाः ॥ कुणपान्यनेकशः शरीरसंघातवहां ध्वजनाग
योडुपां कुंजरशैलसंकटां मनुष्यशीर्षोपलमांसकर्दमां प्रविद्धनानाविधशस्त्रमालिनीं भयावहां वैतरणीव दुस्तरां प्रव
र्त्तितां योधवरैस्तदा नदीं उवाह मध्ये नरराजिरे भृशं भयावहां जीवमृतप्रवाहिनी पिबंति चाश्नंति च यत्र दुर्दृशाः पिशा
चसंघाः स्म नदंति भैरवाः सुनंदिताः प्राणभृतां क्षयंकराः समानभक्षाः श्वसृगालपक्षिणः तथा तदायोधनमुग्रदर्श
नं निशामुखे पितृपतिराष्ट्रवर्द्धनं निरीक्ष्यमाणाः शनकैर्जहुर्नराः समुत्थितानृत्तकवंधसंकुलं अपेतविध्वस्तमहा
र्हभूषणं निपातितं तत्र शक्रसमं महाबलं रणेभिमन्युं ददृशुस्तदा जना मखे प्रदृष्ट्वं सदसीव पावकं ॥ ॥इति श्री द्रोण
पर्वण्यभिमन्युवधः समाप्तस्तृतीयो युद्धदिवसः संजय उवाच हते तस्मिन्महावीर्ये सौभद्रे रथयूथपे विमुक्त
रथसन्नाहाः सर्वे निक्षिप्तकार्मुकाः उपोपविष्टा राजानं परिवार्य युधिष्ठिरं तदेव युद्धं ध्यायंतः सौभद्रगतमानसाः
ततो युधिष्ठिरो राजा विललाप सुदुःखितः अभिमन्यौ हते वीरे भ्रातुः पुत्रे महारथे द्रोणानीकमसंबाधं मम प्रियं
चिकीर्षया भित्वा व्यूहं प्रविष्टोसौ गोमध्यमिव केसरी यस्य शूरा महेष्वासाः प्रत्यनीकगता रणे प्रभग्ना विनिवर्त्तंते
कृतास्त्रा युद्धदुर्मदाः अत्यंतशत्रुरस्माकं येन दुःशासनः शरैः क्षिप्रं ह्यभिमुखः संख्ये विसंज्ञो विमुखीकृतः
स तीर्त्वा दुस्तरं वीरो द्रोणानीकमहार्णवं प्राप्य दौःशासनिं कार्ष्णिः प्राप्तो वैवस्वतक्षयं कथं द्रक्ष्यामि कौंतेयं
सौभद्रे निहतेर्जुनं सुभद्रां वा महाभागां प्रियं पुत्रमपश्यतीं किंस्विद्वयमपेतार्थमश्लिष्टमसमंजसं तावुभौ प्र
तिवक्ष्यामो हृषीकेशधनंजयौ अहमेव सुभद्रायाः केशवार्जुनयोरपि प्रियकामो जयाकांक्षी कृतवानिदमप्रियं

श्रीराम० ५६

नलुब्धोबुध्यतेदोषान्लोभान्मोहात्प्रवर्त्तते मधुलिप्सुर्हिनापश्यंप्रपातमहमीदृशं योहिभोज्येपुरस्कार्योयानेषुशय प
नेषुच भूषणेषुचसोस्माभिर्बालोयुधिपुरस्कृतः कथंहिबालस्तरुणोयुद्धानामविशारदः सदश्वइवसंबा
धेविषमेक्षेममर्हति नोचेद्धिवयमप्येनंमहीमनुशयीमहि बीभत्सोःकोपदीप्तस्यदग्धाःकृपणचक्षुषा अलु
ब्धोमतिमान्धीमान्क्षमावान्रूपवान्बलीवपुष्मान्मानकृद्वीरःप्रियःसत्यपराक्रमः यस्यश्लाघंतिविबुधाःक
र्म्माण्यूर्जितकर्म्मणः निवातकवचान्जघ्नेकालकेयांश्चवीर्यवान् महेंद्रशत्रवोयेनहिरण्यपुरवासिनः अ
क्ष्णोर्निमेषमात्रेणपौलोमाःसगणाहताः परेभ्योप्यभयार्थिभ्योयोददात्यभयंविभुः तस्यास्माभिर्नशकितः
त्रातुमप्यात्मजोबली भयंतुसुमहत्प्राप्तंधार्त्तराष्ट्रान्महद्बलात् पार्थःपुत्रवधात्क्रुद्धःकौरवान्शोषयिष्यति
क्षुद्रःक्षुद्रसहायश्चस्वपक्षक्षयकारकः व्यक्तंदुर्योधनोदृष्ट्वाशोचन्हास्यतिजीवितं नमेजयःप्रीतिकरोनरा
ज्यंनचामरत्वंनसुरैःसलोकता इमंसमीक्ष्याप्रतिवीर्यपौरुषंनिपातितंदेववरात्मजात्मजं॥ ॥इतिद्रोणप
र्वण्यभिमन्युवधे संजयउवाच अथैनंविलपंतंचकुंतीपुत्रंयुधिष्ठिरं कृष्णद्वैपायनस्तत्राजगाममहानृषिः अर्च
यित्वायथान्यायमुपविष्टंयुधिष्ठिरः अब्रवीच्छोकसंतप्तोभ्रातुःपुत्रवधेनच अधर्मयुक्तैर्बहुभिःपरिवार्यमहारथैः
। युध्यमानोमहेष्वासैःसौभद्रोनिहतोरणे बालश्चाबालबुद्धिश्चसौभद्रःपरवीरहा अनुपायेनसंग्रामेयुध्यमानोवि
शेषतः मयाप्रोक्तःससंग्रामेद्वारंसंजनयस्वनः प्रविष्टेप्यंतरेतस्मिन्सैंधवेनास्मवारिताः ननुनामसमंयुद्धमे
ष्टव्यंयुद्धजीविभिः इदंचैवासमंयुद्धमीदृशंयत्कृतंपरैः तेनास्मिभृशसंतप्तःशोकबाष्पसमाकुलः शमंनैवा

द्रो०
५७

छिगच्छामिचिंतयानःपुनःपुनः संजयउवाच तंतथाविलपंतंवैशोकव्याकुलमानसं उवाचभगवान्व्यासोयुधिष्ठिरमिदं
वचः व्यासउवाच युधिष्ठिरमहाप्राज्ञसर्वशास्त्रविशारद व्यसनेषुनमुह्यंतित्वादृशाभरतर्षभ स्वर्गमेषगतःशूरःश
त्रून्हत्वाबहून्रणे अकालसदृशंकर्मकृत्वावैपुरुषोत्तमः अनतिक्रमणीयोवैविधिरेषयुधिष्ठिर देवदानवगंधर्वान्
मृत्युर्हरतिभारत युधिष्ठिरउ० इमेवैपृथिवीपालाःशेरतेपृथिवीतले निहताःपृतनामध्येमृतसंज्ञामहाबलाः नागा
युतबलाश्चान्येवायुवेगबलास्तथा तएतेनिहताःसंख्येतुल्यरूपानरैर्नराः नैषांपश्यामिहंतारंप्राणिनांसंयुगेक्वचि
त् विक्रमेणोपसंपन्नास्तपोबलसमन्विताः जेतव्यमितिचान्योन्यंयेषांनित्यंहृदिस्थितं अथचेमेहताःप्राज्ञाःशे
रतेविगतायुषः मृताइतिचशब्दोयंवर्ततेचततोर्थवत् इमेमृतामहीपालाःप्रायशोभीमविक्रमाः निश्चेष्टानिरभी
मानाःशूराःशत्रुवशंगताः राजपुत्राश्चसंरब्धावैश्वानरमुखंगताः अत्रमेसंशयःप्राप्तःकुतःसंज्ञामृताइति क
श्चमृत्युःकुतोमृत्युःकथंसंहरतेप्रजाः हरत्यमरसंकाशतन्मेब्रूहिपितामह संजयउवाच तंतथापरिपृच्छंतंकुंतीपुत्रं
युधिष्ठिरं आश्वासनमिदंवाक्यमुवाचभगवानृषिः व्यासउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं
अकंपनस्यकथितंनारदेनपुरानृप सचापिराजाराजेंद्रपुत्रव्यसनमुत्तमं अप्रसह्यतमंलोकेप्राप्तवानिति
मेमतिः तदहंसंप्रवक्ष्यामिमृत्योःप्रभवमुत्तमं ततस्त्वंमोक्ष्यसेदुःखात्स्नेहबंधनसंश्रयात् समस्तपापराशि
घ्नंशृणुकीर्त्तयतोमम धन्यमाख्यानमायुष्यंशोकघ्नंपुष्टिवर्द्धनं पवित्रमरिसंघघ्नंमंगलानांचमंगलं यथै
ववेदाध्ययनमुपाख्यानमिदंतथा श्रवणीयंमहाराजप्रातर्नित्यंनृपोत्तमैः पुत्रानायुष्मतोराज्यमीहमानैः श्रीराम०
५७

श्रेयं तथा पुरा कृतयुगे तात आसीद्राजा ह्यकंपनः स शत्रुवशमापन्नो मध्ये संग्राममूर्द्धनि तस्य पुत्रो हरिर्नाम नारायणसमो ब
ले श्रीमान् कृतास्त्रो मेधावी युधि शक्रोपमो बली स शत्रुभिः परिवृतो बहुधा रणमूर्द्धनि व्यस्यन्बाणसहस्राणि योधे
षु च गजेषु च स कर्म दुष्करं कृत्वा संग्रामे शत्रुतापनः शत्रुभिर्निहतः संख्ये पृतनायां युधिष्ठिर स राजा प्रेतकृत्यानि तस्य
कृत्वा शुचान्वितः शोचन्नहनि रात्रौ च नालभत्सुखमात्मनः तस्य शोकं विदित्वा तु पुत्रव्यसनसंभवं आजगामाथ देवर्षि
र्नारदोस्य समीपतः स तु राजा महाभागो दृष्ट्वा देवर्षिसत्तमं पूजयित्वा यथान्यायं कथामकथयत्तदा तस्य सर्वं समा
चष्ट यथावृत्तं नरेश्वरः शत्रुभिर्विजयं संख्ये पुत्रस्य च वधं तथा मम पुत्रो महावीर्य इंद्रविष्णुसमद्युतिः शत्रुभिर्ब
हुभिः संख्ये पराक्रम्य हतो बली क एष मृत्युर्भगवन् किं वीर्यबलपौरुषः एतदिच्छामि तत्त्वेन श्रोतुं मतिमतां वर
तस्य तद्वचनं श्रुत्वा नारदो वरदः प्रभुः आख्यानमिदमाचष्ट पुत्रशोकापहं महत् नारद उवाच शृणु राजन्महाबा
हो आख्यानं बहुविस्तरं यथावृत्तं श्रुतं चैव मयापि वसुधाधिप प्रजाः सृष्ट्वा तदा ब्रह्मा आदिसर्गे पितामहः अप्रसं
हृतं महातेजा दृष्ट्वा जगदिदं प्रभुः तस्य चिंता समुत्पन्ना संहारं प्रति पार्थिव चिंतयन्न ह्यसौ वेद संहारं वसुधाधिप
तस्य रोषान्महाराज खेभ्योग्निरुदतिष्ठत तेन सर्वा दिशो व्याप्ताः सांतर्देशा दिधक्षता ततो दिवं भुवं चैव ज्वालामा
लासमाकुलं चराचरं जगत्सर्वं ददाह भगवान्प्रभुः ततो हतानि भूतानि चराणि स्थावराणि च महता क्रोधवेगेन त्रास
यन्निव वीर्यवान् ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः जगाम शरणं देवं ब्रह्माणं परमेष्ठिनं तस्मिन्नाप
तिते स्थाणौ प्रजानां हितकाम्यया अब्रवीत्परमो देवो ज्वलन्निव महामुनिः किं कुर्मः कामं कामार्ह कामाज्जा

द्रो० ५८ तोस्मि पुत्रक करिष्यामि प्रियं सर्वं ब्रूहि स्थाणो यदिच्छसि॥ ॥इति द्रोणपर्वणि॥ स्थाणुरुवाच प्रजासर्गनिमित्तो
हि कृतो यत्नस्त्वयाविभो त्वया सृष्टाश्च वृद्धाश्च भूतग्रामाः पृथग्विधाः तास्तवेह पुनः क्रोधात्प्रजा दह्यन्ति सर्वशः ता
दृष्ट्वा मम कारुण्यं प्रसीद भगवन्प्रभो ब्रह्मोवाच संहर्तुं न च मे कामो एतदेवं भवेदिति पृथिव्या हितकामं तु ततो मां
मन्युराविशत् इयं हि मां सदा देवी भारार्त्ता समचूचुदत् संहारार्थं महादेव भारेणाभिहतासती ततोऽहं नाधिगच्छा
मि तथ्ये बहुविधं तदा [redacted]
संहारमप्रमेयस्य ततो मामन्युराविशत् रुद्र उवाच संहारार्थं प्रसीदस्व मा तुषो वसुधाधिप मा प्रजाः स्था
वराश्चैव जंगमाश्च व्यनीनशत् तव प्रसादाद्भगवन्निदं वर्त्ते त्रिधा जगत् अनागतमतीतं च यच्च संप्रति वर्त्तते भग
वान्क्रोधसंदीप्तः क्रोधादग्निं समासृजत् स दहत्यश्मकूटानि द्रुमांश्च सरितस्तथा पल्वलानि च सर्वाणि सर्वं चै
व तृणोलपाः स्थावरं जंगमं चैव निःशेषं कुरुते जगत् प्रसीद भगवन्नस्त्वं रोषो न स्याद्वरो मम सर्वे हि सृष्टा नश्यं
ति तव देव कथंचन तस्मान्निवर्त्ततां तेजस्त्वय्येवेह प्रलीयतां तत्पश्य देव सुभृशं प्रजानां हितकाम्यया यथेमे प्राणि
नः सर्वे निवर्त्तेरंस्तथा कुरु अभावं नेह गच्छेयुरुत्सन्नजननाः प्रजाः आदिदेव नियुक्तोऽस्मि त्वया लोकेषु लोककृन् मा
विनश्येज्जगन्नाथ जगत्स्थावरजंगमं प्रसादाभिमुखं देवं तस्मादेवं ब्रवीम्यहं नारद उवाच श्रुत्वा हि वचनं देवः प्र
जानां हितकारणो तेजः संधारयामास पुनरेवांतरात्मनि ततोऽग्निमुपसंहृत्य भगवांल्लोकसत्कृतः प्रवृत्तिं च नि
वृत्तिं च कथयामास वै प्रभुः उपसंहरतस्तस्य तमग्निं रोषजं तथा प्रादुर्बभूव विश्वेभ्यो गोभ्यो नारी महात्मनः
कृष्णा रक्ता तथा पिंगा रक्तजिह्वास्यलोचना कुंडलाभ्यां वराजेद्रत ह्याभ्यां तप्तभूषणासा निःसृत्य श्रीरामं ५८

तथा खेभ्यो दक्षिणां दिशमाश्रिता: स्मयमाना च सावेक्ष्य देवौ विश्वेश्वरावुभौ ततो रूपतदा देवो लोकादिनिधनेश्वर
: मृत्यो हृतिमहिष्या तु जहि चेमाः प्रजा इति त्वं हि संहारबुध्याथ प्रादुर्भूता रुषो मम तस्मात्संहर सर्वास्त्वं प्रजाः
सजडपंडिता: मम त्वं हि नियोगेन ततः श्रेयो ह्यवाप्स्यसि एवमुक्तातु सा तेन मृत्युः कमललोचना दध्यौ चात्य
र्थमबला प्ररुरोद च सुस्वरं पाणिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः सर्वभूतहितार्थाय तां चाप्यनुनयंस्त
दा॥ ॥इति द्रोणपर्वणि मृत्युप्रजापतिसंवादे नारद उवाच विनीय दुःखमबला आत्मन्येव प्रजापतिं उवाच
प्रांजलिर्भूत्वा लतेवावर्जितं पुनः मृत्युरुवाच त्वया सृष्टा कथं नारी ईदृशी वदतां वर क्रूरं कर्माहितं कुर्यां तदे
व किमु जानती बिभेम्यहमधर्माद्धि प्रसीद भगवन्प्रभो प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄन्पितॄन्पतीन्
अपध्यास्यंति मे देव मृतेभ्यो विभेम्यहं कृपणानां हि रुदतां ये पतंत्यश्रुबिंदवः तेभ्योऽहं भगवान्भीता श
रणं त्वाहमागता यमस्य भवने देव गच्छेयं न सुरोत्तम कोपेन विनयोपेता मूर्द्ध्यन खेन च एतदिच्छाम्यहं
कामं त्वत्तो लोकपितामह इच्छेयं त्वत्प्रसादाद्धि तपस्तप्तुं प्रजेश्वर प्रदिशेमं वरं देव त्वं मह्यं भगवन्प्रभो त्वया
ह्युक्ता गमिष्यामि धेनुकाश्रममुत्तमं तत्र तप्स्ये तपस्तीव्रं तवैवाराधने रता नहि शक्ष्यामि देवेश [redacted] प्राणा
न्प्राणभृतां प्रियान् हर्तुं विलपमानानामधर्मादभिरक्ष मां ब्रह्मोवाच मृत्यो संकल्पितासि त्वं प्रजासंहारहेतु
ना गच्छ संहर सर्वास्त्वं प्रजा मा ते विचारणा भविता त्वेतदेवं हि नैतज्जात्वन्यथा भवेत् भवत्वनिंदिता लोके कुरुष्व व
चनं मम नारद उवाच एवमुक्ताभवत्प्रीता प्रांजलिर्भवदुन्मुखी संहारे नाकरोद्बुद्धिं प्रजानां हितकाम्यया तूष्णी

श्री०
५७ मासिन्नत्रदा देवः प्रजानामीश्वरेश्वरः प्रसादं नागमास्सिस्त्रमात्मनैव प्रजापतिः स्मयमानश्च देवेशो लोकान्सर्वानवेक्ष्य
च लोकास्त्वासन्यथापूर्वं दृष्टास्तेनापमन्युना निहन्तरो बेतस्मिंस्तु भगवत्यपराजिते साकन्या पिजगामाथ समी
पात स्य धीमतः अपसृत्या प्रतिश्रुत्य प्रजासंहरणं तदा चचारमाराधवराजेन्द्र मृत्युर्दुष्कृतकमभ्यगात् सा तत्र परमं ती
व्रं चचार व्रतमुत्तमं सा तदा ह्येकपादेन तस्थौ पद्मानि षोडश पंचाब्दानां तु कान्तरूपा प्रजानां तु हितैषिणी इंद्रियाणींद्रिया
र्थेभ्यः प्रियेभ्यः संनिवर्त्य सा ततस्त्वेकेन पादेन पुनरप्यपराण्यपि सप्त वै तस्थौ पद्मानि षट् चैव सप्त चैकं च पार्थिव ततः पद्मा
युतं तात मृगैः सह चचार सा पुनर्गत्वा ततो नंदां पुण्यां शीतामलोदकां अप्सु वर्षसहस्राणि चचार नियमं पुनः पंचगंगेषु
सा पुण्या कन्या वेतसकेषु च तपो विशेषैर्विविधैः कर्षयंद्देहमात्मनः ततो गत्वा तु सा गंगां महामेरुं च केवलं तस्थौ वा
श्मेव निश्चेष्टा प्राणायामपरायणा पुनर्हिमवतो मूर्ध्नि यत्र देवाः पुरायजन् तत्रांगुष्ठेन सा तस्थौ निखर्वं परमा शुभा
पुष्करेष्वथ गोकर्णे नैमिषे मलये तथा अपाकर्षत्स्वकं देहं नियमैर्मनसः प्रियैः अनन्यदेवता नित्यं दृढभ
क्ता पितामहे तस्थौ पितामहं चैव तोषयामास धर्मतः ततस्तामब्रवीत्प्रीतो लोकानां प्रभवो व्ययः सौम्येन मनसा
राजन् प्रीतः प्रीतमनाः सदा मृत्यो किमिदमत्यंतं तपांसि चरसीति ह ततो ब्रवीत्पुनर्मृत्युर्भगवन्तं पितामहं नाहं हन्यां प्रजा दे
व स्वस्थाश्चाक्रोशतीस्तथा एतदिच्छामि सर्वेश त्वत्तो वरमहं प्रभो अधर्मभयभीतास्मि ततोऽहं तपआस्थिता भीतायास्तु
महाभाग प्रयच्छाभयमव्ययं आर्त्ताचानागसीनारीयाचामि भव मे गतिः तामब्रवीत्ततो देवो भूतभव्यभविष्यवित् अध
र्मो नास्ति ते मृत्यो संहरन्त्याः इमाः प्रजाः मया चोक्तं मृषा भद्रे भविता न कथंचन तस्मात्संहर कल्याणि प्रजाः सर्वाश्चतुर्विधाः श्रीराम०
५७

धर्मः सनातनश्च त्वां सर्वथा याचयिष्यति लोकपालोयमश्चैव सहायाव्याधयस्तथा अहं च विबुधाश्चैव पुनर्दद्मस्तमेव वरं
यथा त्वमेनसा मुक्ता विरजाः ख्यातिमेष्यसि सैवमुक्ता महाराजकृतांजलिरिदं विभुं पुनरेवाब्रवीद्वाक्यं प्रसाद्य शिरसा त
दा यद्येवमेतत्कर्तव्यं मया न स्याद्विना प्रभो तवाज्ञा मूर्ध्नि मे न्यस्ता यत्ते वक्ष्यामि तच्छृणु लोभः क्रोधोभ्यसूयेर्ष्या द्रोहो
मोहश्च देहिनां अह्रीश्चान्योन्यपरुषा देहं भिंधुः पृथग्विधाः ब्रह्मोवाच तथा भविष्यते मृत्यो साधु संहर मोप्रजाः अ
धर्मस्ते न भविता नापध्यास्याम्यहं शुभे यान्यश्रुबिंदूनि करे समाहृतानि ते व्याधयः प्राणिनामात्मजाताः ते मारयिष्यं
ति नरान्गतासून्नाधर्मस्ते भविता मास्म भैषीः नाधर्मस्ते भविता प्राणिनां वै त्वं वै धर्मस्त्वं हि धर्मस्य वेषा धर्म्या मृत्यो
धर्मनित्या धरित्री तस्मात्प्राणान्सर्वथेमान्नियच्छ सर्वेषां वै प्राणिनां काम रोषौ संत्यज्यातः संहरस्वेह जीवान् एवं
धर्मस्त्वां भविष्यत्यनंतो मिथ्यावृत्तान्मारयिष्यत्यधर्मः तेनात्मानं पावयस्वात्मनो वै त्वं पेनात्मानं मज्जयिष्यं
त्यसत्वाः तस्मात्काम रोषमभ्यागतं त्वं संत्यज्यातः संहरस्वेह जीवान् नारद उवाच सा वै भीता मृत्युसंज्ञोपदेशाच्छा
पाद्भीता वाढमित्यब्रवीत्तं सा च प्राणां प्राणिनामंतकाले कामक्रोधौ त्यज्य हरत्यसक्ता मृत्युस्तेषां व्याधयस्तत्प्रसू
ता व्याधीरोगो युज्यते येन जंतुः सर्वेषां च प्राणिनां प्राणभीते तस्माच्छोकं मा वृथा निःफलं त्वं सर्वे देवाः प्राणिनां प्रा
पणान्ते गत्वा दत्ताः संनिवृत्तास्तथैव एवं सर्वे प्राणिनामभ्यगत्वा वृत्ता देवा मर्त्यवद्राजसिंह वायुर्भीमो भीमनादो
महौजा भेत्ता देहान्प्राणिनां सर्वगो सौ नैवावृत्तिं नैव वृत्तिं कदाचित्प्राप्नोत्युग्रो नंततेजा विशिष्टः सर्वे देवा मर्त्य सं
ज्ञा विशिष्टास्तस्मात्पुत्रं मा शुचो राजसिंह स्वर्गं प्राप्तो मोदते ते तनूजो नित्यं रम्यान्वीरलोकानवाप्य त्यक्त्वा दुःखं सं

द्रो० गतः पुण्यकृद्भिरेषां त्वं दैवदिष्टा प्रजानां प्राप्नेका लोसंहरिस्त्रीयथावत्स्वयं हतास्माराह रात्मजानां आत्मानं वैप्रा
६० णिनो घ्नंति सर्वे नैनं मा त्वं दुःखं पाणि हि नास्ति तस्मान्मृतान्नानुशोचंति धीरा मृत्युं ज्ञात्वा निसृष्टं ब्रह्मसृष्टं दुःखं सृ
ष्टिं देवकृष्णां विदित्वा पुत्रान्मृतान् शोकमाशु त्यजस्व द्वैपायन उवाच एतच्छ्रुत्वार्थवद्वाक्यं नारदेन प्रकाशि
तं उवाचाकंपनो राजा सखायं नारदं तदा व्यपेतशोकः प्रीतोस्मि भगवन्नृषिसत्तम श्रुत्वेतिहासं त्वत्तस्त्वक्तं कृ
तार्थोस्म्यभिवादये तथोक्तो नारदस्तेन राज्ञा ऋषिवरोत्तमः जगाम नंदनं शीघ्रं देवर्षिरमितात्मवान् पुण्यं
पत्रासर्ग६ स्वर्गप्रदं धर्म्यमायुष्यमेव च अस्येतिहासस्य तदा श्रवणाच्छ्रावणात्तदा एतदर्थपदं श्रुत्वा तदा राजा युधिष्ठिरः
क्षत्रधर्मं च विज्ञाय शूराणां च परां गतिं संप्राप्तोसौ महावीर्यः स्वर्गलोकं महारथः अभिमन्युः परान् हत्वा
सर्व प्रमुखे धन्विनां युध्यमानो महेष्वासो हतः सोभिमुखो रणे असिना गदया शक्त्या धनुषा च महारथः विर
जाः सोमसूनुः स पुनस्तत्र प्रलीयत तस्मात्परां धृतिं कृत्वा भ्रातृभिः सह पांडव अप्रमत्तः सुसन्नद्धः शीघ्रं
योद्धुमुपाक्रम द्रोणपर्वणि प्रजापतिमृत्युसंवादः संजय उवाच श्रुत्वा मृत्युसमुत्पत्तिं कर्माण्यनुपमानि च
धर्मराजः पुनर्वाक्यं प्रसाद्यैनमथाब्रवीत् युधिष्ठिर उवाच गुरवः पुण्यकर्माणः शक्रप्रतिमविक्रमाः स्थाने रा
जर्षयो ब्रह्मन्ननघाः सत्यवादिनः भूय एव तु मां तथ्यैर्वचोभिरभिबृंहय राजर्षीणां पुराणानां समाश्वासय कर्मभिः
कियंत्यो दक्षिणा दत्ताः कैश्च दत्ता महात्मभिः राजर्षिभिः पुण्यकृद्भिस्तद्भवान्प्रब्रवीतु मे व्यास उवाच शैव्यस्य
नृपतेः पुत्रः संजयो नाम नामतः सखायौ तस्य वै चास्तां ऋषी पर्वतनारदौ तौ कदाचिद्गृहं तस्य प्रविष्टौ तद्दि
दृक्षया विधिवच्चार्चितौ तेन प्रीतौ तत्रोषतुः सुखं तं कदाचित्सुखासीनं ताभ्यां सह शुचिस्मिता दुहितास्या श्रीराम०
६०

गमत्कन्या संजयस्य वरवर्णिनी तयाभिवादितः कन्यामभ्यनंदद्यथाविधि तत्सलिंगाभिराशीर्भिरिष्टाभिरभितः स्थिता तां
निरीक्ष्याब्रवीद्वाक्यं पर्वतः प्रहसन्निव कस्येयं चंचलापांगी सर्वलक्षणसंमता उताहो भाः स्विदर्कस्य ज्वलनस्य शि
खा त्वियं श्रीर्ह्रीः कीर्तिर्धृतिः पुष्टिः सिद्धिश्चंद्रमसः प्रभा एवं ब्रुवाणं देवर्षिं नृपतिः संजयोब्रवीत् ममेयं भगव
कन्या मत्तो वरमभीप्सति नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप भार्यार्थं सुमहच्छ्रेयः प्राप्तुं चेदिच्छसे नृप ददा
नीत्येव संहृष्टः संजयः प्राह नारदं पर्वतस्तु सुसंक्रुद्धो नारदं वाक्यमब्रवीत् हृदयेन मया पूर्वं वृतां वै हृतवानसि
यस्माद्धृता त्वया विप्र मा गाः स्वर्गं यथेप्सया एवमुक्तो नारदस्तं प्रत्युवाचोत्तरं वचः मनोवाग्बुद्धिसंभाषादत्ता
श्चोदकपूर्वकं पाणिग्रहणमंत्राश्च प्रथितं वरलक्षणं न त्वेषा निष्ठिता निष्ठा निष्ठा सप्तपदी सतां अनुत्पन्ने
व कार्यार्थे मां त्वं व्याहृतवानसि तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया विना अन्योन्यमेवं शप्त्वा वै तस्थतुस्त
त्र तौ तदा अथ सोर्थिनृपो विप्रान् पानाच्छादनभोजनैः पुत्रकामः परं शक्त्या यत्नाच्चोपाचरच्छुचिः तस्य प्रसन्ना
विप्रेंद्राः कदाचित्पुत्रमीप्सवः तपःस्वाध्यायनिरता वेदवेदांगपारगाः सहिता नारदं प्राहुर्देह्यस्मै पुत्रमीप्सितं
तथेत्युक्त्वा द्विजैरुक्तः संजयं नारदोब्रवीत् तुभ्यं प्रसन्ना राजर्षे पुत्रमीप्संति ब्राह्मणाः वरं वृणीष्व भद्रं ते यादृशं पु
त्रमीप्सितं तथोक्तः प्रांजली राजा पुत्रं वव्रे गुणान्वितं यशस्विनं कीर्तिमंतं तेजस्विनमरिंदमं यस्य मूत्रं पुरीषं च क्लेदः
स्वेदश्च कांचनं सुवर्णष्ठीविरित्येवं तस्य नामाभवत्कृतं तस्मिंस्तु वरप्रदानेन प्रवर्धत्यप्रमितं धनं कारयामास नृपतिः

द्रो० सौवर्णं सर्वमेवासीत् गृहप्राकारदुर्गगोपुरं ग्रामगणावसथान्यपि शय्यासनानि यानानि स्थालीपिठरभाजनं तस्य राज्ञोपि य
६१ द्वेश्मवाह्यश्चापस्कराश्चये सर्वं तत्काञ्चनमयं कालेन परिवर्द्धितं अथ दस्युगणाः श्रुत्वा दृष्ट्वा चैनं तथाविधं संभू
य तस्य नृपतेः समारब्धाश्चिकीर्षितुं केचित्तत्राब्रुवन्राज्ञः पुत्रं गृह्णीम वै वयं सोस्याकरः काञ्चनस्य तत्र यत्नं वरा
महे ततस्ते दस्यवो लुब्धाः प्रविश्य नृपतेर्गृहं राजपुत्रं ततो जह्रुः सुवर्णष्ठीविनं बलात् गृहीत्वैनमनुपायज्ञा नी
त्वारण्यमचेतसः हत्वा विशस्य चापश्यन्न लुब्धा वसु न किंचन तस्य प्राणैर्विमुक्तस्य नष्टं तद्वरदं वसु दस्यवश्च
नदाघ्नोन्योन्यं जघ्नुर्मूर्खा विचेतसः हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि असंभाव्यं गता घोरं नरकं दुष्टकारिणः
तं दृष्ट्वा निहतं पुत्रं वरदत्तं महातपाः विललाप सुदुःखार्त्तो बहुधा करुणं नृपः विलपन्तं निशम्याथ पुत्रशोकहतं नृ
पं प्रत्यदृश्यत देवर्षिर्नारदस्तस्य सन्निधौ उवाच चैनं दुःखार्त्तं विलपन्तमचेतसं संजयं नारदोभ्येत्य तन्निबोध युधिष्ठि
र कामानामवितृप्तस्त्वं संजयेह मरिष्यसि यस्य चैतद्वयं गेहे उषिता ब्रह्मवादिनः आविक्षितं मरुत्तं वै मृतं संजय
शुश्रुम संवर्तो याजयामास स्पर्द्धया वै बृहस्पतेः यस्मै राजर्षये प्रादाद्धनं स भगवान्प्रभुः हैमं हिमवतः पादं यियक्षो
र्विविधैः सवैः यस्य सेन्द्रामरगणा बृहस्पतिपुरोगमाः देवा विश्वसृजः पार्श्वे यजनाते समासते यज्ञवाटस्य सौवर्णाः स
र्वे चास्य परिच्छदाः यस्य सर्वं तदा ह्यन्नं मनोभिप्रायगं शुचि कामतो बुभुजुर्विप्राः सर्वे चान्नार्थिनो द्विजाः पयो दधि घृतं क्षौ
द्रं भक्ष्यं भोज्यं च शोभनं यस्य यज्ञेषु सर्वेषु वासांस्याभरणानि च ईप्सितान्युपतिष्ठन्ते प्रहृष्टान्वेदपारगान् मरुतः प ५५
रिवेष्टारो मरुत्तस्याभवन्गृहे आविक्षितस्य राजर्षेर्विश्वेदेवाः सभासदः यस्य वीर्यवतो राज्ञः सुवृष्ट्या सस्यसंपदः श्रीराम०

६१

हविर्भिस्तर्पिता येन सम्यक्क्लृप्तैर्दिवौकसः ऋषीणां च पितॄणां च देवानां सुखजीविनां ब्रह्मचर्येण श्रुतिमुखैः सर्वै
दानैश्च संपदा शयनासनयानानि स्वर्णराशींश्च हस्त्यश्वाः तत्सर्वं समितं विप्रं दत्त्वा विप्रेभ्य इच्छया सोनुध्यात
स्तु शक्रेण प्रजा कृत्वा निरामयाः श्रद्दधानो जितान्लोकान्गतः पुण्यकृतोक्षयान् सप्रजः सहपामात्यः सदा
रापत्यबांधवः यौवनेन सहस्राहं मरुत्तो राजमन्वशात् सचेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं
मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ ॥इति द्रोणपर्वणि षोडशराजन्यो
पाख्याने नारद उवाच सुहोत्रं नाम राजानं मृतं संजय शुश्रुम एकवीरमशक्यं तममरैरभिवीक्षितुं यः प्राप्य
राज्यं धर्मेण ऋत्विग्ब्रह्मपुरोहितान् अपृच्छदात्मनः श्रेयः पृष्ट्वा तेषां मते स्थितः प्रजानां पालनं धर्मो दानमि
ज्याद्विषज्जयः एतत्सुहोत्रो विज्ञाय धर्मेणैच्छद्धनागमं धर्मेणाराधयन्देवान्बाणैः शत्रून्जयंस्तथा सर्वा
ण्यपि च भूतानि स्वगुणैरप्यरंजयत् यो भुंक्ते मां वसुमतीं म्लेच्छाटविकवर्जितां यस्मै ववर्ष पर्जन्यो हिरण्यं परि
वत्सरान् हैरण्यास्तत्र वाहिन्यः स्वैरिण्यो व्यवहन्पुरा ग्राहान्कर्कटकांश्चैव मत्स्यांश्च विविधान्बहून् कामान्व
र्षति पर्जन्यो रूप्याणि विविधानि च सौवर्णान्यप्रमेयानि वाप्यश्च क्रोशसंमिताः सहस्रं वामनान्कुब्जान्नक्रान्म
करकच्छपान् सौवर्णान्विहितान्दृष्ट्वा ततोस्मयत वै तदा तत्सुवर्णमपर्यन्तं राजर्षिः कुरुजांगले ईजानो वितते यज्ञे
ब्राह्मणेभ्यो ह्यमन्यत सोश्वमेधसहस्रेण राजसूयशतेन च पुण्यैः क्षत्रिययज्ञैश्च प्रभूतवरदक्षिणैः काम्यनैमित्तिका
जस्रैरिष्टां गतिमवाप्तवान् सचेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वा

द्रो० नमहादक्षिणमभिश्वैत्येत्यव्याहरन् द्रोणपर्वणि षोडशराजकीये नारदउवाच राजानंपौरवंवीरंमृतंसंजयशुश्रुम
६२ सहस्रंयःसहस्राणांश्वेतानश्वानवासृजत् तस्याश्वमेधेराजर्षेर्देशाद्देशात्समेयुषां शिक्षाक्षरविधिज्ञानांनानामी
तंस्व्याविपश्चितां वेदविद्याव्रतस्नातावदान्याःप्रियदर्शनाः सुभिक्षाच्छादनगृहाःसुशय्यासनवाहनाः नटनर्त्त
कगंधर्वैःपूर्णकैर्वर्द्धमानकैः नित्योद्योगैश्चक्रीडद्भिस्तत्रस्मपरिहर्षिताः यज्ञेयज्ञेयथाकालंदक्षिणाःसोभ्यकालय
त द्विपादशसहस्राख्याःप्रमदाःकांचनप्रभाः सध्वजाःसपताकाश्चरथाहेममयास्तथा यःसहस्रंसहस्राणांक
न्याहेमविभूषिताः धुर्यैर्जाश्वगजारूढाःखरहक्षेत्रशोभनाः शतंशतसहस्राणिस्वर्णमालीमहात्मनां गवां
सहस्रानुचरान्दक्षिणामत्यकालयत् हेमश्रृंगीरौप्यखुराःसवत्साःकांस्यदोहनाः दासीदासखरोष्ट्रांश्चप्रादात्प्राजा
विकंवसु रत्नानांविविधानांचविविधांश्चान्नपर्वतान् तस्मिन्संविततेयज्ञेदक्षिणामत्यकालयत् तत्रास्यगाथा
गायंतीयेपुराणविदोजनाः अंगस्ययजमानस्यस्वधर्माधिगताःशुभाः गुणोत्तराःक्रतवस्तस्यासन्सार्वकामि
काः सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वै
त्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारदउवाच शिबिमौशीनरंचापिमृतंसंजयशुश्रुम यइमांपृ
थिवींसर्वांचर्मवत्परिवेष्टयत् साद्रिद्वीपार्णववनांरथघोषेणनादयन् सशिबिर्वैरिपून्नित्यंमुख्यान्निघ्नन्सपत्नजि
त् तेनयज्ञैर्बहुविधैरिष्टंपर्याप्तदक्षिणैः सराजावीर्यवान्धीमानवाप्यवसुपुष्कलं सर्वमूर्द्धाभिषिक्तानांसमं
तःसोभवद्युधि अयजंश्चाश्वमेधैर्योविजित्यपृथिवीमिमां निरर्गलैर्बहुफलैर्निष्ककोटिसहस्र
दः हस्त्यश्वपशुभिर्धान्यैर्मृगैर्गोजाविभिस्तथा विविधांपृथिवींपुण्यांशिबिर्ब्राह्मणसात्करोत् या श्रीराम०
६२

वेश्यो वर्षतो धारायां यो दिविता रक्षाः यावंतः सिकता गांग्यो यावन्मेरोर्महोपलाः उदधौ तिच यावंति रत्नानि प्राशिनोपि
च तावतीर्ददद्गावै शिशिरौशीनरोध्वरे नोपंतां धुरं तस्य किंचिदन्यः प्रजापतिः भूतं भव्यं भवंतं वा नाध्यगच्छन्नरोत्तम
तस्यामृद्धिविधायुक्ताः सर्वकामैः समन्विताः हेमयूपास्तनगृहा हेमप्राकारतोरणाः शुचिस्वाद्वन्नपानं च ब्राह्मणाः प्र
युतायुताः नानाभक्ष्यैः प्रियकथाः पयोदधिमहाह्रदाः तस्यासन्यज्ञवाटेषु नद्यः शुभ्रान्नपर्वताः पिवत स्नात खा
दध्वमिति यत्रोचुर्वै जनाः यस्मै प्रादाद्वरं रुद्रस्तुष्टः पुण्येन कर्मणा अक्षयं ददतो वित्तं श्रद्धाकीर्तिस्तथा क्रिया य
थोक्तमेव भूतानां प्रियत्वं स्वर्गमुत्तमं एतान्लब्ध्वा वरानिष्टान् शिबिः काले दिवंगतः स चेन्ममार संजय चतुर्भद्रत
रस्त्वया पुत्रात्पुण्यतरस्तस्मान्मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन् ॥ ॥ द्रोणपर्वणि
षोडशराजिके नारद उवाच रामं दाशरथिं चैव मृतं संजय शुश्रुम यं प्रजा अन्वमोदंत पिता पुत्रानिवौरसान् अ
संख्येया गुणा यस्मिन्नासन्नमिततेजसि यश्चतुर्दश वर्षाणि निदेशात्पितुरच्युतः वने वनितया सार्धमवसल्लक्ष्म
णाग्रजः जघान च जनस्थाने राक्षसान्मनुजर्षभः तपस्विनां रक्षणार्थं सहस्राणि चतुर्दश तत्रैव वसतस्तस्य रावणो
नाम राक्षसः जहार भार्यां वैदेहीं संमोह्यैनं सहानुजं तमागस्कारिणं रामः पौलस्त्यमजितं परैः जघान समरे क्रुद्धः
पुरेव त्र्यंबकोंधकं सुरासुरैरवध्यं तं देवब्राह्मणकंटकं जघान स महाबाहुः पौलस्त्यं सगणं रणे स प्रजानुग्रहं कृ
त्वा त्रिदशैरभिपूजितः व्याप्य कृत्स्नं जगत्कीर्त्या सुरर्षिगणसेवितः संप्राप्य विविधं राज्यं सर्वभूतानुकंपक
ः आजहार महायज्ञं प्रजा धर्मेण पालयन् निरर्गलं सजारूथ्यमश्वमेधशतं विभुः आजहार सुरेशस्य

द्रो०
६३

हविषामुदमाहरत् अन्यैश्चविविधैर्यज्ञैरीजेबहुगुणैर्नृपः क्षुत्पिपासेजितप्राणः सर्वरोगाश्चदेहिनां सततंगुणसंप
न्नोदीप्यमानः स्वतेजसा अतिसर्वाणिभूतानिरामोदाशरथिर्बभौ ऋषीणांदेवतानांचमानुषाणांचसर्वशः
पृथिव्यांसहवासोऽभूद्रामेराज्यंप्रशासति नाहीयततदाप्राणः प्राणिनांनतदन्यथा प्राणापानसमानश्चरामेराज्यं
प्रशासतिपर्यदीप्यन्ततेजांसितदानर्थाश्चनाभवन् दीर्घायुषः प्रजाःसर्वाः युवानम्रियतेतदा वेदैश्चतुर्भिःसंप्रीता
प्राप्नुवन्तिदिवौकसः हव्यंकव्यंचविविधंनिष्पूर्त्तंहुतमेवच अदंशमशकादेशानष्टव्यालसरीसृपाः नाप्सु
प्राणभृतांमृत्युर्नाकालेज्वलनोऽदहत् अधर्मरुचयोलुब्धामूर्खावानभवंस्तदा शिष्टेष्टयाज्ञकर्माणः सर्ववर्णास्त
दाभवन् स्वधांपूजांचरक्षोभिर्जनस्थानेप्रणाशिते प्रादान्निहत्यरक्षांसिपितृदेवेभ्यईश्वरः सहस्रपुत्राःपुरुषा
दशवर्षशतायुषः नचज्येष्ठाःकनिष्ठेभ्यस्तदाश्राद्धान्यकारयन् श्यामोयुवालोहिताक्षोमत्तमातंगविक्रमः आ
जानबाहुःसुभुजःसिंहस्कन्धोमहाबलः दशवर्षसहस्राणिदशवर्षशतानिच सर्वभूतमनःकान्तोरामोराज्यमका
रयत् रामोरामोरामइतिप्रजानामभवत्कथा रामाद्रामंजगदभूद्रामेराज्यंप्रशासति चतुर्विधाःप्रजारामः
स्वर्गंनीत्वादिवंगतः आत्मानंसंप्रतिष्ठाप्यराजवंशमिहाष्टधा सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पु
ण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके
नारदउ० भगीरथंचराजानंमृतंसंजयशुश्रुम येनभागीरथीगंगाचयनैःकांचनैश्चिता यःसहस्रंसहस्राणांकन्याहेमवि

श्री[illegible]॥
६३

भूषिताः राजंश्च राजपुत्रांश्च ब्राह्मणेभ्यो न्यमन्यत सर्वा रथगताः कन्या रथाश्च सर्वे चतुर्युजः रथे रथे शतं नागाः सर्वे वै हेममा
लिनः सहस्रमश्वा श्चैकैकं गजानां पृष्ठतोन्वयुः अश्वे अश्वे शतं गावो गवां पश्चादजाविकं तेनाक्रोशता जनौघेन दक्षि
णा भूयसी द्विदत्ता उपह्वरे निव्यथिता तस्यांके निषसाद ह तथा भागीरथी गंगा उर्वशी चाभवत्पुरा दुहितृत्वं गता रा
ज्ञः पुत्रत्वमगमत्तदा तां तु गाथां जगुः प्रीता गंधर्वाः सूर्यवर्चसः पितृदेवमनुष्याणां शृण्वतां वल्गुवादिनां भगीरथं
यजमानमैक्ष्वाकुं भूरिदक्षिणां गंगा समुद्रगा देवी वव्रे पितरमीश्वरं तस्य सेंद्रैः सुरगणैर्देवैर्यज्ञः स्वलंकृतः स
म्यक्परिगृहीतश्च शांतविघ्नो निरामयः योपदुह्येत विप्रो वै यत्र यत्रात्मनः प्रियं भगीरथस्तदा प्रीतस्तत्र तत्राददद्दु
शी नादेयं ब्राह्मणस्यासीद्यस्य यत्स्यात्प्रियं धनं सोपि विप्रप्रसादेन ब्रह्मलोकं गतो नृपः येन याता यजमानादद
मखमुखौ दिशाशाविहपादपाः तेनावस्थातुमिच्छंति तं गत्वा राजमीश्वरं स चेन्ममार संजय चतुर्भद्रतरस्त्वया
पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ॥इति द्रोणपर्वणि
षोडशराजिके नारद उवाच दिलीपं चैवैलविलं मृतं संजय शुश्रुम यस्य यज्ञशतेष्वासन्प्रयुतायुतशो द्विजाः तत्वज्ञाना
र्थसंपन्ना यज्वानः पुत्रपौत्रिणः यदिमां वसुसंपूर्णां वसुधां वसुधाधिपः ईजानो वितते यज्ञे ब्राह्मणेभ्यो न्यमन्यत
दिलीपस्य तु यज्ञेषु कृतः पंथा हिरण्मयः तं धर्ममिव कुर्वाणाः सेंद्रा देवाः समागमन् चषालं प्रचषालं च यस्य यूपे हि
रण्मये रागषाडवभोज्यपेयाश्च मन्त्राः पृथिवीसुरराजते तदेतदद्भुतं मन्ये अन्यैर्न सदृशं नृपैः यदप्सु युध्यमानस्य चक्रेण परि

द्रो० पेतुः राजानं दृढधन्वानं दिलीपं सत्यवादिनं येप्यश्यन्सुरि दाक्षिण्यं ते पि स्वर्गजिता नराः पंचशब्दा न जीर्यंति खट्वांगस्य नि
६४ वेशने स्वाध्यायघोषो ज्याघोषः पिबताश्नीत खादत सचेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तव [illegible] मा पु
त्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच मां
धाता वै यौवनाश्वो मृतः संजय शुश्रुम देवासुरमनुष्याणां त्रैलोक्यविजयी नृपः यं देवावश्विनौ गर्भात्पितुः पूर्वं चकर्ष
तुः मृगयां विचरन्राजा तृषितः क्लांतवाहनः धूमं दृष्ट्वा गमत्सत्रं पृषदाज्यमवाप सः तं दृष्ट्वा युवनाश्वस्य जठरे सुतां गतं
गर्भं हि जह्रतुर्देवावश्विनौ भिषजां वरौ तं दृष्ट्वा पितुरुत्संगे शयानं देववर्चसं अन्योन्यमब्रुवन्देवाः कमयं धास्य
तीति वै मामेवायं धयत्वग्रे इति ह स्माह वासवः ततोंगुलिभ्यो हींद्रस्य प्रादुरासीत्पयोमृतं मांधास्यतीति कारुण्याद्यदिं
द्रो ह्यस्यान्वकंपयत् तस्मात्तु मांधातेत्येवं नाम तस्याद्भुतं कृतं ततस्तु धारां पयसो घृतस्य च महात्मनः तस्यास्ये यौ
वनाश्वस्य पाणिरिंद्रस्य चाश्रवत् अपिबत्पाणिमिंद्रस्य समासादभ्यवर्द्धत सोभवद्द्वादशसमो द्वादशाहेन वीर्यवा
न् इमां च पृथिवीं कृत्स्नामेकाह्ना सव्यजीजयत् धर्मात्मा धृतिमान्वीरः सत्यसंधो जितेंद्रियः जनमेजयं सुधन्वानं गयं पू
रुं बृहद्रथं असितं चैव रामं च मांधाता मनुजो जयत् उदेति च यतः सूर्यो यत्र च प्रतितिष्ठति तत्सर्वं यौवनाश्वस्य मां
धातुः क्षेत्रमुच्यते सोश्वमेधशतैरिष्ट्वा राजसूयशतेन च अददाद्रोहितान्मत्स्यान्ब्राह्मणेभ्यो विशांपते हैरण्या
न्योजनोत्सेधानायतान्शतयोजनं बहुप्रकारान्सुस्वादून्भक्ष्यभोज्यान्नपर्वतान् अतिरिक्तं त्वाब्राह्मणेभ्यो भु
ज्यमानं हीयते मनः भक्ष्यान्नपानं निचया शुशुभुस्त्वन्नपर्वताः घृतहृदाः सूपपंकादधिफेना गुडोदकाः रुरुधुः श्रीराम० ६४

पर्वता नद्यो मधुक्षीरवहाः शुभाः देवासुरा नरा यक्षा गंधर्वोरगपक्षिणः विप्रास्तत्रागतास्त्वासन् वेदवेदांगपारगाः ब्राह्म
णाश्चर्षयश्चापि नासंस्तत्राविपश्चितः स भद्रां तां वसुमतीं वसुपूर्णां तु सर्वतः स तां ब्राह्मणसात्कृत्वा जगामास्तं तदा
नृपः गतः पुण्यकृतां लोकान्व्याप्य स्वयशसा दिशः स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पु
त्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच य
यातिं नाहुषं चैव मृतं संजय शुश्रुम राजसूयशतैरिष्ट्वा सोश्वमेधशतेन च पुंडरीकसहस्रेण वाजपेयशतैस्तथा अ
तिरात्रसहस्रेण चातुर्मास्यैश्च कामतः अग्निष्टोमैश्च विविधैः सत्रैश्च प्राज्यदक्षिणैः अब्राह्मणानां यद्वित्तं पृथि
व्यामस्ति किंचन तत्सर्वं परिसंख्याय ततो ब्राह्मणसात्करोत् नृप देवासुरेषु युद्धेषु हत्वा देवसहायनां चतुर्धा व्यभ
जत्सर्वां चतुर्भ्यः पृथिवीमिमां यज्ञैर्नानाविधैरिष्ट्वा प्रजामुत्पाद्य चोत्तमां देवयान्यां चौशनस्यां शर्मिष्ठायां च
धर्मतः देवारण्येषु सर्वेषु विजहारामरोपमः आत्मनः कामचारेण द्वितीय इव वासवः यदा नाभ्यगमच्छांतिं
कामानां सर्ववेदवित् ततो गाथामिमां गीत्वा सदारः प्राविशद्वनं यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः प ७
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् एवं कामान्परित्यज्य ययातिर्धृतिमेत्य च पूरुं राज्ये प्रतिष्ठाप्य प्रया
तो वनमीश्वरः स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वा
नमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच नाभागमंबरी
षं चैव मृतं संजय शुश्रुम यः सहस्रं सहस्राणां राज्ञां चैकस्त्वयोधयत् जिगीषमाणः संग्रामे समंताद्वै

द्रो० रिरोऽभ्यपतत् अस्त्रयुद्धविदो घोरास्तं जेतुमाशीविषगिरः वल्कला मादृशी कृत्यमेषां सोऽस्त्रबलेन व छत्रायुधध्वजरथां
६५ छित्वा प्राणांस्तानव्यथः तत एनं मुक्तसन्नाहाः प्रार्थयन जीवितं विराः शरण्यमीयुः शरणं तवास्म इतिवादिनः
स तु तान्वशगान्कृत्वा जित्वा चेमां वसुंधरां ईजे यतशतैरिष्टैर्यथाशास्त्रं तथानघ बुभुजुः सर्वसंपन्नमन्न
मन्येजनाः सदा तस्मिन्यज्ञे तु विप्रेन्द्राः संतृप्ताः परमार्चिताः मोदकान्पूरिकापूपान्स्वादुपूर्णांश्च शष्कुलीः
करंभान्पृथुमृद्वीकानन्नानि सुकृतानि च सूपान्मैरेयकापूपान्रागखाण्डवपानकान् मृष्टान्नानि सुयु
क्तानि मृदूनि सुरभीणि च घृतं मधु पयस्तोयं दधीनि रसवंति च फलं मूलं च सुस्वादु द्विजास्तत्रोपभुंजते माद
नीयानि पानानि विदित्वा चात्मनः सुखं अपिबंत यथाकामं पानपा गीतवादितैः तत्र स्म गाथा गायंति क्षी
वा हृष्टाः पठंति च नाभागस्त्वतिसंयुक्तानन्नतुष्ट्या सहस्रशः तेषु यज्ञेषु यो वरीयो दक्षिणामत्यकालयत् राज्ञां शतस
हस्राणि दशप्रयुतयाजिनां हिरण्यकवचान्सर्वान् श्वेतच्छत्रप्रकीर्णकान् हिरण्यस्यन्दनारूढान्सानुयात्रपरिच्छ
दान् ईजानो वितते यज्ञे दक्षिणामत्यकालयत् मूर्धाभिषिक्तांश्च नृपान् राजपुत्रशतानि च सदंडकोशनिचयान्ब्रा
ह्मणेभ्यो ह्यमन्यत नैव पूर्वे जनाश्चक्रुर्न करिष्यंति चापरे यदंबरीषो नृपतिः करोत्यमितदक्षिणः इत्येवमन्व
मोदंत श्रीता यस्य महर्षयः स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वा
नमदाक्षिण्यमभिश्वैत्येतिव्याहरन् ॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच शशबिंदुं च राजानं मृतं
संजय शुश्रुम ईजे स विविधैर्यज्ञैः श्रीमान्सत्यपराक्रमः तस्य भार्यासहस्राणां शतमासीन्महात्मनः एकैकस्यां च भार्यायां

श्रीराम०
६५

सहस्रंतनयाअभवन् तेकुमाराःपराक्रांताःसर्वेनियुतयाजिनः राजानःक्रतुभिर्मुख्यैरीजानावेदपारगाः हिरण्यकवचाः
सर्वेसर्वेचोत्तमधन्विनः सर्वेश्वमेधैराजीनाःकुमाराःशाशबिंदवः तानश्वमेधेराजेंद्रे ब्राह्मणेभ्योददात्पिता शतंशतं
रथगजाएकैकंपृष्ठतोन्वयुः राजपुत्रंतदाकन्यास्तपनीयस्वलंकृताः कन्यांकन्यांशतंनागानागेनागेशतंरथाः रथेर
थेशतंचाश्वाबलिनोहेममालिनः अश्वेअश्वेसहस्रंगागवांपंचाशदाविकाः एतद्धनमपर्यंतमश्वमेधेमहामखे श
शबिंदुर्महाभागोब्राह्मणेभ्योत्यमन्यत वार्क्षाश्चयूपायावंतोअश्वमेधेमहामखे तेतथैवपुनश्चान्येतावंतःकाम्चना
भवन् भक्षान्नपाननिचयाःपर्वताःक्रोशमुच्छ्रिताः तस्याश्वमेधेनिर्वृत्तेराज्ञःशिष्टास्त्रयोदश तुष्टपुष्टजनाकीर्णांशां
तविघ्नामनामयाः शशबिंदुरिमांभूमिंचिरंभुक्त्वादिवंगतः सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तु
भ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारद
उवाच गयंचामूर्त्तरयसंमृतंसृंजयशुश्रुम योवर्षशतंराजाहुतशिष्टाशनोभवत् तस्मैह्यग्निर्वरंप्रादात्ततोवव्रेवरंगय
ः तपसाब्रह्मचर्येणव्रतेननियमेनच गुरूणांचप्रसादेनवेदानिच्छामिवेदितुं स्वधर्मेणाविहिंस्यान्यानधनमिच्छामि
चाक्षयं विप्रेषुददतश्चैवश्रद्धाभवतुनित्यशः अनन्यासुसवर्णासुपुत्रजन्मचमेभवेत् अन्नंमेददतःश्रद्धाधर्मेमे
रमतांमनः अविघ्नंचास्तुमेनित्यंधर्मकार्येषुपावक तथाभविष्यतीत्युक्त्वातत्रैवांतरधीयत गयोह्यवाप्यतत्सर्वं
धर्मेणारीनजीजयत् सदर्शपौर्णमासाभ्यांकालेचाग्रयणेनच चातुर्मास्यैश्चविविधैर्यज्ञैश्चावाप्तदक्षिणैः अजयच्छ्र

द्रो० ऽयराजा परिसंवत्सरान शतं गवां शतसहस्राणि शतमश्वशतानि च शतं निष्कसहस्राणि गवां चाप्ययुतानि षट् उत्था
६६ योत्थाय सप्रादात् परिसंवत्सरान शतं नक्षत्रेषु च सर्वेषु ददन्नक्षत्रदक्षिणाः ईजे च विविधैर्यज्ञैर्यथा सोमो गिरा यथा
सौवर्णां पृथिवीं कृत्वा य इमां मणिशर्करां विप्रेभ्यः प्राददद्राजा सोऽश्वमेधमहामखे जांबूनदमया यूपाः सर्वे र
त्नपरिच्छदाः गयस्यासन्समृद्धाश्च सर्वभूतमनोहराः सर्वकामसमृद्धं च प्रादादन्नं गयस्तदा ब्राह्मणेभ्यः प्रहृष्टेभ्यः
सर्वभूतेभ्य एव च समुद्रवनद्वीपनदीनदवनेषु च नगरेषु च राष्ट्रेषु दिवि व्योम्नि च येऽवसन् भूतग्रामाश्च विविधाः
:संतृप्ता यज्ञसंपदा गयस्य सदृशो यज्ञो नास्त्यन्य इति तेऽब्रुवन् षड्विंशद्योजनायामा त्रिंशद्योजनमायताः पश्चा
त्पुरस्ताच्चतुर्विंशद्वेदी ह्यासीद्धिरण्मयी गयस्य यजमानस्य मुक्तावज्रमणिस्तृता प्रादात्स ब्राह्मणेभ्योऽथ
वासांस्याभरणानि च यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणा यत्र भोजनशिष्टस्य पर्वताः पंचविंशतिः
कुल्याः कुशलवाहिन्यो रसानामभवंस्तदा वस्त्राभरणगंधानां राशयश्च पृथग्विधाः यस्य प्रभावाच्च गयस्त्रिषु लोके
षु विश्रुतः वटश्चाक्षय्यकरणः पुण्यं ब्रह्मसरश्च तत् स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्र
मनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच सांकृतिं
रंतिदेवं च मृतं संजय शुश्रुम यस्य द्विशतसाहस्रा आसन्सूदा महात्मनः गृहानभ्यागतान्विप्रानतिथीन्परिवेषकाः
पक्वापक्वं दिवारात्रमपर्यंतधनं तदा न्यायेनाधिगतं वित्तं ब्राह्मणेभ्यो ह्यमन्यत वेदानधीत्य धर्मेण यश्चक्रे
द्विशतावशे उपस्थितास्तु पशवः स्वयं यं शंसितव्रतं बहवः स्वर्गमिच्छंतो विधिवत्सत्रयाजिनं नदीमहान श्रीराम० ६६

सा तस्य प्रह्वाच मे राशीतः तस्माच्च मेरावतीपूर्वमग्निहोत्रे भवत्पुरा ब्राह्मणेभ्यो ददन्निष्कान् सौवर्णान्स प्रभावतः तुभ्यं
निष्कं तुभ्यं निष्कं इति हस्म प्रभाषते तुभ्यं तुभ्यमिति प्रादान्निष्कान्निष्कान् सहस्रशः ततः पुनः स माश्वास्य निष्कानेव प्रय
च्छति अल्पं दत्तं मयाद्येति निष्ककोटिं प्रदाय सः एकाह्ना दास्यति पुनः कोन्यस्तत्संप्रदास्यति द्विजपाणिवियोगेन दुःख
मे शाश्वतं महत् भविष्यति न संदेह एवं राजा ददद्वसु सहस्रशश्च सौवर्णान् वृषभान् गोशतानुगान् साष्टं शतं सुव
र्णानां निष्कमाहुः पलं तथा अध्यर्द्धमासमददद्ब्राह्मणेभ्यः शतं समाः अग्निहोत्रोपकरणं यज्ञोपकरणं च यत् ऋ
षिभ्यः करकान्कुंभान्स्थालीः पिठरमेव च शयनासनयानानि प्रासादांश्च गृहाणि च वृक्षांश्च विविधान्दद्यादन्नानि
विविधानि च सर्वं सौवर्णमेवासीद्रंतिदेवस्य धीमतः तत्रास्य गाथा गायंति ये पुराणविदो जनाः रंतिदेवस्य तं दृष्ट्वा
समृद्धिमतिमानुषीं नैतादृशं दृष्टपूर्वं कुबेरसदनेष्वपि धनं च पूर्णमासाद्य किं पुनर्मनुजेष्विति व्यक्तं वस्वोक
सारेयमित्यूचुस्तत्र विस्मिताः सांकृते रंतिदेवस्य यां रात्रिमतिथिर्वसेत् आलभ्यंत तदा गावः सहस्राण्येक
विंशतिः तत्र स्म सूदाः क्रोशंति सुमृष्टमणिकुंडलाः सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा रंतिदेवस्य
यत्किंचित्सौवर्णमभवत्तदा तत्सर्वं वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत प्रत्यक्षं तस्य हव्यानि प्रतिगृह्णंति देवताः
कव्यानि पितरः काले सर्वकामान् द्विजोत्तमाः स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं
मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नार

द्रो० दउवाच दौष्यंतिं भरतंचापिमृतंसंजयशुश्रुम कर्माण्यसुकराण्यन्यैः कृतवान्यः शिशुर्वने हिमावदातान्यः सिंहान्नखदं
६७ ष्ट्रायुधान्वली निर्वीर्यांस्तरसाकृत्वाविचकर्षबबंधच क्रूरानुग्रतरान्व्याघ्रान्दमित्वाचाकरोद्वशे मनःशिलाइवशि
लाः संयुक्ताजतुराशिभिः व्यालांश्चातिबलवान्सुप्रतीकान्गजानपि दंष्ट्रासुगृह्यविमुखान्शुष्कास्यानकरोद्वशे महिषा
नप्यतिबलान्बलिनो विचकर्षह सिंहानांचसुदृप्तानांशतान्याकर्षतबलात् बलिनः सृमरान्खड्गान्नानासत्वानिचा
प्युत कृच्छ्रप्राणान्वनेबद्ध्वादमयित्वाप्यपासृजत् तंसर्वदमनेत्याहुर्द्विजास्तेनास्यकर्मणा तंप्रत्यषेधज्जननीमामा
त्वानिविजीजहि सोऽश्वमेधशतेनेष्ट्वायमुनामनुवीर्यवान् त्रिशतेनाश्वान्सरस्वत्यांगंगामनुचतुःशतान् सोऽश्वमेधसह
स्रेणराजसूयशतेनच पुनरीजेमहायज्ञैः समाप्तवरदक्षिणैः अग्निष्टोमातिरात्राभ्यामिष्ट्वाविश्वजितामपि वा
जपेयसहस्राणांसहस्रैश्चसुसंवृतैः इष्ट्वाशाकुंतलोराजातर्पयित्वाद्विजान्धनैः सहस्रंयत्रपद्मानांकण्वायभरतो
ददौ जांबूनदस्यशुद्धस्यकनकस्यमहायशाः यस्ययूपःशतव्याम परिणाहेनकांचनः समागम्यद्विजैः सार्द्धंस
इंद्रैर्देवैः समुच्छ्रितः अलंकृताराजमानानसर्वरत्नैर्मनोहरैः हैरण्यानश्वान्द्विरदान्रथानुष्ट्रानजाविकं दासीदासं
धनंधान्यंगाः सवत्साः पयस्विनीः ग्रामान्गृहांश्चक्षेत्राणिविविधांश्चपरिच्छदान् कोटीशतायुतांश्चैवब्राह्मणे
भ्योह्यमन्यत चक्रवर्त्यह्यदीनात्माजितारिर्ह्यजितःपरैः सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतर
स्तुभ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरन् ॥ ॥इतिद्रोणपर्वणिषोडश
राजिके नारद उवाच पृथुंवैण्यंचराजानंमृतंसंजयशुश्रुम यमभ्यषिंचन्साम्राज्येराजसूयेमहर्षयः यत्नतः श्रीराम०
६७

प्रथितेस्तु चक्षुः सर्वानभिभवन्पृथुः [redacted] क्ष तोत्र ह्यास्यतेसर्वा नित्यं वक्ष
त्रियोभवत् पृथुं वैराजं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ततो राजेति नामास्य अनुरागादजायत अकृष्ट
पच्या पृथिवी आसीद्धैन्यस्य कामधुक् सर्वाः कुमदहो गावः पुटके पुटके मधु आसन्हिरण्मयादर्भाः सु
खस्पर्शाः सुखावहाः तेषां चीराणि संवीताः प्रजास्तेष्वेव शेरते फलान्यमृतकल्पानि स्वादूनि चमधूनि
च तेषामासीत्तदाहारो निराहाराश्च नाभवन् अरोगाः सर्वसिद्धार्था मनुष्या ह्यकुतोभयाः न्यवसंत यथाका
मं वृक्षेषु च गुहासु च प्रविभागो न राष्ट्राणां पुराणां वा भवत्तदा यथासुखं यथाकामं यथैता मुदिताः प्रजाः
तस्य संस्तंभिता ह्यापः समुद्रं मभियास्यतः पर्वताश्च ददुर्मार्गं ध्वजभंगश्च नाभवत् तं वनस्पतयः शैलाद्दे
वासुरनरोरगाः सप्तर्षयः पुण्यजनागंधर्वाप्सरसोपि च पितरश्च सुखासीनमभिगम्येदमब्रुवन् सम्राडु
सि क्षत्रियोसि राजा गोप्ता पितासि नः देह्यस्मभ्यं महाराज प्रभुः सन्नीप्सितान्वरान् यैर्वयं शाश्वतीस्तृप्ती
र्वर्तयिष्यामहे सुखं तथेत्युक्त्वा पृथुर्वैण्यो गृहीत्वाजगवं धनुः शरांश्चाप्रतिमान्घोरांश्चिंतयित्वाब्र
वीन्महीं एह्येहि वसुधे क्षिप्रं क्षर स्वं कांक्षितं पयः ततो दास्यामि भद्रं ते अन्नं यस्य यथेप्सितं वसुधोवाच
दुहितृत्वेन मां वीर संकल्पयितुमर्हसि तथेत्युक्त्वा पृथुः सर्वं विधानमकरोद्वशी ततो भूतनिकायास्तां वसुधां दुदु
हुस्तदा तां वनस्पतयः पूर्वं समुत्तस्थुर्दुधुक्षया सातिष्ठद्वत्समन्वत्सं दोग्ध्री पात्राणि चेच्छती वत्सोभूत्पुष्पितः शालः

द्रो॰ मसोदोग्धाभवत्तदा छिन्नप्ररोहणं दुग्धं पात्रमौदुम्बरं शुभं उदयः पर्वतो वत्सो मेरुर्दोग्धा महागिरिः रत्नान्योषधयो दुग्धं
६८ पात्रमश्ममयं तथा दोग्धा वासीत्तदा देवो दुग्धमूर्जस्करं प्रियं असुरा दुदुहुर्मायामामे पात्रे तु ते तदा दोग्धा द्विमूर्धा त
त्रासीद्वत्सश्चासीद्विरोचनः कृषिं च सस्यं च नरा दुदुहुः पृथिवीतले स्वायंभुवो मनुर्वत्सस्तेषां दोग्धाभवत्पृथुः अलाबु
पात्रे च तथा विषं दुग्धा वसुंधरा धृतराष्ट्रोऽभवद्दोग्धा तेषां वत्सस्तु तक्षकः सप्तर्षिभिर्ब्रह्म दुग्धा तथा चाक्लिष्टकर्म
भिः दोग्धा बृहस्पतिः पात्रं छन्दो वत्सश्च सोमराट् अन्तर्धानं चामपात्रे दुग्धा पुण्यजनैर्विराट् दोग्धा वैश्रवणस्तेषां
वत्सश्चासीद्वृषध्वजः पुण्यगन्धान्पद्मपात्रे गन्धर्वाप्सरसो दुहन् वत्सश्चित्ररथस्तेषां दोग्धा विश्वरुचिः प्रभुः स्वधां र
जतपात्रेषु दुदुहुः पितरस्तु ततां वत्सो वैवस्वतस्तेषां यमो दोग्धान्तकस्तदा एवं निकायैस्तैर्दुग्धा पयो मोघं हि सा विराट् ये
र्वैन्यं तिलपात्रे वैन्यैश्च नित्यशः यज्ञैश्च विविधैरिष्ट्वा पृथुर्वैण्यः प्रतापवान् संतर्प्य पित्वा भूतानि सर्वकामैर्म्म
नःप्रियैः हैरण्याननकरोद्राजा ये केचित्पार्थिवा भुवि तांश्च ब्राह्मणेभ्यः प्रायच्छदश्वमेधे महामखे षष्टिं नागसहस्राणि
षष्टिं नागशतानि च सौवर्णानकरोद्राजा ब्राह्मणेभ्यश्च तान्ददौ इमां च पृथिवीं सर्वां मणिरत्नविभूषितां सौवर्णीम
करोद्राजा ब्राह्मणेभ्यश्च तां ददौ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः
अयज्वानमदाक्षिण्यमभिश्वैत्येत्यव्याहरन् महाभारते द्रोणपर्वणि षोडशराजिके॥ ॥ नारद उवाच
रामो महातपाः शूरो वीरलोकनमस्कृतः जामदग्न्योऽप्यतियशास्त्रविद्धाम रिष्यति यस्माद्यमनुप
येति भूमिं कुर्वंति मां पुरा नचासीद्विक्रिया यस्य प्राप्य श्रियमनुत्तमां यः क्षत्रियैः परामृष्टे वत्से ꣸ श्रीराम॰

पितरश्चाब्रुवन् ततोवधीत्कार्तवीर्यमजितंसमरेपरैः क्षत्रियाणांचतुःषष्टिमयुतानिसहस्रशः तदप्रभृत्यैःसमेतानिए
कैकंधनुषाजयत् ब्रह्मद्विषांवाथतस्मिन्सहस्राणिचतुर्दश पुनरन्यान्निजग्राहदंतक्रूरंजघानह सहस्रमुशले
नाघ्नत्सहस्रमसिनावधीत् उद्बंधनात्सहस्रंचहैहयाःसमरेहताः सरथाश्वगजावीरानिहतास्तत्रशेरते पितृवधा
मर्षितेनजामदग्न्येनधीमतानिजघ्नेदशसाहस्रान्रामःपरशुनातदा नह्यमृष्यततावाचोयास्तैर्भृशमुदीरिताः
भृगोरामाभिधावेतियदाक्रंदन्द्विजोत्तमाः ततःकाश्मीरदरदान्कुंतिक्षुद्रकमालवान् अंगवंगकलिंगांश्चवि
देहांस्ताम्रलिप्तकान् रक्षोवाहान्वीतिहोत्रान्त्रिगर्तान्मार्तिकावतान् शिबीनन्यांश्चराजन्यान्देशाद्देशात्सहस्रशः
निजघानशितैर्बाणैर्जामदग्न्यःप्रतापवान् कोटीशतसहस्राणिक्षत्रियाणांसहस्रशः इंद्रगोपकवर्णस्यबंधुजी
वनभस्यच रुधिरस्यपरीवाहैःपूरयित्वासरांसिच सर्वानष्टादशद्वीपान्वशमानीयभार्गवः ईजेक्रतुशतैः
पुण्यैःसमाप्तवरदक्षिणैः वेदीमष्टनलोत्सेधांसौवर्णांविधिनिर्मितां सर्वरत्नशतैःपूर्णांपताकाशतमालि
नीं ग्राम्यारण्यैःपशुगणैःसंपूर्णांचमहीमिमां ततःशतसहस्राणिद्विपेंद्रान्हेमभूषणान् रामस्यजामद
ग्न्यस्यप्रतिजग्राहकाश्यपः निर्दस्युंपृथिवींकृत्वाशिष्टेष्टजनसंकुलां काश्यपायददौरामोहयमेधेमहामखे
त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांपुरा इष्ट्वाक्रतुशतैर्वीरोब्राह्मणेभ्योह्यमन्यत सप्तद्वीपांवसुमतींमारीचो
ऽगृह्णतद्विजः रामंप्रोवाचनिर्गच्छवसुधातोममाज्ञया सकाश्यपस्यवचनात्प्रोत्सार्यसरितांपतिं इषुपातेयु
धांश्रेष्ठःकुर्वन्ब्राह्मणशासनं अध्यावसद्गिरिश्रेष्ठंमहेंद्रंपर्वतोत्तमं एवंगुणशतैर्युक्तोभृगूणांकीर्त्तिवर्द्ध

तावा ५

द्रो० नः जामदग्न्योप्यतियशा मरिष्यति महाद्युतिः त्वया चतुर्भद्रतरः पुत्रात्पुण्यतरस्तव अयज्वानमदाक्षिण्यं मा पुत्र
६७ मनुतप्यथाः एते चतुर्भद्रतरास्त्वया भद्रशताधिकाः मृता नरवरश्रेष्ठ मरिष्यन्ति च संजय॥ ॥इति द्रोणपर्वणि
षोडशराजिके व्यास उवाच पुण्यमाख्यानमायुष्यं श्रुत्वा षोडशराजिकं अव्याह न्नरपतिः तूष्णीमासीत्स
संजयः तमब्रवीत्तथासीनं नारदो भगवानृषिः श्रुतं कीर्तयतो मत्तो गृहीतं ते महाद्युते अहोस्विदन्ततो नष्टं श्राद्धं
मिति ५ व हीपतौ स एवमुक्तः प्रत्याह प्रांजलिः संजयस्तदा एतच्छ्रुत्वा महाबाहो धन्यमाख्यानमुत्तमं राजर्षीणां पुराणानां
यज्वनां दक्षिणावतां विस्मयेन हते शोके तमसीवार्कतेजसा विपाप्मास्म्यव्यथोपेतो ब्रूहि किं करवाण्यहं ना
रद उवाच दिष्ट्यापहृतशोकस्त्वं वृणीष्वेह यदिच्छसि तत्तत्प्रपत्स्यसे सर्वं न मृषावादिनो वयं संजय उवाच ए
तेनैव प्रतीतोऽहं प्रसन्नो यद्भवान्मम प्रसन्नो यस्य भगवान्न तस्यास्तीह दुर्लभं नारद उवाच पुनर्ददानि ते पुत्रं द
द्रो० यएवंवध्रीतितत्गुरावरि कुरूणांनोऽपिष्यंस्त्वंनत्वांप्समनमाप्नेजत तेनतयुधिष्ठिरमभोचारमुपलप्स्यतिपांडवाः पांडवान्तकस्पयः सेऽवैयेचान्येपिनरा
८३ धिपाः सकृत्वापितृकर्म्मत्वंपुत्रंसंछाप्यमसंस्थे वैत्तैथायदिधर्म्मेणामतत्वांप्समनमाप्नेजत त्वंतुभाक्ततमोलोकेहितावधर्म्मसनातनं दुर्योधन
समक्षंसर्वशकुनेस्त्वान्ययाम्मतं तन्नविलपितंसर्वंमयाराजन्निशामितं अर्थैर्निविशमानस्यविषमिश्रंयथामधु नामन्यततदाकस्मात्युक्तानेवा
हवंपुरा नभीष्मेनेवचद्रोणंयथातांममतेच्युतः अजानन्स्यपरातुत्वांराजधर्मोऽरथश्चजां तदामन्यतिकस्मात्वां नतथावहूममते यस्यपाण्
अमानांश्चपरापार्थानुपक्षसे तस्मान्नेवंधः प्राप्तस्त्वांपुत्राणांराजकामुक पितृपैतामहंराज्यमपवृत्तंतदानघ अथपार्थैर्जितांकृत्स्नांपृथि
वीमस्यपद्यथाः पांडुनानिर्जितंराज्यंकौरवाणांयशस्तथा ततश्चाप्यधिकंभूयः पांडवैर्धर्मचारिभिः तेषांतत्ताहशंकर्मत्वामासाद्यसुनिष्फलं
यस्मिन्नाप्रंसितात्राज्यास्तेयेहामिषगृद्धिना यस्तुनर्युद्धकालेत्वंपुत्रान्गर्हयसेनृप वहुधाव्याहरन्दोषान्नतदद्योपपद्यते नहिरक्षंतिराजानो
युध्यंतोऽजीवितंरणे चमूंविगाह्यपार्थानांयुध्यंतेक्षत्रियर्षभाः यांतुकृष्णार्ज्जुनौसेनांयांसात्यकिवृकोदरौ रक्षेरन्कोनुतांयुध्येच्चमूमन्यत्र
कौरवैः येषांयोद्धागुडाकेशोयेषांमंत्रीजनार्दनः येषांचसात्यकिर्योद्धायेषांयोद्धावृकोदरः कोहितान्विषहेद्योद्धुंमर्त्यधर्माधनुर्द्धरः अन्य
त्रकौरवेयेभ्योयेवातेषांपदानुगाः यावत्तुशक्यतेकर्त्तुमनुरक्तैर्जनाधिपैः क्षत्रधर्मरतैःशूरैस्तावत्कुर्वंतिकौरवाः यथातुपुरुषव्याघ्रै
र्युद्धंपरमसंकटं कुरूणांपांडवैःसार्द्धंतत्सर्वंशृणुतत्त्वतः ।। द्रोणपर्वणिजयद्रथवधे संजयउवाच तस्यांनिशायांव्युष्टायांद्रोणः शस्त्रभृ
तांवरः स्वान्यनीकानिसर्वाणिप्राक्रामद्व्यूहितुंततः शूराणांगर्जतांराजन्संक्रुद्धानाममर्षिणां श्रूयंतेस्मगिरश्चित्राः परस्परवधैषिणां
विस्फार्यचधनूंष्यन्येज्याःपरिमृज्यच विनिश्वसंतः प्राक्रोशन्क्वेदानींसधनंजयः विकोशान्सुत्सरूनन्येकृतधारान्समाहितान् पीता
नाकाशसंकाशानसीन्केचिच्चिक्षिपुः चरंतस्त्वसिमार्गांश्चधनुर्मार्गांश्चशिक्षया संग्राममनसःशूरादृश्यंतेस्मसहस्रशः संघंटाश्चंद एम०
८३

नाविधाः सुवर्णकवचविभूषिताः समुत्क्षिप्य गदाश्चान्ये पर्यवेष्ठंत पांडवं अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः चक्रुः संबाधमाका
शमुच्छ्रितैर्ध्वजोपमैः नानाप्रहरणैश्चान्ये विविधस्रगलंकृताः संग्राममनसः शूरास्तत्र तत्र व्यवस्थिताः फाल्गुनं क्रमेणाविदं कांक्षमाणा
श्च कोरवः धान्वैतान्स्वसेनायामाह्वयंतो रणे तदा ततः शंखमुपाध्मायल्लरयुग्वाजिनः स्वयं इतस्ततस्तान्नयन्द्रोणश्चरति वेगितः ते
ष्वनीकेषु सर्वेषु स्थितेष्वेवं नरादिषु भारद्वाजो महाराज जयद्रथमथाब्रवीत त्वं चैव सोमदत्तिश्च कर्णश्चैव महारथः अश्वत्थामा च शल्य
श्च वृषसेनः कृपस्तथा शतं चाश्वसहस्राणां रथानामयुतानि षट् द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश पदातीनां सहस्राणि
दंशितान्येकविंशतिः गव्यूतिषु त्रिमात्रासु मामनासाद्य तिष्ठत तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः किं पुनः पांडवाः सर्वे स
माश्वसिहि सैन्धव एवमुक्तः समाश्वस्तः सिंधुराजो जयद्रथः संप्रायात्सह गांधारैर्वृतस्तैश्च महारथैः वर्मिभिः सादिभिर्यत्तैः प्रासपाणि
भिरास्थितैः चामरापीडिनः सर्वे जांबूनदविभूषिताः जयद्रथस्य राजेंद्र हयाः साधुयंससहस्राणि त्रिसाहस्राश्च सैंधवाः मत्तानां सुविरू
ढानां हस्त्यारोहैर्विशारदैः नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणां अध्यर्द्धं तु सहस्रं तु पुत्रो दुर्मर्षणस्तव अग्रतः सर्वसैन्याना
ममानो व्यवस्थितः ततो दुःशासनश्चैव विकर्णश्च तवात्मजौ सिंधुराजार्थसिद्ध्यर्थमग्रानीके व्यवस्थितौ दीर्घो द्वादशगव्यूतिः पश्चा
र्द्धे पंचविस्तृतः व्यूहः सचक्रशकटो भारद्वाजेन निर्मितः नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः रथाश्वगजपत्त्योघैर्द्रोणेन विहितः स्व
यं पश्चार्द्धे तस्य पद्मस्य गर्भव्यूहः सुदुर्भिदः सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः सूची
मुखे महेष्वासः कृतवर्मा व्यवस्थितः अनंतरं च कांबोजो जलसंधश्च मारिष दुर्योधनश्च कर्णश्च तदनंतरमेव च ततः शतसहस्राणि
योधानामनिवर्त्तिनां व्यवस्थितानि सर्वाणि शकटे सुखरक्षणा तेषां च पृष्ठतो राजा बलेन महता वृतः जयद्रथस्ततो राजा सूचीपा

वाहिनः तेचैव १

म्ध्ये अवस्थितः शकटस्य तु तुण्डस्थो भारद्वाजो मुखे स्थितः अनु तस्माभवद्भोजो जुगोपैनं ततः स्वयं श्वेतवर्माम्बरोष्णीषो व्यूढोरस्को महाभु-
जः धनुर्विस्फारयन् द्रोणस्तस्थौ क्रुद्ध इवान्तकः पताकिनं शोणहयं वेदीकृष्णाजिनध्वजं द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवो भवन्
सिद्धचारणसंघानां विस्मयः सुमहानभूत् द्रोणेन विहितं दृष्ट्वा व्यूहं क्षुब्धार्णवोपमं सशैलसागरवना नानाजनपदाकुला ग्रसे-
द्व्यूहः क्षितिं सर्वामिति भूतानि मेनिरे बहुरथमनुजाश्वपत्तिनागं प्रतिभयनिस्वनमद्भुतानुरूपं अहितहृदयभेदनं महद्वै शकटमवे-
क्ष्य कृतं ननन्द राजा ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच ततो व्यूढेष्वनीकेषु समुत्क्रुष्टेषु मारिष ताड्यमानासु भेरीषु मृदं-
गेषु नदत्सु च अनीकानां च संह्रादे वादित्राणां च निस्वने प्रध्मापितेषु शंखेषु संनादे लोमहर्षणे अभिहारयत्सु शनकैर्भरतेषु युयु-
त्सुषु रौद्रे मुहूर्ते संप्राप्ते सव्यसाची व्यदृश्यत बलानां वायसानां च पुरस्तात्सव्यसाचिनः बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत
मृगाश्च घोरसंनादाः शिवाश्चाशिवदर्शनाः दक्षिणेन प्रयातानामस्माकं प्राणदंस्तथा सनिर्घाताः ज्वलंत्यश्च पेतुरुल्काः सहस्र-
शः चचाल च मही कृत्स्ना भये घोरे समुत्थिते विष्वग्वाताः सनिर्घाता रूक्षाः शर्करकर्षिणः ववुरायाति कौन्तेये संग्रामे समुपस्थिते ना-
कुलिश्च शतानीकः धृष्टद्युम्नश्च पार्षतः पांडवानामनीकानि प्राज्ञौ तौ व्यूहतुस्तदा ततो रथसहस्रेण द्विरदानां शतेन च त्रिभिरश्वस-
हस्रैश्च पदातीनां शतैः शतैः अध्यर्धमात्रे धनुषां सहस्रे तनयस्तव अग्रतः सर्वसैन्यानां स्थित्वा दुर्मर्षणोऽब्रवीत् अद्य गांडीवधन्वानं
तपंतं युद्धदुर्मदं अहमावारयिष्यामि वेलेव मकरालयं अद्य पश्यंतु संग्रामे धनंजयममर्षणं विषक्तमपि दुर्द्धर्षमश्मकूटमिवाश्मनि
तिष्ठध्वं रथिनो यूयं संग्राममभिकांक्षिणः युध्यामि संहतानेतान्यशोमानं च वर्धयन् एवं ब्रुवन्महाराज महात्मा सुमहामतिः महेष्वास-
वृतो राजन्महेष्वासो व्यवस्थितः ततोऽन्तक इव क्रुद्धः सवज्र इव वासवः दंडपाणिरिवासह्यो मृत्युः कालेन चोदितः शूलपाणिरिवाक्षो- एक
८४

म्लेच्छास्ताः पाशवानिव युगांताग्निरिवार्चिष्मान्संवर्त्स्येव पुनः प्रजाः कोपामर्षबलोद्भूतो निवातकवचांतकः जयेत्यजितास्थितः ससपारपि
ष्वन्मराघतं आमुक्तकवचः खड्गी जांबूनदकिरीटभृत शुभ्रमाल्यांबरधरः स्वंस्थाः स्वकुंडलः रथप्रवरमास्थाय नरो नारायणानुगः विधु
न्वन् गांडिवं संख्ये बभौ सूर्य इवोदितः सोऽग्रानीकस्य महतः इषुपाते धनंजयः व्यवस्थाप्य रथं राजन् शंखं दध्मौ प्रतापवान् अथ कृष्णोऽप्यसंभ्रांतः
पार्थेन सह मारिष प्राध्मापयत्पांचजन्यं शंखप्रवरमोजसा तयोः शंखप्रणादेन तव सैन्ये विशांपते आसन्संहृष्टरोमाणः कंपिता गतचेत
सः यथा त्रस्यंति भूतानि सर्वाण्यशनिनिःस्वनात् तथा शंखप्रणादेन वित्रेसुस्तव सैनिकाः प्रसुस्रुवुः शकृन्मूत्रं वाहनानि च सर्वशः एवं स
वाहनं सर्वमाविग्नमभवन्नृप सीदंति स्म नरा राजन् शंखशब्देन मारिष विसंज्ञाश्चाभवन्केचित्केचिद्राजन्वितत्रसुः ततः कपिर्महानादं
सह भूतैर्ध्वजालयैः अकरोद्व्यादितास्यश्च भीषयंस्तव सैनिकान् ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह पुनरेवाभ्यहन्यंत तव
सैन्यप्रहर्षणाः नानावादित्रसंह्रादैः क्ष्वेडितास्फोटिताकुलैः सिंहनादैः समुत्क्रुष्टैः समाहूतैर्महारथैः तस्मिंस्तुमुले शब्दे भी
रूणां भयवर्धने अतीव हृष्टो दाशार्हमब्रवीत्पाकशासनिः ॥ द्रोणपर्वणि जयद्रथवधे अर्जुन उवाच चोदयाश्वान् हृषीकेश य
त्र दुर्मर्षणः स्थितः एतद्भित्त्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीं संजय उवाच एवमुक्तो महाबाहुः केशवः सव्यसाचिना अचोदयद्ध
यांस्तत्र यत्र दुर्मर्षणः स्थितः स संप्रहारस्तुमुलः संप्रवृत्तः सुदारुणः एकस्य च बहूनां च रथनागनरक्षयः ततः सायकवर्षेण
पर्जन्य इव वृष्टिमान् परानवाकिरत्पार्थः पर्वतानिव नीरदः ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत् अवाकिरन्बाणजालैस्ततः
कृष्णधनंजयौ ततः क्रुद्धो महाबाहुर्वार्यमाणः परैर्युधि शिरांसि रथिनां पार्थः कायेभ्योपाहरच्छरैः उद्भ्रांतनयनैर्वक्त्रैः संदष्टौष्ठ
पुटैः शुभैः सकुंडलशिरस्त्राणैर्वसुधा समकीर्यत पुंडरीकवनानीव विध्वस्तानि समंततः विनिकीर्णानि योधानां वदनानि चकाशि

द्रो रे तपनीयतनुत्राणाः संसिक्ता रुधिरेण च संसक्ताश्च दृश्यंते मेघसंघास्सविद्युतः शिरसां पततां राजन् शब्दोभूद्वसुधातले कालेन परिपक्वा
८५ नां तालानां पततामिव ततः कबंधः कश्चित्तु धनुरालंब्य तिष्ठति किंचित्खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति पतितानि न जानंति शिरांसि पुरु
षर्षभाः अमृष्यमाणाः संग्रामे कौंतेयं जयकांक्षिणः हयानामुत्तमांगैश्च हस्तिहस्तैश्च मेदिनी बाहुभिश्च शिरोभिश्च वीराणां समकीर्यत अयं
पार्थः कुतः पार्थः एष पार्थ इति प्रभो तव सैन्येषु योधानां पार्थभूतमिवाभवत् अन्योन्यमपि चाजघ्नुरात्मानमपि चापरे पार्थभूतममन्यंत
जगत्कालेन मोहिताः निष्टनंतः सरुधिरा विसंज्ञा गाढवेदनाः शयाना बहवो वीराः कीर्तयंतः स्वबांधवान् सभिंदिपालाः सप्रासाः सश
क्त्यृष्टिपरश्वधाः सनिर्व्यूहाः सनिस्त्रिंशाः सशरासनतोमराः सबाणवर्माभरणाः सगदाः सांगदा रणे महाभुजगसंकाशा बाहवः
परिघोपमाः उद्वेष्टंति विचेष्टंति [illegible] संवेष्टंति च सर्वशः वेगं कुर्वंति संरब्धाः निकृत्ताः परमेषुभिः यो यः स्म समरे पार्थं प्रतिसंरभ
ते नरः तस्य तस्यांतको बाणः शरीरमुपसर्पति नृत्यतो रथमार्गेषु धनुर्व्यायच्छतस्तथा न कश्चित्तत्र पार्थस्य ददर्शांतरमण्वपि यत्नस्य ८६
घटमानस्य क्षिप्रं विक्षिपतः शरान् लाघवात्पांडुपुत्रस्य व्यस्मयंत परे जनाः हस्तिनं हस्तियंतारमश्वमाश्विकमेव च अभिनत्फाल्गुनो
बाणैः रथिनं च ससारथिं आवर्तमानमावृत्तं युध्यमानं च पांडवः प्रमुखे तिष्ठमानं च किंचिन्न निहंति सः यथोदयन्वै गगने सूर्यो हंति मह
त्तमः तथार्जुनो गजानीकमवधीत्कंकपत्रिभिः हस्तिभिः पतितैर्भिन्नैस्तव सैन्यमदृश्यत अंतकाले यथा भूमिर्विकीर्णा महीधरैः
यथा मध्यंदिने सूर्यो दुष्प्रेक्ष्यः प्राणिभिः सदा तथा धनंजयः क्रुद्धो दुष्प्रेक्ष्यो युधि शत्रुभिः तत्तथा तव पुत्रस्य सैन्यं युधि परंतप प्रभग्नं ११०
द्रुतमाविग्नमतीव शरपीडितं मारुतेनेव महता मेघानीकं व्यदीर्यत प्रकाल्यमानं तत्सैन्यं नाशकत्प्रतिवीक्षितुं प्रतोदैश्चापकोटीभि ३५

ट्कारैः साधुवादिहैः कशापार्ष्ण्यभिघातैश्च वाग्भिश्चाभिरेव च चोदयंतो हयांस्तेरोपलायंतेस्म तावकाः सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः
पार्ष्ण्यंगुष्ठांकुशैर्नागं चोदयंतस्तथापरे शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः तव योधा हतोत्साहा विभ्रांतमनसस्तदा ॥ ॥ इति द्रोणपर्व
णि जयद्रथवधे धृतराष्ट्र उवाच तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना केतु तत्र रणे वीराः प्रत्युदीयुर्धनंजयं आहो स्विच्छकटव्यूहं प्रविश्यामो
घविश्रयाः द्रोणमाश्रित्य संतिष्ठंत प्राकारमकुतोभयं संजय उवाच तथार्जुनेन संभग्ने तस्मिंस्तव बलेनघ हतवीरे हतोत्साहे पलायनकृ
तक्षणे पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः न तत्र कश्चित्संग्रामे शशाकार्जुनमीक्षितुं ततस्तव सुतो राजन दृष्ट्वा सैन्यं तथागतं
दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्यगात् सकांचनविचित्रेण कवचेन समावृतः जांबूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः नागा
नीकेन महता ग्रसन्निव महीमिमां दुःशासनो महाराज सव्यसाचिनमावृणोत् ह्रादेन गजघंटानां शंखानां निनदेन च ज्याक्षेपनिनदैश्चैव
बृंहितेन च दंतिनां भूर्दिशश्चांतरिक्षं च शब्देनासीत्समावृतं स मुहूर्तं प्रतिभयो दारुणः समपद्यत तान्दृष्ट्वा पततस्तूर्णमंकुशैर
भिचोदितान् व्यालंबहस्तान्संरब्धान्सपक्षानिव पर्वतान् सिंहनादेन महता नरसिंहो धनंजयः गजानीकममित्राणामभितो व्यध
मच्छरैः महोर्मिणमिवोद्धूतं श्वसनेन महार्णवं किरीटी तद्गजानीकं प्राविशन्मकरो यथा काष्ठातीत इवादित्यः प्रतपन्युगसंक्षये
ददृशे शत्रुसंघानां पार्थः परपुरंजयः खुरशब्देन चाश्वानां नेमिघोषेण तेन च तेन चोत्क्रुष्टशब्देन ज्यानिनादेन तेन च नानावादित्रशब्दे
न पांचजन्यस्वनेन च देवदत्तस्य घोषेण गांडीवनिनदेन च मंदवेगा नरा नागा बभूवुस्ते विचेतसः शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्य
साचिना ते गजा विशिखैस्तीक्ष्णैर्युधि गांडीवचोदितैः अनेकशतसाहस्रैः सर्वांगेषु समर्पिताः आरावं परमं कृत्वा वध्यमानाः किरीटिना

तां२

निपेतुर्निहता भूमौ छिन्नपक्षा इवाद्रयः अपरे दंतवेष्टेषु कुंभेषु च कपोलयोः समर्पिता नागाः क्रौंचवद्व्यनदन्मुहुः गजस्कंधगतानां च
पुरुषाणां किरीटिना छिद्यंते चोत्तमांगानि भल्लैः सन्नतपर्वभिः सकुंडलानां पततां शिरसां धरणीतले पद्मानामिव संघातैः पार्थश्चक्रे नि-
वेदनं यन्त्रबद्धा विकवचा व्रणार्त्ता रुधिरोक्षिताः भ्रमत्सु युधि नागेषु मनुष्या विललंबिरे केचिदेकेन बाणेन सुमुक्तेन पतत्रिणा द्वौ त्रयश्च
विनिर्भिन्ना निपेतुर्धरणीतले अतिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः सारोहा न्यपतन्भूमौ द्रुमवंत इवाचलाः मौर्वीं ध्वजं धनुश्चैव युगमी-
षां तथैव च रथिनां कुट्टयामास भल्लैः सन्नतपर्वभिः न संदधन्न चाकर्षन्न विमुंचन्न चोद्वहन् मंडलेनैव धनुषा नृत्यन्पार्थः स्म दृश्यते अ-
तिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः मुहूर्तान्न्यपतन्नन्ये वारणा वसुधातले उच्छ्रितान्यगणेयानि कबंधानि समंततः अदृश्यंत महाराज
तस्मिन्परमसंकुले सचापाः सांगुलित्राणाः सखड्गाः सांगदा रणे अदृश्यंत भुजाश्छिन्ना हेमाभरणभूषिताः सूपस्करैरधिष्ठा-
नैरीषादंडकबंधुरैः चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा युगैः चर्मचापधरैश्चैव व्यवकीर्णैस्ततस्ततः स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महा-
ध्वजैः निहतैर्वारणैरश्वैः क्षत्रियैश्च निपातितैः अदृश्यत मही तत्र दारुणप्रतिदर्शना एवं दुःशासनबलं वध्यमानं किरीटिना संप्रा-
द्रवन्महाराज व्यथितं सहनायकं ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः द्रोणं त्रातारमाकांक्षन् शकटव्यूहमभ्यगात् ॥ ॥
इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच दुःशासनबलं हत्वा सव्यसाची महारथः सिंधुराजं परीप्सन्वै द्रोणानी-
कमुपाद्रवत् स गत्वा द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितं कृतांजलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत् शिवेन ध्याहि मां ब्रह्मन् स्वस्ति
चैव वदस्व मे भवत्प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूं भवान्पितृसमो मह्यं धर्मराजसमोऽपि च तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते

सत्रथ्याध धंनेद्

अश्वत्थामा यथा तात रक्षणीयस्त्वयानघ तथाहमपि ते रक्ष्यः सर्वदैव द्विजोत्तम तव प्रसादादिच्छेयं सिन्धुराजानमाहवे निहन्तुं द्विपदां श्रेष्ठ
प्रतिज्ञां रक्ष मे प्रभो संजय उवाच एवमुक्तस्तदाचार्यः प्रत्युवाच स्मयन्निव मामजित्वा न बीभत्सो शक्यो जेतुं जयद्रथः एतावदुक्त्वा तं द्रोणः शर
व्रातैरवाकिरत् [illegible] तीक्ष्णैः प्रहसन्वै ससारथिं ततोऽर्जुनः शरव्रातान्द्रोणस्यावार्य सायकैः द्रोणमभ्यद्रवद्बाणैर्घोररूपैर्महत्त
रैः विव्याध च रणे द्रोणमनुमान्य विशांपते क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः तस्येषूनिषुभिश्छित्त्वा द्रोणो विव्याध तावुभौ विषा
ग्निज्वलितप्रख्यैरिषुभिः कृष्णपाण्डवौ इयेष पाण्डवस्तस्य बाणैश्छेत्तुं शरासनं तस्य चिन्तयतस्त्वेवं फाल्गुनस्य महात्मनः द्रोणः शरै
रसंभ्रान्तो ज्यां विच्छेदाशु वीर्यवान् विव्याध च हयानस्य ध्वजं सारथिमेव च अर्जुनं च शरैर्वीरः स्मयमानोऽभ्यवाकिरत् एतस्मिन्नन्तरे पा
र्थः सज्यं कृत्वा महद्धनुः विशेषयिष्यन्नाचार्यं सर्वास्त्रविदुषां वरः मुमोच षट्शतान्बाणान्गृहीत्वैकमिवद्रुतं पुनः सप्तशता
न्यान्सहस्रं चानिवर्तिनां विव्याधायुतशश्चान्यांस्तेऽघ्नन्द्रोणस्य तां चमूं सम्यगस्तैर्बलिना कृतिना चित्रयोधिना मनुष्यवाजि
मातंगा विद्धाः पेतुर्गतासवः विसूताश्वध्वजाः पेतुः संछिन्नायुधजीविताः रथिनो रथमुख्येभ्यः सहसा शरपीडिताः चूर्णिताक्षिप्तद
ग्धानां वज्रानिलहुताशनैः तुल्यरूपा गजाः पेतुर्गिर्यग्राम्बुदवेश्मनां पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः हंसा हिमवतः प्रस्थे वारिवि
प्रहता इव रथाश्वद्विपपत्त्योघाः सलिलौघा इवाद्भुताः युगान्तादित्यरश्मिभिः पाण्डवास्त्रशरैर्हताः तं पाण्डवादित्यशरांशुजालं कुरु
प्रवीरान्युधि निष्टपन्तं स द्रोणमेघः शरवृष्टिवेगैः प्राच्छादयन्मेघ इवार्करश्मीन् अथात्यर्थं विसृष्टेन द्विषतामसुभोजिना आज
घ्ने वक्षसि द्रोणो नाराचेन धनंजयं स विचलितस [illegible]

स८

द्रो० ८

वीगः क्षितिकंपे यथाचलः धैर्यमालंब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः द्रोणस्तु पंचभिर्बाणैर्वासुदेवमताडयत अर्जुनं च त्रिसप्तभि
ध्वजं चास्य त्रिभिः शरैः विशेषयिष्यञ्शिष्यं वै द्रोणो राजन्पराक्रमी अदृश्यमर्जुनं चक्रे निमेषाच्छरवृष्टिभिः प्रसक्तान्पततोद्राक्ष्म भार
द्वाजस्य सायकान् मंडलीकृतमेवास्य धनुश्चादृश्यताद्भुतं तेन्वयुः समरे राजन्वासुदेवधनंजयौ द्रोणसृष्टाः सुबहवः कंकपत्रपरि
च्छदाः तद्दृष्ट्वा तादृशं युद्धं द्रोणपांडवयोस्तदा वासुदेवो महाबुद्धिः कार्यवत्तामचिंतयन् ततोब्रवीद्वासुदेवो धनंजयमिदं वचः पार्थ पार्थ म
हाबाहो न नः कालात्ययो भवेत् द्रोणमुत्सृज्य गच्छामः कृत्यमेतन्महत्तरं पार्थश्चाप्यब्रवीत्कृष्णं यथेष्टमिति केशव ततः प्रदक्षिणं कृ
त्वा द्रोणं प्रायान्महाभुजं परिहृत्य च बीभत्सुरगच्छद्विसृजञ्छरान् ततोब्रवीत्स्वयं द्रोणः क्वेदं पांडव गम्यते ननु नाम रणे शत्रुमजित्वा न नि
वर्तसे अर्जुन उवाच गुरुर्भवान्न मे शत्रुः शिष्यः पुत्रसमोस्मि ते न चास्ति स पुमाँल्लोके यस्त्वां युधि पराजयेत संजय उ० एवं ब्रुवाणो
बीभत्सुर्जयद्रथवधोत्सुकः त्वरायुक्तो महाबाहुस्त्वत्सैन्यं समुपाद्रवत् तं चक्ररक्षौ पांचाल्यौ युधामन्यूत्तमौजसौ अन्वयातां महात्मानौ विवि
शंतं तावकं बलं ततो जयो महाराज कृतवर्मा च सात्वतः कांबोजश्च श्रुतायुश्च धनंजयमवारयन् तेषां दश सहस्राणि रथानामनुया
यिनां अभीषाहाः शूरसेनाः शिबयोथ वसातयः मावेल्लकाः ललित्थाश्च केकया मद्रकास्तथा नारायणाश्च गोपालाः कांबोजानां
च ये गणाः कर्णेन विजिताः पूर्वं संग्रामे शूरसंमताः भारद्वाजं पुरस्कृत्य सहृष्टात्मानोर्जुनं प्रति पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवांत
कं त्यजंतं तुमुले प्राणान्सन्नद्धं चित्रयोधिनं गाहमानमनीकानि मातंगमिव यूथपं महेष्वासं पराक्रांतं नरव्याघ्रमवारयन् ततः प्रव
वृते युद्धं तुमुलं लोमहर्षणं अन्योन्यं वै प्रार्थयतां योधानामर्जुनस्य च जयद्रथवधं प्रेप्सुमायांतं पुरुषर्षभं न्यवारयंत सहिताः राम० ८

क्रियात्मार्थिमिवाछितं॥ ॥ इतिद्रोणपर्वणिजयद्रथवधे॥ ॥ संजयउवाच स निरुद्धस्तु कौंतेः पार्थो महाबलपराक्रमः द्रुतं स
मनुयातश्च द्रोणेन रथिनां वरः किरन्निषुगणांस्तीक्ष्णान्स रश्मीनिव भास्करः तापयामास तत्सैन्यं देहं व्याधिगणो यथा अश्वो वि
द्धो रथश्छिन्नः सारोहः पतितो गजः छत्राणि चापविद्धानि रथाश्चक्रैर्विनाकृताः विद्रुतानि च सैन्यानि शरार्त्तानि समंततः इ
त्यासीत्तुमुलं युद्धं न प्राज्ञायत किंचन तेषां संयच्छतां संख्ये परस्परमजिह्मगैः अर्जुनो ध्वजिनीं राजन्नभीक्ष्णं समकंपयत् सत्यां चि
कीर्षमाणस्तु प्रतिज्ञां सत्यसंगरः अभ्यद्रवद्रथश्रेष्ठं शोणाश्वं श्वेतवाहनः तं द्रोणः पंचविंशत्या मर्मभिद्भिरजिह्मगैः अंतेवासि
नमाचार्यो महेष्वासं समार्पयत् तं तूर्णमिव बीभत्सुः सर्वशस्त्रभृतां वरः अभ्यधावदिषूनस्यन्निषुवेगविघातकान् तस्याशु प्रहि
तान्भल्लान्भल्लैः सन्नतपर्वभिः प्रत्यविध्यदमेयात्मा ब्रह्मास्त्रं समुदीरयन् तदद्भुतमपश्याम द्रोणस्याचार्यकं युधि यतमानो युवा ने
नं प्रत्यविध्यद्यदर्जुनः क्षरन्निव महामेघो वारिधाराः सहस्रशः द्रोणमेघः पार्थशैलं ववर्ष शरवृष्टिभिः अर्जुनः शरवर्षं तद्ब्रह्मास्त्रे
णैव मारिष प्रतिजग्राह तेजस्वी बाणैर्बाणान्विशातयन् द्रोणस्तु पंचविंशत्या श्वेतवाहनमार्दयत् वासुदेवं च सप्तत्या बाह्वोरुरसि
चाशुगैः पार्थस्तु प्रहसन्धीमानाचार्यं शरवृष्टिणं विसृजंतं शितान्बाणानवारयत तं युधि अथ तौ वध्यमानौ तु द्रोणेन रथसत्
तमौ अ वर्जयेतां दुर्द्धर्षं युगांताग्निमिवोत्थितं वर्जयंत्रिशितान्बाणान्द्रोणचापविनिःसृतान् किरीटमाली
कौंतेयो भोजानीकं व्यशातयत् सोंतरा कृतवर्माणं कांबोजं च सुदक्षिणं अभ्ययादर्जयन्द्रोणं मैनाकमिव पर्वतं ततो भोजो

द्रो०

८८

नरव्याघ्रो दुर्धर्षं कुरुसत्तमं । अविध्यत्तूर्णमव्यग्रो दशभिः कंकपत्रिभिः । तमर्जुनः शतेनाजौ राजन्विव्याध पत्रिणा । पुनश्चान्यैस्त्रिभि
र्बाणैर्मोहयन्निव सात्वतं । भोजस्तु प्रहसन्पार्थं वासुदेवं च माधवं । एकैकं पंचविंशत्या सायकानां समार्पयत् । तस्यार्जुनो धनुश्छित्वा विव्या
धैनं त्रिसप्तभिः । शरैरग्निशिखाकारैः क्रुद्धाशीविषसंनिभैः । अथान्यद्धनुरादाय कृतवर्मा महारथः । पंचभिः सायकैस्तूर्णं विव्याधोर
सि भारत । पुनश्च निशितैर्बाणैः पार्थं विव्याध पंचभिः । तं पार्थो नवभिर्बाणैराजघान स्तनांतरे । दृष्ट्वा विषक्तं कौंतेयं कृतवर्मरथं प्रति । चिं
तयामास वार्ष्णेयो न नः कालात्ययो भवेत् । ततः कृष्णोऽब्रवीत्पार्थं कृतवर्मणि मा दयां । कुरु संबंधकं हित्वा प्रमथ्यैनं विशातय । ततः
स कृतवर्माणं मोहयित्वार्जुनः शरैः । अभ्यगात्त्वरितैरश्वैः कांबोजानामनीकिनीं । अमर्षितस्तु हार्दिक्यः प्रविष्टे श्वेतवाहने । विधुन्व
न्सशरं चापं पांचाल्याभ्यां समागतः । चक्ररक्षौ तु पांचाल्यावर्जुनस्य पदानुगौ । पर्यवारयदायांतौ कृतवर्मा रथेषुभिः । तावविध्यत्ततो भो
जः कृतवर्मा शितैः शरैः । त्रिभिरेव युधामन्युं चतुर्भिश्चोत्तमौजसं । तावप्येनं विविधतुर्दशभिर्दशभिः शरैः । त्रिभिरेव युधामन्युरुत्तमौजा
स्त्रिभिस्तथा । संचिच्छिदतुरप्यस्य ध्वजं कार्मुकमेव च । अथान्यद्धनुरादाय हार्दिक्यः क्रोधमूर्छितः । कृत्वा विधनुषौ वीरौ शरवर्षैरवाकि
रत् । तावन्ये धनुषी सज्ये कृत्वा भोजं विजघ्नतुः । तेनांतरेण बीभत्सुर्विवेशामित्रवाहिनीं । न लेभाते तु तौ द्वारं वारितौ कृतवर्मणा । धा
र्तराष्ट्रेष्वनीकेषु यतमानौ नरर्षभौ । अनीकान्यर्दयन्युद्धे त्वरितः श्वेतवाहनः । नावधीत्कृतवर्माणं प्राप्तमप्यरिसूदनः । तं दृष्ट्वा त
थायांतं शूरो राजा श्रुतायुधः । अभ्यद्रवत्सुसंक्रुद्धो विधुन्वानो महद्धनुः । स पार्थं त्रिभिरानर्छत्सप्तत्या च जनार्दनं । क्षुरप्रेण सुती एम०

नपार्थं केतुमात्रयातयत् ततोऽर्जुनो नवत्या तु शराणां नतपर्वणां आजघान भृशं क्रुद्धस्तोत्त्रैरिव महाद्विपं स तन्न ममृषे राजन् पाण्डवस्य
च विक्रमं अथैनं सप्तसप्तत्या नाराचानां समार्पयत् तस्यार्जुनो धनुश्छित्वा शरावापं निकृत्य च आजघानोरसि क्रुद्धः सप्तभिर्नतपर्वभिः
अथान्यद्धनुरादाय स राजा क्रोधमूर्छितः वासविं नवभिर्बाणैर्बाह्वोरुरसि चार्पयत् ततोऽर्जुनः स्मयन्नेव श्रुतायुधमरिंदमः शरैरनेक
साहस्रैः पीडयामास भारत अश्वांश्चास्यावधीत्तूर्णं सारथिं च महारथः विव्याध चैनं सप्तत्या नाराचानां महाबलः हताश्वं रथमुत्सृज्य स
तु राजा श्रुतायुधः अभ्यद्रवद्रणे पार्थं गदामुद्यम्य वीर्यवान् वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः पर्णाशा जननी यस्य शीततोया
महानदी तस्य माताब्रवीद्राजन् वरुणं पुत्रकारणात् अवध्योऽयं भवेल्लोके शत्रूणां तनयो मम वरुणस्त्वब्रवीत्प्रीतो ददाम्यस्मै वरं
हितं दिव्यमस्त्रं सुतस्तेऽयं येनावध्यो भविष्यति नास्ति चाप्यमरत्वं वै मनुष्यस्य कथंचन सर्वेणावश्यमर्तव्यं जातेन सरितां वरे दुर्द्ध
र्षस्त्वेष शत्रूणां रणेषु भविता सदा अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मानसो ज्वरः इत्युक्त्वा वरुणः प्रादाद्गदां मंत्रपुरस्कृतां यामासा
द्य दुराधर्षः सर्वलोके श्रुतायुधः उवाच चैनं भगवान् पुनरेव जलेश्वरः अयुध्यति न मोक्तव्या सा त्वय्येव पतेदिति हन्यादेषा प्रतीपं हि प्र
योक्तारमपि प्रभो न चाकरोत्स तद्वाक्यं प्राप्ते काले श्रुतायुधः स तया वीरघातिन्या जनार्दनमताडयत् प्रतिजग्राह तां कृष्णः पीनेनां
सेन वीर्यवान् नाकंपयत शौरिं सा विंध्यं गिरिमिवानिलः प्रत्युद्याता तमेवैषा कृत्येव दुरधिष्ठिता जघान चास्थितं वीरं श्रुतायुधममर्षणं
हत्वा श्रुतायुधमरिंदमं अयुध्यमानाय ततः केशवाय नराधिप क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा यथोक्तं वरुणेनाजौ
तथा स निधनं गतः व्यसुश्चाप्यपतद्भूमौ प्रेक्षतां सर्वधन्विनां पतमानस्तु स बभौ पर्णाशायाः प्रियः सुतः स भग्न इव वातेन बहुशाखो

वीरं धरणीमन्वपद्यत् गदां निवर्तितां दृष्ट्वा निहतं च श्रुतायुधं हाहाकारो महानासीत्सैन्यानां सर्वसैन्यानां सम आपत स्वेनास्त्रेण हतं दृष्ट्वा श्रुतायुधं

द्रो० २४५

वनस्पतिः ततः सर्वाणिसैन्यानिसेनामुख्याश्चसर्वशः प्राद्रवंतहतंदृष्ट्वाश्रुतायुधमरिंदम ः ततः कांबोजराजस्यपुत्रः शूरः सुदक्षिणः
अभ्ययाज्जवनैरश्वैः फाल्गुनंशत्रुसूदनं तस्यपार्थः शरान्सप्तप्रेषयामासभारत तेतंशूरंविनिर्भिद्यप्राविशन्धरणीतलं सोतिविद्धः शरैः
स्तीक्ष्णैर्गांडीवप्रेषितैर्मृधे अर्जुनंप्रतिविव्याधदशभिः कंकपत्रिभिः वासुदेवंत्रिभिर्विध्वापुनः पार्थंचपंचभिः तस्यपार्थोधनुश्छित्वा
केतुंचिच्छेदमारिष भल्लाभ्यांभृशतीक्ष्णाभ्यांतंचविव्याधपांडवः सतुपार्थंत्रिभिर्विध्वासिंहनादमथानदत् सर्वपारशवींचैवशक्तिंशूरः
सुदक्षिणः सघंटांप्राहिणोद्घोरांक्रुद्धोगांडीवधन्वने साज्वलंतीमहोल्केवतमासाद्यमहारथं सविस्फुलिंगानिर्भिद्यनिपपातमहीतले
तंचतुर्दशभिः पार्थोनाराचैः कंकपत्रिभिः साश्वसूतध्वजंसतंविव्याधामितविक्रमः रथंचान्यैः सुबहुभिश्चक्रेविशकलंशरैः सुद
क्षिणंतुकांबोजममोघसंकल्पविक्रमं बिभेदहृदिबाणेनपृथुधारेणपांडवः सभिन्नमर्मास्रस्तांगः प्रभ्रष्टमुकुटांगदः पपाताभिमुखः
शूरोयंत्रमुक्तइवध्वजः गिरेः शिखरजः श्रीमान्सुशाखः सुप्रतिष्ठितः निर्भग्नइववातेनकर्णिकारोहिमात्यये शेतेस्मनिहतोभूमौकांबो
जास्तरणोचितः महार्हाभरणोपेतः सानुमानिवपर्वतः सुदर्शनीयस्ताम्राक्षः कर्णिनाससुदक्षिणः पुत्रः कांबोजराजस्यपार्थे
नविनिपातितः धारयन्नग्निसंकाशांशिरसाकांचनींस्रजं अशोभतमहाबाहुर्व्यसुर्भूमौनिपातितः ततः सर्वाणिसैन्यानिव्यद्रवंतसु
तस्यते हतंश्रुतायुधंदृष्ट्वाकांबोजंचसुदक्षिणं द्रोणपर्वणिजयद्रथवधे ॥ ॥ संजयउवाच हतेसुदक्षिणेराजन्वीरेचैवश्रुतायुधे
जवेनाभ्यद्रवन्पार्थंकुपिताः सैनिकास्तव अभीषाहाः शूरसेनाः शिबयोथवसातयः अभ्यवर्षंस्ततोराजन्शरवर्षैर्धनंजयं तेषांष
ष्टिशतान्यन्यान्प्रामथ्नात्पांडवः शरैः तेस्मभीताः पलायंतव्याघ्रात्क्षुद्रमृगाइव तेनिवृत्ताः पुनः पार्थंसर्वतः परिवार्यतं रणेसपत्ना

गण० ८४५

त्रिघ्नंतन्निर्गोयंतंपरान्युधि तेषामापततांतूर्णंगांगेयैरुभिर्वितैः शरैः शिरांसिपातयामासबाहूंश्चापिधनंजयः शिरोभिःपतितै
स्तत्रभूमिरासीन्निरंतरा अभ्रच्छायेवचैवासीत्ध्वांक्षगृध्रबलैर्युधि तेषुत्वेवाधमानेषुक्रोधामर्षसमन्वितौ श्रुतायुश्चाच्युतायुश्च
धनंजयमयुध्यतां बलिनौस्पर्द्धिनौवीरौकुलजौबाहुशालिनौ तावेनंशरवर्षाणिसव्यदक्षिणमस्यतां त्वरायुक्तौमहाराजप्रार्थ
यानौमहद्यशः अर्जुनस्यवधप्रेप्सूपुत्रार्थेतवधन्विनौ तावर्जुनंसहस्रेणपत्रिणांनतपर्वणां पूरयामासतुः क्रुद्धौतडागमिव
तोयदौ श्रुतायुश्चततः क्रुद्धस्तोमरेणधनंजयं आजघानरथश्रेष्ठः पीतेननिशितेनच सोतिविद्धोबलवताशत्रुणाशत्रुकर्ष
णः जगामपरमंमोहंमोहयन्केशवंरणे एतस्मिन्नेवकालेतुसोच्युतायुर्महारथः शूलेनभृशतीक्ष्णेनताडयामासपांडवं क्ष
तेक्षारंहिसददौपांडवस्यमहात्मनः पार्थोपिभृशसंविद्धोध्वजयष्टिंसमास्थितः ततःसर्वस्यसैन्यस्यतावकस्यविशांपते सिंहनादोम
हानासीद्धतंमत्वाधनंजयं कृष्णश्चभृशसंतप्तोदृष्ट्वापार्थंविचेतनं आश्वासयत्सुहृद्वाग्भिस्तत्रधनंजयं ततस्तौरथिनांश्रेष्ठौ
लब्धलक्षौधनंजयं वासुदेवंचवार्ष्णेयंशरवर्षैः समंततः सचक्रकूबररथंसाश्वध्वजपताकिनं अदृश्यंचक्रतुर्युद्धेतदद्भुतमि
वाभवत् प्रत्याश्वस्तस्तुबीभत्सुः शनकैरिवभारत प्रेतराजपुरंप्राप्यपुनः प्रत्यागतोयथा संछन्नंशरजालेनरथंदृष्ट्वासकेशवं
शत्रूचाभिमुखौदृष्ट्वादीप्यमानाविवानलौ प्रादुश्चक्रेततः पार्थः शाक्रमस्त्रंमहारथ तस्मादासन्सहस्राणिशराणांनतप
र्वणां तेजघ्नुस्तौमहेष्वासौताभ्यांमुक्ताश्चसायकाः विचेरुराकाशगताः पार्थबाणविदारिताः प्रतिहत्यशरांस्तूर्णंशरवेगेन
पांडवः प्रतस्थेतत्रतत्रैवयोधयन्वैमहारथान् तौचफाल्गुनबाणौघैर्विबाहुशिरसौकृतौ वसुधामन्वपद्येतांवातनुन्नाविवद्रुमौ

द्रो० श्रुतायुषश्च निधनं वधश्चैवाच्युतायुषः लोकविस्मापनमभूत्समुद्रस्येव शोषणं तयोः पदानुगान्हत्वा पुनः पंचाशतं रथान् प्रत्यगा
८० द्भारतीं सेनां निघ्नन्पार्थो वरान्वरान् श्रुतायुषं च निहतं प्रेक्ष्य चैवाच्युतायुषं नियुतायुश्च संक्रुद्धो दीर्घायुश्चैव भारत पुत्रौ तयोर्नरश्रेष्ठौ
कौंतेयं प्रतिजग्मतुः किरंतौ विविधान्बाणान्पितृव्यसनकर्शितौ तावर्जुनो मुहूर्तेन शरैः संनतपर्वभिः प्रेषयत्परमक्रुद्धो यम
सदनं प्रति लोडयंतमनीकानि द्विपं पद्मसरो यथा नाशक्नुवन्वारयितुं पार्थं क्षत्रियपुंगवाः अंगास्तु गजवारेण पांडवं पर्यवार
यन् क्रुद्धाः सहस्रशो राजन्शिक्षिता हस्तिसादिनः दुर्योधनसमादिष्टाः कुंजरैः पर्वतोपमैः प्राच्याश्च दाक्षिणात्याश्च कलिंगप्रमु
खा नृपाः तेषामापततां शीघ्रं गांडीवप्रेषितैः शरैः निचकर्त शिरांस्युग्रो बाहूनपि सुभूषणान् तैः शिरोभिर्मही कीर्णा बाहुभिश्च सहां
गदैः बभौ कनकपाषाणा भुजगैरिव संवृता बाहवो विशिखैश्छिन्नाः शिरांस्युन्मथितानि च च्यवमानान्यदृश्यंत द्रुमेभ्य इव पक्षि
णः शरैः सहस्रशो विद्धा द्विपाः प्रस्रुतशोणिताः अदृश्यंताद्रयः काले गैरिकांबुस्रवा इव निहताः शेरते स्मान्ये बीभत्सोर्निशितैः
शरैः गजपृष्ठगता म्लेच्छा नानाविकृतदर्शनाः नानावेषधरा राजन्नानाशस्त्रौघसंवृताः रुधिरेणानुलिप्तांगा भांति चित्रैः शरै
र्हताः शोणितं निर्वमंति स्म द्विपाः पार्थशराहताः सहस्रशश्छिन्नगात्राः सारोहाः सपदानुगाः चुक्रुशुश्च निपेतुश्च बभ्रमुश्चापरे
दिशः भृशं त्रस्ताश्च बहवः स्वानेव ममृदुर्गजाः सांतरायुधिनश्चैव द्विपास्तीक्ष्णविषोपमाः विदंत्यसुरमायां ये सुघोरा घोरचक्षुषः
यवनाः पारदाश्चैव शकाश्च सह बाह्लिकैः गोयोनिप्रभवा म्लेच्छाः कालकल्पाः प्रहारिणः दार्वातिसारा दरदाः पुंड्राश्च बहुशः सश
तनशकाः स्म संख्यातुं व्राताः शतसहस्रशः अभ्यवर्षंत ते सर्वे पांडवं निशितैः शरैः अवाकिरंश्च ते म्लेच्छा नानायुद्धविशारदाः द्रो०
८०

तेषामपिसमस्तानांशरवृष्टिंधनंजयः दृष्टिस्तथाविधाह्यासीछलभानामिवापतिः अभ्रछायामिवशरैः सैन्येकृत्वाधनंजयः
मुंडार्द्धमुंडानजटिलानशुचीनजटिलाननान म्लेछानशातयत्सर्वानसमेतांछस्त्रतेजसा शरैश्चशतशोविद्धास्तेसंघाग
रिचारिणः प्राद्रवंतरणेभीतागिरिगह्वरवासिनः गजाश्वसादिम्लेछानांपतितानांशितैःशरैः वकपाःकंकावृकाभूमावपि
वन्रुधिरंमुदा पत्यश्वरथनागैश्चप्रछन्नकृतसंक्रमां शरवर्षप्लवांघोरांकेशशैवलशाद्वलां प्रावर्त्तयन्नदीमुग्रांशोणितौघत
रंगिणीं छिन्नांगुलीक्षुद्रमत्स्यांयुगांतेकालसंनिभां प्राकरोद्गजसंवाधांनदीमुत्तरशोणितां देहेभ्योराजपुत्राणांनागाश्व
रथसादिनां यथास्थलंचनिम्नंचनस्याद्वर्षतिवासवे तथासीत्पृथिवीसर्वाशोणितेनपरिप्लुता षट्सहस्रान्हयानवीरानपुनः
शशतान्वरान प्राहिणोन्मृत्युलोकायक्षत्रियानक्षत्रियर्षभः शरैःसहस्रशोविद्धाविधिवत्कल्पिताद्विपाः शेरतेभूमिमाश्रि
त्यशैलावज्रहताइव सवाजिरथमातंगान्निघ्नन्व्यचरदर्जुनः प्रभिन्नइवमातंगोमृद्नन्नलवनंयथा भूरिद्रुमलताग
ल्मम्शुष्कंधनतृणोलपं निर्दहेदनलोरण्यंयथावायुसमीरितः सैन्यारण्यंतवतथाकृष्णानिलसमीरितः शराग्निरदहत्क्रुद्धः
पांडवाग्निर्धनंजयः शून्यान्कुर्वन्रथोपस्थान्मानवैःसंस्तरन्महीं प्रानृत्यदिवसंबाधेचापहस्तोधनंजयः वज्रकल्पैःशरैर्भू
मिंकुर्वन्नुत्तरशोणितां प्राविशद्भारतींसेनांसंक्रुद्धोवैधनंजयः तंश्रुतायुस्तथांवष्ठोव्रजमानंन्यवारयत तस्यार्जुनःशरैस्ती
क्ष्णैःकंकपत्रपरिच्छदैः न्यपातयद्धयानशीघ्रंयतमानस्यमारिष धनुश्चास्यापरंछित्वाशरैःपार्थोविचक्रमे अंवष्ठस्तुगदांगृ
ह्यक्रोधपर्याकुलेक्षणः आससादरणेपार्थंकेशवंचमहारथं ततःसंप्रहसन्वीरोगदामुद्यम्यभारत रथमावार्यगदयाकेशवमम

द्रो० २८

ताऽयत गस्यातास्तिं हस्नाकेशंवपरवीरहा अर्जुनो यमंशकुद्धः सोवंच्यति भारत॥ ततः शरैर्हेमपुंखैः सगरःरथिनां वरं छा
दयामास समरे मेघः सूर्यमिवोदितं अथापरैः शरैश्चापि गाढंतस्य महात्मनः अचूर्णयच्छरान्पार्थस्तदद्भुतमिवाभवत् अथ तंपति
तं दृष्ट्वा गुरुस्तामां च महागदां अर्जुनं वासुदेवं च पुनः पुनरताडयत् तस्यार्जुनः क्षुरप्राभ्यां सगदावुधतो भुजौ चिच्छेदेन्दुध्वजाकारं
शिरश्चास्येन पत्रिणा सपपात हतो राजन्नवसुधामनुनादयन् दृष्ट्वा न रथा सस्थापयत्रनिर्मुक्तबन्धनः रथानीकावगाढश्च वार
णाश्चाशतेहतः अदृश्यत तदा पार्थो योधैः सर्वैर्वृताः इति द्रोणपर्वणि जयद्रथवधे संजय उवाच ततः प्रविष्टे कौन्तेये सिंधुराज
जिघांसया द्रोणानीकं विनिर्भिद्य भोजानीकं च दुस्तरं काम्बोजस्य च दायादे हते एवं न सुदक्षिणे श्रुतायुधे च विक्रान्ते निहते सव्यसा
चिना विप्रद्रुतेष्वनीकेषु विध्वस्तेषु समंततः प्रभग्नं स्वबलं दृष्ट्वा पुत्रस्ते द्रोणमभ्ययात् त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत् गतः
स पुरुषव्याघ्रः प्रमथ्येमां महाचमूं अथ बुध्यास्य समीक्षस्व किंनु कार्यमनन्तरं अर्जुनस्य विघाताय दारुणेऽस्मिन्नजनक्षये यथा
स पुरुषव्याघ्रो न हन्येत जयद्रथः तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः॥ असौ धनंजयाग्निर्हि कोपमारुतचोदितः सेनाकक्षं
दहति मे वह्निः कक्षमिवोत्थितः अतिक्रान्ते हि कौन्तेये भित्वा सैन्यं परंतप जयद्रथस्य गोप्तारः संशयं प [illegible] रमं गताः
स्थिरा बुद्धिर्नरेन्द्राणामासीद्ब्रह्मविदांवर नातिक्रमिष्यति द्रोणं जातु जीवन्धनंजयः योऽसौ पार्थो व्यतिक्रान्तो मिषतस्ते महाद्युते
सर्वं ह्यद्यातुरं मन्ये नेदमस्ति बलं मम जानामि त्वां महाभाग पाण्डवानां हिते रतं तथा मुह्यामि च ब्रह्मन् कार्यवत्तां विचिन्तयन् यथाशक्ति
चते ब्रह्मन् वर्तये वृत्तिमुत्तमां प्रीणामि च यथाशक्ति तच्च त्वं नाववुध्यसे अस्मान्न त्वं सदा भक्तानिच्छस्यमितविक्रम पाण्डवान्सत

द्रो० २८

तं प्रियो गाण्डीवस्यास्माकं विप्रियेरतान् अस्मानेवोपजीवंस्त्वमस्माकं विप्रियेरतः नह्यहं त्वां विजानामि मधुदिग्धमिव क्षुरं नादास्यच्चेद्वरं मह्यं भवान्
पाण्डवनिग्रहे नावारयिष्यं गच्छंतमहं सिंधुपतिं गृहान् मया त्वाशंसमानेन त्वत्तस्त्राणमबुद्धिना आश्वासितः सिंधुपतिर्मोहाद्दत्तश्च मृत्यवे
यमदंष्ट्रांतरं प्राप्तो मुच्येतापि हि मानवः नार्जुनस्य वशं प्राप्तो मुच्येताजौ जयद्रथः स तथा कुरु शोणाश्व यथा मुच्येत सैंधवः मम चार्त्तप्र
लापानां मा क्रुधः पाहि सैंधवं द्रोण उवाच नाभ्यसूयामि ते वाक्यमश्वत्थाम्नासि मे समः सत्यं तु ते प्रवक्ष्यामि तज्जुषस्व विशांपते सारथिः प्र
वरः कृष्णः शीघ्राश्चास्य हयोत्तमाः अल्पं च विवरं कृत्वा तूर्णं याति धनंजयः किं न पश्यसि बाणौघान् क्रोशमात्रे किरीटिनः पश्चाद्र
थस्य पतितान् क्षिप्तान् शीघ्रं हि गच्छतः न चाहं शीघ्रयानेऽद्य समर्थो वयसान्वितः सेनामुखे च पार्थानामेतद्बलमुपस्थितं युधिष्ठिरश्च
मे ग्राह्यो मिषतां सर्वधन्विनां एवं मया प्रतिज्ञातं क्षत्रमध्ये महाभुज धनंजयेन चोत्सृष्टो वर्त्तते प्रमुखे नृप तस्माद्व्यूहमुखं हित्वा नाहं या
स्यामि फाल्गुनं तुल्याभिजनकर्माणं शत्रुमेकं सहायवान् गत्वा योधय मा भैस्त्वं त्वं ह्यस्य जगतः पतिः राजा शूरः कृती दक्षो वैरमुत्पाद्य
पाण्डवैः वीर स्वयं प्रयाह्यत्र यत्र यातो धनंजयः दुर्योधन उवाच कथं त्वामप्यतिक्रान्तः सर्वशस्त्रभृतां वरः धनंजयो मया शक्य आ
चार्य प्रतिबाधितुं अपि शक्यो रणे जेतुं वज्रहस्तः पुरंदरः नार्जुनः समरे शक्यो जेतुं परपुरंजयः येन भोजश्च हार्दिक्यो
भवांश्च त्रिदशोपमः अस्त्रप्रतापेन जितौ श्रुतायुश्च निबर्हितः सुदक्षिणश्च निहतः स च राजा श्रुतायुधः श्रुतायुश्चाच्युतायुश्च
म्लेच्छाश्चायुतशो हताः तं कथं पाण्डवं युद्धे दहन्तमिव पावकं प्रतियोत्स्यामि दुर्धर्षं तन्मे शंसस्व कोविद क्षमं च मन्यसे युद्धं मम तेनाद्य संयुगे
परवानस्मि भवति प्रेष्यवद्रक्ष मे यशः द्रोण उवाच सत्यं वदसि कौरव्य दुराधर्षो धनंजयः अहं तु तत्करिष्यामि यथैनं प्रसहिष्यसि अ

द्रो० त्वं चापपरं लोके सर्वधनुर्धराः विषक्तं तापि कौंतेयं वासुदेवसमपश्यतः एषते कवचं राजंस्तथा बध्नामि कांचनं यथा न बाणा नास्त्रा
१८२ णि प्रहरिष्यंति ते रणे यदि त्वां मासुरसुराः सपक्षोरगराक्षसाः योधयंति त्रयो लोकाः सनराः स्वस्ति ते भयं न कृष्णो न च कौंतेयो न चा
न्यः शस्त्रभृद्रणे शरानर्पयितुं कश्चित्कवचे तव शक्ष्यति स तं कवचमास्थाय क्रुद्धमद्य रणेर्जुनं त्वरमाणः स्वयं याहि न त्वासौ
विसहिष्यति संजय उवाच एवमुक्त्वा त्वरन्द्रोणः स्पृष्ट्वांभो वर्म भास्वरं आबबंधाद्भुततमं जयन्मंत्रं यथाविधि रणे तस्मिन्सुमह
प्यतेद् ति विजयसंहतसुते विस्मापयिषुर्लोकान्विषयाद्ब्रह्मवित्तमः ॥ ॥ द्रोण उवाच करोतु स्वस्ति ते ब्रह्म स्वस्ति चापि द्विजातयः
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति भारत ययातिर्नहुषश्चैव धुंधुमारो भगीरथः स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा लक्ष्मीररुंध
ती चैव कुरुतां स्वस्ति तेनघ असितो देवलश्चैव विश्वामित्रस्तथांगिराः वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वंतु ते नृप धाता विधाता लोकेशो
दिशश्च सदिगीश्वराः स्वस्ति ते संप्रयच्छंतु कार्तिकेयश्च षण्मुखः विवस्वान्भगवान्स्वस्ति करोतु तव सर्वशः दिग्गजाश्चैव चत्वारः
क्षितिश्च गगनं ग्रहाः अधस्ताद्धरणीं योसौ सदा धारयते नृप शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु गांधारे युधि विक्रम्य निर्जिताः
सुरसत्तमाः पुरा वृत्रेण दैत्येन भिन्नदेहाः सहस्रशः हृततेजोबलाः सर्वे तदा सेंद्रा दिवौकसः ब्रह्माणं [illegible] शरणं ज
ग्मुर्वृत्राद्भीता महासुरात् देवा ऊचुः प्रमर्दितानां वृत्रेण देवानां देवसत्तम गतिर्भव सुरश्रेष्ठ त्राहि नो महतो भयात् अथ पार्श्वस्थि
तं विष्णुं शक्रादींश्च सुरोत्तमान् प्राह तथ्यमिदं वाक्यं विषण्णान्सुरसत्तमान् रक्ष्या मे सततं देवाः सहेंद्राः सद्विजातयः त्वष्टुः सुदु
र्धर्षं तेजो येन वृत्रो विनिर्मितः त्वष्ट्रा पुरा तपस्तप्त्वा वर्षायुतशतं तदा वृत्रो विनिर्मितो देवाः प्राप्यानुज्ञां महेश्वरात् स तवैष महा द्रो० १८२

ह्रीमांस्त्वपि पुर्वलो नागत्वा शंकरस्थानं भगवान्द्रष्टुमेतेह्न दृष्ट्वा निष्पद्य दृष्टं तं स्मि गच्छत मंदरं यत्रास्ते तपसां योनिर्दक्षयज्ञविनाशनः
पिनाकी सर्वभूतेशो भगनेत्रनिपातनः ते गत्वा सहिता देवा ब्रह्मणा सह मंदरं अपश्यंस्तेजसां राशिं सूर्यकोटिसमप्रभं सोऽब्रवीत्स्वागतं दे
वा ब्रूत किं करवाण्यहं अमोघं दर्शनं मह्यं कामप्राप्तिरतोऽस्तु वः एवमुक्तास्तु ते सर्वे प्रत्यूचुस्तं दिवौकसः तेजो हृतं नो वृत्रेण गतिर्भव दि
वौकसां मूर्तीरीक्षस्व नो देव प्रहारैर्जर्जरीकृताः शरणं त्वां प्रपन्नाः स्म गतिर्भव महेश्वर शर्व उवाच विदितं वो यथा देवाः कृत्येयं सु
महाबलाः त्वष्टुस्तेजोभवा घोरा दुर्निवार्याकृतात्मभिः अवश्यं तु मया कार्यं साहाय्यं सर्वदिवौकसां ममेदं गात्रजं शक्र कवचं गृह्य भा
स्वरं बधानानेन मंत्रेण मानसेन सुरेश्वर द्रोण उवाच इत्युक्त्वा वरदः प्रादाद्वर्म तन्मंत्रमेव च स तेन वर्मणा गुप्तः प्रायाद्वृत्रचमूं प्र
ति नानाविधैश्च शस्त्रौघैः पात्यमानैर्महारणे न संधिः शक्यते भेत्तुं वर्मबंधस्य तस्य तु ततो जघान समरे वृत्रं देवपतिः स्वयं तं च मंत्रमयं
चैव वर्म चांगिरसे ददौ अंगिराः प्राह पुत्रस्य मंत्रज्ञस्य बृहस्पतेः बृहस्पतिरथोवाच अग्निवेश्याय धीमते अग्निवेश्यो मम ददौ तेन बध्ना प्रा८
मि वर्म ते तवाद्य देहरक्षार्थं मंत्रेणानेन सत्तम संजय उवाच एवमुक्त्वा ततो द्रोणस्तव पुत्रं महाद्युतिं पुनरेव वचः प्राह शनैराचार्यपुंग
वः ब्रह्मसूत्रेण बध्नामि कवचं तव भारत हिरण्यगर्भेण यथा बद्धं विष्णोः पुरा रणे यथा च ब्रह्मणा बद्धं संग्रामे तारकामये शक्रस्य कवचं
दिव्यं तथा बध्नाम्यहं तव बध्वा तु कवचं तस्य मंत्रेण विधिपूर्वकं प्रेषयामास राजानं युद्धाय महते द्विजः स सन्नद्धो महाबाहुराचार्येण महात्म
ना रथानां च सहस्रेण त्रिगर्त्तानां मैति नानावादित्रघोषेण यथा वैरोचनिस्तथा ततः शब्दो महानासीत्सैन्यानां तव भारत अगाधं प्र
स्थितं दृष्ट्वा समुद्रमिव कौरवं ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच प्रविष्टयोर्महाराज पार्थवार्ष्णेययो रणे दुर्योध

प्रहारिणां तथा दंतिसहस्रेण मत्तानां वीर्यशालिनां ॥ अश्वानां नियुतेनैव तथान्यैश्च महारथैः ० ततः प्रायान्महाबाहुरर्जुनस्य रथं प्र

तिस्मानि द्रोणस्तु रथिनांवरः अधमच्चापि तामस धृष्टद्युम्नो महारथः धार्त्तराष्ट्रास्तथा भूता वध्यंते पांडुसृंजयैः अनेयाः पशवस्तानि द्रोणस्तु रथिनांवरः अधमच्चापि ता वीररणेव हृमिः स्वापितीव कालः स्वयमस
२३ ते योधान् धृष्टद्युम्नेन मोहिता न संग्रामे तुमुले तस्मिन्नितिसंप्रगिरिंजना कुनृपस्य यथा राष्ट्रं दुर्भिक्षव्याधितस्करैः द्राव्यते तद्वदापन्ना पांडवानां वरूथिनी अर्करश्मिविमिश्रेषु शस्त्रेषु कवचेषु च चक्षूंषि
प्रतिहन्यंते सैन्येन रजसा तथा त्रिधाभूतेषु सैन्येषु वध्यमानेषु पांडवैः अमर्षितस्ततो द्रोणः पांचालान् व्यधमच्छरैः मृदतस्तामनी २४ १३

द्रो० नेमयानेव हृष्टतः पुरुषर्षभ जयेनाभ्यद्रवंस्तत्र द्रोणाम्भवतानि सैन्येनच पाण्डवाः सोमकैः सार्द्धं ततो युद्धमवर्तत तद्युद्धमभवद्घोरं तुमुलं लोमहर्ष-
८०३ णं कुरूणां पाण्डवानां च सूर्हसंपूरितोद्भुतं राजन् कदाचिन्नास्माभिर्दृष्टं नाश्रुतमेव च यादृग्मया गते सूर्ये युद्धमासीद्विशांपते धृष्टद्युम्न-
मुखाः पार्थाव्यूढानीकाः महौजसः द्रोणमेवाभ्यवर्तन्त ते शरवर्षैरवाकिरन् वयं द्रोणं पुरस्कृत्य सर्वशस्त्रभृतां वरं पार्षतप्रमुखान् पा-
र्थानभ्यवर्षाम सायकैः महामेघाविवोद्दीर्णौ मिश्रवातौ हिमात्यये सेनाग्रे विप्रकाशेते रुचिरे रथभूषिते समेत्य तु महासेने चक्रतुर्वेग-
मुत्तमं जाह्नवीयमुने नद्यौ प्रावृषीवोल्बणोदके नानाशस्त्रपुरोवातो द्विपाश्वरथसंवृतः गदाविद्युन्महारौद्रः संग्रामजलदो महा-
न् भारद्वाजानिलोद्धूतः शरधारासहस्रवान् अभ्यवर्षन्महारौद्रः पाण्डुसेनाग्निमुद्धतं समुद्रमिव घर्मान्ते विवान्घोरो महानिल
व्यक्षोभयदनीकानि पाण्डवानां द्विजोत्तमः तेऽपि सर्वप्रयत्नेन द्रोणमेव समाद्रवन् बिभित्सन्तो महासेतुं वार्योघाः प्रबला इव वारयामा-
स तं द्रोणो जलौघमचलो यथा पाण्डवान्समरे क्रुद्धान् पाञ्चालांश्च सकेकयान् अथापरे तु राजानः परिवृत्य समन्ततः महाब-
ला रणशूराः पाञ्चालान्प्रत्यवारयन् ततो रणे नरव्याघ्रः पार्षतः पाण्डवैः सह संजघानासकृद्द्रोणं बिभित्सुरिव वाहिनीं यथैव शरव-
र्षाणि द्रोणो वर्षति पार्षते तथैव शरवर्षाणि धृष्टद्युम्नोऽभ्यवर्षत सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंवृतः ज्याविद्युच्चापसंह्रादो
धृष्टद्युम्नबलाहकः शरधाराश्मवर्षाणि व्यसृजत्सर्वतो दिशं निघ्नन्रथवराश्वौघान् प्लावयामास वाहिनीं यं यमार्छच्छरैर्द्रोणः पा-
ण्डवानां रथव्रजं ततस्ततः शरैर्द्रोणमपाकर्षत पार्षतः तथा तु यतमानस्य द्रोणस्य युधि भारत धृष्टद्युम्नं समासाद्य त्रिधा सैन्यमभि- द्रो०
द्यत भोजमेके न्यवर्तन्त जलसंधं तथापरे पाण्डवैर्हन्यमानाश्च द्रोणमेवापरे ययुः संघट्टयति सैन्येन रजसा तथा त्रिधाभूतेषु सैन्येषु ८०३

ध्यमानेषु पांडवेषु अमर्षितस्ततो द्रोणः पंचालानवधमच्छरैः सदश्वास्तु नीकानि निघ्नतस्यापि सायकैः बभूवुरुग्रा द्रोणस्य काला
ग्नेरिव दीप्यतः रथं नागं हयं चापि पत्तिनश्च विशांपते एकैकेन शरेणाजौ निर्बिभेद महारथः पांडवानां तु सैन्येषु नास्ति कश्चित्स भार
त यः धारयेत्सो बाणान्द्रोणचापसमुत्थितान् तसच्यमानमद्धे द्रोणसायकतापितं बभ्राम पांडवं सैन्यं तत्र तत्रैव भारत तथैव पृ
षतेनापि कालमानं बलं तव अभवत्सर्वतो दीप्तं शुष्कं वनमिवाग्निना बाध्यमानेषु सैन्येषु द्रोणपार्षतसायकैः त्यक्त्वा प्राणान् परेण
क्षायुध्यंत सर्वतो मुखाः तावकानां परेषां च युध्यतां भरतर्षभ नासीत्कश्चिन्महाराज यो सा सौ संयुगं भयात् भीमसेनं तु कौंतेयं सौभ
ग्याः पर्यवारयन् विविंशतिश्चित्रसेनो विकर्णश्च महारथः विंदानुविंदावावंत्यौ क्षेमधूर्तिश्च वीर्यवान् त्रयाणां तव पुत्राणां त्रयप्र
वानुयायिनः बाल्हिको राजपुत्रस्तु सौकुलपुत्रो महारथः सहसेनः सहामात्यः द्रौपदेयानवारयन् शैब्यो गोवासनो राजा योधैर्दशश
ताबरैः काश्यस्याभिभुवः पुत्रं पराक्रांतमवारयत् अजातशत्रुं कौंतेयं ज्वलंतमिव पावकं मद्राणामीश्वरः शल्यो राजाराजानमावृ
णोत् दुःशासनस्त्ववस्थाप्य स्वमनीकममर्षणः सात्यकिं प्रययौ क्रुद्धः स्वकेनाथ रथं युधि स्वकेनाहमनीकेन सन्नद्धः कवचावृतः
चतुःशतैर्महेष्वासैश्चेकितानमवारयं शकुनिस्तु महानीको माद्रीपुत्रमवारयत् गांधारकैः सप्तशतैश्चापशक्त्यसिपाणिभिः विं
दानुविंदावावंत्यौ विराटं मत्स्यमार्च्छतां प्राणांस्त्यक्त्वा महेष्वासौ [illegible] मित्रार्थे समुद्यतायुधौ शिखंडिनं याज्ञसेनिं रुंधानमपराजितं बाल्हिकं
प्रतिसंपन्नः पराक्रांतमवारयत् धृष्टद्युम्नं तु पांचाल्यं क्रूरैः सार्द्धं प्रभद्रकैः आवंत्यः सह सौवीरैः क्रुद्धरूपमवारयत् घटोत्कचं तथा शू
रं राक्षसं क्रूरकर्मिणं अलायुधोद्रवत्तूर्णं क्रुद्धमायांतमाहवे अलंबुषं राक्षसेंद्रं कुंतिभोजो महारथः सैन्येन महता युक्तः क्रूरक

२५

द्रो० ९४ पर्यवारयत सैंधवः दृष्टद्युम्नस्त्वामेतान्सर्वान्सैन्यस्य भारत रक्षितः परमेष्वासैः कृपप्रभृतिभी रथैः तस्मात्तानब्रवं श्रेष्ठो द्रोणो सैंधवं महाहवे तेमो
द्रोणोदृष्टद्युम्नात्तोऽपश्यन्नस्तपुत्रस्तवामतः दृष्टद्युम्नःपाण्डवस्तस्मात्सेनां स महारथिपुरोगमाः कृपश्चैव वृषसेनश्च शलः शल्यश्च सुजयः नीतिमंतो म
हेष्वासाः सर्वयुद्धविशारदाः सैंधवस्य विधीयंतां सायुयुधिरतः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच राजन्संग्राममाश्च
र्यमस्त्राकौन्तेयतो मम कुरूणां पाण्डवानां च यथा युद्धमवर्तत भारद्वाजं समासाद्य व्यूहस्य प्रमुखे स्थितं अयोधयन्रणे पार्था द्रोणानी
कं बिभित्सवः रक्षमाणाः स्वकं व्यूहं द्रोणोऽपि सह सैनिकः अयोधयद्रणे पार्थान्प्रार्थयानो महद्यशः विंदानुविंदावावंत्यौ वि
राटं दशभिः शरैः आजघ्नतुः सुसंक्रुद्धौ तव पुत्रहितैषिणौ विराटश्च महाराज तावुभौ समरे स्थितौ पराक्रांतो पराक्रम्य योधयामास सा
नुगौ तेषां युद्धं समभवद्दारुणं शोणितोदकं सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने बाल्हीकं रभसं युद्धे याज्ञसेनिर्महाबलः
आजघ्ने विशिखैस्तीक्ष्णैर्घोरैर्मर्मास्थिभेदिभिः बाल्हीको याज्ञसेनिं तु हेमपुंखैः शिलाशितैः आजघान भृशं क्रुद्धो नवभिर्नतप
र्वभिः तद्युद्धमभवद्घोरं शरशक्तिसमाकुलं भीरूणां त्रासजननं शूराणां हर्षवर्धनं ताभ्यां तत्र शरैर्मुक्तैरंतरिक्षं दिशस्तथा अभवत्स
हतं सर्वं न प्राज्ञायत किंचन शैब्यो गोवासनो युद्धे काश्यपुत्रं महारथं ससैन्यो योधयामास गजः प्रतिगजं यथा बा[ल्ही]कराजः संक्रु
द्धो द्रौपदेयान्महारथान् मनः पंचेंद्रियाणीव शुशुभे योधयन्रणे अयोधयंस्ते सुभृशं तं शरौघैः समंततः इंद्रियार्था यथा देहं श द्रो०
श्वद्देहवतां वर वार्ष्णेयं सात्यकिं युद्धे पुत्रो दुःशासनस्तव आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः सोऽतिविद्धो बलवता महेष्वासे
न धन्विना ईषन्मूर्छां जगामाशु सात्यकिः सत्यविक्रमः समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथं विव्याध दशभिस्तूर्णं सायकैः कंकपत्रिभिः द्रो०
५१ ९४

ताड्यमानं हर्षविह्वलो मोघशरविक्षतो रत्नतुः समरे राजन्पुष्पिता इव किंशुकौ अलंवुषस्तु संक्रुद्धः कुंतिभोजं शरान्वितैः अशोभ
त महाशैलः रम्या पुष्पो इव किंशुकः कुंतिभोजस्ततो रक्षो विध्वा बहुभिरायसैः अनादयद्भैरवं नादं वाहिन्याः प्रमुखे तव ततस्तौ समरे शूरौ
योधयंतौ परस्परं ददृशुः सर्वभूतानि शक्रजंभौ यथा पुरा शकुनिं रभसं युद्धे कृतवैरं च भारत माद्रीपुत्रौ च संरब्धौ शरैरार्दयतां मृधे तं मु
लः सुमहाराजन् प्रावर्तत जनक्षयः त्वया संजनितो ऽत्यर्थं कर्णेन च विवर्धितः रक्षितस्तव पुत्रैश्च क्रोधमूलो हुताशनः य इमां पृथिवीं रा
जन् दग्धुं सर्वां समुद्यतः शकुनिः पांडुपुत्राभ्यां कृतः स विमुखः शरैः न स्म जानाति कर्तव्यं युद्धे किंचित्पराक्रमम् विमुखं चैनमालोक्य माद्री
पुत्रौ महारथौ ववर्षतुः पुनर्बाणैर्यथा मेघौ महागिरिं स वध्यमानो बहुभिः शरैः संनतपर्वभिः संप्रायाज्जवनैरश्वैर्द्रोणानीकाय
सौबलः घटोत्कचस्तथा शूरं राक्षसं तमलायुधं अभ्ययाद्रभसं युद्धे वेगमास्थाय मध्यमं तयोर्युद्धं महाराज चित्ररूपमिवाभवत् या
दृशं हि पुरा वृत्तं रामरावणयोर्मृधे ततो युधिष्ठिरो राजा मद्रराजानमाहवे विद्ध्वा पंचाशता बाणैः पुनर्विव्याध सप्तभिः ततः प्रववृते युद्धं त
योरत्यद्भुतं नृप यथा पूर्वं महद्युद्धं शंवरामरराजयोः विविंशतिश्चित्रसेनो विकर्णश्च तवात्मजः अयोधयन्भीमसेनं महत्या सेनया वृताः
द्रोणपर्वणि जयद्रथवधे संजय उवाच तथा तस्मिन्प्रवृत्ते तु संग्रामे लोमहर्षणे कौरवेयांस्त्रिधाभूतान्पांडवाः समुपाद्रवन् जलसंधं म
हाबाहुं भीमसेनो ऽभ्यवर्तत युधिष्ठिरः सहानीकः कृतवर्माणमाहवे किरन्तु शरवर्षाणि रोचमान इवांशुमान् धृष्टद्युम्नो महाराज द्रो
णमभ्यद्रवद्रणे ततः प्रववृते युद्धं त्वरतां सर्वधन्विनां कुरूणां पांडवानां च संक्रुद्धानां परस्परं संक्षये तु तथाभूते वर्तमाने महाभये द्व

द्वैभूतेषु सैन्येषु युध्यमानेष्वभीतवत् द्रोणः पांचालपुत्रेण बलो बलवतां मह यद्दक्षिपत्तर्षस्तोमांस्तद्दुहमिवाभवत् पुंडरीकवना
नीव विध्वस्तानि समंततः चक्राते द्रोणपांचाल्यौ नृणां शीर्षाण्यनेकशः विनिकीर्णानि वीराणामनीकेषु समंततः वस्त्राभरणशस्त्राणि च
ध्वजवर्मायुधानि च तपनीयविचित्रांगाः संसिक्ता रुधिरेण च संसक्ता इव दृश्यंते मेघसंघाः सविद्युतः कुंजराश्वनरानन्ये पातयंति स्म पत्रिभिः
तालमात्राणि चापानि विकर्षंतो महारथाः असिचर्माणि चापानि शिरांसि कवचानि च विप्रकीर्यंत शूराणां संप्रहारे महात्मनां उच्छि
तान्यसंख्यानि कबंधानि समंततः अदृश्यंत महाराज तस्मिन्परमसंकुले गृध्राः कंकाबलाः श्येना वायसा जंबुकास्तथा बहुशः पिशि
ताशाश्च तत्रादृश्यंत मारिष भक्षयंतश्च मांसानि पिबंतश्चापि शोणितं विलुंपंतश्च केशांश्च मज्जाश्च बहुधा नृप आकर्षंतः शरीरा
णि शरीरावयवांस्तथा नराश्वगजसंघानां शिरांसि च ततस्ततः कृतास्त्रा रणदीक्षाभिर्दीक्षिता रणशालिनः रणे जयं प्रार्थयाना भृ
शं युयुधिरे तदा असिमार्गान्बहुविधान्विचेरुः सैनिका रणे ऋष्टिभिः शक्तिभिः प्रासैः शूलतोमरपट्टिशैः गदाभिः परिघैश्चान्यैरायु
धैश्च भुजैरपि अन्योन्यं जघ्निरे क्रुद्धा युद्धरंगगता नराः रथिनो रथिभिः सार्धमश्वारोहाश्च सादिभिः मातंगा वरमातंगैः पदाताश्च प
दातिभिः क्षीबा इवान्ये चोन्मत्ता रंगेष्विव च वारणाः उच्चुक्रुशुरथान्योन्यं जघ्नुरन्योन्यमेव च वर्तमाने तथा युद्धे निर्मर्यादे विशांपते धृष्टद्युम्नो
हयानश्वैर्द्रोणस्य व्यत्यमिश्रयत् ते हयाः साध्वशोभंत मिश्रिता वातरंहसः पारावतसवर्णाश्च रक्तशोणाश्च संयुगे पारावतसवर्णास्ते
रक्तशोणविमिश्रिताः हयाः शुशुभिरे राजन्मेघा इव सविद्युतः धृष्टद्युम्नस्तु संप्रेक्ष्य द्रोणमभ्याशमागतं असिचर्माददे वीरो

धनुस्तस्य भारत चिकीर्षुर्दुष्करं कर्म पार्षतः परवीरहा रथेषां समतिक्रम्य द्रोणस्य रथमाविशत् अतिष्ठद्युगमध्ये स युगसन्नहनेषु च जघना
र्द्धेषु चाश्वानां तत्सैन्यान्यपूजयन् खड्गेन चरतस्तस्य शोणाश्वानधितिष्ठतः न ददर्शान्तरं द्रोणस्तदद्भुतमिवाभवत् यथा श्येनस्य पतनं वनेष्वामि
षगृद्धिनः तथैवासीदभीसारस्तस्य द्रोणं जिघांसतः ततः शरशतेनास्य शतचन्द्रं समाक्षिपत् द्रोणो द्रुपदपुत्रस्य खड्गं चर्म च दशभिः शरैः हयांश्चैव
चतुःषष्ट्या शराणां जघ्निवान्बली ध्वजं छत्रं च भल्लाभ्यां तथा तौ पार्ष्णिसारथी अथास्मै त्वरितो बाणमपरं जीवितान्तकं आकर्णपूर्णं चिक्षेप व वज्रं
ज्रमिवोरगं यथा तं चतुर्दशभिस्तीक्ष्णैर्बाणैश्चिच्छेद सात्यकिः ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नं व्यमोचयत् सिंहेनेव मृगं ग्रस्तं नरसिंहेन मारिष द्रो
णेन मोचयामास पांचाल्यं शिनिपुंगवः सात्यकिं प्रेक्ष्य गोप्तारं पांचाल्यं च महाहवे शराणां त्वरितो द्रोणः षड्विंशत्या समार्पयत् ततो द्रोणं शि
नेः पौत्रो ग्रसन्तमिव सृंजयान् प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनान्तरे ततः सर्वे रथास्तूर्णं पांचाल्या जयगृद्धिनः सात्वताभिसृते द्रोणे
धृष्टद्युम्नमपाक्षिपन् द्रोणपर्वणि जयद्रथवधे धृतराष्ट्र उवाच बाणे तस्मिन्निकृत्ते तु धृष्टद्युम्ने च मोक्षिते तेन वृष्णिप्रवीरेण युयुधानेन सं
जय अमर्षितो महेष्वासः सर्वशस्त्रभृतां वरः नरव्याघ्रः शिनेः पौत्रे द्रोणः किमकरोद्युधि संजय उवाच संप्रद्रुतः क्रोधविषो व्यादितास्य
शरासनः तीक्ष्णधारेषुदशनः शितनाराचदंष्ट्रवान् संरम्भामर्षताम्राक्षो महोरग इव श्वसन् नरवीरः प्रमुदितैः शोणैरश्वैर्महाजवैः
उत्पतद्भिरिवाकाशं क्रामद्भिरिव पर्वतं रुक्मपुंखान् शरानस्यन् युयुधानमुपाद्रवत् शरपातमहावर्षं रथघोषबलाहकं कार्मुकाकर्षविक्षिप्तं ना
राचबहुविद्युतं शक्तिखड्गाशनिधरं क्रोधवेगसमुत्थितं द्रोणमेघमनावार्यं हयमारुतचोदितं दृष्ट्वैवाभिपतन्तं तं शूरः परपुरंजयः उवाच सूतं शै
नेयः प्रहसन् युद्धदुर्मदः एतं वै ब्राह्मणं शूरं स्वकर्मण्यनवस्थितं आश्रयं धार्तराष्ट्रस्य राज्ञो दुःखभयावहं शीघ्रं प्रजवितैरश्वैः प्रत्युद्या

हिप्रहृष्टवत्। आचार्यराजपुत्राणां संवृत्तं शूरमानिनं ततो रजतसंकाशा माधवस्य हयोत्तमाः द्रोणस्याभिमुखाः शीघ्रमगछन्नाततरंहसः
ततस्तौ द्रोणशैनेयौ युयुधाते परंतपौ शरैरनेकसाहस्रैस्ताडयंतौ परस्परं इषुजालावृतं व्योम चक्रतुः पुरुषर्षभौ पूरयामासतुर्वीरावुभौ दश दि
शः शरैः मेघाविवातपापाये धाराभिरितरेतरं न स्म सूर्यस्तदा भाति न ववौ च समीरणः इषुजालावृतं घोरमंधकारं समंततः अनाधृष्यमिवाभू
च्छूराणामभवत्तदा अंधकारीकृते लोके द्रोणशैनेययोः शरैः तयोः शीघ्रास्त्रविदुषोर्द्रोणसात्वतयोस्तदा नांतरं शरवृष्टीनां ददृशे न
रसिंहयोः इषूणां संनिपातेन शब्दो धाराभिघातजः शुश्रुवे शक्रमुक्तानामशनीनामिव स्वनः इषुजालावृतं घोरमंधकारं समंततः नाराचैर्व्यति
विद्धानां शूराणां रूपमाबभौ आशीविषविदष्टानां सर्पाणामिव भारत तयोर्ज्यातलनिर्घोषः शुश्रुवे युद्धशौण्डयोः अजस्रं शैलशृंगाणां
वज्रेणाहन्यतामिव उभयोस्तौ रथौ राजंस्ते चाश्वास्तौ च सारथी रुक्मपुंखैः शरैश्छिन्नाश्चित्ररूपा बभुस्तदा निर्मलानामजिह्मानां नाराचानां
विशांपते निर्मुक्ताशीविषाभानां संपातोभूत्सुदारुणः उभयोः पतितं छत्रं तथैव पतितौ ध्वजौ उभौ रुधिरसिक्तांगौ उभौ च विजयैषिणौ स्र
वद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ अन्योन्यमभ्यविध्येतां जीवितांतकरैः शरैः गर्जितोत्क्रुष्टसन्नादाः शंखदुंदुभिनिस्वनाः उपारमन्महा
राज व्याजहार न कश्चन तूष्णींभूतान्यनीकानि तथा युद्धादुपारमत् ददृशुर्द्वैरथं ताभ्यां जाते कौतूहले जनः रथिनो हस्तियंतारो हयारोहाः
पदातयः अवैक्षंताचलैर्नेत्रैः परिवार्य नरर्षभौ हस्त्यनीकान्यतिष्ठंत तथानीकानि वाजिनां तथैव रथवाहिन्यः प्रतिव्यूह्य व्यवस्थिताः मुक्ता
विद्रुमचित्रैश्च मणिकांचनभूषितैः ध्वजैराभरणैश्चित्रैः कवचैश्च हिरण्मयैः वैजयंतीपताकाभिः परिस्तोमांगकंबलैः विमलैर्निशितैः
शस्त्रैर्हयानां च प्रकीर्णकैः जातरूपमयीभिश्च राजतीभिश्च मूर्धसु गजानां कुंभमालाभिर्दंतवेष्टैश्च भारत सबलाकाः सखद्योताः सऐरावत

शातकुम्भैः अदृश्यंतोऽस्यपर्यायेषु धानाभिवधागुणाः अपश्यन्नस्य सायाश्च तत्रैवोपाधिष्ठिराः स्थिताः तद्युयुधानस्य महात्मनः विमा
नायाता रथवाजस्य सोमदुरागमाः भिक्षाचारणासंघाश्च विद्याधरमहोरगाः गतप्रत्यागतासेपस्त्रिवैरस्त्रविघातिभिः विविधैर्विस्मयं जग्मुस्तयोः
पुरुषसिंहयोः हस्तलाघवमस्य सुस्थाय तौ महाबलौ अन्योन्यमभिविध्यंतौ शरैस्तौ द्रोणमासकौ ततो द्रोणस्य दाशार्हः शरैश्छित्वा दृढं युधि
पत्रिभिः सुदृढैराशु धनुश्चैव महायुतं निमेषान्तरमात्रेण भारद्वाजोऽपरं धनुः सज्यं च कारनरस्पि चिच्छेदास्य च सात्यकिः ततस्त्वरन्पुनर्द्रो
णो धनुर्हस्तो व्यतिष्ठत सज्यं सज्यं धनुश्चास्य चिच्छेदानवमश्च ततोऽस्य संयुगे द्रोणो दृष्ट्वा कर्मातिमानुषं युयुधानस्य राजेन्द्र मनसैतद
चिंतयत् एतदस्त्रबलं रामे कार्त्तवीर्ये धनंजये भीष्मे च पुरुषव्याघ्रे यदिदं सात्वतां वरे तं चास्य मनसा द्रोणः पूजयामास विक्रमं लाघवं वासव
[redacted]
[redacted] सेवसमं ह्य द्विजसत्तमः तुतोषास्त्रविदां श्रेष्ठस्तथा देवाः सवासवाः न तामालोकयामासुर्लघुतां शीघ्रचारिणः देवाश्च युयु
धानस्य गंधर्वाश्च विशांपते सिद्धचारणसंघाश्च विदुर्द्रोणस्य कर्म तत् ततोऽन्यद्धनुरादाय द्रोणः [illegible] क्षत्रिय
मर्दनः अस्त्रैरस्त्रविदां श्रेष्ठो योधयामास भारत तस्यास्त्राण्यस्त्रमायाभिः प्रतिहत्य स सात्यकिः जघान निशितैर्बाणैस्तदद्भुतमिवाभव
त् तस्यातिमानुषं कर्म दृष्ट्वान्यैरसमं रणे युक्तं योगेन योगज्ञास्तावकाः समपूजयन् यदस्त्रमस्यति द्रोणस्तदेवास्यति सात्यकिः तमा
चार्योऽथ संभ्रांतोऽयोधयच्छत्रुतापनः ततः क्रुद्धो महाराज धनुर्वेदस्य पारगः वधाय युयुधानस्य दिव्यमस्त्रमुदैरयत् तदाग्नेयं महा
घोरं रिपुघ्नमुपलक्ष्य सः दिव्यमस्त्रं महेष्वासो वारुणं समुदैरयत् हाहाकारो महानासीद्दृष्ट्वा दिव्यास्त्रधारिणौ न विचेरुस्तदाकाशे

भूतान्याकाशगान्यपि अस्त्रैस्तैर्वारुणाग्नेयैस्ताभ्यां बाणाः समाहिताः नताः कश्चन पश्येत्तांआवर्तेद्यथभास्करः ततो युधिष्ठिरो राजा भीमसेनश्च
पांडवः नकुलः सहदेवश्च पर्यरक्षंत समंततः धृष्टद्युम्नमुखैः सार्द्धं विराटश्च सकैकयः मत्स्याः शाल्वेयसेनाश्च द्रोणमाजग्मुरंजसा ३९ श्याम
नपुरस्कृत्य राजपुत्राः सहस्रशः द्रोणमभ्युपपद्यंत सम्यत्तैः परिवारितं तेजोयुद्धमभूद्राजन्नेतेषां तव च धन्विनां रजसा संवृते लोके शरजाला
लसमावृते सर्वमाविग्नमभवन्नप्राज्ञायत किंचन सैन्येन रजसा ध्वस्ते निर्मर्यादमवर्तत ॥ ॥ द्रोणपर्वणि जयद्रथवधे संजय उवाच
निवर्तमाने त्वादित्ये तत्रास्तशिखरं प्रति रजसा कीर्यमाणे च मंदीभूते दिवाकरे तिष्ठतां युध्यमानानां पुनरावर्ततामपि भज्यतां जयतां चै
व जगाम तद्रहः शनैः तथा तेषु विसक्तेषु सैन्येषु जयकांक्षिषु अर्जुनो वासुदेवश्च सैंधवायैव जग्मतुः रथमार्गप्रमाणं तु कौंतेयो निशितैः
शरैः चकार तत्र पंथानं ययौ येन जनार्दनः यत्र यत्र रथो याति पांडवस्य महात्मनः तत्र तत्रैव दीर्यंते सेनास्तव विशांपते रथशिक्षां
तु दाशार्हो दर्शयामास वीर्यवान् उत्तमाधममध्यानि मंडलानि विदर्शयत् ते तु नामांकिताः पीताः कालज्वलनसंनिभाः स्नायुनद्धाः सु
पर्वाणः पृथवो दीर्घगामिनः वैणवाश्चायसाश्चोग्रा ग्रसंतो विविधानरीन् रुधिरं पतगैः सार्द्धं प्राणिनां पपुराहवे रथस्थितोग्रतः क्रो
शं यानस्यत्यर्जुनः शरान् रथे क्रोशमतिक्रांते तस्य ते घ्नंति शात्रवान् तार्क्ष्यमारुतरंहोभिर्वाजिभिः साधुवाहिभिः तथागच्छद्धृषीकेशः कृत्स्नं
विस्मापयन् जगत् न तथा गच्छति रविर्न वायुर्न विशांपते नेंद्रस्य वेतुरुद्रस्य नापि वैश्रवणस्य च नान्यस्य समरे राजन्गतपूर्वस्तथा रथः
यथा ययावर्जुनस्य मनोभिप्राय शीघ्रगः प्रविश्य तु रणे राजन्केशवः परवीरहा सेनामध्ये हयांस्तान्नोदयामास भारत ततस्तस्य रथौघस्य
मध्यं प्राप्य हयोत्तमाः कृच्छ्रेण रथमूहुस्तं क्षुत्पिपासासमन्विताः क्षताश्च बहुभिः शस्त्रैर्युद्धशौंडैरनेकशः मंडलानि विचित्राणि विचेरुस्ते मुहुर्मु

ॐ हयानां वाजिनागानां रथानां चैव सैनिकैः सह ठप गिरशति क्रान्ताः शैलाभानां सहस्रशः एतस्मिन्नन्तरे वीरौ रावणौ मोक्षतौ नृप सह
सैन्यस्य मध्ये तौ पाण्डवं क्रोधात्समाहनं तावर्जुनमवतुः षष्ट्या समस्तसायकैर्जनार्दनं शराणां च शतैस्तस्मात् विध्येतां मुदान्वितौ तावर्जुनो महाराज तेन
वभिन्नेत पत्रिभिः अजयामरगोऽक्रुद्धो मम्मज्ञो मम्मभेदिभिः ततस्तौ तु शरौघाणां वामसुंमहकेशवं आत्मादरे तौ मरथौ सिंहनादं च च
क्रतुः तयोस्तु धनुषी चित्रे भल्लाभ्यां श्वेतवाहनः चिच्छेद समरे तूर्णं ध्वजौ च कनकोज्ज्वलौ अथान्ये धनुषी राजन् प्रगृह्य समरे तदा
दश्चैवसर्वेचैवाग्नियोनयः एतेविनिर्जिताः सम्यक्संग्रामेसव्यसाचिना मदर्थमेवसंपन्नाउयोधनवशानुगाः एतान
हत्वाशरैराजन्किरातान्युद्धदुर्म्मदान् सैंधवस्यवधेयत्तमनुयास्यामिपांडवं येत्वेतेसुमहानागाञ्जनस्यकुलोद्भवाः
ककेशाश्चविनीताश्चप्रभिन्नकरटामुखाः जांबूनदमयैः सर्वैर्वर्मभिः सुविभूषिताः लब्धलक्ष्याः रणेराजन्नैरा
वणसमायुधि उत्तरपर्वतादेतेतीक्ष्णैर्दस्युभिराश्रिताः कर्कशैःप्रवरैर्योधैः कार्ष्णायसतनुच्छदैः संतिगोयोन
यश्चात्रसंतिवानरयोनयः अनेकयोनयश्चान्येतथामानुषयोनयः अनीकमसमेतानांधूमवर्णमुदीर्यते म्ले

राम०
११४

ध्यानां पापकर्तॄणां हिमशृंगनिवासिनां एतैर्युयोधनो लब्धा समयं राजमंडलं कपयं च सोमदत्तिं च द्रोणं च रथिनांवरं सिं
धुराजं तथा कर्णं मम भ्रमत्यास्थान क्षतार्थम थचात्मानं मन्यते कालचोदितः तेतु सर्वे च सेना साम भनाराचगोचरं नविमो
क्ष्यति कौंतेय यद्यपि स्युर्मनोजवाः तेन संभाविता नि संपदो पापक्तो विना विनाशमुपयास्यंति मच्छरौघविनिपीडिताः येत्व
ते रथिनो राजन्नदृश्यंते कांचनध्वजाः एते दुर्वारणा नाम कांबोजा यदि ते श्रुताः शूराश्च कृतविद्याश्च धनुर्वेदे च निष्ठिताः
संहताश्च भृशं येते अन्योन्यस्य हितैषिणः अक्षौहिणी च संरब्धा धार्तराष्ट्रस्य भारत यत्ता मदर्थे तिष्ठंति कुरुवीराभिरक्षि
ताः अप्रमत्ता महाराज मामेव प्रत्युपस्थिताः तानहं प्रमथिष्यामि तृणानीव हुताशनः तस्मात्सर्वानुपासंगान सर्वो
पकरणानि च रथे कुर्वंतु मे राजन्यथावदुपकल्पितान् अस्मिंस्तु किल संमर्दे याद्यं विविधमायुधं यथोपदिष्टमाचार्यैः
कार्यः पंचगुणो रथः कांबोजैर्हि समेष्यामि तैः क्रुद्धैराशीविषोपमैः नानाशस्त्रसमावापैर्विविधायुधयोधिभिः किरा
तैश्च समेष्यामि विषकल्पैः प्रहारिभिः लालितैः सततं राज्ञा दुर्योधनहिते रतैः शकैश्चापि समेष्यामि शक्रतुल्यपरा

श्रै०

११५

क्रौमैः श्वश्रिकैर्लैर्मुद्गुणैर्वृषैः प्रदीप्तैरश्मिपावकैः तथान्यैर्विविधैर्योधैः कालकेयैर्गुणान्वितैः सोपश्यदभिरोगानवृद्धिभिर्युद्ध
मत्तैः तस्माद्देववाजिनो मुख्याविश्रुताः शुभलक्षणाः उपाहृतास्त्वपीताश्च पुनर्युसंकृतैरथ तस्य सर्वेषां पार्श्वगान्सर्वोपकरणा
नि वरस्थेचास्थापयद्भ्राजाशस्त्राणि विविधानि च ततस्तान्सर्वतोयुक्तानश्वांश्चतुराजनाः रमयसाययामासुः पानंमृद्
मीरणांपीतोपद्धत्वान्स्नाताश्चक्रुःधान्नान्ममलंकृतान् विनीतशस्त्रान्मुद्गगानवतुरोहेममालिनः तान्युक्तानरुकल्पवरा
भानसुनोतानशीघ्रगामिनः संस्थष्टमनमोचयानविधिवत्कल्पितान्रथे महाध्वजेन सिंहेन मकेसरमालिना श्वेतेन को
तुकैर्हैमैः मणिविद्रुमचित्रितैः पांसुभ्रप्रकाशाभिः पताकाभिरलंकृतं हेमदंडोच्छ्रितच्छत्रं बहुशस्त्रपरिच्छदं योजया
मास विधिवत्हेमभांडविभूषितान् दारुकस्यानुजो भ्रातास्तस्य प्रियः सखा भ्वेरयच्चर्थयुक्तं वासवस्येव मातलिः
ततस्नातः शुचिर्भूत्वा कृतकौतुकमंगलः स्नातकानां सहस्रस्य स्वर्णनिष्कानवाचयत आशीर्वादैः परिष्वक्तः सा
त्वकिः श्रीमतांवरः ततः समधुपर्कार्हैः पीत्वा कैलातकं मधु लोहिताक्षो बभौ तत्र मदविक्लवलोचनः श्वात्मवी एम०

११५

रंकास्यं च हैमं हेम्णा महता न्वितः हिरण्मयोक्लतते ज्वालाभिः प्रज्वलन्निव पावकः उत्तमां धनुरादाय यमदंडोपमं शरं रथिनां वरः कृतस्वस्त्य
यनो विप्रैः कवचेन समलंकृतः लोकांगं वेलयामास कृष्णाभिवादितः युधिष्ठिरस्य चरणाव भिवाद्य कृतांजलि
तेन मूर्ध्न्युपाघ्रात आरुरोह महारथं ततस्तु वाजिनो हृष्टाः सुपुष्टा वातरंहसः अजग्मुः सिंह अमूहर्न्तो विकुर्वाणाः स्मे स्मेंध
याः तथैव भीमसेनोपि धर्मराजेन पूजितः प्रयातमास किंनामाहं समभिवाद्य युधिष्ठिरं तोहत्वा प्रविविक्तौ तौ तत्र वसे नाम शिं
मो सपुत्रास्तावकाः सर्वे तत्र छुद्रौ गगापुरोगमाः मत्रहमनुगच्छेतेहत्वा भीमसेन मासकिं अभिनंदायानवाहं सस्तवाह
षेकं वचः अथ हर्षपरीतांगः मासकिर्भीममब्रवीत त्वं भीम अस्य राज्ञा नमेतत्काप्यनतमं हिते अहं भित्वा प्रवेक्ष्यामि
कालपक्कमिदं फलं आयसांच तदातव घ्रयोराज्ञाभिरक्षणं ज्ञानीषमसवीर्य तंतवचाहमरिंदम तस्माद्भीमनि
वर्तस्व मम वेद इष्टमिति प्रियं तथोक्तं मासकिं प्राह ब्रज त्वं कार्यसिद्धये अहं राज्ञः करिष्यामि रक्षां पुरुषसत्तम एवमु
क्तः सात्वताभीमसेनेन स माधवः गच्छ गच्छ ध्वज धनुर्वधाय पार्थस्य नमहात्मना परिष्वजिष्य राज्ञा नंद धर्मात्मानं युधिष्ठिर

पार्थध्रुवो हि विजयो मम पत्रेगुणान् गतश्च त्वमध वसमास्यतः निमित्तानि च धन्यानि पश्यामि नमवदंति मां निहतो सैंधवे १

द्रो० ११६ तावद्रुक्मा भीमं तु परिघं रुक्मभूषणं अथैष्यन्तावर्कमैमं व्याघ्रो मृगगणानिव तं दृष्ट्वा प्रविविशंतं भैमं तवजना
धिप भूय एवाभवन्मूढं संभ्रमं शरचाप्यकंपत ततः प्रयातः सहसा तव भैमं समासकिः द्विरदस्तु सन्तेनराजन धर्मराजस्य शासना
त्. इति द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे संजय उवाच मयातेतवभैमं तु युयुधाने युयुत्सया धर्मराजो महाराज सै
नानीकेन संवृतं प्रायाद्रोणरथं प्रेस्युर्युयुधानस्य पृष्टतः ततः पांचालराजस्य पुत्रः समरदुर्मदः। प्राक्रोशत्सोमकानीकेवसु
क्षिप दानस्य च पार्थिवः आगच्छत प्रहरत द्रुतं विपरिधावत यथासौ वै न याति तस्मात् तथा कियुद्ध दुर्मदः महारथा हि वहतो य तिष्ठं
लस्य निर्जये इति ब्रुवंतो वेगेन निपेतुस्ते महारथाः वयं प्रतिजिगीषंतस्तत्र तानभ्यमिद्र तान ततः शरैर्महानाभीयुयु
धानरथं प्रति आकीर्यमाणा धावंती तव पुत्रस्य वाहिनी। मात्वते न महाराज शतधा तिव्य शीर्यत तस्यां विदीर्यमाणा
यां शिने पौत्रो महारथः समरे वीरान्महेष्वासान साध्यानीकेव्ययोधयत अथोमानीपरिगेंद्र नाना जनपदेश्वरान शरै
रनलसंकाशैर्निमेवीरान महायं शतमेकेन विव्याध शतेनैकं च पत्रिणां द्विपारोहान् द्विपांश्चैव हयारोहान् हयां एम० ११६

स्तथा रथिनः साश्वसूतांश्चजयानेशः पशूनिव ततस्तदद्भुतकर्माणं शरसंपातवर्षिणं नकेचनाभ्यधावंश्चसा
त्यकिं तव सैनिकाः ते भीतास्त्रस्यमानाश्च प्रमृष्टा दीर्घबाहुना आयोधनं जहुर्वीराः दृष्ट्वातमतिमानिनं रथैर्विमथिता
श्चक्रैर्भग्नैर्नीडैश्च मारिष चक्रैर्विमथितैश्छत्रैर्ध्वजैश्च विनिपातितैः अनुकर्षैः पताकाभिः शिरस्त्राणैः सकांचनैः
बाहुभिश्चंदनादिग्धैः सांगदैश्च विशांपते हस्तिहस्तोपमैश्चापि भुजंगाभोगसंनिभैः ऊरुभिः पृथिवीछन्ना मनुजा
नां नराधिप शशांकसन्निभैश्चैव वदनैश्चारुकुंडलैः पतितैर्ऋषभाक्षाणां माबभावतिमेदिनी गजैश्च बहुधा
छिन्नैः शयानैः पर्वतोपमैः रराजातिभृशं भूमिर्विकीर्णैरिव पर्वतैः तपनीयमयैर्योक्त्रैर्मुक्ताजालविभूषितैः उर
श्छदैर्विचित्रैश्च व्यशोभंत तुरंगमाः गतसत्वा महीं प्राप्य प्रमृष्टा दीर्घबाहुना नानाविधानि सैन्यानि तव हत्वा तु सा
त्वतः प्रविष्टस्तावकं सैन्यं द्रावयित्वा चमूं भृशं ततस्तेनैव मार्गेण यतो यातो धनंजयः इयेष सात्यकिर्गंतुं ततो द्रोणो
न्यवारितः भारद्वाजं समासाद्य युयुधानश्च सात्यकिः न न्यवर्तत संक्रुद्धो वेलामिव जलाशयः निवार्य तु रणे द्रोणो

द्रो० १८

युयुधानं महाराजं विव्याध निशितैः शरैः पंचभिर्मर्मभेदिभिः सात्यकिस्तु रणे द्रोणं राजन्विव्याध सप्तभिः हेमपुंखैः शिला
धौतैः कंकबर्हिणवाजितैः तं षड्भिः सायकैर्द्रोणः साश्वयंतारमर्दयत सतन्नममृष्यद्द्रोणं युयुधानो महारथः सिंहनादं
ततः कृत्वा द्रोणं विव्याध सात्यकिः दशभिः सायकैश्चान्यैः षड्भिरष्टाभिरेव च युयुधानः पुनर्द्रोणं विव्याध दशभिः शरैः
एकेन सारथिं चास्य चतुर्भिश्चतुरो हयान ध्वजमेकेन बाणेन विव्याध युधि मारिष तं द्रोणः साश्वयंतारं सरथध्वजमाशुगैः
त्वरन्समाच्छादयद्द्रोणः शलभानामिव व्रजैः तथैव युयुधानोपि द्रोणं बहुभिराशुगैः आच्छादयदसंभ्रांतस्ततो द्रोण उवा
च ह तवाचार्यो रणं हित्वा गतः कापुरुषो यथा युध्यमानं मां हित्वा प्रदक्षिणमवर्तत त्वं हि मे युध्यतो नाद्य जीवन्या
स्यसि माधव यदि मां त्वं रणे हित्वा न यास्याचार्यवद्गुतं सात्यकिरुवाच धनंजयस्य पदवीं धर्मराजस्य शासनात् गच्छामि
स्वस्ति ते ब्रह्मन्न मे कालात्ययो भवेत आचार्यानुगतो मार्गः शिष्यैरन्वास्यते सदा तस्मादेव व्रजाम्याशु यथा मे स
गुरुर्गतः संजय उवाच एतावदुक्त्वा शैनेय आचार्यं परिवर्जयन्प्रयातः सहसा राजन्सारथिं चेदमब्रवीत द्रो राम० १८

राः करिष्यंत्येष्यलं सहसा मम वासरो पत्तोयाहि रणे ततस्तु राहुंनेवं सुबः पुरं स्मरालोकयेतेषां समा मार्कसानां महात्मनं श्व
सानं कृतस्तु ततस्त्रि शिशिराणां सं महाबलं तदनंतरमेतच्च बाल्हिकानां महद्बलं बाल्हिकाभ्यामतो युक्तं कर्णस्य च महद्बलं च मे
मेनं हि सम्मानि भिन्नामेतानि सारथे कम्बोजानां समुपाश्रित्य विरक्षितं रणाजिरे एतद्धैतरमासाद्य चोरयाश्चान्वरस्पृशेत मध्यमे
नवमास्थाय बहुमाममच सारथे बाल्हिकाय पत्तेहृदयं तेनानाप्रहरणायुधाः हस्तिनामासाद्य बहवः सूतपुत्रगणामाः
हस्तस्य च रथसंवाधे यच्चानीकं विलोक्यते नानादेशसमुच्चयपदातिरधिष्ठितं एतावदुक्त्वा यतां रेखा स्मरणापि स्वसुयन स
ध्वतो याहि यच्चायं कर्णस्य च महद्बलं तं द्रोणोनुयतो क्रुद्धो विकिरन्विशिखान्बहून् युयुधानं महाभागं गच्छंतमनिवर्ति
नं कर्णस्य सैन्यं सुमहदभिहत्य शितैः शरैः प्राविशद्भारतीं सेनामपर्यंतां समासकिः प्रविष्टे युयुधाने तु सैनिकेषु द्रुतेषु च
अमर्षी कृतवर्मा तु सात्यकिं पर्यवारयत तमापतंतं विशिखैः षड्भिर्हत्य समासकिः चतुर्भिश्च हतो स्मा च्चापान्याजघा
नाशु वीर्यवान् ततः पुनः षोडशभिर्नतपर्वभिराशुगैः सात्यकिः कृतवर्माणं प्रत्यविध्यत्स्तनांतरे एताड्यमानो विशिखैः खै

अल्लजातविशिखांस्तूर्णं शतशोथ सहस्रशः सरथं कृतवर्म्माणं समंतात्पर्यवारयत् छादयित्वा रणे राजन् हार्दिक्यं स तु सात्यकिः अथास्य भल्लेन शिरः सारथेः
४८ समकृंतत सपपात हतः सूतो हार्दिक्यस्य महारथात् ततस्ते यंतृरहिताः प्राद्रवंस्तुरगा भृशं व्यपेतभीरमित्राणां नावहत्सुमहद्भयं सात्यकिश्चाभ्यगात् सैन्यं
युधि सम्प्रद्रवत् युयुधानोपि राजेंद्र भोजानीकाद्विनिःसृतः प्रययौ त्वरितस्तूर्णं काम्बोजानां महाचमूं स तत्र बहुभिः शूरैः संनिरुद्धो महारथैः न चचाल तदा राजन् सात्य-
सात्यकिः ५

द्रो० वृहन्मिमित्स्थितेत्रमे: सात्वतेनमहाराजकृतवर्माणावक्षेम सवत्सरंतंसंधायपत्रिस्नागाग्निसमंनिभं आहत्परराजन्नाकरणात्
११८ विश्वधानमिमासक्तिं मतमन्देहावरणांभित्वादेहंसमाप्रत: सपुंखपत्र: पृथिवींविवेशरुधिरोक्षित: अथास्यवहुभिर्वा
णैश्छिन्नतप्रसमार्च्चितं समार्गणगाणांराजन्कृतवम्मांशरासनं विमाय्यवरणोराजन्सात्यकिंसत्यविक्रमं दशभिर्विशि
खैस्तीक्ष्णैरभिक्रुद्धस्तनांतरे ततःप्रशीर्णेधनुषिशक्त्याशक्तिमतांवर: जघानदक्षिणंबाहुंसात्यकिः कृतवर्म्मण: ततो
मत्सुहृदंचापंपूर्णमायम्यसात्यकि: सत्यविक्रम: संधायचचमूंद्रोणाभिजमार्गंनिवेशयत् अथमत्वद्गुरोयत्नोयुयुधानं
युयुत्सया तथातमनुधावंतंयुयुधानस्य पृष्ठत: नवारयंतमस्त्रेश पांडुसेनंस्टहेतमा: समासाद्यतुहार्दिक्यंरथानांप्रवरंरथं
पांचालोविगतोत्साहाभीमसेनपुरोगमा: विक्रम्यवारिताराजन्वीरेणकृतवर्म्मणा यतमानांस्चतान्सर्वानीषद्विगत
चेतस: अभितस्तांश्छरौघेणक्लांतवाहानवारयत् निगृहीतास्तुभोजेनभोजानीकेप्सवोरणे अतिष्ठन्नार्यवद्वीरा:प्रार्थयं
तोमहद्यश:॥ ॥ इतिद्रोणपर्वणिजयद्रथवधेसात्यकिप्रवेशे धृतराष्ट्रउवाच एवंबहुविधंसैन्यमेवंप्रविचितंपरं व्यूढमेव एम०
११८

यथाम्नायमेवं वहन्नमंत्रय निसंमृज्जितमस्मादिशिकामं वनः सता शोठमसद्भुताकारं पुरस्ताद्दृष्टविक्रमं नातिवृद्धम
बालं वनान्तशेनापिपीवरं लक्षुद्दतायतमारांमाशाजानाम
आतमनाद्भुतमेवं वहुशस्त्रपरिच्छदं शस्त्रग्रहणा
विधासुवर्केषु परिनिष्ठितं आरोहणमेवं स्कंदनमरणसांतरस्थाने सम्यक्कृप्रहरणायानेव्वपयानचकोविदं नागेन्द्रमे
पुत्रं शोरयेषुवपरिस्थितं परीक्ष्य यथाम्नायमेवं तेनेनापयादितं नगोस्यानोपक्रागरानसंबंधिनिमित्ततः नानाहृतं ५४
नाप्यन्वतमममेवं वभूव कुलीनायैर्जनोपेतं दृष्टपुष्पमनुहृतं कृतमानोपचयशस्विचमनस्विच मक्रिभ्यापि
मुख्यैर्वहुभिः पुण्यकर्मभिः लोकपालायैमस्तानपालितं नरसत्तमैः वहुभिः पार्थिवैर्गुप्तमस्मात्प्रियचिकीर्षुभिः
अस्मानभिरतैः कामात्मवलैः सपत्नानुगैः महोदधिमिवापूर्णमापगाभिः समंततः अपरैः पक्षिसंकाशैः
धैर्यैश्च सहितं प्रभिन्नकरटैश्चैवविधुरैः स्थावृतमस्त परहमतमेवं किमन्यद्बाधयतः योधास्सप्तजनं भीमं ताहृतो

ष्टा तीर्त्वा

न्यायार्थं भीमसेनार्जुनौ पांडवर्षभौ संजयैक्य च यथैव युधिष्ठिरेण नामकं सर्वशो षंन पश्यामि प्रविष्टे सव्यसाचिनि सात्वते च योधा एव समसे २

किं तु वा कुरवः कर्णसंविदधुः कालचोदिताः दारुणे कायने काले कथं वा प्रतिपेदिरे अक्षौ नृहिकौ रवा स्म मे ससुना तात संगतान् ३

३

द्रो० म्भितं गिरीणां स्वपणवमिगराशृक्तिशस्त्रासमुखपाकुलं स्वजभूषणसंबाधं [illegible] रेतोसलसुसंचितं नाद

२१७ नैरभिधावद्भिर्वायुवेगविकंपितं द्रोणगंभीरपातालं कृतवर्ममहाह्रदं जलसंधमहाग्राहं कर्णचंद्रोदयोद्धतं गते सै

न्यसंजय तीर्त्वा तत्रसमतिक्रांते हस्ताते वत रसिनी सिंधुराजं तु संप्रेक्ष्य गांडीवस्य गोचरे विक्रमोऽपि स्मरोते षां नेतथा

दृश्यते हि वै अक्षतौ तौ संयुगे तत्र प्रविष्टौ कृष्णपांडवौ न च वारयिता कश्चित्तयोरस्तीह संजय भृताश्च बहवो योधाः

पीड्यैव महारथाः वर्तन्ते च यथायोगं प्रियवादेन चापरे असत्कारभृतस्तात मम सैन्ये न विद्यते कर्मणा ह्यनुरूपेण ८५

लभ्यते भक्तवेतनं न चायोधोऽभवत्कश्चिन्मम सैन्येषु संजय अल्पदानभृतस्तात तथा चाभृतको नरः पूजिता हि

यथाशक्त्या दानमानासनैर्मया तथा पुत्रैश्च मे तात ज्ञातिभिश्च सबांधवैः ते च प्राप्यैव संग्राममनिर्जिताः सव्यसाचि

ना शैनेयेन च परामृष्टाः किमन्यद्भागधेयतः रक्ष्यते यश्च संग्रामे ये च संजय रक्षिणः एकः साधारणः पंथा रक्ष्यस्य

सह रक्षिभिः अर्जुनं समरे दृष्ट्वा सैंधवस्याग्रतः स्थितं पुत्रो मम भृशं मूढः किं कार्यं प्रत्यपद्यत सात्यकिं च रणे दृ गम०

२१७

स्त्वामविशंतमभीतवत् किंनु दुर्योधनः कृत्यं प्राप्तकालममन्यत सर्वशस्त्रातिगो ह्येनां प्रविष्टो रणसत्तमो दृष्ट्वा कौरवम
तिं युद्धमत्स्यपृथं तमामकाः दृष्ट्वा कृष्णं तु दाशार्हमर्जुनार्थे व्यवस्थितं शिनीनामृषभं चैव मन्ये शोचंति पुत्रकाः
[illegible] दृष्ट्वा सेनां व्यतिक्रांतां सात्वतेनार्जुनेन च पलायमानांश्च कुरून्मन्ये शोचंति पुत्रकाः
विद्रुतान्रथिनो दृष्ट्वा निरुत्साहान्द्विषज्जये पलायने कृतोत्साहान्मन्ये शोचंति पुत्रकाः शून्यान्कृतान्रथोपस्था
न्सात्वतेनार्जुनेन च हतांश्च योधान्संदृश्य मन्ये शोचंति पुत्रकाः व्यश्वनागरथान्दृष्ट्वा तत्र वीरान्सहस्रशः धावमा
नान्रणे व्यग्रान्मन्ये शोचंति पुत्रकाः महानागान्विद्रवतो दृष्ट्वार्जुनशराहतान् पतितान्पतितांश्चान्यान्मन्ये शोचंति
पुत्रकाः विहीनांश्च कृतान्नागान्विरथांश्च कृतान्नरान् तत्र सात्यकिपार्थाभ्यां मन्ये शोचंति पुत्रकाः पत्तिसंघा
न्रणे दृष्ट्वा धावमानांश्च सर्वशः निराशा विजये सर्वे मन्ये शोचंति पुत्रकाः द्रोणस्य समतिक्रांतावनीकमपराजि
तौ क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचंति पुत्रकाः संमूढोऽस्मि भृशं तात श्रुत्वा कृष्णधनंजयौ प्रविष्टौ मामकं सैन्यं सा

द्रो० १२० त्येतेन महाद्युतौ तस्मिन्प्रविष्टे शत्रूणां शिनीनां प्रवरे रथे भोजानीकं व्यतिक्रान्ते किमकुर्वत कौरवाः तथा द्रोणे
न समरे निगृहीतेषु पांडुषु कथं युद्धमभूत्तत्र तन्ममाचक्ष्व संजय द्रोणो हि बलवाञ्छ्रेष्ठः कृतास्त्रो युद्धदुर्मदः पा
ञ्चालास्तं महेष्वासं प्रसविध्यन्कथं रणे बद्धवैरास्ततो द्रोणं धनंजयजयैषिणः भारद्वाजस्ततस्तेषु दृढवैरो महारथः
अर्जुनश्चापि यच्चक्रे सिंधुराजवधं प्रति। तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि संजय संजय उवाच आत्मापरा
धात्संभूतं व्यसनं भरतर्षभ प्राप्य नाहं त्वं वीरनरलं शोचितुमर्हसि पुरा यदुच्यसे प्राज्ञैः सुहृद्भिर्विदुरादिभिः माहार्षीः
पांडवानीति न त्वया तच्छ्रुतं सुहृदां हितकामानां वाक्यं यो न शृणोतीह स महद्व्यसनं प्राप्य शोचते वै यथा भवा
न् याचितोसि पुरा राजन्दाशार्हेण शमं प्रति न च तं लब्धवान्कामं त्वत्तः कृष्णो महायशाः तव निर्गुणतां ज्ञात्वा
पक्षपातं सुतेषु च द्वैधीभावं तथा धर्मे पांडवेषु च मत्सरं तव जिह्ममभिप्रायं विदित्वा पांडवान्प्रति आर्तप्रलापां
श्च बहून्मनुजाधिप मन्त्रम सर्वलोकस्य तत्त्वज्ञः सर्वलोकेश्वरः प्रभुः वासुदेवस्ततो युद्धं कुरूणामकरोन्महत् गम० २०

त आत्मा पराधात्सु महात्मा नमस्ते विपुल स्रयः येनं द्रुयोधने रोषं कर्तुमर्हसि मानद न हि ते सुकृतं किंचिद्वि
दे मध्येव भारत दृश्यते रष्टत च्चैव त्वन्मूलो हि पराजयः तस्मात्स्वयं स्थितो भूत्वा जानता लोकसन्निर्णयं श्रणु
इयं यावृत्तं घोरं देवासुरोपमं प्रविष्टतव सैन्यं तु शैनेये सत्यविक्रमे भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीं तव आ
गच्छमानस्तान्सह सा क्रुद्धरूपान्महारथान् एकोरिकारणोपाद्गन्कृतवर्मा महारथः यथोद्धूतं वारयते वेलाव
सलिलार्णवं पांडुसैन्यं तथा संख्ये हार्दिक्यः समवारयत तत्राद्भुतमपश्याम हार्दिक्यस्य पराक्रमं यदेनं स
हिता पार्था नातिचक्रमुराहवे ततो भीमस्त्रिभिर्विद्ध्वा कृतवर्माणमाशुगैः शंखं दध्मौ महाबाहुर्हर्षयन्सर्व
पांडवान् सहदेवस्तु विंशत्या धर्मराजश्च पंचभिः शतेन नकुलश्चापि हार्दिक्यं समविध्यत द्रौपदेयास्त्रिसप्तत्या
सप्तभिश्च घटोत्कचः धृष्टद्युम्नस्त्रिभिश्चापि कृतवर्माणमार्दयत विराटो द्रुपदश्चैव याज्ञसेनिश्च पंचभिः शि
खंडी चैव हार्दिक्यं विध्वा पंचभिराशुगैः पुनर्विव्याध विंशत्या सायकानां हसन्निव कृतवर्मा ततो राजन्स

८१

द्रो०
१२१

वृतस्तान्महारथान एकैकंपंचभिर्विद्ध्वाभीमंविव्याधसप्तभिः धनुर्ध्वजंचास्यतथासारथ्याश्चावयातयत अथैनं
छिन्नध्वजानेन्त्रसमरेणामहारथः अजानेयानोगविक्रुद्धः सप्तसाप्तिविशितैः शरैः सगतविद्धोबलवानहार्दिक्यस्म
शरोत्तमैः प्रचालरथमध्यस्थः क्षितिकंपेयथाबलः भीमसेनंतथादृष्ट्वाधर्मराजपुरोगमाः विरथंततः शरान्वरान
नह्तातवध्वाराणामार्दयन तंतयाकोष्टकीकृत्यरथवंशेनमारिषविव्यधुः सायकैर्हृष्टारसायेमारुतेर्मृधे म
तिलब्ध्वाततःसंज्ञांभीमसेनोमहाबलः शक्तिंजग्राहसमरे [illegible] हेमदंडामयस्मयीचिक्षेपचरथात्तूर्णंहार्दिक्यस्य
रथंप्रति साभीमभुजनिर्मुक्तोरगसंनिभा हार्दिक्यमोणामभितः प्रजज्वालसुदारुणा तमापतंतींमहसा
युगांताग्निसमप्रभां द्वाभ्यांशराभ्यांहार्दिक्योनिजघानद्विधामदा साछिन्नापतिताभूमौ [illegible] शक्तिः कनकभूषणा द्योतयंती
[illegible] दिशोराजनमहोल्केवनभश्च्युता शक्तिंविनिहतांदृष्ट्वाभीमश्चक्रोधेभृशं ततोन्य
द्धनुरादायवेगवत्समहास्वनं भीमसेनोरणेक्रुद्धोहार्दिक्यंसमवारयत् अथैनंपंचभिर्बाणैराजघानस्तनांतरे रम०
१२१

र्मेता८

भीमंभीमबलोराजन्बलवद्दुर्मर्षितेरणे भोज्ञात्वा ततस्सर्वांगोभीमसेनेनमारिष रक्ताशोकइवोत्फुल्लोव्यभ्राजतरणा
जिरे ततः क्रुद्धस्त्रिभिर्बाणैर्भीमसेनंहसन्निव अभिहत्यदृढंपुङ्खैस्तान्नवान्नसविध्यत त्रिभिस्त्रिभिर्मर्मस्थानेषुपायतमानात्म
हारथान् तेपितंप्रत्यविध्यंतसन्नतपर्वभिः सप्तभिः शरैः शिखंडिनस्ततः क्रुद्धः सुवर्णपुंखामहारथः धनुश्चिच्छेदसमरेत्व
हसन्निवभारत शिखंडीतुततः क्रुद्धस्त्यक्त्वाधनुषिमलवः अन्यन्नायाहसमरेश तवं...मा स्वरं भ्राजयित्वामहच्च
न्मचामीकरविभूषितं तमभिप्रेषयामासमोक्षतवसम्मरथंप्रति सतम्प्रभशरंचापंछित्वारणेमहानभिः अभ्यगाद्धर
णींराजन्नच्युतस्यातिप्रियांप्रभात एतस्मिन्नेवकालेतु तवमारणामहास्त्याः विव्यधुःसायकैर्योदंक्षतवमोगणामाद
वं अथापद्गुरात्मायस्यातत्वमहद्धनुः विशीर्णोभरतश्रेष्ठाहार्दिक्यः परवीरहा विव्याधयोध्वानस्युद्ध
त्रिभिस्त्रिभिरजिह्मगैः शिखंडीनंचविव्याधत्रिभिः पंचभिरेवच धनुर[illegible]मादायशिखंडीतुमहायशाः अवार

भ्यत स१

द्रो० पत्कृम्मेनसेवरा युगोत्हृदिकात्मजं ततः क्रुद्धोरणोराजन्‌नत्हृदिकस्यात्मसंभवः अभिदुद्राववेगेनयात्तसेनिं
१२२ महारथं भीष्मस्यममेराजन्नरसोऽहंतुमहात्मनः विरर्शीपदूलंशूरः शार्दूलरवकुंजरं तौदिशागजसंकाशौज्व
लिताविवपावकौ समापेततुरन्योन्यंशरसंघैररिंदमौ विधुन्वानौधनुः श्रेष्ठेसंदधानौचसायकान् विसृजंतौ
चशतशोगाभस्तीनिवभास्करौ तापयंतौशरैस्तीक्ष्णैरन्योन्यंतौमहारथौ युगांतप्रतिमौवीरौरेजतुर्भास्कराविव
कृतवर्माचरणेयात्तसेनिंमहारथं विद्ध्वाविभिः स्त्रिभिर्विद्ध्वापुनर्विव्याधसप्तभिः समाढविद्धोव्यथितोरथो
पस्थउपाविशत् विसृजन्सशरंचापंमूर्छयाभिपरिप्लुतः तंविषण्णंरणेदृष्ट्वातावकाः पुरुषर्षभाः हार्दिक्यंपूजया
मासुर्वासांस्यादुधुवुश्चह शिखंडिनंतथाज्ञात्वाहार्दिक्यशरपीडितं अपोवाहरणाद्यंतास्त्वरमाणोमहारथं स्व
दितंत्वथोपस्थेदृष्ट्वापार्थाःशिखंडिनं परिवव्रूरथैस्तूर्णंकृतवर्माणमाहवे तत्राद्भुतंपरंचक्रेकृतवर्मामहा एम०
१२२

२५ तस्मिन् हार्दिक्येन महात्मना तज्जपावनते वापि प्रहृष्टैश्चापि तावकैः दीप्यमानासी पाण्डूनामगाधेगाधमिच्छता श्रुत्वा सात्यकिना द्रमी मंता वक्ता नां मता ४५

थः तेद्राव्यमाणाः समरे हार्दिक्येन स्म पाण्डवाः स्तेस्थित स्यधावंतो नैव चक्रुर्धृतिं रणे जित्वा पांडुसुतान् युद्धे भीम
सेन पुरोगमान् हार्दिक्यः समरे तिष्ठद्विधूमस्त्व पावकः तेद्राव्यमाणाः समरे हार्दिक्येन महारथाः विमुखाः समपद्यंत
शरवृष्टिभिरर्दिताः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशे संजय उवाच शृणुष्वैकमना राजन् यन्मां त्वं प
रिपृच्छसि द्राव्यमाणे बले [illegible] ह वशैनेयस्त्वरितो राजन् हार्दिक्यस्य
मगात् कृतवर्मा तु हार्दिक्यः शैनेयं निशितैः शरैः ततस्तं विरथं कृत्वा सात्यकिः सत्यविक्रमः सेनामभ्यपीड
यामास शरैः सन्नतपर्वभिः अभज्यताथ तेना शैनेय शरपीडि [illegible] ता ततः प्रायात्स
त्वरितः सात्यकिः सत्यविक्रमः शृणु राजन् यदकरोत्तव सैन्येषु वीर्यवान् अतीत्य स महाराज द्रोणानीकमहार्णवं परा
जित्य समरे हृष्टः कृतवर्माणमाहवे यंतारमब्रवीच्छूरः शैनेयः शीघ्रसंभ्रमं दृष्ट्वा तु तव तत् सैन्यं रथाश्वद्विपसंकुलं पदाति
जनसंपूर्णमब्रवीत् सारथिं पुनः यदेतन्मेघसंकाशं द्रोणानीकस्य सव्यतः सुमहत् कुंजरानीकं यस्य रुक्मरथो मुखे एतेहि

मु२

द्रो०
१२३

वृहद्वलः सुतश्चैव निवारास्त्वसंयुगे दुर्योधनसमादिष्टास्सहदेवेन [illegible]जीविताः राजपुत्रा महेष्वासाः सौवर्णविक्रान्तयोधिनः त्रिगर्ता
नारथ्यास्सभाः स्वर्णविकृतध्वजाः मामेवाभिर्लावीराणयोत्स्यमाना व्यवस्थिताः
अश्वमाप्याथ क्षिप्रमथाश्वोत्स्यमानस्य त्रिगर्तैः सह योत्स्यामि भासहाम सपश्यत ततः प्रायाद्धवेनैः सूतः सात्वत
ममतेस्थितः रथेनादित्यवर्णेन भास्वरेणापताकिना तमूहुः सारथेर्वश्याह्लादमाना हयोत्तमाः वायुवेगासमाः
संख्ये कुंदेन्दुरजतप्रभाः आपतन्तं रणे तं तु शंखवर्णैर्हयोत्तमैः परिवव्रुस्ततः शूरा गजानीकेन सर्वतः किरन्तो विविधांस्ती वि५
क्ष्णान् सायकान् लघुवेधिनः सात्वतोपि शितैर्वाणैर्गजानीकमपोथयत् पर्वतान्निव वर्षेण तपान्ते जलदो महान् व
ज्राशनिसमस्पर्शैर्वध्यमानाः शरैर्गजाः प्राद्रवन् रणमुत्सृज्य शिनिवीरसमीरितैः शीर्णदंता विरुधिरा भिन्नमस्तक
पिंडिकाः विशीर्णकर्णास्यकरा विनियन्तृपताकिनः संछिन्नवर्मघंटाश्च विनिकृत्तमहाध्वजाः हतारोहा दिशो भे
जिरे भ्रष्टकंबलाः रुवंतो विविधान्नादान् जलदोपमनिस्वनाः नाराचैर्वत्सदंतैश्च भल्लैरंजलिकैस्तथा क्षुर गम०
१२३

स३

प्रसह्यचैवंस्य सात्वतेन विदारिता: स्रवितास्तकृतथा मूत्रपुरीषंच प्रसुस्रुवुः बभ्रमुश्च रणे लुठ्यमानैस्तैर्मत्तास्तथापरे
सर्वमत्तकुंजरानीकं युयुधानेन पातितं शरैरग्न्यर्कसंकाशैः प्रद्रावमगमत्ततः तस्मिन्हते गजानीके जलसंधोम
हाबलः यत्तः संप्रापयन्नागं रजताश्वरथं प्रति रुक्मवर्मधरः शूरस्तपनीयांगदः शुचिः कुंडलीमुकुटीचक्री र
क्तचंदनरूषितः शिरसा धारयन्दीप्तां तपनीयमयीं स्रजं उरसा धारयन्निष्कं कंठसूत्रं च भास्वरं चापं रुक्मं च विकृतं
विधुन्वन्गजमूर्द्धनि अशोभत महाराज सविद्युदिव तोयदः तमापतंतं सहसा मागधस्य गजोत्तमं सात्यकिर्वार
यामास वेलेव मकरालयं नागं निवारितं दृष्ट्वा शिनेयस्य शरोत्तमैः अक्रुध्यत रणे राजन्जलसंधो महाबलः ततः क्रु
द्धो महाराज मार्गणैर्भारसाधनैः अविध्यत शिनेः पौत्रं जलसंधो महोरसि ततोऽपरेण भल्लेन पीतेन निशितेन च
अस्यतो वृष्णिवीरस्य निचकर्त शरासनं सात्यकिं छिन्नधन्वानं प्रहसन्निव भारत अविध्यन्मागधो वीरः पंचभिर्नि
शितैः शरैः सविद्धो बहुभिर्बाणैर्जलसंधेन वीर्यवान् नाकंपत महाबाहुस्तदद्भुतमिवाभवत् अचिंतयंश्च संभ्रमं।

द्रो०

२५

तनालसंधं संप्रमाह्वलो धनुरुत्तममासाद्य तिष्ठ तिष्ठेति सुवाच ह एतावदुक्त्वा शैनेयो जलसंधं महोरसि विव्याध
षष्ट्या सप्तशरैः शितैः गांप्रहसन्निव क्षुरप्रेण गात्रयुतौ ह्येनं मुष्टिदेशे महद्धनुः जलसंधस्य चिच्छेद विव्याध च त्रिभिः शरैः जल
संधस्तु तत्संत्यक्त्वा सशरं वै शरासनं तोमरं व्यसृजत्तूर्णं सात्यकिं प्रति मारिष स निर्भिद्य भुजं सव्यं माधवस्य महारणे अभ्य
गाद्धरणीं घोरः श्वसन्निव महोरगः निर्भिन्ने तु भुजे सव्ये सात्यकिः सत्यविक्रमः त्रिंशद्भिर्विशिखैस्तीक्ष्णैर्जलसंधम
ताडयत् प्राप्तयेत्तु ततः खड्गं जलसंधो महाबलः आर्षभं चर्म च महत् शतचन्द्रकसंकुलं आविध्य ततः तं खड्गं सात्वता
योत्ससर्ज ह शैनेयस्य धनुश्छित्वा स खड्गो न्यपतन्महीं अलातचक्रवच्चैव व्यरोचत महीं गतः अथ्यान्नहनुगत्ता
पसर्वकायावरणं शालस्कंधप्रतीकाशमिंद्राशनिसमस्वनं विस्फार्य विव्यधे क्रुद्धो जलसंधं शरेण ह ततः साभ
रणौ बाहू क्षुराभ्यां माधवोत्तमः सात्यकिर्जलसंधस्य चिच्छेद प्रहसन्निव तौ बाहू परिघप्रख्यौ पेततुर्गजसत्तमात
वसुंधरधराद्भ्रष्टौ पंचशीर्षाविवोरगौ ततः सुदंष्ट्रं सुमहत् चारुकुण्डलमंडितं क्षुरेणास्य तृतीयेन शिरश्चिच्छेद सात्य राम०

२५

किं तस्मिन्निति शिरो बाहू कबंधं भीमदर्शनं छिन्नं जलसंधस्य रुधिरेणाभ्यषिंचत जलसंधं निरस्यो[illegible]
स्तु सात्वतः विमानं पातयामास गजस्कंधाद्विशांपते [illegible]
[illegible] रुधिरेणावसिक्तांगो जलसंधस्य कुंजरः हाहाका
रो महानासीत्तव सैन्यस्य मारिष जलसंधं हतं दृष्ट्वा हस्तिनामस्य भ्रेणात् विमुखाश्चाभ्यधावंत तव योधाः समंततः पलायन
कृतोत्साहा निरुत्साहा द्विषज्जये एतस्मिन्नंतरे राजन्द्रोणः शस्त्रभृतां वरः अभ्ययात्सात्वतं दैवं यत्पृथुधन्वा महारथं तमु
दीर्णं तथा दृष्ट्वा शैनेयं कुरुपुंगवाः द्रोणेनैव सह क्रुद्धाः सात्यकिं समुपाद्रवन् ततः प्रववृते युद्धं कुरूणां सात्वतस्य
च द्रोणस्य च रणे राजन्घोरं देवासुरोपमं इति द्रोणपर्वणि सात्यकिप्रवेशे जयद्रथवधे जलसंधवधः ॥ संजय उवाच
ते किरंतः शरव्रातान्सर्वे यत्ताः प्रहारिणः त्वरमाणा महाराज युयुधानमयोधयन् तं द्रोणः सप्तसप्तत्या जघान निशि
तैः शरैः दुर्मर्षणो द्वादशभिर्दुःसहो दशभिः शरैः विकर्णश्चापि निशितैस्त्रिंशद्भिः कंकपत्रिभिः विव्याध सव्ये पार्श्वे तु

द्रो० १२५ स्तेनाभ्यामंसेतथा दुर्मुखोदशभिर्बाणैस्तथा दुःशासनोऽष्टभिः चित्रसेनश्चशैनेयं द्वाभ्यांविव्याधमारिष दुर्योधनश्चमहता
शरवर्षेणमाधवं अपीडयद्रणेराजन्शूराश्चान्येमहारथाः सर्वतः प्रतिविद्धस्तुतवपुत्रैर्महारथैः तानप्रत्यविध्यद्वार्ष्णे
यः पृथक्पृथगजिह्मगैः भारद्वाजंत्रिभिर्बाणैर्दुःसहंनवभिः शरैः विकर्णंपंचविंशत्याचित्रसेनंचसप्तभिः दुर्मर्षणंद्वा
दशभिश्चाष्टभिश्चविविंशतिं सत्यव्रतंचनवभिर्विजयंदशभिः शरैः ततोरुक्मांगदंचापंविधुन्वानोमहारथः अभ्ययात्
सात्यकिस्तूर्णंपुत्रंतवमहारथं राजानंसर्वलोकस्यसर्वलोकमहारथं शरैरभ्याहनद्गाढंततोयुद्धमभूत्तयोः विमुंच
तोःशरांस्तीक्ष्णान्संदधानौचसायकान् अदृश्यंसमरेऽन्योन्यंचक्रतुस्तौमहारथौ सात्यकिःकुरुराजेननिर्विद्धोव्यरो
शोभत अस्रवद्रुधिरंभूरिस्वरसंचंदनोयथा सात्वतेनचबाणौघैर्निर्विद्धस्तनयस्तव शातकुंभमयापीडोबभौयूपइवो
च्छ्रितः माधवस्तुरणेराजन्कुरुराजस्यधन्विनः धनुश्चिच्छेदसमरेक्षुरप्रेणहसन्निव अथैनंछिन्नधन्वानंशरैर्बहुभिरा
चिनोत् निर्भिन्नश्चशरैस्तेनद्विषताक्षिप्रकारिणा नामृष्यतरणेराजाशत्रोर्विजयलक्षणं अथान्यद्धनुरादायहेम रामः १२५

शष्टंदुःशासनं विव्याधमार्गणैःकिंतुशंसीमापकानांशोनेनह सोतिविद्धोबलवतातवपुत्रेणाधविना अभयेवशमापन्न
वपुत्रमपोउयत पोरितंत्रपतिंहस्तातवपुत्रामहारथाः सारसकिंशरवैषणछायया सामर्थ्यनमा सछाद्यमानोबहुभिस्तव
पुत्रैर्महारथैः एकैकंपंचभिर्विद्ध्वापुनर्विव्याधसप्तभिः दुर्योधनंचतस्रिंशतोविव्याधाष्टभिराशुगैः प्रहसंश्चाभ्यविध्यत्स कार्ष्णि
केरिपुभीषणां तमांमतिमध्येवैवशरैर्ध्वजमपातयत हत्वातुचतुरोवाहान्चतुर्भिर्निशितैः शरैः सारथिंपात
यामास सुराश्रेणामहायशाः एतस्मिन्नंतरेचैवकुरुराज्ञेमहारथं अवाकिरंछेरस्तीक्ष्णैर्बहुभिर्मर्मभेदिभिः सवध्यमानं
समभेशेनेयुस्वशरोत्तमैः मार्जुनसहमाराजनपुत्रोदुर्योधनस्तव आलुत्स्युतजोयानंविक्रमेनस्वधन्विनः हाहाभू
तेजगत्सर्वाहृष्ट्वाराजानमाहवे यस्यमानंमासकिंनारेवसोमभिवराहुणा ततःशरभमथश्रुत्वाकृतवर्मामहारथः
अभ्ययात्सहसातत्रपत्रारुतोमाधवः प्रभुः विधुन्वानोधनुःश्रेष्ठंचोदयंश्चैववाजिनः भर्त्सयन्सारथिंचास्येयाहियाहि
तिस्वरं समागतंतंसंप्रेक्ष्यव्यादितास्यमिवांतकं युयुधानोमहाराजत्यंतारमिरसमब्रवीत् कृतवर्मारथेनैषद्रुतमाप

५६

द्रो०
१२६

सा १

ते ते शरीरस्य याहि रथेनेनं श्वरं स्वसे धान्विनां ततः प्रज्वलितास्त्वे न विविध वत्कालिते नव श्री मत्स्य रणे भोजं प्रतिमानं धनुष्म
तां ततः परमसंक्रुद्धो ह्मलिताविव पार्श्वको समेयातां नरश्रेष्ठौ व्याघ्राविव तरस्विनौ कृतवर्म्मा तु शैनेयं षड्विंशत्या सास
र्प्पयत् निशितैः सायकैः स्त्री हार्यं तांश्वास पंचभिः चतुरश्च तुरगवाहांश्च तुभिः परमेषुभिः अविध्यत्सांधुरतं वै
सैंधवान्सात्वतस्य हि रुक्मध्वजो रुक्मपृष्ठमस्थिमकार्यं कार्मुकं रुक्मांगदी रुक्मवर्म्मा रुक्मपुंखान वारयत् ततोऽशी
तिं शिनेः पौत्रः सायकान्कृतवर्म्मणे प्राहिणोत्त्वरया युक्तो द्रष्टुकामो धनंजयं सोऽतिविद्धो बलवता शत्रुणा शत्रुता
पनः समकंपत दुर्द्धर्षः क्षितिकंपे यथाचलः त्रिषष्ट्या चतुरोऽस्याश्वान्सप्तभिः सारथिं तथा विव्याध निशितैस्तूर्णं
सात्यकिः सत्यविक्रमः सुवर्णपुंखं विशिखं समाधाय च सात्यकिः विसृज्य तं महाज्वालं संक्रुद्धमिव पन्नगं सोऽविध्य
त्कृतवर्म्माणं यमदंडोपमैः शरैः जांबूनदविचित्रं च वर्म निर्भिद्य भानुमत् अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः
संजातरुधिरश्चाजौ सात्वतेषुभिरर्द्दितः सशरं धनुरुत्सृज्य न्यपतत्स्यंदनोत्तमात् स सिंहदंष्ट्रो जानुभ्यामापतितोऽमित

राम०
१२६

विद्रुमः शरार्द्दितः सात्यकिनाश्वेपृष्ठेनर्षभः सहस्रवाल्हदशम मोर्म्मिमिवसागरं निवार्य्यकृतवर्म्माणं सात्यकिः
अपययौततः त्वरन्‌शक्तिभृत्‌ःकौरवाणांसम्पश्यतांसकुलो प्रवर्तितोग्ररुधिरांशातवराः क्षत्रियर्षभैः प्रेक्षतांसर्वसैन्यानांमध्ये
नशिनिपुंगवः अभ्यगाद्दृष्टिनींहित्वा वृत्रेहवासवः शंवरम् समाश्वासव्वहार्द्दिक्योमात्यावामनमहङ्कुः तस्मैासत्त्वमवलवानस्या
स्यनयुधिपांडवान द्रोणपर्वणिजयद्रथवधेसात्यकिप्रवेशे संजयउवाच कथ्यमानेषुसैन्येषुशैनेयेनततस्ततः भारद्वा
जः शरव्रातैर्म्महद्भिः समवाकिरत सम्प्रहारस्तुमुलोद्रोणसात्वतयोरभूत पश्यतांसर्वसैन्यानांबलिवासवयोरिव
ततोद्रोणः शिनेःपौत्रंचित्रैःसर्वायसैःशरैः त्रिभिराशीविषाकारैर्ललाटेसमविध्यत तैर्ललाटार्पितैर्बाणैर्युयुधा
नस्त्वजिह्मगैः व्यरोचतमहाराजत्रिशृंगइवपर्वतः ततोस्यवाणानपरानिंद्राशनिसमस्वनान भारद्वाजोंतरप्रेक्षी
प्रेषयामाससंयुगे तानद्रोणचापनिर्मुक्तानदाशार्हःपततःशरान द्वाभ्यांद्वाभ्यांसुपुंखाभ्यांचिच्छेदपरमास्त्र
वित तामस्यलघुतांद्रोणः समवेक्ष्यविशांपतेप्रहस्यसहसाविध्यद्विंशताशिनिपुंगवं पुनःपंचाशतेषूणां

५०

द्रो॰ १८७

शते॰ नैव समर्पयत लाघवं तां युयुधानस्य लाघवेन विशेषयन् समुत्सतीति वल्मीकान यथा क्रुद्धा महोरगाः तथा द्रोणरथा
राजन्नुत्पतन्ति तनुच्छिदः तथैव युयुधानेन प्रेषिताः शतसहस्रशः अवाकिरन् द्रोणरथं शरा रुधिरभोजनाः लाघवात् द्वि
जमुख्यस्य सात्वतस्य च मारिष विशेषं नाध्यगच्छाम समावास्तां नरर्षभौ सात्यकिस्तु ततो द्रोणं नवभिर्नतपर्वभिः आजघा
न भृशं क्रुद्धो ध्वजं च निशितैः शरैः सारथिं च शतेनैव भारद्वाजस्य पश्यतः लाघवं युयुधानस्य दृष्ट्वा द्रोणो महारथः सप्त
त्या सारथिं विद्ध्वा तुरगांश्च त्रिभिस्त्रिभिः ध्वजमेकेन विव्याध माधवस्य रथे स्थितं अथापरेण भल्लेन हेमपुंखेन पत्रि
णा धनुश्चिच्छेद समरे माधवस्य महात्मनः सात्यकिस्तु ततः क्रुद्धो धनुस्त्यक्त्वा महारथः गदां जग्राह भारद्वाजाय मह४
चाक्षिपत् तामापतन्तीं सहसा पट्टबद्धामयस्मयीं न्यवारयत् ततो द्रोणः शरैर्बहुविधैर्बहुरूपिभिः अथान्यद्धनुरादाय सात्यकिः
सत्यविक्रमः विव्याध बहुभिर्वीरं भारद्वाजं शिलाशितैः सविद्ध्वा समरे द्रोणं सिंहनादममुञ्चत तं वै न ममृषे द्रोणः स
र्वशस्त्रभृतां वरः ततः शक्तिं गृहीत्वा तु रुक्मदण्डामयस्मयीं तरसा प्रेषयामास माधवस्य रथं प्रति अनासाद्य तु शैने राम

मि३ १९०

पंचाशद्भिः कालसंनिभा भित्वा रथं जगामोग्रा धरणीं शरुगा सना ततो द्रोणः शितैः पीतो राजन्न विस्माथ पत्रिणा
दक्षिणं भुजमासाद्य पीडयन् भरतर्षभ द्रोणोपि समरे राजन्न माधवस्य महद्धनुः अर्द्धचंद्रेण चिच्छेद यशस्यावमार्गयि
मुमोक्षाग्रं विष्णोर्गस्य शक्तिमाम माहतः सात्यकिः सछमामाद्य मकूंदं मेनिवोस्तर चकार समरे कौराजन्मूतक स्मेति
मानुषं अपोषधपच्च द्रोणस्य सीनस्यायास्त्रवसयं ततः शरशतेनैव युयुधानो महारथः अविध्यद् द्रोणमासाद्य सर्वलोकस्य
रूपोविशं पते तस्य द्रोणः शरान् पंच प्रेषयामास भारत ते घोराः कवचं भित्वा पपुः शोणितमाहवे निर्विद्धस्तु शैनेयो
घोरैः क्रुद्धो मास किमर्थं शंसाय कानथ स्वजापि वीरः रुक्मरथं प्रति ततो द्रोणस्य यंतारं निपात्यैकेन मार्गणैः अ
श्वान व्यद्रावयद्बाणैः हतसूतस्य मारिष ततः स रथः प्रद्रुतः संख्ये मंडलानि सहस्रशः चकार राजतो राजन् भ्राम्यमानो हयैः जै२
मान अभिद्रवत गृह्णीत तस्यानु द्रोणस्य धावत इति स्म चुक्रुशुः सर्वे राजपुत्राः सराजकाः ते मा सात्यकिमयास्य स्यात्
जन [illegible] युधि महारथाः यतो द्रोणस्ततः सर्वे सहसा समुपाद्रवन् तान् दृष्ट्वा प्रद्रुतान् संख्ये सात्वतेन शरा

स्तत३

द्रो० १२८ १२७

हिताेन त्वमप्ययं पुनरेवासीत्तवेमन्यं समाकुलं व्यूहस्यैव पुनर्द्वारं गत्वा द्रोणाय्यवस्थितः वातायमारोसैतरस्यैौ
त्यावृष्णिशरार्दितैः पांडुपांचालसंभिन्नं व्यूहमालोक्य वीर्यवान् शैनेयनाकरोद्यत्नं व्यूहस्याचारणे मन निवार्य पांडुपांचा
लान्द्रोणाग्निः शरहृज्जिव तस्थौ द्रोणाग्निसंदीप्तः कालसूर्यस्यायुतः॥ ॥ इतिद्रोणा [redacted] र्धे गाजयद्रथवधे सात्यकिप्रवेशे सं
जयउवाच द्रोणं सजित्वा पुरुषप्रवीरस्तथैव हार्दिक्यमुखांस्त्वदीयान् प्रहस्य सूतं वचनं बभाषे शिनिप्रवीरः कुरु ५५
पुंगवाग्र्यः निमित्तमात्रं वयमत्र सूत धार्यः केशवफाल्गुनाभ्यां हतान्विहन्मेह नरर्षभेण तथायं संजेशात्मसमुद्र
वेन तमेवमुक्त्वा शिनिपुंगवस्तदा महामृधे सोग्र्यधनुर्द्धरोरिहा किरन्समंतात्सहसाशरान्बलीसमापतच्छ्येन इवा तस्ये ३
मिषं यथा तं यांतमश्वैः शशिशंखवर्णैर्विगाह्य सैन्यं पुरुषप्रवीरं नाशक्नुवन्वारयितुं समंतादादित्यरश्मिप्रतिमं नरा
ग्र्यं अस्त्यविक्रांतमदीनसत्त्वं सेव गणा भारतये त्वदीयाः सहस्रनेत्रप्रतिमप्रभावं दिवीवसूर्यं जलदव्यपाये त्वम

द्रो० १२८ १२७

षेपूर्णास्तिति चित्रयोधी शरप्रमानीकांचनवर्म्मधारी । सुदर्शनः सात्यकिमापतंतं स्ववाणपङ्क्त्यावरं प्रसह्य त
पोरभूद्वारतसंप्रहारः सुदारुणास्तेसमतिप्रशंसन योधास्तशीयास्त्वहिसोमकाश्चवृन्दे यो युद्धमिवाभिरोषाः
शरैः सुतीक्ष्णैः शतशोऽभ्यविध्यत्सुदर्शनः सात्वतमुख्यमोजा अनागतानेवतुतान् शरस्तान्विच्छेदराजन
शिनिपुंगवोऽपि तथैव शक्रप्रतिमोऽपि सात्यकिः सुदर्शनेनायान् क्षिपतिस्मसायकान् द्विधा त्रिधा तानकरो
सुदर्शनः शरोत्तमैः स्वं दत्तवर्णमाश्रितः तावोऽस्य वाणान्निहतांस्तदानीं सुदर्शनः सात्यकिवाणवेगैः क्रो
धात्द्विधा स्वविपतितामतेजाः शरानमुंचत्कनकोपचित्रान् पुनः सवाणो त्रिभिरग्निकल्पैराकर्णपूर्णैर्नि
शितैः सपुंखैः विव्याध देहावरणं विभिद्य ते सात्यकेरा विविशुः शरीरं तथैव तस्यावनिपालपुत्रः संधाय वा
णान्पंचवलैश्चतुर्भिः स्वाजघ्निवांस्तांश्च रजतप्रकाशान चतुर्भिरश्वान्स्वतुरंगमस्य तथा तु तेनाभिहतस्तरस्वी नप्ता
शिनेरिंद्रसमानवीर्यः सुदर्शनस्येषुगणैः सुतीक्ष्णैर्हयान्निहत्याशु ननाद नादं अथास्य सूतस्य शिरो

द्रो०
१२०

निहत्य समेल्लेन शक्राशनिसंनिभेन सुदर्शनस्यापि शिनिप्रवीरः क्षुरेण कालानलसंनिभेन सकुंडलं पूर्णशशिप्रकाशं भ्राजिष्णुवक्त्रं वि
चकर्त देहात् यथा पुरा वज्रधरः प्रसह्य बलस्य संख्ये त्रिदशस्य राजन् निहत्य तं पार्थिवपुत्रपौत्रं रणे यदूनामृषभस्तरस्वी मुदा समेतः परया
महात्मा रराज राजन्सुरराजकल्पः ततो ययावर्जुनमेव येन निवार्य सैन्यं तव मार्गणौघैः सदश्वयुक्तेन रथेन राजन् लोकान्विसिस्मापयि
षुर्नृवीरः तत्तस्य विस्मापयनीयमग्र्यमपूजयन्योधवराः समेताः प्रवर्तमानान्निषुगोचरे यो ददाह बाणैर्हुतभुग्यथैव ॥ ॥ इति द्रोण
पर्वणि जयद्रथवधे सात्यकिप्रवेशे सुदर्शनवधः संजय उवाच ततः स सात्यकिर्धीमान्महात्मा वृष्णिपुंगवः सुदर्शनं निहत्याजौ यंता
रं पुनरब्रवीत् रथाश्वनागकलिलं शरशक्त्यूर्मिमालिनं खड्गमत्स्यं गदाग्राहं शूरायुधमहास्वनं प्राणापहारिणं रौद्रं वादित्रोत्क्रु २६
म१ ष्टनादितं योधानामसुखस्पर्शं दुर्धर्षं जयैषिणां तीर्णाः सुदर्शनं तात द्रोणानीकमहार्णवं जलसंधवधेनाजौ पुरुषादैरिवावृतं
अन्ये तां मन्ये तरतनाशेषमन्यैकुनदिकामिव तर्तव्यामल्पसलिलां चोदयाश्वानसंभ्रमं हस्तप्राप्तमहं मन्ये सांप्रतं सव्यसाचिनं निर्जित्य दुर्हृदं
द्रोणं सपदानुगमाहवे हार्दिक्यं योधवर्यं च प्राप्तं मन्ये धनंजयं न हि मे जायते त्रासो दृष्ट्वा सैन्यान्यनेकशः वह्नेरिव प्रदीप्तस्य वने शु
ष्कतृणोल्बणं पश्य पांडवमुख्येन याता भूमिं किरीटिना पत्त्यश्वरथनागौघैः पतितैर्विषमीकृतां द्रवते तद्यथा सैन्यं तेन भग्नं महात्मना र
थैर्विपरिधावद्भिर्गजैरश्वैश्च मारिष कौशेयारुणसंकाशमेतदुद्धूयते रजः अभ्याशस्थमहं मन्ये श्वेताश्वं कृष्णसारथिं स एष श्रूयते श राम०
१३०

द्रोणं तु व्यस्यामितो तस्य: यादृशानि निमित्तानि मम प्रादुर्भवंति वै अन्तर्गतस्यादित्ये स्त्वां सेयधवमर्जुन: शैनेय विश्रब्धं मयचन्द्रमाणय त्रीसिवाहिनी यत्रैव
स्तलत्राणा: सुयोधनपुरोगमा: दंशिता: क्रूरकर्माण: कांबोजा युद्धदुर्मदा: शरचापासनधरा यवनाश्च प्रहारिण: शका: किराता यवना बर्बरा
स्ताम्रलिप्तका: अन्ये च बहवो म्लेच्छा विविधायुधपाणय: यत्रैते सतलत्राणा: सुयोधनपुरोगमा: मामेवाभिमुखा: सर्वे तिष्ठंति समरार्थिन: एतान्स
थनागाश्वान्निहत्याजौ सपत्तिन: इदं दुर्गं महाघोरं तीर्णमेवोपधारय सूत उवाच न संभ्रमो मे वार्ष्णेय विद्यते सत्यविक्रम यद्यपि स्यात्स्वयं क्रुद्धो जामदग्न्यो
ग्रत: स्थित: द्रोणो वा रथिनां श्रेष्ठ: कृपो मद्रेश्वरोऽपि वा तथापि संभ्रमो न स्यात्त्वामाश्रित्य महाभुज त्वया सुबहवो युद्धे निर्जिता: शत्रुसूदन दंशि
ता: क्रूरकर्माण: कांबोजा युद्धदुर्मदा: शरचापासनधना यवनाश्च प्रहारिण: शका: किराता दरदा बर्बरास्ताम्रलिप्तका: अन्ये च बहवो
म्लेच्छा विविधायुधपाणय: नच मे संभ्रम: कश्चिद्भूतपूर्व: कदाचन किमुतैतत्समासाद्य वीर संयुगगो: पदं आयुष्मन्कतरेणत्वां प्रापयामि धनंज
यं केषां क्रुद्धोसि वार्ष्णेय केषां मृत्युरुपस्थित: केषां संयमनीमद्य गंतुमुत्सहते मन: के त्वां युधि पराक्रांतं कालांतकयमोपमं दृष्ट्वा विक्रमसंपन्नं
विद्रविष्यंति संयुगे केषां वैवस्वतो राजा स्मरतेऽद्य महाभुज सात्यकिरुवाच मुंडानेतान्हनिष्यामि दानवानिव वासव: प्रतिज्ञां पालयिष्यामि कांबोजा
नेव मां वह अद्यैषां कदनं कृत्वा प्रियं यास्यामि पांडवं अद्य द्रक्ष्यंति मे वीर्यं कौरवा: ससुयोधना: मुंडानीके हते सूत सर्वसैन्येषु चासकृत अद्य कौ
रवेयं सैन्यं दीर्यमाणं समं युगे अद्य मद्बाणनिहतान्नृपो धमुख्यान्सहस्रश: दृष्ट्वा दुर्योधनो राजा पश्चात्तापं गमिष्यति अद्य मे क्षिप्रहस्तस्य

द्रो०
१३१

क्षिप्तः सायकोत्तमान् अलातचक्रप्रतिमं धनुर्दृष्ट्वा तु कौरवाः मत्वा यमकृतां गात्रान् रुधिरस्रवतां मुहुः सैनिकानां वधं दृष्ट्वा संतस्य
ति सुयोधनः अथ मे कुरुरूपस्य निघ्नतस्त्वद्वरान्वरान् हिरण्यनमिमं लोके संस्मृते घसुयोधनः आघराजस्य हस्त्याणि निरतानि मपार्श्वो दृष्ट्वा
दुर्योधनो राजा संतत्र यत्तिमहामधे अथ मत्तेहं च भक्तिं च पाण्डवेषु महात्मसु बलं वीर्यं कृतज्ञत्वं ममरक्षा स्पृतिकौरवाः संजय उवाच एवमुक्ते
स्तदा सूतः शिक्षितान्साधुवाहिनः शशांकसंनिकाशांश्च वाजिनो व्यनुदद्द्रुतं ते पिबंत इवाकाशं युयुधानं हयोत्तमाः प्रापयन्यवना
न्शीघ्रं भुजगैः पवनं रहसः सात्यकिं ते समासाद्य पृतनासु निवर्तिनं बहवो लघुहस्ताश्च शरवर्षैरवाकिरन् तेषामिषून्यथास्त्राणि वेग
वन्नतपर्वभिः अच्छिनत्सात्यकी राजन्नैनं ते प्राप्नुवंच्छराः रुक्मपुंखैः सुनिशितैर्गार्ध्रपत्रैरजिह्मगैः उच्चकर्त शिरांस्युग्रो यवनानां भु
जामपि शैक्यायसानि वर्माणि कांस्यानि च समंततः भित्त्वा देहांस्तथा तेषां शरा राजन्महीतलं ते हन्यमाना वीरेण म्लेच्छाः सात्यकिना रणे
शतशो व्यपतंस्तत्र व्यसवो वसुधातले सुपूर्णायतमुक्तैस्तानव्यवच्छिन्नपिंडितैः पंच षट्सप्त चाष्टौ च बिभेद यवनान्शरैः कांबोजानां सह
स्रैश्च शकानां च विशांपते शबराणां किरातानां बर्बराणां तथैव च अगम्यरूपां पृथिवीं मांसशोणितकर्दमां कृतवांस्तत्र शैनेयः क्षप
यंस्तावकं बलं दस्यूनां सशिरस्त्राणैः शिरोभिर्लूनमूर्धजैः दीर्घकूर्चैर्मही कीर्णा विबर्हैरंडजैरिव रुधिरोक्षितसर्वांगैस्तैस्तदायोधनं ब
भौ कबंधैः संवृतं सर्वं ताम्राभैः खमिवांबुदैः वज्राशनिसमस्पर्शैः सुपर्वभिरजिह्मगैः ते साश्वयाना निहताः [redacted] ।

१३

राम०
१३१

समावव्रुर्वसुंधरां अस्त्रावशिष्टाः संभग्नाः कृच्छ्रप्राणा विचेतसः जिताः संख्ये महाराज युयुधानेन दंशिताः पाषाणैर्भिद्य कंषाभि
स्थताऽयंततस्तुरंगमान जवमुत्तममास्थाय सर्वतः प्राद्रवन्भयात कांबोजसैन्यं विद्राव्य दुर्जयं युधि भारत यवनानां च तत्सैन्यं शका
नां च महद्बलं ततः स पुरुषव्याघ्रः सात्यकिः सत्यविक्रमः प्रविष्टस्तावकान जित्वा सूतं याहीत्यचोदयत तत्रस्य समरे कर्म्म दृष्ट्वान्यै
रकृतं पुरा चारणाश्च सगंधर्वाः पूजयांचक्रिरे भृशं तं यांतं पृष्ठगोप्तारमर्ज्जुनस्य विशांपते चारणाः प्रेक्ष्य संहृष्टास्त्वदीयाश्चाप्यपूज
यन॥ ॥ द्रोणपर्व्वणि जयद्रथवधे सात्यकिप्रवेशे संजय उवाच जित्वा यवनकांबोजान युयुधानस्ततोर्ज्जुनं जगाम तव सैन्यस्य म
ध्येन रथिनां वरः शरदंष्ट्रो नरव्याघ्रो विचित्रकवचध्वजः मृगान्व्याघ्र इवाजिघ्नन तव सैन्यमभीषयत स रथेन चरन्मार्गान धनुरभ्राम
यद्भृशं रुक्मपृष्ठं महावेगं रुक्मचंद्रकसंकुलं रुक्मांगदशिरस्त्राणो रुक्मवर्म्मसमावृतः रुक्मध्वजधनुः शूरो मेरुशृंगमिवावभौ
सधनुर्म्मंडलः संख्ये तेजोभास्कररश्मिवान शरदीवोदितः सूर्यो नृसूर्यो विराजत वृषभस्कंधविक्रांतो वृषभाक्षो नरर्षभः ता
वकानां बभौ मध्ये गवां मध्ये यथा वृषः मत्तद्विरदसंकाशं मत्तद्विरदगामिनं प्रभिन्नमिव मातंगं यूथमध्ये व्यवस्थितं व्याघ्रा इव
जिघांसंतस्त्वदीयाः समुपाद्रवन द्रोणानीकमतिक्रांतं भोजानीकं च दुस्तरं जलसंधार्णवं तीर्त्वा कांबोजानां च वाहिनीं हार्दिक्य

द्रो०
१३२

मकरान्मुक्तं तीर्णोऽस्मि सैन्यसागरं परिक्षयं स्ससंक्रुद्धात्वद्दीयाः सात्यकिं यया: दुर्योधनश्चित्रसेनो दुःशासन विविंशती शकुनिर्दुःसहश्चैव
युवा दुर्मर्षणः क्रथ श्चान्ये च बहवः शूराः शस्त्रवंतो दुरासदाः पृष्ठतः सात्यकिं यांतमन्वधावन्नमर्षिणः अथ शब्दो महानासीत्तवसै
न्यस्य मारिष मारुतोद्धूतवेगस्य सागरस्येव पर्वणि तानभिद्रवतः सर्वान् समीक्ष्य शिनिपुंगवः शनैर्याहीति यंतारमब्रवीत्स हसन्निव इदमेति
त्समुद्धूतं धार्त्तराष्ट्रस्य यद्बलं मामेवाभिमुखं तूर्णं गजाश्वरथपत्तिमत् नादयन्वै दिशः सर्वा रथेन पृथिवीं चांतरिक्षं च कंपयन्सागा
रानपि एतद्बलार्णवं सूत वारयिष्ये महारणे पौर्णमास्यामिवोद्धूतं वेलेव मकरालयं पश्य मे सूत विक्रांतमिंद्रस्येव महामृधे स
सैन्यानि शत्रूणां विधमामि शितैः शरैः निहतानाहवे पश्य पदात्यश्वरथद्विपान् मच्छरैरग्निसंकाशैर्विदेहान्सहस्रशः इत्येवं
ब्रुवतस्तस्य सात्यकेरमितौजसः समीपे सैनिकास्ते तु शीघ्रमीयुर्युयुत्सवः हन्याद्रवस्वेति तिष्ठेति पश्य पश्येति वादिनः २ तानेवं ब्रुवतो
वीरान्सात्यकिर्निशितैः शरैः जघान त्रिशतानश्वान् कुंजरांश्च चतुः शतान् ससंप्रहारस्तुमुलस्तस्य तेषां च धन्विनां देवासुररण
प्रख्यः प्रावर्त्तत जनक्षयः मेघजालनिभं सैन्यं तव पुत्रस्य मारिष प्रत्यगृह्णाच्छिनेः पौत्रः शरैराशीविषोपमैः प्रच्छाद्यमानः समरे शर राम०
१३२

[redacted] जोलेः सवीर्यवान् असंभ्रमं महाबाहो तावकानवधीद्बहून् आश्चर्यं तत्र राजेंद्र सुमह
दृष्टवानहं अमोघः सायकः कश्चित्सात्यकेरभवत्प्रभो रथनागाश्वकलिलः पदात्यूर्म्मिसमाकुलः शैनेयवेलामासाद्य स्थितः सैन्यमहा
र्णवः संभ्रांतं नरनागाश्वमावर्तत मुहुर्मुहुः तत्सैन्यमिषुभिस्तेन वध्यमानं समंततः बभ्रामतत्र तत्रैव गावः शीतार्दिता इव पदातिनं रथ
नागं सादिनं तुरगं तथा अविद्धं तत्र नाद्राक्षं युयुधानस्य सायकैः नतादृक्कदनं राजन्कृतवांस्तत्र फाल्गुनः यादृक्क्षयमनीकानामकरो
त्सात्यकिर्नृप अत्यर्जुनं शिनेः पौत्रो युध्यते पुरुषर्षभ वीतभीर्लाघवोपेतः कृतित्वं संप्रदर्शयन् ततो दुर्योधनो राजा सात्वतस्य त्रिभि
ः शरैः विव्याध सूतं निशितैश्चतुर्भिश्चतुरो हयान् सात्यकिं च त्रिभिर्विद्ध्वा पुनरष्टाभिरेव च दुःशासनः षोडशभिर्विव्याध शिनिपुंगवं
शकुनिः पंचविंशत्या चित्रसेनश्च पंचभिः दुःसहः पंचदशभिर्विव्याधोरसि सात्यकिं उत्स्मयन्वृष्णिशार्दूलस्तथा बाणैः समाहतः ता
न्विध्यन्महाराज सर्वानेव त्रिभिस्त्रिभिः गाढविद्धानरीन्कृत्वा मार्गणैः सोतितेजनैः शैनेयः श्येनवत्संख्ये व्यचरल्लघुविक्रमः सौबल
स्य धनुश्छित्वा हस्तावापं निकृत्य च दुर्योधनं त्रिभिर्बाणैरभ्यविध्यत्स्तनांतरे चित्रसेनं शतेनैव दशभिर्दुःसहं तथा दुःशासनं तु विंशत्या वि
व्याध शिनिपुंगवः अथान्यद्धनुरादाय श्यालस्तव विशांपते अष्टाभिः सात्यकिं विद्ध्वा पुनर्विव्याध पंचभिः दुःशासनश्च दशभिर्दुःसह

श्रा

वि २

द्रो०
१३६

स्त्रिभिः शरैः [redacted] दुर्मुखश्च द्वादशभिः राजन्विव्याधमारिषकिं दुर्योधन
स्त्रिभ्यसोयंभारतमाधवे ततोसनिशितैर्बाणैस्त्रिभिर्विव्याधमारिषां तान्सर्वान्सहितांश्च राज्यस्मानान्महारथान् पंचभिः पंचभि
र्बाणैः [illegible] पुनर्विव्याधसात्यकिः ततः स्वरथिनांश्रेष्ठस्तवपुत्रस्यमारिष आजघानाशुमश्लेषस्य हसोय पतद्भुवि पतितेसारथौ
तस्मिंस्तवपुत्रस्य रथः प्रभो वातायमानैस्तैरश्वैरपनीयतसंगरात् ततस्तवसुताराजन्नन्ये निकाश्च विशांपते राज्ञोरथमभिप्रेक्ष्यविद्रुताः
शतशोभवन् विद्रुतं तत्रतत्सैन्यंदृष्ट्वाभारतमासन्निः अवाकिरच्छरैस्तीक्ष्णैः रुक्मपुंखैः शिलाशितैः। विद्राव्यसर्वसैन्यानितावकानि
सहस्रशः प्रययौसात्यकी राजन्श्वेताश्वस्यरथंप्रति तंशरानादहानं वरक्षमाणंचमारिष आत्मानंपालयानं वतावकाः समपू
जयन्॥ ॥ इतिश्रीद्रोणपर्वणिसात्यकिप्रवेशे धृतराष्ट्रउवाच संप्रमथ्यमहत्सैन्यंयांतंशैनेयमर्जुनं निर्ह्रीकाममते
पुत्राः किमकुर्वतसंजय कथंचैषांतथायुद्धेधृतिरासीन्मुमूर्षतां शैनेयचरितंदृष्ट्वायादृशंसव्यसाचिनः किंनुवक्ष्यंतितेक्षा
त्रंसैन्यमध्येपराजिताः कथंनुसात्यकिर्युद्धेव्यतिक्रांतोमहायशाः कथंचममपुत्राणांजीवतां तत्रसंजय योभिययौयुद्धेतन्ममाच
क्ष्वसंजय अत्यद्भुतमिदंतात त्वत्सकाशाच्छृणोम्यहं एकस्यबहुभिः सार्धंशत्रुभिस्तैर्महारथैः विपरीतमहंमन्येमंदभाग्यंसुतं ए०

१३३

तत्र २

शक्यकान्योऽजवा दीनाः पवनाः पारदास्तथा: कुलिन्दास्तंगणा ५४

प्रति पत्याववृधेतं समरे सात्वतेन महात्मना एकस्तु हि निपर्यो संप्रयत्नेनमंतस्तमंजय क्रुद्धस्य युयुधानस्य समीवेति शेति पांडवाः निर्जित्य समरे द्रोणं
कृतिनं चित्रयोधिनं यथा पशुगणान्सिंहस्तद्वद्धंता सुतान्मम कृतवर्मादिभिः शूरैर्यत्तैर्बहुभिराहवे युयुधानो नशक्योतो हंतुं यः पुरुषर्षभ नैतदी
दृशकं युद्धं कृतवांस्तत्र फाल्गुनः यादृशं कृतवान्युद्धं शिनेर्नप्ता महायशाः संजय उ० तवपुत्रस्य दुर्मंत्रितै राजन्दुर्योधनपुरोगमाः शृणुष्व राजन्नं यामं नर
वास्त्रिभिर्नस्ययं दुर्योधनाय प्रतीतेन तव दुर्मंत्रितेन च ते पुनः संन्यवर्तंत संशप्तकाः स्थिरा परां युद्धे मतिं कृत्वा पुत्रस्य तव शासनात् ॥ त्रीणि
सादिसहस्राणि दुर्योधनपुरोगमाः शकाः काम्बोजाः बाह्लीकाः यवनाः पारदास्तथा कुलिन्दास्तंगणा अम्बष्ठाः पैशाचाश्च सबर्बराः पर्वतीयाश्च राजेन्द्र क्रुद्धाः पाषाणपाणयः अभ्यद्रवंत शैनेयं शलभाः पावकं यथा युक्ताश्च पार्वतीयानां रथाः पाषाणयोधिनां शूराः पंचशता राजन् शैनेयं समुपाद्रवन् ततो रथसहस्रेण महारथशतेन च द्विरदानां
सहस्रेण द्विसाहस्रैश्च वाजिभिः शरवर्षाणि मुंचंतो विविधानि महारथाः अभ्यद्रवंत शैनेयमसंख्येयाश्च पत्तयः तांश्च संचोदयन्सर्वान्घ्नतैनमिति
भारत दुःशासनो महाराज सात्यकिं पर्यवारयत् तत्राद्भुतमपश्याम शैनेयचरितं महत् यदेको बहुभिः सार्धमसंभ्रान्तमयुध्यत अवधीच्च रथानीकं द्विरदानां च तद्बलं सादिनश्चैव तान्सर्वान्दस्यूनपि च सर्वशः तत्र चक्रैर्विमथितैर्भग्नैश्च परमायुधैः अक्षैश्च बहुधा
भग्नैरीषादंडकबंधुरैः कुंजरैर्मथितैश्चापि ध्वजैश्च विनिपातितैः वर्मभिश्च तथानीकैर्व्यवकीर्णा वसुंधरा स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्च मारिष सं
छन्ना वसुधा तत्र ग्रहैर्द्यौरिव भारत गिरिरूपधराश्चापि पतिताः कुंजरोत्तमाः अंजनस्य कुले जाता वामनस्य च भारत सुप्रतीककुले जाता महा
कलेश्वैवत पाम्बेषु उपमकुले तथा ऐरावणकुले चैव जाता दंतिव राराजन शैनेयस्वोरताः वनायुजान्पार्वतीयान्काम्बोजानरट्टबाल्हीकानपि तथा हयवरांस्तत्र ५३
न निजघ्ने तत्र सात्यकिः नानादेशसमुत्थांश्च नानाजातांश्च पत्तयः निजघ्ने तत्र शैनेयः शतशोऽथ सहस्रशः तेषु प्रकाल्यमानेषु दस्यून्
दुःशासनोऽब्रवीत् निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः तांश्चातिभग्नान्संप्रेक्ष्य पुत्रो दुःशासनस्तव पाषाणयोधिनः शूरान्पार्वतीया

दुःशासनो महाराज सात्यकिं पर्यवारयत् तत्राद्भुतमपश्याम शैनेयचरितं महत् यदेको बहुभिः सार्धमसंभ्रान्तमयुध्यत ५४

यानचोदयत अश्मयुद्धेषु कुशला नैतज्जानाति मां सात्यकिः अश्मयुद्धमजानन्तं तं घ्नन्तं युद्धकामुकं तथैव कुरवः सर्वे चाश्मयुद्धविशारदाः अभिद्रवन्त
मां भैष्टनवः मा स्यति मा सात्यकिः ते पार्वतीया राजानः सर्वे पाषाणयोधिनः अभ्यद्रवन्त शैनेयं राजानमिव मंत्रिणः ततो गजशिरः प्रख्यैरुपलैः शै
लवासिनः उद्यतैर्युयुधानस्य पुनस्ते तस्थुराहवे क्षेपणीयैस्तथाप्यन्ये सात्वतस्य वधैषिणः चोदितास्तव पुत्रेण रुरुधुः सर्वतो दिशः तेषामापततां
मेव शिलायुद्धं चिकीर्षतां सात्यकिः प्रतिसंधाय त्रिंशतं प्राहिणोच्छरान् तामश्मवृष्टिं तुमुलां पार्वतीयैः समीरितां चिच्छेदोरगसंकाशैर्ना
राचैः शिनिपुंगवः तेनाश्मचूर्णैर्दीप्यद्भिः खद्योतानामिव व्रजैः प्रायः सैन्यान्यहन्यन्त हाहाभूतानि मारिष ततः पंचशताः शूराः समुद्यतमहाशि
लाः निकृत्तबाहवो राजन्निपेतुर्धरणीतले पुनर्दशशताश्चान्ये शतसाहस्रिणस्तथा सोपलैर्बाहुभिश्छिन्नैः पेतुरप्राप्य सात्यकिं पा
षाणयोधिनः शूरान्यतमानानवस्थितान् अवधीद्बहुसाहस्रांस्तदद्भुतमिवाभवत् ततः पुनस्तकसंभूयते अश्मवृष्टीः समंततः अयोह
स्ताः शूलहस्ता दरदास्तंगणाः खशाः लंपाकाश्च कुलिंदाश्च चिक्षिपुस्तांश्च सात्यकिः नाराचैः प्रतिविच्छेद प्रतिपत्तिविशारदः अद्रीणां
भिद्यमानानामन्तरिक्षे शितैः शरैः शब्देन प्राद्रवन्संख्ये रथाश्वगजपत्तयः अश्मचूर्णैरवाकीर्णा मनुष्या गजवाजिनः नाशक्नुवन्नवस्था
तुं भ्रमरैरिव दंशिताः हतशिष्टाः सरुधिरा भिन्नमस्तकपिण्डिकाः कुंजरा वर्जयामासुर्युयुधानरथं तदा ततः शब्दः समभवत्तव सैन्य
स्य मारिष माधवेनार्द्यमानस्य सागरस्येव पर्वणि तं शब्दं तुमुलं श्रुत्वा द्रोणो यन्तारमब्रवीत् एष सूत रणे क्रुद्धः सात्वतानां महारथः दा
रयन्बहुधा सैन्यं रणे चरति कालवत् यत्रैष शब्दस्तुमुलस्तत्र सूत रथं नय पाषाणयोधिभिर्नूनं युयुधानः तथा हि रथिनः सर्वे ह्रियन्ते जवनै
समागतः

द्रौणेर्हये ऽविशस्त्रकवचास्तथा स्तत्रतत्र पतंति वै नराश्चाश्च नियंतारः संयुगे तुमुले ह्यमान् इमे ते ह्यत्र नश्यन्ति तावकाः सम्यङ् मारिषः प्रसह्य च
ततो द्रोणामर्षशल्यप्रतोदैः सेनां सर्वत्र चापुष्यनेकाः स्वयमंततः पश्य योधा नराणां भग्नाः न धावंति वै ततस्ततः इमे च संक्रुद्धाः शूराः पां
चालाः पार्थैः सह त्वामेव हि प्रतिधावंत आद्रवंति समंततः अत्र कार्यं समाधत्स्व प्राप्तकालमरिंदम स्थाने चाग मनेवापि ह्रदयं यातयन्मा स
७४ किं तेऽथवैतेन तस्य मारस्य गात्र समारिष प्रसह्यस्य तेनाने योनि मानवं ह्रदि विधानरथान् ते वध्यमानाः समरे युयुधानेन तावकाः युयुधानरथं
त्यक्त्वा द्रोणानीकाय दुद्रुवुः येस्तु दुःशासनः सार्धं रथैः पूर्वं समवस्थिते तेऽभीतास्सम्प्रधावंत समेव द्रोणरथं प्रति ॥ ॥ इति द्रोणपर्वणि सात्यकियुद्धे
वेधानस किमवेतो सत्यसंगस्त्व दुःशासन रथं दृष्ट्वा समीपं पर्यवस्थितं भारद्वाजस्ततो वाक्यं दुःशासनमथाब्रवीत दुःशासन रथाः सर्वे
कस्माच्चैते विद्रुताः कच्चित् क्षेमं तु नृपतेः कच्चिज्जीवति सैंधवः राजपुत्रो भवान् राजभ्राता सिमंभरो न जानी थ युवराजत्वं गतो हत्वा स्थानं दुर
रं त्वामहारथः किमर्थं दुर्वेसयुद्धे योविराजसमवाप्य हि स्वयं वैरं महत्कृत्वा पांचालैः पांडवैः सह एकं सात्यकिमासाद्य कथं भीतः शरासु
तेऽभवि प्यांति दारुणाशी विषोपमाः अप्रियाणां ह्रिष्वमासं पांडवस्य विशांपते द्रौपद्याश्च परिक्लेशस्तन्मूलमभवत्पुरा कौतेमानश्च द
र्पश्च क्वते वीर्यं क्व दर्पितं आशी विषसमान् पार्थान् कोपयित्वाक्व यास्यसि शोच्येयं भारती सेना राजं श्वैव सुयोधनः यस्य त्वं कर्कशो भ्रा
ता पलायनपरायणाः ननु नाम त्वयावीर दीर्यमाणा भयार्दिता स्वबाहुबलमास्थाय रक्षितव्या त्वनीकिनी सत्वमद्य रणाहित्वा भी

द्रो० १३५

तोऽहर्षयं सेपरान विद्रुते त्वयि सैन्यस्मिन्नायके शत्रुसूदन कोऽन्यः स्थास्यति संग्रामे भीतो भीतेष्वपाश्रयात् एकेनाश्वत्थाम्ना नाद्य युध्यमानस्य
ते नैवं पलायनेन तव मतिः संग्रामाद्विप्रवर्तते युद्धाङ्गानि विध्वंसन्भीमसेनं च कौरव यन्मे वायुस्थितस्मि तदहं किं करिष्यामि युधि फाल्गुन
वारणानां सहस्राणि विमर्दन्त्वभ्यसां नतुलाः सासकिशराः युधां भीतः पलायसे यदि तावत्कृता बुद्धिः पलायनपरायणा शृथिवीध
म्भसा न्यायधर्मेणैव प्रदीयतां यावत्फाल्गुननाराचा निर्मुक्तो रणमध्ये विभाः नाविशन्ति शरी रैतेनावत्संग्राम्यपाण्डवैः यावन्न पृथिवीं पार्थाः
ता भ्रातृशतानि नाशिष्यन्ति महात्मानस्तावत्संग्राम्यपाण्डवैः यावन्न कुरुश्रेष्ठ राजा धर्मपुत्रो युधिष्ठिरः कृतास्त्रश्च समरश्लाघी तावत्संग्रा
म्य पाण्डवैः यावद्भीमो महाबाहुर्विगाह्य महतीं चमूं सोदरांस्तेन गृह्णाति तावत्संग्राम्य पाण्डवैः पूर्वमुक्तश्च ते भ्राता भीष्मेणामोघया
ध्वज कृत्तयाः पाण्डवाः सर्वे संग्राम्य शाम्यते तैः सह न वै तत्कृतवान्मन्दस्तव भ्राता सुयोधनः न युद्धं स्थितिमास्थाय यत्नापुत्रस्व पाण्डवैः
गच्छ तूर्णं रथेनैव यत्र तिष्ठति सात्यकिः त्वया हीनं बलं ह्येतद्विद्रविष्यति मारिष आत्मार्थे योधय रणे मा सकिंसमविक्रम एवमुक्तस्तव सु
तो नाभ्यभाषत किंचिद्विशिष्यसौ श्रुतं चाश्रुतवत्कृत्वा प्रायाद्येन स सात्यकिः सैन्येन महता युक्तो म्लेच्छानामनिवर्तिनां आसाद्य च रणे यत्तो यु
युधानमयोधयत द्रोणोऽपि रथिनां श्रेष्ठः पांचालान्संस्थितांस्तथा अभ्यद्रवत संक्रुद्धो जवमास्थाय मध्यमं प्रविश्य च रणे द्रोणः पाण्डवा
नां वरूथिनीं द्रावयामास योधांश्च शतशोऽथ सहस्रशः ततो द्रोणो महाराज नाम विश्राव्य संयुगे पाण्डुपांचालमत्स्यानां प्रचक्रे कदनं राम० १३५

महत् तंजयंतमनीकानिभारद्वाजंततस्ततः पांचालपुत्रोद्युतिमानवीरकेतुः समभ्ययात सद्रोणंपंचभिर्विद्ध्वाशरैः सन्नतपर्वभिः ध्वजमेकेन
विव्याधसारथिंचास्यसप्तभिः तत्राद्भुतंमहाराजदृष्टवानस्मिसंयुगे यद्द्रोणोरभसंयुद्धेपांचाल्येनाभ्यवर्त्तत संनिरुद्धंरणेद्रोणंपांचालावीक्ष्यमभिष
च्याववुः सर्वतोराजन्धर्मपुत्रजयैषिणः तेशरैरग्निसंकाशैस्तोमरैश्चमहाधनैः शस्त्रैश्चविविधैराजन्द्रोणमेकमवाकिरन् निहत्यतांस्तान्वाणा
गणोद्रोणोराजन्समंततः महाजलधरान्व्योम्निमातरिश्वाविवानिव ततः शरंमहाघोरंसूर्यपावकसंनिभं संदधेपरवीरघ्नोवीरकेतोरथंप्रति
सभित्वातुशरोराजन्पांचालकुलनंदनं अभ्यगाद्धरणींतूर्णंलोहिताद्रोज्वलन्निव ततोपतद्रथात्तूर्णंपांचाल्यकुलनंदनः पर्वताग्रादिवमहा
हान्वंपकोवातरुग्णितः तस्मिन्हतेमहेष्वासेराजपुत्रेमहाबले पांचालास्त्वरिताद्रोणंसमंतात्पर्यवारयन् चित्रकेतुः सुधन्वाचचित्रवर्म्मा
चभारत तथाचित्ररथश्चैववर्म्मव्यसनकर्शिताः सहिताः भारद्वाजंयुयुत्सवः मुंचंतः शरवर्षाणितपांतेजलदाइव सवध्यमानोबहुधा
राजपुत्रैर्महारथैः क्रोधमाहारयत्तेषांमभावायद्विजर्षभः ततः शरमयंजालंद्रोणस्तेषांमवासृजत तेहन्यमानाद्रोणस्यशरैराकर्णचोदितैः कर्त्तव्यं
नाभ्यजानन्वैकुमाराराजसत्तम तानविमूढान्रणेद्रोणाः प्रहसन्निवभारत व्यश्वसूतरथांश्चक्रेकुमारान्कुपितोरणे तथाशरैः सुनिशितैः
भल्लैस्तेषांमहायशः पुष्पाणीवविचिन्वन्हिसोत्तमांगान्यपातयत् तेरथेभ्योहताः पेतुः छिन्नाराजन्सुवर्च्चसः देवासुरेपरायुद्धेयथादैत्येयदानवाः
तान्निहत्यरणेराजन्भारद्वाजः प्रतापवान् कार्मुकंभ्रामयामासहेमपृष्ठंदुरासदं पांचाल्यान्निहतान्दृष्ट्वादेवकल्पान्महारथान् धृष्टद्युम्नो

नय^ पं४

पांचालस्तंयरे संछाद्यमानोबहुधापार्षतेनमहात्मना नविव्यथेततोद्रोरगः १

द्रो०
१३६

रोक्रुद्धोनेत्राभ्यांपातयन्जलं अभ्यवर्त्ततसंग्रामेक्रुद्धोद्रोणारथंप्रति ततोहाहेतिसहसानादः समभवन्नृप पांचाल्येनरणोद्दृष्ट्वाद्रोणं
: स्मपून्नेवाद्वयुध्यत ततोद्रोणंमहाराजपांचाल्यः क्रोधमूर्छितः आजघानोरसिक्रुद्धोनवत्यानतपर्वणां सगाढविद्धोवलिनाभारद्वाजोम
हाजसीः निषसादरथोपस्थेकश्मलंचजगामह तंवैतथागतंदृष्ट्वाधृष्टद्युम्नः पराक्रमी चापमुत्सृज्यशीघ्रंवअसिंजग्राहवीर्यवान अव
प्लुत्यरथात्तापित्वरितः समहारथः आरुरोहरथंतूर्णंभारद्वाजस्यमारिष हर्तुमिछन्शिरः कायात्क्रोधसंरक्तलोचनः प्रत्याश्वस्तस्ततोद्रो
णोधनुर्गृह्यमहानवलीः शरैर्वैतस्तिकैराजन्विव्याधासन्नयोधिभिः योधयामाससमरेधृष्टद्युम्नंमहारथं तेहिवैतस्तिकानामशरा आ
सन्नयोधिनः द्रोणस्यविदितारांजन्धृष्टद्युम्नमथोक्षिणोत् सवध्यमानोवहुभिः सायकैस्तैर्महावलः अवप्लुत्यरथात्तूर्णंभग्नवेगः परा
क्रमी आरुह्यस्वरथंवीरः प्रगृह्यचमहद्धनुः विव्याधसमरेद्रोणंधृष्टद्युम्नोमहारथः तदद्भुतंतयोर्युद्धंभूतसंघाह्यपूजयन क्षत्रियाश्च
महाराजयेचान्येतत्रसैनिकाः अवश्यंसमरेद्रोणोधृष्टद्युम्नेनसंगतः वशमेष्यतिनोराजन्पांचाल्यइतिचुक्रुशुः द्रोणस्तत्वरितोयुद्धेधृष्टद्यु
म्नस्यसारथेः शिरः प्रच्यावयामासफलंपक्वंतरोरिव ततस्तेप्राद्रुताबाहाराजंस्तस्यमहात्मनः तेषुप्रद्रवमाणेषुपांचालान्सृंजयांस्तथा अ
योधयद्रणेद्रोणस्तत्रतत्रपराक्रमी विजित्यपांडुपांचालान्भारद्वाजः प्रतापवान स्वंव्यूहंपुनरास्थायस्थितोभवदरिंदम :नचैनंपांडवायुद्धेजेतुमुत्सेहि
रेप्रभो॥ ॥इतिद्रोणपर्वणिराजपदरथवधेसात्यकिप्रवेशेसंजयउवाच ततोदुःशासनोराजन्शैनेयंसमुपाद्रवत किरंछरसहस्राणिपर्जन्यइववृष्टिमान सविव्याधसात्यकिंषष्ट्यातथाषोडश॥ ॥ राम०
१२१

भिः शरैः नाकंपत तस्थितं युद्धे मैनाकमिव पर्वतं स तु दुःशासनं शूरं सायकैराहरणोमहै शरै रथव्रातेन महता नाना देशोद्भ
वेन ह सर्वतो भारतश्रेष्ठो विकिरन्सायकान्बहून् पर्जन्य इव घोषेण नादयन्वै दिशो दश तमापतंतमालोक्य सात्यकिः कौरवं र
णे अभिद्रुत्य महाबाहुश्छादयामास सायकैः ते छाद्यमाना बाणौघैर्दुःशासनपुरोगमाः प्राद्रवन्समरे भीतास्तव पुत्रस्य पश्य
तः तेषु द्रवत्सु राजेंद्र पुत्रो दुःशासनस्तव तस्थौ व्यपेतभी राजन्सात्यकिं चार्दयच्छरैः चतुर्भिर्वाजिनस्तस्य सारथिं च त्रि
भिः शरैः सात्यकिं च शतेनाजौ विध्वा नादं मुमोच सः ततः क्रुद्धो महाराज माधवस्तस्य संयुगे रथं सूतं ध्वजं तं च चक्रे दृश्यम
जिह्मगैः मशकं समनुप्राप्तमूर्णनाभिरिवोर्णया ह्वयाद्दुःशासनं राजा तपासरसनाचितं त्रिगर्त्तांश्चोदयामास युयुधानरथं प्र
ति तेगच्छन्युयुधानस्य समीपं क्रूरकर्मिणः त्रिगर्त्तानां त्रिसाहस्रा रथा युद्धविशारदाः ते तु तं परवंशेन महता पर्यवारय
न् स्थिरां कृत्वा मतिं युद्धे भूत्वा संसप्तका मिथः तेषां प्रयततां युद्धे शरवर्षाणि मुंचतां योधान्पंचशतान्मुख्यान
ग्रानीके व्यपोथयत् हयैश्चक्रे नकापीडैः पतितैस्तत्र मेदिनी शैलेनेव शरासंछन्नैः शोणितौघपरिप्लुतैः अशोभत महा
राज किंशुकैरिव पुष्पितैः ते वध्यमानाः समरे युयुधानेन तावकाः त्रातारं नाध्यगच्छंत पंकमग्ना इव द्विपाः ततस्ते पर्यवर्त्तंत
सर्वे द्रोणरथं प्रति भयात्तनगराजस्य गर्त्तानीव महोरगाः हत्वा पंचशतान्योधान्शरै राशीविषोपमैः प्रायात्स शनकैर्वीरस्त ११२
न्धनंजयरथं प्रति तं प्रयांतं नरश्रेष्ठं पुत्रो दुःशासनस्तव विव्याध नवभिस्तूर्णं शरैः सन्नतपर्वभिः स तु तं प्रतिविव्याध

ते पतंति हयास्तस्य शिलाशितवरसायकैः महाभारतद्रोणभग्नाद्रुमता द्रुमाः नागैश्चावद्धपादप्लैर्ध्वजैश्चैवविशीर्णपते ४४

द्रो॰ १३७

पंचभिस्त्रिशितैः शरैः रुक्मपुंखैर्महेष्वासो गार्द्ध्रपत्रैरजिह्मगैः सात्यकिं तं महाराज प्रहसन्निव भारत दुःशासनं
स्त्रिभिर्विध्वा पुनर्विव्याध पंचभिः शैनेयस्तव पुत्रं तु हत्वा पंचभिराशुगैः धनुश्चास्य रणे छित्वा प्रस्मयन्नर्जुनं ययौ
ततो दुःशासनः क्रुद्धो वृष्णिवीराय गच्छते सर्वपारशवीं शक्तिं विससर्ज जिघांसया तां तु शक्तिं तदा घोरां तव पुत्रस्य सात्य
किः चिच्छेद शतधा राजन् निशितैः कंकपत्रिभिः अथान्यद्धनुरादाय पुत्रस्तव जनेश्वरः सात्यकिं च शरैर्विध्वा सिंहनादं ननर्द
ह सात्यकिस्तु रणे क्रुद्धो मोहयित्वा सुतं तव शरैरग्निशिखाकारैराजघान स्तनांतरे त्रिभिरेव महाभाग शरैः सन्नतपर्वभिः
सर्वायसैस्तीक्ष्णवक्त्रैः पुनर्विव्याध चाष्टभिः दुःशासनस्तु विंशत्या सात्यकिं प्रत्यविध्यत सात्वतोपि महाराज तं विव्याध स्त
नांतरे त्रिभिरेव महाभागः शरैः सन्नतपर्वभिः ततोस्य वाहान्निशितैः शरैर्जघ्ने महारथः सारथिं च सुसंक्रुद्धः शरैः सन्नत
पर्वभिः धनुरेकेन भल्लेन हस्तावापं च पंचभिः ध्वजं च रथशक्तिं च भल्लाभ्यां परमास्त्रवित् चिच्छेद विशिखैस्तीक्ष्णैस्तथोभौ पा
र्ष्णिसारथी स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः त्रिगर्तसेनापतिना स्वरथेनापवाहितः तमभिद्रुत्य शैनेयो मुहूर्त
मिव भारत न जघान महाबाहुर्भीमसेनवचः स्मरन् भीमसेनेन तु वधः सुतानां तव भारत प्रतिज्ञातः सभामध्ये सर्वेषामे
व संयुगे ततो दुःशासनं जित्वा सात्यकिः संयुगे प्रभो जगाम त्वरितो राजन् येन यातो धनंजयः ॥ ॥ इति द्रोणपर्वणि
जयद्रथवधे सात्यकिप्रवेशे धृतराष्ट्र उवाच किं तस्यां मम सेनायां नासन् केचिन्महारथाः ये तथा सात्यकिं यांतं नैवा
घ्नन्नाप्यवारयन् एको हि समरे कर्म कृतवान्सत्यविक्रमः शक्रतुल्यबलो युद्धे महेंद्रो दानवेष्विव अथवा शून्य

राम॰ १३७

मासीत्तेषेनयातः समास्सकिः हतभूयिष्ठमेवाप्येनयातः समास्तकिः यत्कृतं भिष्मगीराकर्म शंसमेमेरणो नैतदुत्स
हेतकर्तुंकर्मशक्तोपिसंजय अश्रद्धेयमचिंत्यंचयथासंजयभाषसे एकोवैबहुलाःसेनाः प्रमृद्नन्सत्यविक्रमः कथंचयुधमा
नानामपक्रांतोमहात्मना एकोबहूनांशैनेयस्तन्ममाचक्ष्वसंजय संजयउवाच राजन्केनासमुद्योगोरथनागाश्वपत्तिमा
न् तुमुलस्तवसैन्यानांयुगांतसदृशोभवत् आह्निकेयुसमहेषुतवसैन्यसमानद नामलोकेसमः कश्चित्समहइतिमेमतिः
तत्रदेवास्त्वभाषंतचारणाश्चसमागताः एतदंताःसमुहावैभविष्यंतिमहीतले नैवएतादृशोम्हआसीत्कश्चिद्दिशांपते या
दृक्जयद्रथवधेद्रोणेनविहितोभवत् चंडवातविभिन्नानांसमुद्राणामिवस्वनः रणेभवद्बलौघानामन्योन्यमभिधावतां
पार्थिवानांसमेतानांबहून्यासन्नरोत्तम त्वद्बलेपांडवानांचसहस्राणिशतानिच संरब्धानांप्रवीराणांसमरेदृढकर्म
णां तत्रासीत्सुमहान्शब्दः तुमुलोलोमहर्षणः अथाक्रंदद्भीमसेनोधृष्टद्युम्नश्चमारिष नकुलःसहदेवश्चधर्म
राजश्चपांडवः आगच्छतप्रहरतबलवत्परिधावत प्रविष्टावरिसेनांहिवीरोमाधवपांडवौ यथासुखेनगच्छेतांजयद्रथ
वधंप्रति तथाप्रकुरुतक्षिप्रमितिसैन्यान्यचोदयत् तयोरभावेकुरवः कृतार्थाःस्युर्वयंजिताः तेयूयंसहिताभूत्वा
तूर्णमेवबलार्णवं क्षोभयध्वंमहावेगाःपवनःसागरंयथा भीमसेनेनतेराजन्पांचाल्येनचचोदिताः आजघ्नुः
कौरवान्संख्येस्त्यक्त्वासूनात्मनःप्रियान् इच्छंतोनिधनंयुद्धेशस्त्रैरुत्तमतेजसः स्वर्गार्थमित्रकार्यार्थनाभ्यरक्षंतजीवितं न
चैवतावकाराजन्प्रार्थयंतोमहद्यशः आर्यांयुद्धेमतिंकृत्वायुद्धायैवावतस्थिरे तस्मिन्सुतुमुलेयुद्धेवर्तमानेभयावहे जित्वास

द्रो० १३९

वीरिणिसैन्यानि प्रयात्सात्यकिरर्ज्जुनं कंठचानांप्रभास्तत्रसूर्यरश्मिविराजिताः हृष्टीः संख्येसैनिकानांप्रतिजघ्नुः समंततः
तथा प्रपतमानानां पांडवानां महात्मनां दुर्योधनो महाराजेव्यगाहत महद्बलं सनिपातस्तुमुलस्तेषांतस्यचभारत
च्चाभवत्सर्वभूतानांमभावकरणोमहान् धृतराष्ट्र उवाच तथायातेषुसैन्येषुतथाकृच्छ्रगतः स्वयं कच्चित्तदुर्योधनः
स्तेनाकार्षीत्पृष्ठतोरणे एकस्यचबहूनांचसंनिपातोमहाहवे विशेषतोनरपतेर्विषमः प्रतिभातिमे सोत्यंतसुखसंवृद्धो ल सं ४
क्ष्म्यालोकस्य चेश्वरः एकोबहून्समासाद्य कच्चिन्नासीत्पराङ्मुखः संजयउवाच राजन्संग्राममाश्चर्यं तवपुत्रस्यभा
रत एकस्यबहुभिः सार्द्धं शृणुष्वगदतोमम दुर्योधनेनसमरे पृतनापांडवीरणे नलिनी द्विरदेनेवसमंताच्चवि
लोडिता ततस्तांप्रहृतांसेनांदृष्ट्वापुत्रेणतेनृप भीमसेनपुरोगास्तां पांचालाः समुपाद्रवन् सभीमसेनंदश
भिः शरैर्विव्याधपांडवं त्रिभिस्त्रिभिर्यमौवीरौ धर्मराजंचसप्तभिः विराटद्रुपदौषड्भिः शतेनचशिखंडिनं
धृष्टद्युम्नंचविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः शतशश्चापरान्योधान्सद्विपांश्चापरान्रणे शरैरवचकर्तोग्रैः क्रुद्धो
ऽतकइवप्रजाः नसंदधन्विमुंचन्वा मंडलीकृतकार्मुकः अदृश्यतरिपून्निघ्नन् शिक्षयास्त्रबलेनच तमस्तान्निघ्नतः श
त्रून्हेमपृष्ठं महद्धनुः भ्रान्तंतु मंडलीभूतं ददृशुः समरेजनाः ततोयुधिष्ठिरोराजाभल्लाभ्यामाच्छिनद्धनुः तवपुत्र
स्यकौरव्य यतमानस्यसंयुगे विव्याधचैनंदशभिः सम्यगस्तैः शरोत्तमैः वर्मचाशुसमासाद्य तेभग्नाः क्षितिमावि
शन् ततः प्रमुदिताः पार्थाः परिवव्रुर्युधिष्ठिरं यथावृत्रवधे देवाः पुराशक्रंमहर्षयः ततोन्यद्धनुरादायतवपुत्रः प्रता राम०
पवान् तिष्ठतिष्ठेतिराजानंब्रुवन्पांडवमभ्ययात् तमायांतमभिप्रेक्ष्यतवपुत्रंमहामृधे प्रत्युद्ययुः प्रमुदिताः पांचाला १३८

प्रतिजग्राह धर्मात्मन् युधिष्ठिरपांडवं चंडवातोद्धतान्मेघान्गिरिरंशुमुखोयथा तत्र राजन्महानासीत्संग्रामो लोमहर्षणः पांडवा
नां महाराज होतावकानां च धन्विनां रुद्रस्याक्रीडसदृशः संहारः सर्वदेहिनां ततः शब्दो महानासीत्पुनर्येन धनंजयः । अतीव स
र्वशब्देभ्यो रोमहर्षकरः प्रभो । अर्जुनस्य महाबाहो तावकानां च धन्विनां मध्ये भारत सैन्यस्य माधवस्य महारणे द्रोणस्यापि परैः
सार्द्धं महद्युद्धं महारणे एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते क्रुद्धे ऽर्जुने तथा द्रोणे सात्वते च महारथे इति द्रोणपर्वणि
जयद्रथवधे सात्यकिप्रवेशे संजय उवाच अपराह्णे महाराज संग्रामः सुमहानभूत् पर्जन्यसमनिर्घोषः पुनर्द्रोणस्य सोम
कैः शोणाश्वं रथमास्थाय नरवीरः समाहितः समरेभ्यद्रवत्पांडून् जवमास्थाय मध्यमं तव प्रियहिते युक्तो महेष्वासो
महाबलः चित्रपुंखैः शितैर्बाणैः कलशोत्तमसंभवः वरान्वरान्हि योधानां विचिन्वन्निव भारत अक्रीडत रणे राजन्भार
द्वाजः प्रतापवान् तमभ्ययाद्बृहत्क्षत्रः कैकयानां महारथः भ्रातॄणां पंचानां श्रेष्ठः समरकर्कशः विमुंचन्विशिखांस्ती
क्ष्णानाचार्यं छादयन्भृशमार्दयत् महामेघो यथा वर्षं विमुंचन्गंधमादने तस्य द्रोणो महाराज स्वर्णपुंखाञ्छिलाशितान् प्रेषया
मास संक्रुद्धः सायकान्दश पंच च तांस्तु द्रोणविनिर्मुक्तान्क्रुद्धाशीविषसंनिभान् एकैकं पंचभिर्बाणैर्युधि चिच्छेद हृ
ष्टवत् तदस्य लाघवं दृष्ट्वा प्रहस्य द्विजपुंगवः प्रेषयामास विशिखानष्टौ सन्नतपर्वणः तान्दृष्ट्वापततस्तूर्णं द्रोणचापच्यु
तान्रणे अवारयच्छरैरेव तावद्भिर्निशितैर्मृधे ततोभवन्महाराज तव सैन्यस्य विस्मयः बृहत्क्षत्रेण तत्कर्म कृतं दृष्ट्वा
सुदुष्करं ततो द्रोणो महाराज बृहत्क्षत्रं विशेषयन् प्रादुश्चक्रे रणे दिव्यं ब्राह्ममस्त्रं सुदुर्जयं कैकेयोस्त्रं समालोक्य मुक्तं द्रो
णेन संयुगे ब्रह्मास्त्रेणैव राजेंद्र ब्राह्ममस्त्रमशातयत् ततोस्त्रे निहते ब्राह्मे बृहत्क्षत्रस्तु भारत विव्याध ब्राह्मणं षष्ट्या स्वर्ण

द्रो॰ १३९ पुंखैः शिलाशितैः तं द्रोणो द्विपदांश्रेष्ठो नाराचेन समार्पयत् स तस्य कवचं भित्त्वा प्राविशद्धरणीतलं कृतसर्पो यथा मु
कोवल्मीकं नृपसत्तम तथाभ्यगान्महीं बाणो भित्त्वा केकयमाहवे सोतिविद्धो महाराज केकयो द्रोणसायकैः क्रोधेन मह
ताविष्टो व्यावृत्य नयने शुभे द्रोणं विव्याध सप्तत्या स्वर्णपुंखैः शिलाशितैः सारथिं चास्य बाणेन भृशं [illegible] मर्मस्व ताड
यत् द्रोणस्तु बहुभिर्विद्धो बृहत्क्षत्रेण मारिष असृजद्विशिखांस्तीक्ष्णान् केकयस्य रथं प्रति व्याकुलीकृत्य तं द्रो
णो बृहत्क्षत्रं महारथं अश्वांश्चतुर्भिरवधीच्चतुरः सप्तत्रिभिः सूतं चैकेन बाणेन रथनीडादपाहरत् द्वाभ्यां ध्वजं च छत्रं
च छित्त्वा भूमावपातयत् ततः साधुविसृष्टेन नाराचेन द्विजर्षभः हृद्यविध्यद्बृहत्क्षत्रं स छिन्नहृदयोपतत् बृहत्क्षत्रे हते
राजन्केकयानां महारथे शैशुपालिर्भृशं क्रुद्धो यन्तारमिदमब्रवीत् सारथे याहि यत्रैष द्रोणस्तिष्ठति दंशितः विनिघ्नन्
केकयान्सर्वान्पंचालानां च वाहिनीं तस्य तद्वचनं श्रुत्वा सारथी रथिनां वरं द्रोणाय प्रापयामास काम्बोजैर्जवनै
र्हयैः धृष्टकेतुश्च चेदीनामृषभोतिबलोदितः [illegible] वधायाभ्यद्रवद्द्रोणं पतंग इव पावकं सोऽवि
ध्यत्ततो द्रोणं षष्ट्या साश्वरथध्वजं पुनश्चान्यैः शरैस्तीक्ष्णैः सुप्तं व्याघ्रं तुदन्निव तस्य द्रोणो धनुर्मध्ये क्षुरप्रेण शि
तेन च चकर्त गार्द्धपत्रेण पतमानस्य शुष्मिणः अथान्यद्धनुरादाय शैशुपालिर्महारथः विव्याध सायकैर्द्रोणं
कङ्कबर्हिणवाजितैः तस्य द्रोणो हयान्हत्वा चतुर्भिश्चतुरः शरैः सारथेश्च शिरः कायाच्चकर्त प्रहसन्निव अथैनं पंचवि
शत्या सायकानां समार्पयत् अवप्लुत्य रथाच्चेद्यो गदामादाय सत्वरः भारद्वाजाय चिक्षेप रुषितामिव पन्नगीं तामा
पतन्तीमालोक्य कालरात्रिमिवोद्य राम॰ १३९

तां अश्मसारमयीं गुर्वीं तपनीयविभूषितां शरैरनेकसाहस्रैर्भारद्वाजोछिनच्छितैः साछिन्नाबहुभिर्वाणैर्भारद्वाजेन मा
रिष गदापपातकौरव्यनादयंती धरातलं गदां विनिहतां दृष्ट्वा धृष्टकेतुरमर्षणः तोमरं व्यसृजद्वीरः शक्तिं च कनकोज्वलां
तोमरं पंचभिर्भित्वा शक्तिं चिछेद पंचभिः तौ जग्मतुर्महीं छिन्नौ सर्पाविव गरुत्मता ततोस्य विशिखं तीक्ष्णं वधाय वधकां
क्षिणः प्रेषयामास समरे भारद्वाजः प्रतापवान् स तस्य कवचं भित्वा हृदयं चामितौजसः अभ्यगाद्धरणीं बाणो हंसः पद्म
वनं यथा पतंगं हि ग्रसेच्चाषो यथा क्षुद्बुभुक्षितः तथा द्रोणोग्रसच्छूरो धृष्टकेतुं महाहवे निहते चेदिराजे तु तत्खंडं पि
त्र्यमाविशत् अमर्षवशमापन्नः पुत्रोस्य परमास्त्रवित् तमपि प्रहसन् द्रोणः शरैर्निन्ये यमक्षयं महाव्याघ्रो महारण्ये
मृगसावं यथा बली तेषु प्रक्षीयमाणेषु पांडवेयेषु भारत जरासंधसुतो वीरः स्वयं द्रोणमुपाद्रवत् स तु द्रोणं महाबाहुः
शरधाराभिराहवे अदृश्यमकरोत्तूर्णं जलदो भास्करं यथा तस्य तल्लाघवं दृष्ट्वा द्रोणः क्षत्रियमर्दनः व्यसृजत्साय
कांस्तूर्णं शतशोथ सहस्रशः छादयित्वा रणे द्रोणो रथस्थं रथिनां वरं जारासंधिं जघानाशु मिषतां सर्वधन्विनां यो
यः स्म नीपते तत्र तं द्रोणो ह्यंतकोपमः आदत्त सर्वभूतानि प्राप्तकाले यथांतकः ततो द्रोणो महाराज नाम विश्राव्य
संयुगे शरैरनेकसाहस्रैः पांडवान्समवारयत् ततेतु नामांकिता बाणा द्रोणेनास्ताः शिलाशिताः नरान्नागान्हयांश्चै
व निजघ्नुः शतशो मृधे ते वध्यमाना द्रोणेन शक्रेणेव महासुराः समकंपंत पंचालाः गावः शीतार्दिता इव ततो निष्ठान
को घोरः पांडवानामजायत द्रोणेन वध्यमानेषु सैन्येषु भरतर्षभ प्रताप्यमानाः सूर्येण हन्यमानाश्च सायकैः अ

द्रो० १५०

न्वपद्यंत पंचालास्तदा संत्रस्तचेतसः मोहिताश्च राजानो भारद्वाजेन संयुगे उग्रस्त्राहगृहीतानां पंचालानां महारथाः
चेदयश्च महाराज संजयाः काशिकोशलाः अभ्यद्रवंत संहृष्टा भारद्वाजं युयुत्सया ब्रुवंतश्च रणेन्योन्यं चेदिपांचालसंज
याः हत द्रोणं हत द्रोणमिति ते द्रोणमभ्ययुः यतंतः पुरुषव्याघ्राः सर्वशक्त्या महाद्युतिं निनीषवो रणे द्रोणं यमस्य सदनं
प्रति यतमानांस्तु तान्वीरान् भारद्वाजः शिलीमुखैः यमाय प्रेषयामास चेदिमुख्यान्विशेषतः तेषु प्रक्षीयमाणेषु चेदिमुख्ये
षु सर्वशः पांचालाः समकंपंत द्रोणसायकपीडिताः प्राक्रोशन् भीमसेनं ते धृष्टद्युम्नं च भारत दृष्ट्वा द्रोणस्य कर्म्माणि
तथारूपाणि मारिष ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत् तथा हि युधि संक्रुद्धो दहति क्षत्रियर्षभान् धर्मो युद्धं क्षत्रि
यस्य ब्राह्मणस्य परं तपः तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्दहेत् द्रोणास्त्रमग्निसंपन्नं प्रविष्टाः क्षत्रियर्षभाः
बहवो दुस्तरं घोरं यत्रादह्यंत भारत यथाबलं यथोत्साहं यथासत्वं महाद्युतिः मोहयन्सर्वभूतानि द्रोणो हंति बलानि नः
तेषां तद्वचनं श्रुत्वा तत्र धर्म्मो व्यवस्थितः अर्द्धचंद्रेन चिच्छेद तत्र धर्म्मो महाबलः क्रोधसंविग्नमनसो द्रोणस्य सशरं धनुः
स संरब्धतरो भूत्वा द्रोणः क्षत्रियमर्द्दनः अन्यत्कार्मुकमादाय भास्वरं वेगवत्तरं तत्राधाय शरं तीक्ष्णं भारद्वाजो विपुलं दृढं आ
कर्णपूर्णमाचार्यो बलवानभ्यवासृजत् स हत्वा तत्र धर्म्माणं जगाम धरणीतलं सजीवितमुपादाय धार्ष्टद्युम्नेः शरोत्तमः
आशीविष इव क्रुद्धो जगाम धरणीतलं स भिन्नहृदयो बाहान्यपतन्मेदिनीतले ततः सैन्यान्यकंपंत धृष्टद्युम्नसुते हते अ रीम०
थ द्रोणं समारोहच्चेकितानो महाबलः स द्रोणं दशभिर्विद्ध्वा प्रत्यविध्यत्स्तनांतरे चतुर्भिः सारथिं चास्य चतुर्भिश्च तुरोहयान् १५०

तस्याचार्यः षोडशभिरविध्यद्दक्षिणं भुजं ध्वजं षोडशभिर्वाणैर्यंतारं चास्य सप्तभिः तस्यास्ते हरितेश्वा रथमादाय
विद्रुताः समरे शरसंवीताः भारद्वाजेन मारिष चेकितानरथं दृष्ट्वा हताश्वं हतसारथिं पांचालान् पांडवांश्चैव महद्भ
यमथाविशत् तान्समेतान् रणे शूरान् चेदिपांचालसंजयान् समंतात् द्रावयन् द्रोणो बह्वशोभत मारिष आकर्ण
पलितः श्यामो वयसाशीतिपंचकः रणे पर्यचरद् द्रोणो वृद्धः षोडशवर्षवत् अथ द्रोणं महाराज विचरंतमभीतवत् व
ज्रहस्तममन्यंत शत्रवः शत्रुसूदनं ततोब्रवीन्महाबाहुर्द्रुपदो बुद्धिमान् नृप लुब्धोयं क्षत्रियान् हंति व्याघ्रः क्षुद्रमृ
गानिव कृच्छ्रान् दुर्योधनो लोकान् पापः प्राप्स्यति दुर्मतिः यस्य लोभाद्विनिहताः समरे क्षत्रियर्षभाः शतशः शेर
ते भूमौ निकृत्ता गोवृषा इव रुधिरेण परीतांगाः श्वशृगालादनीकृताः एवमुक्त्वा महाराज द्रुपदोक्षौहिणीपतिः पुर
स्कृत्य रणे पार्थान् द्रोणमभ्यद्रवद् द्रुतं ॥ ॥इति द्रोणपर्वणि जयद्रथवधपर्वे सात्यकिप्रवेशे संजय उवाच व्यूहेष्वालो
ड्यमानेषु पांडवानां ततस्ततः सुदूरमन्वयुः पार्थाः पांचालाः सहसोमकैः वर्त्तमाने तथा रौद्रे संग्रामे लोमहर्षणे सं
क्षये जगतस्तीव्रे युगांत इव भारत द्रोणे युधि पराक्रांते नर्दमाने मुहुर्मुहुः पांचालेषु च क्षीणेषु वध्यमानेषु पांडुषु ना
पश्यच्छरणं किंचिद्धर्मराजो युधिष्ठिरः चिंतयामास राजेंद्र कथमेतद्भविष्यति तत्र वीक्ष्य दिशः सर्वाः सव्यसाचि
दिदृक्षया युधिष्ठिरो ददर्शाथ नैव पार्थं न माधवं सो पश्यन्नरशार्दूलं वानरर्षभलक्षणं गांडीवस्य च निर्घोषं अशृ
ण्वन् व्यथितेंद्रियः अपश्यन्सात्यकिं चापि वृष्णीनां प्रवरं रथं चिंतयाभिपरीतांगो धर्मराजो युधिष्ठिरः नाध्यगच्छत्तत

द्रो० शांतिं तावपश्यन्तरे तस्मै लोकोपक्रोशभीरुत्वाधर्म्मराजो महामनाः अचिंतयन्महाबाहुः शैनेयस्य रथं प्रति पदवीं प्रे
१४१ षितश्चैव फाल्गुनस्य मया रणे शैनेयः सात्वकिः सत्यो मित्राणामभयंकरः तदिदं ह्येकमेवासीत् द्विधा जातं ममाद्य वै सात्वकि
श्चापि हि मे ज्ञेयः पांडवश्च धनंजयः सात्वकिं प्रेषयित्वा तु पांडवस्य पदानुगं सात्वतस्यापि कं युद्धे प्रेषयिष्ये पदानुगं करि
ष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि युयुधानमन न्वेष्य लोको मां गर्हयिष्यति भ्रातुरन्वेषणं कृत्वा धर्मपुत्रो युधिष्ठि
रः परित्यजति वार्ष्णेयं सात्वकिं सत्यविक्रमं लोकापवादभीरुत्वात् सोहं पार्थं वृकोदरं पदवीं प्रेषयिष्यामि माधवस्य महा
त्मनः यथैव च मम प्रीतिरर्जुने शत्रुसूदने तथैव वृष्णिवीरेपि सात्वते युद्धदुर्म्मदे अतिभारे नियुक्तश्च मया शैनेयनं
दनः स तु मित्रोपरोधेन गौरवात्तु महाबलः प्रविष्टो भारतीं सेनां मकरः सागरं यथा असौ हि श्रूयते शब्दः शूराणामनि
वर्तिनां मिथः संयुध्यमानानां वृष्णिवीरेण धीमता प्राप्तकालं सुबलवत् निश्चितं बहुधा हि मे तत्रैव पांडवेयस्य भीम
सेनस्य धन्विनः गमनं रोचते मह्यं यत्र यातौ महारथौ न चाप्यसह्यं भीमस्य विद्यते भुवि किंचन शक्तो ह्येष रणे यत्तः
पृथिव्यां सर्वधन्विनां स्वबाहुबलमास्थाय प्रतिव्यूहितुमंजसा यस्य बाहुबलं सर्वे समाश्रित्य महात्मनः वनवासान्निवृ
त्ताः स्म न च युद्धेषु निर्ज्जिताः इतो गते भीमसेने सात्वतं प्रति पांडवे सनाथौ भवितारौ हि युधि सात्वतफाल्गुनौ कामं त्व
शोचनीयौ तौ रणे सात्वतफाल्गुनौ रक्षितौ वासुदेवेन स्वयं चास्त्रविशारदौ अवश्यं तु मया कार्य्यमात्मनः शोकनाशनं रा०
तस्माद्भीमं नियोक्ष्यामि सात्वतस्य पदानुगं ततः प्रतिकृतं मन्ये विधानं सात्वकिं प्रति एवं निश्चित्य मनसा धर्मपुत्रो यु १४१
धिष्ठिरः यंतारमब्रवीद्राजा भीमं प्रति नय

स्तमां धर्मराजवचः श्रुत्वा सारथिर्हयकोविदः रथं हेमपरिस्कारं भीमांतिकमुपानयत् भीमसेनमनुज्ञाप्य प्राप्तकालमनुस्मरन्
कश्मलं प्राविशद्राजा वृहुतत्वसमादिशत् सकश्मलसमाविष्टो भीममाहूयपार्थिवः अब्रवीद्वचनं राजन् कुंतीपुत्रो युधिष्ठिरः यः
सेंद्रान्सगंधर्वान् दैत्यांश्चैकरथोजयत् तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते ततोब्रवीद्धर्मराजं भीमसेनस्तथागतं नैव
द्राक्षं न चाश्रौषं तव कश्मलमीदृशं पुरातिदुःखदीर्णानां भवान्नगतिरभूद्धि नः उत्तिष्ठोत्तिष्ठ राजेंद्र शाधि किं करवाणि ते नह्य
साध्यमहार्यं वा विद्यते मम मानद आज्ञापय कुरुश्रेष्ठ मा च शोके मनः कृथाः तमब्रवीदश्रुपूर्णः कृष्णसर्प इव श्वसन् भीमसे
नमिदं वाक्यं म्लानवदनो नृपः ॥ यथा शंखस्य निर्घोषः पांचजन्यस्य श्रूयते पूरितो वासुदेवेन संरब्धेन यशस्विना नूनमद्य
हतः शेते तव भ्राता धनंजयः तस्मिन् विनिहते नूनं युध्यते सौ जनार्दनः यस्य सत्ववतो वीर्यमुपजीवंति पांडवाः यं भये
ष्वभिगच्छंति सहस्रा त्वमिवामराः स शूरः सैंधवं प्रेप्सुरन्वयाद्भारतीचमूं तस्य वै गमनं विद्मो भीम नावर्त्तनं पुनः श्यामो यु
वा गुडाकेशो दर्शनीयो महारथः व्यूढोरस्को महाबाहुर्मत्तद्विरदविक्रमः चकोरनेत्रस्ताम्राक्षो द्विषतां भयवर्द्धनः तदिदं
मम भद्रं ते शोकस्थानमरिंदम अर्जुनार्थं महाबाहो सात्वतस्य च कारणात् वर्द्धते हविषेवाग्निरिध्यमानः पुनः पुनः तस्य
लक्ष्म न पश्यामि तेन विंदामि कश्मलं तं विद्धि पुरुषव्याघ्रं सात्वतं च महारथं स तं महारथं पश्चादनुयातस्तवानुजं तम
पश्यन्महाबाहुमहं विंदामि कश्मलं पार्थे तस्मिन्हते चैव युध्यते नूनमग्रणीः महायोनास्य वै कश्चित्तेन विंदामि कश्म

द्रो॰ १५२ लं तस्मिन्कृष्णोहतेनन्तंयुद्धेतेयुद्धकोविदः सतत्रगच्छकौंतेययत्रपार्थोधनंजयः सात्यकिश्चमहावीर्यःकर्तव्यंपरिम
न्यसे वचनंममधर्मज्ञभ्राताज्येष्ठोभवा मिते नतेर्जुनस्तथाज्ञेयोज्ञातव्यःसात्यकिर्यथा चिकीर्षुर्मत्प्रियंपार्थसंप्रातः
सव्यसाचिनं पदवींदुर्गमांघोरामगम्यामकृतात्मभिः दृष्ट्वाकुशलिनौकृष्णौसात्वतंचैवसात्यकिं संविदंचैवकुर्यास्त्वंसिं
हनादेनपांडव॥ ॥इतिद्रोणपर्वणिजयद्रथवधेयुधिष्ठिरचिंतायांभीमसेनप्रवेशे भीमसेनउवाच ब्रह्मेशानेंद्रवरुण
नवहधःयुरथः तमास्थाययतोकृष्णोनतयोर्विद्यतेभयं आज्ञांतुशिरसाबिभ्रदेषगच्छामिमाशुचः समेत्यतान्नरव्याघ्रान्त
वद्गस्यामिसंविदं संजयउवाच एतावदुक्त्वाप्रययौपरिदाययुधिष्ठिरं धृष्टद्युम्नायबलवान्सुहृद्भ्यश्चपुनःपुनः धृष्टद्युम्नंचेद
माहभीमसेनोमहाबलः विदितंतेमहाबाहोयथा द्रोणोमहारथः ग्रहणेधर्मराजस्यसर्वोपायेनवर्तते नचमेगमनेकृत्यंता
दृक्पार्थतविद्यते यादृशंरक्षणंराज्ञःकार्यमात्ययिकंहिनः एवमुक्तोस्मिपार्थेनप्रतिवक्तुंचनोत्सहे प्रयास्येतत्रयत्रासौमुम
र्षुःसैंधवस्थितः धर्मराजस्यवचनेस्थातव्यमविशंकया यास्यामिपदवींभ्रातुःसात्वतस्यचधीमतः सोयत्तोरणेपार्थंपरि
रक्षयुधिष्ठिरं एतद्धिसर्वकार्याणांपरमंकृत्यमाहवे तमब्रवीन्महाराजधृष्टद्युम्नोवृकोदरं ईप्सितेनमहाबाहोगच्छपार्थ
विचारयन् नाहत्वासमरेद्रोणोधृष्टद्युम्नंकथंचन निग्रहंधर्मराजस्यप्रकरिष्यतिसंयुगे ततोनिक्षिप्यराजानंधृष्टद्युम्ने
चपांडवं अभिवाद्यगुरुंज्येष्ठंप्रययौयेनफाल्गुनः परिष्वक्तश्चकौंतेयोधर्मराजेनभारत॰ आघ्रातश्चतथामूर्ध्निश्रावित राम॰ १५२
श्चाशिषःशुभाः कृत्वाप्रद ॥

द्विगणान्विप्रानर्चितांस्तर्प्यमानस्तान् आलभ्यमंगलान्यष्टौपीत्वाकैलातकंमधु द्विगुणद्रविणो ॥१६॥ वीरोमदरक्तांतलो
चनः विप्रैः कृतस्वस्त्ययनोविजयोत्साहसूचितः पश्यन्नेवात्मनोवुद्धिंविजयानंदकारिणी अनुलोमानिलैश्चाशुभैर्देशितज
योदयः भीमसेनोमहावाहुः कवचीशुभकुंडली सांगदीसतलत्राणः सरथीरथिनांवरः तस्यकार्ष्णायसंवर्महेमचित्रमहर्द्धिम
त् विवभौसर्वतःश्लिष्टंसविद्युदिवतोयदं पीतरक्तासितसितैर्वासोभिश्चसुवेष्टितः कंठत्राणेनचवभौसेंद्रायुधइवांवुदः प्र
यातेभीमसेनेतुतवसैन्यंयुयुत्सया ॥ पांचजन्यरवोघोरः पुनरासीद्विशांपते तंश्रुत्वानिनदंघोरंत्रैलोक्यत्रासनंमहत् पु
नर्भीमंमहावाहुंधर्मपुत्रोभ्यभाषत एषव्रह्मिप्रवीरेणध्मातःशलिलजोभृशं पृथिवीचांतरिक्षंचविनादयतिशंखराट् न
नंव्यसनमापन्नेतुमहत्सव्यसाचिनि ॥ सभीमत्वरयायुक्तोयाहियत्रधनंजयः मुह्यतीवहिमेसर्वाधनंजयदिदृक्षया दिश
श्चप्रदिशःपार्थस्यात्वतस्यचकारणात् एवंसंनोदितस्तेनधर्मपुत्रेणसंयुगे भीमसेनोमहावाहुः कवचीदंशितोवली गछ
गछेतिचपुनर्भीमसेनमभाषत सशंसप्रहितोभ्रात्रा ॥ भ्राताभ्रातुःप्रियंकरः आहत्यदुंदुभीभीमः शंखंदध्माप्यचासकृ
त् विशोकेनाभिसंपन्नामनोमारुतरंहसः आरुजन्विरुजन्पार्थोज्यांविकर्षंश्चपाणिना सोपकर्षन्विकर्षंश्चसेनाग्र
समलोडयत् तंप्रयांतुमहावाहुंपांचालाः सहसोमकाः पृष्ठतोनुययुः सर्वेमघवंतमिवामराः तंसमेत्यमहाराजसोद
र्याःपर्यवारयन् दुःशलश्चित्रसेनश्चकुंडभेदीविशांपते दुर्मुखोदुःसहश्चैवविकर्णश्चशलस्तथा विंदानुविंदौसुमुखो

कुरुर्मिर्युध्यतेसार्द्धं सर्वैश्चिक्रूरकर्मभिः आहकुंतीनन्दनमार्गान्प्रापमघनिर्दर्शने दोषदर्शवसमनराधपश्चपन्नोसहवंधुभिः ६४

दीर्घबाहुः सुदर्शनः वृंदारकः सुहस्तश्च सुषेणो दीर्घलोचनः अभयो रौद्रकर्म्मा च सुवर्म्मा दुर्विमोचनः शोभंतो रथिनां श्रेष्ठाः
सहसैन्यं सहानुगाः संयत्ताः समरे वीरा भीमसेनमुपाद्रवन् तान्समीक्ष्य तु कौंतेयो भीमसेनः पराक्रमी अभ्यवर्त्तत वेगेन सिंहः
क्षुद्रमृगानिव ते महास्त्राणि दिव्यानि तत्र वीरा ह्यदर्शयन् वारयंतः शरैर्भीमं मेघाः सूर्यमिवोदितं स तानतीत्य वेगेन द्रो
णानीकमुपाद्रवत् अग्रतश्च गजानीकं शरवर्षैरवाकिरत् सोचिरेणैव कालेन तद्गजानीकमाशुगैः दिशः सर्वाः समभ्यस्यद्व्यधमत्प
वनात्मजः त्रासिताः शरभस्येव गर्ज्जितेन वने मृगाः प्राद्रवन्द्विरदाः सर्वे नदंतो भैरवान्रवान् पुनश्चातीत्य वेगेन द्रोणानीकमु
पाद्रवत् तमावारयदाचार्य्यो वेलेवोद्धृतमार्णवं ललाटेताडयच्चैनं नाराचेन स्मयन्निव ऊर्द्ध्वरश्मिरिवादित्यो विबभौ तत्र पा
ण्डवः समन्यमानस्त्वाचार्य्यो ममायं फाल्गुनो यथा भीमः करिष्यते पूजामित्युवाच वृकोदरं भीमसेन न ते शक्यं प्रवेष्टुमरिवा
हिनीं मामनिर्ज्जित्य समरे शत्रुमद्य महाबल यदि ते सानुजः कृष्णः प्रविष्टोनुमते मम अनीकं न तु शक्यं भोः प्रवेष्टुमिह वै त्वया
अथ भीमस्तु तच्छ्रुत्वा गुरोर्वाक्यमपेतभीः क्रुद्धः प्रोवाच वै द्रोणं रक्तताम्रेक्षणस्त्वरन् तवार्ज्जुनो नानुमते ब्रह्मबंधो रणाजिरं
प्रविष्टः स हि दुर्द्धर्षः शक्रस्यापि विशेद्बलं तेन वै परमां पूजां कुर्वता मानितो ह्यसि नार्ज्जुनोहं घृणी द्रोण भीमसेनोस्मि ते रिपुः
पिता नस्त्वं गुरुर्बंधुस्तथा पुत्रा हि ते वयं इति मन्यामहे सर्वे भवंतं प्रणताः स्थिताः अद्य तद्विपरीतं ते वदतोस्मासु दृश्यते यदि
त्वं शत्रुमात्मानं मन्यसे तत्तथास्त्विह एष ते सदृशं शत्रोः कर्म भीमं करोम्यहं अथोद्भ्राम्य गदां भीमः

कालदंडमिवांतकः द्रोणायप्रसृजद्राजन्नरथादवपुप्लुवे साम्यस्ततश्चजंयानंद्रोणस्यापोप्यपक्तदा प्राम्द्राच्च वहन्न
योधान्वासुदेवस्तानि वीजसा तेपुनः शिवमुक्तितवपुत्रारथोत्तमं अन्यंतुरथमास्थायद्रोणः प्रहरतांवरः व्यूहद्वारं समा
साधयुद्धायसमवस्थितः ततः क्रुद्धोमहाराजभीमसेनः पराक्रमी अभ्यतः स्यंदनानीकं शरवर्षैरवाकिरत् तेवध्यमा
नाः समरे तवपुत्रामहारथाः भीमंभीमबलायुद्धेयोधयंतिजयैषिणः ततोदुःशासनः क्रुद्धोरथशक्तिसमाक्षिपत् स
र्वपारसवींतीक्ष्णांजिघांसुः पांडुनंदनं आपतंतीमहाशक्तिंतवपुत्रप्रणोदितां द्विधाचिच्छेदतांभीमस्तदद्भुतमिवा भवत्
अथान्यैर्विशिखैर्वीरैः संक्रुद्धः पांडुनंदनः सुषेणंदीर्घनेत्रंचत्रिभिस्त्रीनवधीद्वली ततोवृंदारकंवीरंकुरूणांकीर्तिवर्द्धनं पुत्रा
णांतववीराणांयुध्यतामवधीत्सुनेः अभयंरौद्रकर्माणंदुर्विमोचनमेवच त्रिभिस्त्रीनवधीद्भीमः पुनरेवसुतांस्तव वध्यमा
नामहाराजपुत्रास्तवबलीयसा भीमंप्रहरतांश्रेष्ठंसमंतात्पर्यवारयन् तेशरैर्भीमकर्माणंववर्षुः पांडवंयुधि मेघाइवतपापा
येधाराभिर्द्धरणीधरं सतद्बाणमयंवर्षमश्मवर्षमिवाचलः प्रतीच्छन्पांडुदायादोनप्राव्यथतशत्रुहा विंदानुविंदौसहितौसुव
र्माणंचतेसुतं प्रहसन्नेवकौंतेयः शरैर्निन्येयमक्षयं ततः सुदर्शनंवीरंपुत्रंतेभरतर्षभ विव्याधसमरेतूर्णंसपपातममा
रच सोचिरेणैवकालेन तद्रथानीकमाशुगैः दिशः सर्वाः समालोक्यव्यधमत्पांडुनंदनः ततोवैरथघोषेणगर्जितेने
नमृगाइव भज्यमानाश्चसमरेतवपुत्राविशांपते प्राद्रवन्सहसासर्वेभीमसेनभयार्द्दिताः अनुयायांश्चकौंतेयः पुत्राणां
तेमहद्बलं विव्याधसमरेराजन्कौरवेयान्समंततः वध्यमानामहाराजभीमसेनेनतावकाः त्यक्त्वाभीमंरणेयांतिचोदयं

द्रो० १७४

तोहयेत्समान् तांस्तुनिर्जित्यसमरेभीमसेनोमहावलः सिंहनादरवंचक्रेवाहुशब्दंचपांडवः तलशब्दंचसुमहत्कृत्वाभीमोम
हावलः वतीसरथिनश्चापिद्रोणानीकमुपाद्रवत्॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभीमसेनप्रवेशे संजयउवाच समुत्ती
र्णरथानीकंपांडवंविहसन्रणे विवारयिषुराचार्यः शरवर्षैरवाकिरत् पिवन्निवशरौघांस्तान्द्रोणचापपरिच्युतान् सोभ्यद्रव
त्तसोदर्यान्मापयामोहयन्बलं तंमृधेवेगमास्थायपरं परमधन्विनः चोदितास्तवपुत्रैश्चसर्वतःपर्यवारयन् सतथासर्वं
तोभीमः प्रहसन्निवभारत उदयच्छद्गदांतेभ्यस्तुघोरांसिंहवन्नदन् अवासृजच्चवेगेनशत्रुपक्षविनाशिनी सेंद्राशनिरिवें
त्रि६ द्राणांविहृासंहतात्मना घोषेणमहताराजन्पूरयित्वेवमेदिनी ज्वलंतीतेजसाभीमात्रासयामासतेसुतान् तांपतंतीं
महावेगांदृष्ट्वातेजोभिसंवृतां प्राद्रवंस्तावकाःसर्वेनदंतोभैरवान्रवान् तंचशब्दमसह्यंवैतस्याःसंलक्ष्यमारिष प्रपत
न्मनुजास्तत्ररथेभ्योरथिनस्तथा सतान्विद्राव्यकौंतेयःसंख्येमित्रान्दुरासदः सुपर्णइववेगेनपक्षिराडत्यगाच्चमूं तथातु
विप्रकुर्वाणंरथयूथपयूथपं भारद्वाजोमहाराजभीमसेनंसमभ्ययात् भीमंतुसमरेद्रोणोवारयित्वाशरोर्मिभिः अक
रोत्सहसानादंपांडुनोभयमादधत् तद्युद्धमासीत्सुमहद्घोरंदेवासुरोपमं द्रोणस्यचमहाराजभीमस्यचमहात्मनः यदा
तुविशिखैस्तीक्ष्णैर्द्रोणचापविनिःसृतैः वध्यंतेसमरेवीराःशतशोथसहस्रशः ततोरथादवप्लुत्यवेगमास्थायपांडवः
निमील्यनयनेराजन्पदातिर्द्रोणमभ्ययात् यथाहिगोवृषोवर्षंप्रतिगृह्णातिलीलया तथाभीमोनरव्याघ्रःशरवर्षंसमग्रहीत्

राम० १४४

सवध्यमानः समेरे रथंद्रोणस्यमारिष ईषायांपाणिनाग्रह्यप्रचिक्षेपमहाबलः द्रोणस्तुसत्वरोराजन्क्षिप्तोभीमेनसंयुगे दृश्यतेता
वकैर्योधैर्विस्मयोत्फुल्ललोचनैः परित्यज्यरथंद्रोणःजर्जरंतस्मान्महीतले रथमन्यंसमास्थायव्यूहद्वारमुपाययौ तस्मिन्नुत्तगेप
स्यपंतात्तूर्णमभ्यानचोदयत् भीमसेनस्यकौरव्यतत्राद्भुतमिवाभवत् ततः स्वरथमास्थायभीमसेनोमहाबलः अभ्यद्रवतवेगेनत
वपुत्रस्यवाहिनीं समद्रनत्क्षत्रियानाजौवातोवृक्षानिवोद्धतः आगच्छन्पर्वतंसेनासिंधुवेगोनगानिव भोजानीकंसमासाद्यहा
र्दिक्येनाभिरक्षितं प्रमथ्यतरसावीरस्तत्र प्यतिवलोम्भपात् संत्रासयन्ननीकानितलशब्देनपांडवः अर्दयन्सर्वसैन्यानिशार्दूलइ
वगोवृषान् भोजानीकमतिक्रम्यदरदानांचवाहिनीं तथाम्लेच्छगणानन्यान्बहून्युद्धविशारदान् सात्यकिंचैवसंप्रेक्ष्ययुध्य
मानंमहारथं रथेनयत्तःकौंतेयोवेगेनप्रययौतदा भीमसेनोमहाराजद्रष्टुकामोधनंजयं अतीत्यसमरेयोधांस्तावकान्पांडु
नंदनः सोपश्यदर्जुनंतत्रयुध्यमानंमहारथं सैंधवस्यवधार्थंहि पराक्रांतपराक्रमी तंदृष्ट्वापुरुषव्याघ्रश्चुक्रोशमहतो
रवान् प्रावृट्कालेमहाराजनर्दन्निवबलाहकः तंतस्यनिनदंघोरंपार्थःशुश्रावनर्दतः वासुदेवश्चकौरव्यभीमसेनस्यसंयु
गे तौश्रुत्वायुगपद्वीरौनिनदंतस्यशुष्मिणः पुनःपुनःप्रणदतांदिदृक्षन्तौवृकोदरं ततःपार्थोमहानादंमुंचन्वैमाधव
श्चह अभ्ययातांमहाराजनर्दन्तौगोवृषाविव भीमसेनरवंश्रुत्वाफाल्गुनस्यचधन्विनः अप्रीयतमहाराजधर्मपुत्रो
युधिष्ठिरः विशोकश्चाभवद्राजाश्रुत्वातंनिनदंतयोः धनंजयस्यसमरेजयमाशास्यवान्विभुः तथातुनर्दमानेवैभीमसेने
म होत्कटे ॥

द्रो० १४५

स्मितं कृत्वा महाबाहुर्धर्मपुत्रो युधिष्ठिरः हृष्टेन मनसा प्राह ध्यात्वा धर्मभृतां वरः स्वामी मत्वया संदिष्टः कृतं गुरुवचस्त्वया नहि तेषां
जयो युद्धे येषां हेतुरसि पांडव दिष्ट्या जीवति संग्रामे सव्यसाची धनंजयः दिष्ट्या च कुशली वीरः सात्यकिः सत्यविक्रमः दिष्ट्या श्रुत्वा
भिगर्ज्जतो वासुदेवधनंजयौ येन शक्रं रणे जित्वा तर्पितो हव्यवाहनः स हंता द्विषतां संख्ये दिष्ट्या जीवति फाल्गुनः यस्य बाहुबलं स
र्वे वयमाश्रित्य जीविताः स हंता रिपुसैन्यानां दिष्ट्या जीवति फाल्गुनः निवातकवचा येन देवैरपि सुदुर्ज्जयाः निर्ज्जिता धनुषैके
न दिष्ट्या पार्थः स जीवति कौरवान्सहितान्सर्वान्गोग्रहार्थे समागतान् यो जयत्स्वतेजसा दिष्ट्या पार्थः स जीवति कालकेयसह
स्राणि चतुर्दश महारणे यो वधीद्भुजवीर्येण दिष्ट्या पार्थः स जीवति गंधर्वराजं बलिनं दुर्योधनकृते न वै जितवान्योस्त्रवीर्येण
पा६ दिष्ट्या पार्थः स जीवति किरीटमाली बलवान्श्वेताश्वः कृष्णसारथिः मम प्रियश्च सततं दिष्ट्या पार्थः स जीवति पुत्रशोकाभिसंत
प्तश्चिकीर्षन्कर्म दुष्करं जयद्रथवधान्वेषी प्रतिज्ञां कृतवान्हि यः कच्चित्स सैंधवं संख्ये हनिष्यति धनंजयः कच्चित्तीर्णप्रतिज्ञं हि वा
सुदेवेन रक्षितं अनस्तमित आदित्ये समेष्याम्यहमर्जुनं कच्चित्सैंधवको राजा दुर्योधनहिते रतः मंदयिष्यत्यमित्रान्हि फाल्गु
नेन निपातितः कच्चिद्दुर्योधनो राजा फाल्गुनेन निपातितं दृष्ट्वा सैंधवकं संख्ये शममस्मासु धास्यति दृष्ट्वा विनिहतान्भ्रातॄन्भी
मसेनेन संयुगे कच्चिद्दुर्योधनो मंदः शममस्मासु धास्यति दृष्ट्वा चान्यान्महायोधान्पातितान्धरणीतले कच्चिद्दुर्योधनो मंदः राम० १४५
पश्चात्तापं गमिष्यति कच्चिद्भीष्मेण नो वैरं शममेकेन यास्यति शेषस्य रक्षणार्थं च

संग्रामस्त्विति सुयोधनः एवं बहुविधं तस्य राज्ञश्चिंतयतस्तदा ॥ कृपया भिपरीतस्य घोरं युद्धमवर्त्तत इति द्रोणपर्वणि जयद्रथ
वधे भीमसेनप्रवेशो युधिष्ठिरप्रमोदः धृतराष्ट्र उवाच निनदं ततस्तथा तं तु भीमसेनं महाबलं पर्जन्यमिव निर्घोषं के वीराः
पर्य्यवारयन् नहि पश्याम्यहं तं वै त्रिषु लोकेषु कंचन क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे गदामुद्यच्छतस्तस्य कालस्येव
हसंजय नहि पश्याम्यहं युद्धे यस्तिष्ठेदग्रतः पुमान् रथं रथेन यो हन्यात् कुंजरान् कुंजरेण च कस्तस्य समरे स्थाता साक्षादपि
पुरंदरः क्रुद्धस्य भीमसेनस्य मम पुत्रान् जिघांसतः दुर्योधनहिते युक्ताः समतिष्ठंत केऽग्रतः भीमसेनदवाग्नेस्तु मम पुत्रतृणोल्
पान् प्रधक्ष्यतो रणमुखे के तिष्ठन्नग्रतो नराः काल्यमानांस्तु पुत्रान्मे हष्ट्वा भीमस्य संयुगे कालेनेव प्रजाः सर्वाः के भीमं पर्य
वारयन् नमेऽर्जुनाद्भयं तादृक् कृष्णान्नापि च सात्वतात् हुतभुग्जन्मनो नैव यादृग्भीमाद्भयं मम भीमवन्हेः प्रदीप्तस्य मम पु
त्रान्दिधक्षतः के शूराः पर्य्यवर्त्तंत तन्ममाचक्ष्व संजय संजय उवाच तथा तु नर्दमानं तं भीमसेनं महाबलं तुमुलेनैव श
ब्देन कर्णोऽप्यभ्यद्रवद्बली आक्षिप्य तु महच्चापमतिमात्रममर्षणः कर्णस्तु युद्धमाकांक्षन्दर्शयिष्यन्बलं मृधे रुरोध मा
र्गं भीमस्य वातस्येव महीरुहः भीमोऽपि दृष्ट्वा तं वेगं पुरो वैकर्त्तनं स्थितं चुकोप बलवद्वीरश्चिक्षेपास्य शिलाशितान् तान्
प्रत्यगृह्णात्कर्णोऽपि प्रतीपं प्रापयच्छरान् । ततस्तु सर्वयोधानां यततां प्रेक्षतां तदा प्रावेपन्निव गात्राणि कर्णभीमसमाग
मे रथिनां सादिनां चैव तयोः श्रुत्वा तलस्वनं भीमसेनस्य निनदं घोरं श्रुत्वा रणाजिरे खं च भूमिं च संबद्धां मेनिरे क्षत्रि
यर्षभाः पुन

घोरेणनादेनपांडवस्यमहात्मनः केषांचिदल्पसत्वानांतंश्रुत्वानिनदंमृधे शस्त्राणिन्यपतन्हस्तेभ्यः केषांचिच्चासवोद्रवन् वित्रस्तानि
चसर्वाणिशकृन्मूत्रंप्रसुस्रुवुः वाहनानि चसर्वाणिबभूवुर्विमनांसिच प्रादुरासन्निमित्तानिघोराणिसुबहून्युत गृध्रकंकवलै
श्चासीदंतरिक्षंसमावृतं तस्मिन्सुतुमुलेराजन्कर्णभीमसमागमे ततःकर्णस्तुविंशत्याशराणांभीममार्दयत् विव्याधचास्यत
रितःसूतंपंचभिराशुगैः प्रहस्यभीमसेनोपिकर्णंप्रत्याद्रवद्रणे सायकानांचतुःषष्ट्याक्षिप्रकारीमहायशाः तस्यकर्णोमहेष्वासः
सायकांश्चतुरोक्षिपत् असंप्राप्तांश्चतान्भीमः सायकान्नतपर्वभिः चिच्छेदबहुधाराजन्दर्शयन्पाणिलाघवं तंकर्णश्छादया
मासशरव्रातैरनेकशः संछाद्यमानःकर्णेनबहुधापांडुनंदनः चिच्छेदचापंकर्णस्यमुष्टिदेशेमहारथः विव्याधचैनंबहुभिः
सायकैर्नतपर्वभिः अथान्यद्धनुरादायसज्यंकृत्वाचसूतजः विव्याधसमरेभीमंभीमकर्मामहारथः तस्यभीमोभृशंक्रुद्ध
स्त्रीञ्छरान्नतपर्वणः निचखानोरसितदासूतपुत्रस्यपार्थिव तैःकर्णोराजतशरैरुरोमध्यगतैस्तदा महीधरइवोदग्र
स्त्रिशृंगोभरतर्षभ सुस्रावचास्यरुधिरंविद्धस्यपरमेषुभिः धातुप्रस्कंदिनःशैलाद्यथागैरिकधातवः किंचिद्विचलितःकर्णःसु
प्रहाराभिपीडितः आकर्णपूर्णमाकृष्यभीमंविव्याधसायकैः सशरैरर्दितस्तेनकर्णेनदृढधन्विना धनुर्ज्यामच्छिनत्तूर्णंभीम
स्तस्यक्षुरेणह सारथिंचास्यभल्लेनरथनीडादपातयत् वाहांश्चचतुरस्तस्यव्यसूंश्चक्रेमहारथः हताश्वात्तुरथात्कर्णः समाप्लु
त्यविशांपते स्यंदनंवृषसेनस्यतूर्णमापुप्लुवेभयात् निर्जितस्तुरणेकर्णोभीमसेनःप्रतापवान् ननादबलवान्नादंपर्जन्य

स्वनिनंहोपमं तस्यतन्निनदंश्रुत्वा प्रहृष्टोभूद्युधिष्ठिरः कर्णंपराजितंमत्वाभीमसेनेनसंयुगे सशंखवाणनिनदंहर्षाद्राजा
स्ववाहिनी चक्रेयुधिष्ठिरः संविग्रहर्षनादैश्चसंकुलां शत्रुसेनाध्वनिंश्रुत्वातावकाह्यनरर्षभ शं गांडीवंव्याक्षिपत्पार्थः कृष्णो
प्यब्जमवादयत् तमंतर्धायनिनादंभीमस्यनर्दतोध्वनिः अश्रूयततद्राजन्सर्वसैन्येषुदारुणः ततोव्यायच्छतांवीरौपृथ
गरिंदमौ मृदुपूर्वंतुराधेयोदृढपूर्वंतुपांडवः॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभीमसेनप्रवेशेकर्णपराजयः संजय
उवाच तस्मिन्विलुलितेसैन्येसैंधवायार्जुनेगते सात्यकौभीमसेनेचपुत्रस्तेद्रोणमभ्ययात् त्वरन्नेकरथेनैवबहुकृत्यंविचिंतय
न् सरथस्तवपुत्रस्तुत्वरयापरयायुतः तूर्णमभ्यद्रवद्द्रोणंमनोमारुतवेगवान् द्रोणांतिकमुपागम्यराजारक्तांतलोचनः स
संभ्रममिदंवाक्यमब्रवीत्कुरुनंदन अर्जुनोभीमसेनश्चसात्यकिश्चापराजितः विजित्यसर्वसैन्यानिसुमहांतिमहारथाः
संप्राप्ताःसिंधुराजस्यसमीपमनिवारिताः व्यायच्छंतिचतत्रापिसर्वएवमहारथाः यदितावद्रणेपार्थोव्यतिक्रांतोमहारथाः
कथंसात्यकिभीमाभ्यांव्यतिक्रांतोसिमानद आश्चर्यभूतंलोकेस्मिन्समुद्रस्येवशोषणं निर्जयस्तवविप्राग्र्यसात्वतेनार्जुने
नच तथैवभीमसेनेनलोकःसंवदतेभृशं कथंद्रोणोजितःसंख्येधनुर्वेदस्यपारगः इत्येवंब्रुवतेयोधाश्श्रद्धेयमिदंतव न
शएवतुमेनूनंमंदभाग्यस्यसंयुगे यत्रत्वांपुरुषव्याघ्रंव्यतिक्रांतास्त्रयोरथाः एवंगतेतुकृत्येस्मिन्ब्रूहियत्तेविवक्षितं य
द्गतंगतमेवेहशेषंचिंतयमानद यत्कृत्यंसिंधुराजस्यप्राप्तकालमनंतरं तत्संविधीयतांक्षिप्रंसाधुसंचिंत्यनोद्विज द्रोणउवाच

द्रो० १४७

चिरसंवद्धविधंतातयत्कृत्स्नंतच्छृणुष्वमे त्रयोहिसमतिक्रांताः पांडवानांमहारथाः यावद्देवमयंपश्चात्तावद्देवपुरस्सरं तद्द्वीपस्त
रंमन्येपत्रकृत्स्नधनंजयौ सापुरस्ताच्चपश्चाच्चगृहीताभारतीचमूः तत्रकृत्समहंमन्येसैंधवस्याभिरक्षणं मनोरथस्यतमस्तात
क्रुद्धाद्भीतोधनंजयात् गतौचसैंधवंभीमोयुयुधानश्चकोरवौ संप्राप्तंतदिदंद्यूतंयच्छकुनिबुद्धिमं नसभायांजयोवृत्तोनापि
तत्रपराजयः इहनोग्लहमानानांमद्यतातजयाजयौ यान्स्मतान्ग्लहतेघोराञ्छकुनिः कुरुसंसदि अक्षान्संमन्यमानः साक्षशरास्ते
हिदुरासदाः नतेक्षानिशिताघोराः शरायुष्मत्तनुछिदः यत्रतेवहवस्तातकौरवेयाव्यवस्थिताः सेनांदुरोदरंविद्धिशरानक्षा
न्विशांपते ग्लहंचसैंधवंराजन्नत्रद्यूतस्यनिश्चयः सैंधवेतुमहद्यूतंसमासक्तंपरैःसह अत्रसर्वंमहाराजत्यक्त्वाजीवित
मात्मनः सैंधवस्यरणेरक्षांविधिवत्कर्तुमर्हथ तत्रनोग्लहमानानांध्रुवौजयपराजयौ यत्रतेपरमेष्वासायत्तारक्षंति
सैंधवं तत्रगच्छस्वयंशीघ्रंतांश्चरक्षस्वरक्षिणः इहैवत्वहमासिष्येप्रेषयिष्यामिचापरान् निरोत्स्यामिचपांचालान्सहितान्
पांडुसंजयैः ततोदुर्योधनोगच्छत्तूर्णमाचार्यशासनात् उद्यम्यात्मानमुग्रायकर्मणेसपदानुगः चक्ररक्षौतुपांचाल्यौ
युधामन्यूत्तमौजसौ बाह्येनसेनामभ्येत्यजग्मतुःसव्यसाचिनं तौ[illegible]तुपूर्वंमहाराजवारितौकृतवर्मणा प्रविष्टेत्वर्जुने
राजंस्तवसैन्यंयुयुत्सया पार्श्वभित्त्वाचमूंवीरौप्रविष्टौतववाहिनीं ताभ्यांदुर्योधनःसार्द्धमकरोद्युद्धमुत्तमं त्वरितस्त्वरमाणा
भ्यांभ्रातृभ्यांभारतोबली तावेनमभ्यद्रवतामुद्यतकार्मुकौ महारथसमाख्यातौक्षत्रियप्रवरौयुधि तममविध्यद्युधामन्युस्त्रिं

राम० १४७

शताकंकेपत्रिभिः त्रिंशत्यासारथिंचास्यचतुर्भिश्चतुरंगहयान् दुर्योधनोयुधामन्योर्ध्वजमेकेषुणाछिनत् एकेनकार्मुकंचास्यच
कर्त्ततनयस्तव सारथिंचास्यभल्लेनरथनीडाद्रणाहरत् ततोविद्याधिरेतीत्तौश्चतुर्भिश्चतुरंगहयान् युधामन्युश्चसंक्रुद्धः शरांस्त्रि
शतमाहवे त्वसजत्तवपुत्रस्य त्वरमाणःस्तनांतरे तथोत्तमौजाःसंक्रुद्धःशरैर्हेमविभूषितैः अविध्यत्सारथिंचास्यप्राहिणोद्
यमसादनं दुर्योधनोपिराजेंद्रपांचाल्यस्योत्तमौजसः जघानचतुरोस्याश्वानुभौचपार्ष्णिसारथी उत्तमौजाहताश्वस्तुहतसूत
श्चसंयुगे आरुरोहरथंभ्रातुर्युधामन्योरभित्वरन् सरथंप्राप्यतंभ्रातुर्दुर्योधनहयांच्छरैः बहुभिस्ताडयामासतेहताःप्राप
तन्भुवि हयेषुपतितेषुस्यचिच्छेदपरमेषुणा युधामन्युर्द्धनुःशीघ्रंशरावापंचसंयुगे हताश्वसूतात्सरथादवतीर्यनरा तं दे
धिपः गदामादायतेपुत्रःपांचाल्यौतौसमाद्रवत् तमापतंतंसंप्रेक्ष्यक्रुद्धंकुरुपतिंतदा अवप्लुत्यरथोपस्थाद्युधाम
न्यूत्तमौजसौ ततःसहेमचित्रांगंगदयासंदनंगदी संक्रुद्धःपोथयामाससाश्वसूतध्वजंनृप भंक्त्वारथंसपुत्रस्तेह
ताश्वोहतसारथिः मद्रराजरथंतूर्णमारुरोहपरंतपः पांचालानांततोमुख्यौराजपुत्रौमहारथौ रथावन्यौसमारुह्यवी
भत्सुमभिजग्मतुः॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभीमसेनप्रवेशे संजयउवाच वर्त्तमानेमहाराजसंग्रामेलोमहर्ष
णे व्याकुलेषुचसर्वेषुपीड्यमानेषुसर्वशः राधेयोभीममानर्छद्युद्धायभरतर्षभ यथानागोवनेनागंमत्तोमत्तमभिद्रवन् धृत
राष्ट्रउवाच यौतौकर्णश्चभीमश्चसंप्रयुद्धौमहाबलौ अर्जुनस्यरथांतेकीदृशःसोभवद्रणः पूर्वंहिनिर्जितःकर्णोभीमसेन

द्रो॰
१४८

नसंयुगे कथंभयः सरथेयोभीममागान्महारथः भीमोवासूततनयंप्रत्युद्यातःकथंरणे महारथंसमरख्यातंपृथिव्यां
प्रवृंररथं द्रोणभीष्मावतिक्रम्यधर्मराजोयुधिष्ठिरः नान्यतोभयमास्थायपथाकर्णान्महारथात् भयाद्यस्यमहावाहोन
नेमैतेवहुलाःसमाः चिंतयन्निस्सशेतेवीर्यंराधेयस्यमहात्मनः तंकथंसूतपुत्रंतुभीमेयोधयत्ताहवे ब्रह्मण्यंवीर्यसंपन्नंसम
मेष्वनिवर्त्तिनं कथंकर्णंयुधांश्रेष्ठंयोधयामासपांडवः योनौसमीयतुर्वीरौवैकर्त्तनवृकोदरौ कथंतावत्रयुध्येतांमहावल
पराक्रमौ भ्रातृत्वंदर्शितंपूर्वंघृणीचापिससूतजः कथंभीमेनयुयुधेकुंत्यावाक्यमनुस्मरन् भीमोवासूतपुत्रेणस्मरन्वैरंपुरा
कृतं अयुध्यत्तकथंशूरः कर्णेनसहसंयुगे आशास्तेचसदासूतपुत्रोदुर्योधनोमम कर्णोजेष्यतिसंग्रामेसमस्तान्पांड
वानिति जयाशायत्रपुत्रस्यममममंदस्यसंयुगे सकथंभीमकर्माणंभीमसेनमयोधयत् यंसमासाद्यपुत्रैर्मेकृतंवैरंमहा
रथैः तंसूततनयंतातकथंभीमोऽभ्ययोधयत् अनेकान्विप्रकारांश्चसूतपुत्रसमुद्भवान् स्मरमाणःकथंभीमोयुयुधेस
तसूनुना योऽजयत्पृथिवींसर्वांरथेनैकेनवीर्यवान् तंसूततनयंयुद्धेकथंभीमोह्ययोधयत् योजातःकुंडलाभ्यांचक
वचेनसहैवच तंसूतपुत्रंसमरेभीमःकथमयोधयत् यथातयोर्युद्धमभूद्यश्चासीद्विजयस्तयोः तन्ममाचक्ष्वतत्वेन
कुशलोह्यसिसंजय संजयउवाच भीमसेनस्तुराधेयमुत्सृज्यरथिनांवरं इयेषगंतुंयत्रास्तांवीरौकृष्णधनंजयौ
तंप्रयांतमभिद्रुत्यराधेयःकंकपत्रिभिः अभ्यवर्षन्महाराजमेघोवृष्ट्येवपर्वतं फुल्लतापंकजेनेववक्त्रेणावि
हसन्वली आजुहावरणेयांतंभीममाधिरथिस्तदा कर्णउवाच भीमाहितैस्त्ववरणो

राम॰
१४८

स्वेद्गीपनविभावितः तद्दर्शयसि कस्मान्मे एवं पार्थिव रिहस्त्वया कुंत्याः पुत्रस्य सदृशं नेदं पांडवनंदन तेन मामभितः स्थित्वा श
रवर्षैरवाकिरत् भीमसेनस्तु ह्लाह्लानं कर्णेनामर्षयद्युधि अर्द्धमंडलमावृत्य सूतपुत्रमयोधयत् अवक्रगामिभिर्बाणैरभ्यवर्षन्म
हायशाः दंशितं हृष्टमायांतं सर्ववेशास्त्रविशारदं विधित्सुः कलहं सांतं जिघांसुः कर्णमन्तिणोत् तं च हत्वेतरान्सर्वान् हन्तुकामो म
हाबलः तस्मै व्यसृजदुग्राणि विविधानि परंतपः अमर्षी पांडवः क्रुद्धः शरवर्षाणि मारिष तस्य तानीषुवर्षाणि मत्तद्विरद
मा ५ गामिनः सूतपुत्रोऽस्त्रमायाभिरग्रसत्सुमहास्त्रवित् स यथावन्महाबाहुर्विद्यया वै सुपूजितः आचार्यवन्महेष्वासः कर्णः पर्यचर
द्बली युध्यमानं तु संरंभाद्भीमसेनं हसन्निव अभ्यभाषत कौंतेयं कर्णो राजन्वृकोदरं तन्नामृष्यत कौंतेयः कर्णस्य स्मित
माहवे युध्यमानेषु वीरेषु पश्यत्सु च समंततः तं भीमसेनः संप्राप्तं वत्सदंतैस्तनांतरे विव्याध बलवान्क्रुद्धः तोत्त्रैरिव
महाद्विपं पुनश्च सूतपुत्रं तु स्वर्णपुंखैः शिलाशितैः सुमुक्तैश्चित्रवर्माणं निर्बिभेद त्रिसप्तभिः कर्णो जांबूनदैर्जा
लैः संछन्नान्वातरंहसः हयान्विव्याध भीमस्य पंचभिः पंचभिः शरैः ततो बाणमयं जालं भीमसेनरथं प्रति कर्णेन वि
हितं राजन्निमेषार्द्धाददृश्यत सरथः सध्वजस्तत्र ससूतः पांडवस्तदा प्राच्छाद्यत महाराज कर्णचापच्युतैः शरैः तस्य क
र्णश्चतुःषष्ट्या व्यधमत्कवचं दृढं क्रुद्धश्चाप्यहनत्पार्थं नाराचैर्मर्मभेदिभिः ततोऽचिंत्य महाबाहुः कर्णकार्मुकनिःसृ
तान् समाश्लिष्यदसंभ्रांतः सूतपुत्रं वृकोदरः स कर्णचापप्रभवानिषूनाशीविषोपमान् बिभ्रद्भीमो महाराज न जगाम व्य

णंरणे ततो हात्रिंशता भल्लैर्निशितैस्तिग्मतेजसैः विव्याध समरे कर्णं भीमसेनः प्रतापवान् अयत्नेनैव तं कर्णः शरैर्भृ
शमवाकिरन् भीमसेनं महाबाहुं सैंधवस्य वधैषिणं मृदुपूर्वं तु राधेयो भीममाजावयोधयत् क्रोधपूर्वं तथा भीमः पूर्ववै
रमनुस्मरन् तं भीमसेनो नामृष्यदवमानममर्षणः सतस्मै व्यसृजत्तूर्णं शरवर्षममित्रहा ते शराः प्रेषिता स्तेन भीमसेनेन संयु
गे निपेतुः सर्वतो वीरे कूजन्त इव पक्षिणः हेमपुंखाः प्रसन्नाग्रा भीमसेनधनुश्च्युताः प्राच्छादयंस्ते राधेयं शलभा इव पावकं
कर्णस्तु रथिनां श्रेष्ठ श्छाद्यमानः समन्ततः राजन्व्यसृजदुग्राणि शरवर्षाणि भारत तस्य तानशनिप्रख्यानिषून्समरशो
भिनः चिच्छेद बहुभिर्भल्लैरसंप्राप्तान्वृकोदरः पुनश्च शरवर्षेण छादयामास भारत कर्णं वैकर्तनो युद्धे भीमसेनमरिं
दमः तत्र भारत भीमं तु दृष्टवन्तः स्म सायकैः समाचिततनुं संख्ये श्वाविधं शललैरिव हेमपुंखाञ्छिलाधौतान्कर्णचापच्यु
तांछरान् दधार समरे वीरः स्वरश्मीनिव रश्मिमान् रुधिरोक्षितसर्वाङ्गो भीमसेनो व्यराजत समृद्धकुसुमापीडो वसंते ऽशो
कवृक्षकः तत्तु भीमो महाबाहोः कर्णस्य चरितं रणे नामृष्यत महाबाहुः क्रोधादुद्वृत्तलोचनः स कर्णं पंचविंशत्या नारा
चानां समर्पयत् महीधरमिव श्वेतं गूढपादैर्विषोल्बणैः पुनरेव च विव्याध षड्भिरष्टाभिरेव च मर्मस्वमरविक्रांतः
सूतपुत्रं तनुत्यजं पुनः सेन बाणेन भीमसेनः प्रतापवान् चिच्छेद कार्मुकं तूर्णं कर्णस्य प्रहसन्निव जघान चतुरश्चाश्वान्सूतं
च त्वरितः शरैः नाराचैरर्करश्म्याभैः कर्णं विव्याध चोरसि ते जग्मुर्द्धरणीमाशु कर्णं निर्भिद्य पत्रिणः यथा जलधरं भित्वा दि
वाकरमरीचयः स वैकल्यं महत्प्राप्य छिन्नधन्वा शरार्दितः तथा पुरुषमानी स प्रत्यपायाद्रथान्तरं इति द्रोणपर्वणि जयद्रथ
वधे भीमसेनप्रवेशे कर्णपराजयः धृतराष्ट्र उवाच ॥

यस्मिन्नजयपाशामहती पुत्राणांममसंजय तंभीमादिमुखंदृष्ट्वाकिंनुदुर्योधनोऽब्रवीत् कथंचयुयुधेभीमोवीर्यश्लाघीमहाबलः
कर्णोवासमरेतातकिमकार्षीदतःपरं भीमसेनंरणेदृष्ट्वाज्वलंतमिवपावकं संजयउवाच रथमन्यंसमास्थायविधिवत्कल्पितंपु
नः अभ्ययात्संशरंकर्णोवातोद्धूतइवार्णवः क्रुद्धमाधिरथिंदृष्ट्वापुत्रास्तवविशांपते भीमसेनममन्यंतवैश्वानरमुखेहुतं चापशब्दं
ततः कृत्वातलशब्दंचभैरवं अभ्यद्रवत्तराधेयोभीमसेनरथंप्रति पुनरेवततोराजन्घोरआसीत्समागमः वैकर्तनस्यशूरस्य
भीमस्यचमहात्मनः संरब्धौहिमहाबाहूपरस्परवधैषिणौ अन्योन्यमीक्षांचक्रातेदहंताविवलोचनैः क्रोधरक्तेक्षणौतीव्रौ
निश्वसंताविवोरगौ शूरावन्योन्यमासाद्यततस्तौतुअरिंदमौ व्याघ्राविवसुसंरब्धौश्येनाविवचशीघ्रगौ शरभाविवसंक्रुद्धौयु
युधातेपरस्परं ततोभीमःस्मरन्क्लेशानक्षद्यूतेवनेपिच विराटनगरेचैवदुःखंप्राप्तमरिंदमः राष्ट्राणांस्फीतरत्नानांहर
णंचतवात्मजैः सततंचपरिक्लेशान्सपुत्रेणत्वयाकृतान् दग्धुमैच्छन्समयः कुंतीसपुत्रांत्वमनागसं कृष्णायाश्चपरिक्लेशंस
भामध्येदुरात्मभिः केशपक्षग्रहंचैवदुःशासनकृतंतथा परुषाणिचवाक्यानिकर्णेनोक्तानिभारत पतिमन्यंपरीप्सेतिनसंति
पतयस्तव पतितानरकेपार्थाःसर्वेषंढतिलोपमाः समक्षंतवकौरव्ययदूचुःकौरवास्तदा दासीभोगेनकृष्णांचभोक्तुकामाः
सुतास्तव यच्चापितान्प्रव्रजतः कृष्णाजिननिवासिनः परुषाण्युक्तवान्कर्णःसभायांसन्निधौतव तृणीकृत्यचयत्पार्थास्त
वपुत्रोववल्गह विषमस्थान्समस्थोहिसंरब्धोगतचेतसः बाल्यात्प्रभृतिचारिघ्नःस्वानिदुःखानिचिंतयन् निरविद्यतधर्मात्माजी

द्रो०
१५०

विंतेनवृकोदरः ततोविस्फार्यसुमहद्धेमपृष्ठंदुरासदं चापंभरतशार्दूलसमालोलाकर्णमभ्ययात् ससायकमयेज्जीलि
भीमः कर्णरथंप्रति भानुमद्भिःशिलाधौतैर्भानोःप्राच्छादयत्प्रभां ततःप्रहस्याधिरथिस्तूर्णमाप्यशिलाशितैः व्य
धमद्भीमसेनस्यशरजालानिपत्रिभिः महारथोमहाबाहुर्महाबाणोमहाबलः विव्याधाधिरथिर्भीमंनवभिर्निशितैस्त
दा संतोत्रैरिवमातंगंवार्यमाणःपतत्रिभिः अभ्यधावत्संभ्रान्तःसूतपुत्रंवृकोदरः तमापतंतंवेगेनरभसंपाण्डवर्षभं कर्णः
प्रत्युद्ययौयुद्धेमत्तोमत्तमिवद्विपं ततःप्रध्माप्यजलजंभेरीशतसमस्वनं अक्षुभ्यतबलंघोरंउद्धूतइवसागरः तदुद्धूतंबलंहस्त्य
श्वरथपत्तिमत् भीमःकर्णसमासाद्यच्छादयामाससायकैः अश्वानृक्षसवर्णाञ्श्चहंसवर्णैर्हयोत्तमैः व्यामिश्रयद्र
णेकर्णःपाण्डवंछादयञ्छरैः ऋक्षवर्णान्हयान्हंसैर्मिश्रान्मारुतरंहसः निरीक्ष्यतवपुत्राणांहाहाभूतमभूद्बलं तेहया
वह्वशोभंतमिश्रितावातरंहसः सितासिता महाराजयथाव्योम्निवलाहकाः संरब्धौक्रोधताम्राक्षौप्रेक्ष्यकर्णवृकोदरौ
संत्रस्ताःसमकंपंतत्वदीयानांमहारथाः यमराष्ट्रोपमंघोरमासीदायोधनंतयोः दुर्दर्शंभरतश्रेष्ठप्रेतराजपुरंयथा
समाजमिवतच्चित्रंप्रेक्षमाणामहारथाः नाविज्ञायंतजयंव्यक्तमेकस्यवमहारणे तयोःप्रैक्षंतसंमर्दंसंनिकृष्टंमहास्त्रयोः
तवदुर्मंत्रितेराजन्सपुत्रस्यविशांपते छादयंतौहिशत्रुघ्नावन्योन्यंसायकैःशितैः शरजालाहतंव्योमचक्रातेशरवृष्टिभिः
तावन्योन्यंजिघांसंतौशरैस्तीक्ष्णैर्महारथौ प्रेक्षणीयतरावास्तांवृष्टिमंताविवांबुदौ सुवर्णविकृतान्बाणान्विमुंचंतावरिं
दमौभास्वरंव्योमचक्रातेमहोल्काभिरिवप्रभो ताभ्यांमुक्ताःशराराजन्गार्ध्रपक्षाश्चकाशिरे श्रेण्यःशरदिमत्तानांसारसानां

६२

राम०
१५०

श्रीरामः

संसक्तंसंतवपुत्रेणदृष्ट्वाभीममरिंदमं अतिभारममन्येतांभीमेकृष्णधनंजयौ तत्राधिरथिभीमाभ्यांशरैर्मुक्तैर्दृढंहताः
द्रुक्मपुत्रा तम तिक्रम्यपेतुरश्वनरद्विपाः पतद्भिःपतितैश्चान्यैर्गतासुभिरनेकशः कृताराजन्महाराजपुत्राणांतेजन
क्षयः मनुष्याश्वगजानांचशरीरैर्गतजीवितैः संछन्नाभूमिःसंजज्ञेसंवृताभरतर्षभ॥ ॥इतिमहाभारतेद्रोणपर्वणिराज
पद्दयवधेभीमसेनप्रवेशे धृतराष्ट्र॥३० अत्यद्भुतमहंमन्येभीमसेनस्यविक्रमं यत्कर्णंयोधयामाससमरेलघुविक्रमं
६५ त्रिदशानपिचोद्युक्तान्सर्वशस्त्रधरान्युधि धारयेद्योरणेकर्णःसयक्षासुरमानवान् सकथंपांडवंयुद्धेभ्राजमा
नमिवश्रिया नातरत्संयुगेपार्थंतन्ममाचक्ष्वसंजय कथंचयुद्धंसंभूतंतयोःप्राणदुरोदरे अत्रमन्येसमायत्तेजयोवाजय
एववा कर्णंप्राप्यरणेसूतममपुत्रःसुयोधनः जेतुमुत्सहतेपार्थान्सगोविन्दान्ससात्वतान् श्रुत्वातुनिर्जितंक
र्णमसकृद्भीमकर्मणा भीमसेनेनसमरेमोहआविशतीवमां विनष्टान्कौरवान्मन्येममपुत्रस्यदुर्नयैः नहिकर्णोमहे
ष्वासान्पार्थाञ्जेष्यतिसंजय कृतवान्यानियुद्धानिकर्णःपांडुसुतैःसह सर्वत्रपांडवाःकर्णमजयंतरणाजिरे अजे
याःपांडवास्तातदेवैरपिसवासवैः नचतद्बुध्यतेमंदःपुत्रोदुर्योधनोमम धनंधनेश्वरस्येवहृत्वापार्थस्यमेसुतः मधुप्रे
प्सुरिवाबुद्धिःप्रपातंनावबुध्यते निकृत्यानिकृतिप्रज्ञोराज्यंहृत्वामहात्मनां जितमित्येवमन्वानःपांडवानवमन्यत पुत्र
स्नेहाभिभूतेनमयावाप्यकृतात्मना धर्मेस्थितामहात्मानोनिकृताःपांडुनंदनाः शमकामःसदार्येहीर्दीर्घप्रेक्षीयुधि
ष्ठिरः अशक्तइतिमत्वातुपुत्रैर्ममनिराकृतः तानिदुःखान्यनेकानिविप्रकारांश्चसर्वशः हृदिकृत्वामहाबाहुर्भीमो

द्रो॰ १५१

युध्यतस्तत्र जं तस्मान्मे संजय ब्रूहि कर्णभीमौ यथा रणे अयुध्येतां युधि श्रेष्ठौ परस्परवधैषिणौ संजय उवाच शृणु राजन्यथा वृ
त्तं संग्रामं कर्णभीमयोः परस्परवधप्रेप्सु वने कुंजरयोरिव राजन्वैकर्तनो भीमं क्रुद्धः क्रुद्धमरिंदमं पराक्रांतं पराक्रम्य विव्याध त्रिंश
ता शरैः महावेगैः प्रसन्नाग्रैः शातकौंभपरिष्कृतैः आहनद्भरतश्रेष्ठ भीमं वैकर्तनः शरैः तस्यास्यतो धनुर्भीमश्चकर्त्त निशि
तैस्त्रिभिः रथनीडाच्च यंतारं भल्लेनापातयत् क्षितौ स कांक्षन्भीमसेनस्य वधं वैकर्तनो भृशं शक्तिं कनकवैडूर्यचित्रदंडां परा
मृशत् प्रगृह्य च महाशक्तिं कालशक्तिमिवापरां समुत्क्षिप्य च राधेयः संधाय च महाबलः चिक्षेप भीमसेनाय जीवितांतकरी
मिव शक्तिं विसृज्य राधेयः पुरंदर इवाशनिं ननाद सुमहानादं बलवान्सूतनंदनः तं च नादं ततः श्रुत्वा पुत्रास्ते हर्षिता भ
वन् तां कर्णभुजनिर्मुक्तामर्कवैश्वानरप्रभां शक्तिं वियति चिच्छेद भीमः सप्तभिराशुगैः छित्त्वा शक्तिं ततो भीमो निर्मुक्तोर
गसन्निभां मार्गमाणश्च प्राणान्सूतपुत्रस्य मारिष प्राहिणोत्क्रुद्धसंरंभः शरान्बर्हिणवाससः स्वर्णपुंखांछिलाधौतान्
यमदंडोपमान्मृधे कर्णोप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदं विकृष्य च महच्चापं व्यसृजत्सायकांस्तदा तान्पांडुपुत्रश्चिच्छे
द नवभिर्नतपर्वभिः वसुषेणेन निर्मुक्तान्नव राजन्महाशरान् छित्त्वा भीमो महाराज नादं सिंह इवानदत् तौ वृषाविव नर्दंतौ
बलिनौ वाशितांतरे शार्दूलाविव चान्योन्यमामिषार्थेऽभ्यगर्जतां अन्योन्यं प्रजिहीर्षंतावन्योन्यस्यांतरैषिणौ अन्योन्यमभि
वीक्षंतौ गोष्ठेष्विव महर्षभौ महागजाविवासाद्य विषाणाग्रैः परस्परं शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः निर्दहं
तौ महाराज शस्त्रवृष्ट्या परस्परं अन्योन्यमभिवी

न्तौ कोपादुद्वृत्तलोचनौ । प्रहसंतौ तथान्योन्यं भर्त्सयंतौ मुहुर्मुहुः शंखशब्दं च कुर्वाणौ युयुधाते परस्परं तस्य भीमः पुनश्चापं मुष्टौ चिच्छेद मारिष शंखवर्णांश्च
तानश्वान्बाणैर्निन्ये यमक्षयं सारथिं च तथाप्यस्य रथनीडादपातयत् ततो वैकर्तनः कर्णः [illegible] चिंतां प्रापदुरत्ययां संछाद्यमानः समरे हताश्वो हतसारथिः
मोहितः शरजालेन कर्तव्यं नाभ्यपद्यत तथा कृच्छ्रगतं दृष्ट्वा कर्णं दुर्योधनो नृपः वेपमानः स्वक्रोधाद्व्यादिदेशाथ दुर्जयं गच्छ दुर्जय राधेयं पुरा ग्रसति पांडवः जहि
तुंवरकं क्षिप्रं कर्णस्य बलमादधत् एवमुक्तस्तथेत्युक्त्वा तव पुत्रेण वात्मजः अभ्यद्रवद्भीमसेनं व्यासक्तं विकिरंछरैः स भीमं नवभिर्बाणैरश्वानष्टभिरर्पयत् षड्भिः
सूतं त्रिभिः केतुं पुनस्तं चापि सप्तभिः भीमसेनोपि संक्रुद्धः साश्वयंतारमाशुगैः दुर्जयं भिन्नमर्माणमनयद्यमसादनं स्वलंकृतं क्षितौ क्षीणं चेष्टमानं यथोरगं
नुदन्नार्तस्तव सुतं कर्णश्चक्रे प्रदक्षिणं स तु तं विरथं कृत्वा स्मयन्नत्यंतवैरिणं समाचिनोद्बाणगणैः शतघ्नीमिव शंकुभिः तथाप्यतिरथः कर्णो भिद्यमानः स
सायकैः नजहौ समरे भीमं क्रुद्धरूपं परंतपः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे संजय ८० सर्वथा विरथः कर्णः पुनर्भीमेन निर्जि
तः रथमन्यं समास्थाय सद्यो विव्याध पांडवं महागजाविवासाद्य विषाणाग्रैः परस्परं शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः अथ कर्णः शरव्रातैर्भीमसेनं स
मार्पयत् ननाद च महानादं पुनर्विव्याध चोरसि तं भीमो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः पुनर्विव्याध सप्तत्या शराणां नतपर्वणां कर्णं तु नवभिर्भीमो
भित्त्वा राजन्स्तनांतरे ध्वजमेकेन विव्याध सायकेन शितेन ह सायकानां ततः पार्थस्त्रिषष्ट्या प्रत्यविध्यत तोत्रैरिव महानागं कशाभिरिव वाजिनं सोतिविद्धो रा ९
महाराज पांडवेन यशस्विना सृक्किणी लेलिहन्वीरः क्रोधसंरक्तलोचनः ततः शरं महाराज सर्वकायावदारणं प्राहिणोद्भीमसेनाय बलायेंद्र इवाशनिं स
निर्भिद्य रणे पार्थं सूतपुत्रधनुश्च्युतः अगच्छद्दारयन्भूमिं चित्रपुंखः शिलीमुखः ततो भीमो महाबाहुः क्रोधसंरक्तलोचनः सर्वकल्पां चतुष्किष्कुं गुर्वीं रुक्मां
[illegible]ग्रहीं गदां प्राहिणोत्सूतपुत्राय षडस्रिमविचारयन् तया जघानाधिरथेश्छित्त्वा सूतमथाहनच्छरैः हताश्वं सूतमुत्सृज्य स रथं पतितध्वजं विस्फारय
न्धनुः कर्णस्तस्थौ भारत दुर्मनाः तत्राद्भुतमपश्याम राधेयस्य पराक्रमं । विरथो रथिनां श्रेष्ठो वारयामास यद्रिपुं विरथं तं नरश्रेष्ठं दृष्ट्वाधिरथिमाहवे दुर्यो
धनस्ततो राजन्नभ्यभाषत दुर्मुखं । एष दुर्मुख राधेयो भीमेन विरथीकृतः । तं रथेन नरश्रेष्ठं संपादय महारथं दुर्योधनवचः श्रुत्वा ततो भारत दुर्मुखः त्वरमाणो
भ्ययात्कर्णं भीमं चावारयच्छरैः दुर्मुखं प्रेक्ष्य संग्रामे सूतपुत्रपदानुगं । वायुपुत्रः प्रहृष्टोभूत्सृक्किणी परिलेलिहन् । ततः कर्णं महाराज वारयित्वा शिलीमुखैः
दुर्मुखस्य रथं शीघ्रं प्रेषयामास पांडवः । तस्मिन्क्षणे महाराज नवभिर्नतपर्वभिः । सुमुखैर्दुर्मुखं भीमः शरैर्निन्ये यमक्षयं । ततस्तमेवाधिरथिः स्यंदनं दुर्मुखे हते ॥
आस्थितः प्रबभौ राजन्दीप्यमान इवांशुमान् । शयानं भिन्नवर्माणं दुर्मुखं शोणितोक्षितं । दृष्ट्वा कर्णोश्रुपूर्णाक्षो मुहूर्तं नाभ्यवर्तत । तं गतासुमतिक्रम्य कृत्वा

सदश्वान्साधुवाहिनः गदया भारत क्रुद्धो वज्रेणेव [illegible] ततो भीमो महाबाहुः क्षुराभ्यां भरतर्षभ ध्वजमाधिरथे ६४

द्रो॰
१५२

कर्णः प्रहसितोणं। दीर्घमुष्णं च निश्वसन्नीतेनाकिंचिन्मत्तमपघतात्। तस्मिंस्तु विवरे राजन्नाराचानार्धगासमः। प्राहिणोत्सूतपुत्राय भीमसेनश्चतुर्दश। ते तस्य कव
चं भित्वा स्वर्णपुंखा महेष्वासस्य माधिप। हि मम चित्रा महाराज घोततप तेरि शेदश। अपिवन्त तदुत्तस्य शोणितं तेरक भोजनाः। क्रुद्धा इव मनुष्येंद्र भुजगाः कालनोदि
ताः। प्रसर्पमाणा मेदिन्यां ते व्यरोचंत मार्गणाः। अर्धप्रविष्टाः संरब्धा बिलानीव महोरगाः। तं प्रत्यविध्यद्राधेयो जांबूनदविभूषितैः। चतुर्दशभिरत्युग्रैर्नारा
चैरविचारयन्। ते भीमसेनस्य भुजं सव्यं निर्भिद्य पत्रिणः। प्राविशन्मेदिनीं भीमः क्रौंचपत्ररथा इव। ते व्यरोचंत नाराचाः प्रविशंतो वसुंधरां गच्छत्यस्तं दिनकरे दी
प्यमाना इवांशवः। स निर्भिन्नो रणे भीमो नाराचैर्मर्मभेदिभिः सुस्राव रुधिरं भूरि पर्वतः सलिलं यथा। स भीमस्त्रिभिरायस्तः सूतपुत्रं पतत्रिभिः। सुपर्णवेगै
र्विव्याध सारथिं चास्य सप्तभिः। स विह्वलो महाराज कर्णो भीमबलार्दितः। प्राद्रवज्जवनैरश्वै रणं त्यक्त्वा महायशाः। भीमसेनस्तु विस्फार्य चापं हेमपरिष्कृ
तं आहवेऽतिरथोऽतिष्ठज्ज्वलन्निव हुताशनः। इति द्रोणपर्वणि भीमसेनप्रवेशे धृतराष्ट्र उवाच। दैवमेव परं मन्ये धिक्पौरुषमनर्थकं। यत्राधि
रथिरायत्तो नातरत्पांडवं रणे। कर्णः पार्थान्सगोविंदाञ्जेतुमुत्सहते रणे। न च कर्णसमं योधं लोके पश्यामि कंचन। इति दुर्योधनस्याहमश्रौष
जल्पतो मुहुः। कर्णो हि बलवान्शूरो दृढधन्वा जितक्लमः। इति मामब्रवीत्सूत मंदो दुर्योधनः पुरः। वसुषेणसहायं मां नालं देवापि संयुगे॥
किमु पांडुसुता राजन्गतसत्वा विचेतसः। तत्र तं निर्जितं दृष्ट्वा भुजंगमिव निर्विषं युद्धात्कर्णमपक्रांतं किंस्विद्दुर्योधनोऽब्रवीत् अहो दुर्मुख
मेवैकं युद्धानामविशारदं प्रावेशयद्धुतवहं पतंगमिव मोहितः अश्वत्थामा मद्रराजः कृपः कर्णश्च संगताः न शक्ताः प्रमुखे स्थातुं नूनं भी
मस्य संजय तेऽपि चास्य महाघोरं बलं नागायुतोपमं जानंतो व्यवसायं च क्रूरं मारुततेजसः किमर्थं क्रूरकर्माणं यमकालांतकोपमं ब
लसंरंभवीर्यज्ञाः कोपयिष्यंति संयुगे कर्णस्त्वेको महाबाहुः स्वबाहुबलदर्पितः भीमसेनमनादृत्य रणेऽयुध्यत सूतजः योऽजयत्समरे कर्णं
पुरंदर इवासुरं स पांडुसुतो जेतुं शक्यः केनचिदाहवे द्रोणं यः संप्रमथ्यैकः प्रविष्टो मम वाहिनीं भीमो धनंजयान्वेषी कस्तमर्छेज्जिजीवि
षुः को हि संजय भीमस्य स्थातुमुत्सहतेऽग्रतः उद्यताशनिहस्तस्य महेंद्रस्येव दानवः प्रेतराजपुरं प्राप्य निवर्तेतापि मानवः न भीमसेनं संप्राप्य नि
वर्तेतक

हाचन पतंगाइववह्निंतेप्राविशन्नल्पचेतसः येभीमसेनंसंक्रुद्धमन्वधावन्विमोहिताः यत्तत्सभायांभीमेनममपुत्रवधाश्रयं
उक्तंसंरंभिणोग्रेण कुरूणांशृण्वतांतदा तन्नूनमभिसंचिंत्य दृष्ट्वाकर्णंचनिर्जितं दुःशासनःसहभ्रात्रा भयाद्भीमादुपार
मत् पश्चसंजयदुर्बुद्धिरब्रवीत्समितौमुहुः कर्णोदुःशासनोहंचजेष्यामोयुधिपांडवान् सततंविरथंदृष्ट्वाकर्णंभीमेननिर्जि
तं भत्याख्यानाच्चकृष्णस्यभृशंतप्यतसंजय दृष्ट्वाभ्रातॄन्हतान्संख्येभीमसेनेनदंशितान् आत्मापराधात्सुमहन्नूनंतप्यतिपु
त्रकः कोहिजीवितमन्विच्छन्प्रतीपंपांडवंव्रजेत् भीमंभीमायुधंक्रुद्धंसाक्षात्कालमिवस्थितं वडवामुखमध्यस्थोमुच्येता
पिहिमानवः नभीममुखसंप्राप्तोमुच्येदितिमतिर्मम नपार्थानचपांचालानचकेशवसात्यकी जानंतेयुधिसंरब्धाजीवितं
परिरक्षितुं अहोममसुतानांहिविपन्नसतजीवितं संजयउ० यःसशोचसिकौरव्यवर्तमानेमहाभये त्वमस्यजगतोमू
लंविनाशस्यनसंशयः स्वयंवैरंमहत्कृत्वापुत्राणांवचनेस्थितः उच्यमानोनगृह्णीषेमर्त्यःपथ्यमिवौषधं स्वयंपीत्वा
महाराजकालकूटंसुदुर्जरं तस्मादिदानींफलंकृत्स्नमवाप्नुहिनरोत्तम यत्तुकुत्सयसेयोधान्युध्यमानान्महाबलान्
तत्रतेवर्णयिष्यामियथायुद्धमवर्तत दृष्ट्वाकर्णंतुपुत्रास्तेभीमसेनपराजितं नामृष्यंतमहेष्वासाःसोदर्याः पंचभारत
दुर्मर्षणोदुःसहश्चदुर्मदोदुर्धरोजयः पांडवंचित्रसन्नाहास्तेप्रतीपमुपाद्रवन् तेसमंतान्महाबाहुंपरिवार्यवृकोदरं
दिशःशरैःसमावृण्वंशलभानामिवव्रजैः आगच्छतस्तान्सहसाकुमारान्देवरूपिणः प्रतिजग्राहसमरेभीमसेनो

वि

हसन्निव नवहस्तात्तुततपार्भीमसेनंपुरोगमान् आप्रवर्त्ततराधेयो भीमसेनंमहाबलं विसृजन्विशिखांस्तीक्ष्णान् स्वर्णपुं
खान्शिलाशितान् ततोभीमोभ्यपात्कर्णंवार्यमाणः सुतैस्तव कुरवस्ततः कर्णंपरिवार्यसमंततः आवाकिरनभीमसे
नंशरैः सन्नतपर्वभिः तान्वाणैः पंचविंशत्यासाश्वान्राजन्नरर्षभान् सहतानभीमधनुषोभीमोनिन्येयमक्षयं प्रापतन्स
हैनभ्रष्टैःसार्द्धंसूतैर्गतासवः चित्रपुष्पधराभग्नावातेनेवमहाद्रुमाः तत्राद्भुतमपश्याममभीमसेनस्यविक्रमंकर्णंपर्याधिरथिंयो सं ४
ज धयानस्तवात्मजान् सवार्यमाणोभीमेशिनेबाणैःसमंततः सतपुत्रोमहाराजभीमसेनमवैक्षत तंभीमसेनःसंरंभात्क्रोधसंरक्त
लोचनः विस्फार्यसुमहच्चापमुहुःकर्णमवैक्षत ॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभीमसेनप्रवेशे संजयउ०
तवात्मजांस्तुपतितान्दृष्ट्वाकर्णः प्रतापवान् क्रोधेनमहताविष्टोनिर्विण्णोभूत्सजीवितात् आगस्कृतमिवात्मानंमेनेचा
धिरथिस्तदा यत्प्रत्यक्षंतवसुताभीमेननिहतारणे भीमसेनस्ततःक्रुद्धःकर्णमाधावदसंभ्रमं सभीमंपंचभिर्विद्ध्वाराधेयःस
हसन्निव पुनर्विव्याधसप्तत्यास्वर्णपुंखैःशिलाशितैः अविचिंत्याथतान्वाणान्कर्णेनास्तान्वृकोदरः रणेविव्याधरा
धेयंशतेननतपर्वणां पुनश्चविशिखैस्तीक्ष्णैर्विद्ध्वामर्मसुपंचभिः धनुश्चिच्छेदभल्लेनसूतपुत्रस्यमारिष अथान्य
द्धनुरादायकर्णोभारतदुर्मनाः इषुभिःछादयामासभीमसेनंपरंतपः तस्यभीमोहयान्हत्वाविनिहत्यचसारथिं प्रजहा
समहाहासंकृतेप्रतिकृतेपुनः इषुभिःकार्मुकंचास्यचकर्त्तपुरुषर्षभः तत्पपातमहाराजस्वर्णपृष्ठंमहास्वनं अवारोह
द्रथात्तस्मादथकर्णोमहारथः गदांगृहीत्वासमरेभीमायप्राहिणोद्रुषा तामापतंतीमालक्ष्यभीमसेनोमहागदां

शौरेरथापश्यद्राजन्सर्वसैन्यस्यपश्यतः ततोबाणसहस्राणिप्रेषयामासपांडवः सूतपुत्रवधाकांक्षीत्वरमाणःपराक्र
मी तानिषुभिः कर्णोवारयित्वामहामृधे कवचंभीमसेनस्यपातयामाससायकैः अथैनंपंचविंशत्यानाराचानांस
मार्पयत् पश्यतांसर्वसैन्यानांतदद्भुतमिवाभवत् ततोभीमोमहाबाहुर्नवभिर्नतपर्वभिः प्रेषयामाससंक्रुद्धः सू
तपुत्रस्यमारिष तेतस्यकवचंभित्वातथाबाहुंचदक्षिणं अभ्यपुर्धरणींतीक्ष्णावल्मीकमिवपन्नगाः सछाद्यमानोबाणौघै
र्भीमसेनधनुश्च्युतैः पुनरेवाभवत्कर्णोभीमसेनात्पराङ्मुखः तंपराङ्मुखमालोक्यपदातिंसूतनंदनं कौंतेयशर
संछन्नंराजादुर्योधनोब्रवीत् त्वरध्वंसर्वतोयत्ताराधेयस्यरथंप्रति ततस्तवसुताराजन्श्रुत्वाभ्रातुर्वचोद्भुतं अभ्ययुःपांडवं
युद्धेविसृजंतःशिलीमुखान् चित्रोपचित्रःचित्राक्षश्चारुचित्रःशरासनः चित्रायुधश्चित्रवर्मासमरेचित्रयोधिनः तानापत
तएवाशुभीमसेनोमहारथः एकैकेनशरेणाजौपातयामासतेसुतान् तेहतान्यपतन्भूमौवातरुग्णाइवद्रुमाः दृष्ट्वाविनि
हतान्पुत्रान्तवराजन्महारथान् अश्रुपूर्णमुखःकर्णःक्षत्तुःसस्मारतद्वचः रथंचान्यंसमास्थायविधिवत्कल्पि
तंपुनः अभ्ययात्पांडवंयुद्धेत्वरमाणःपराक्रमी तावन्योन्यंशरैर्भित्वास्वर्णपुंखैःशिलाशितैः व्यभ्राजेतांयथामेघौसं
स्यूतौसूर्यरश्मिभिः षट्त्रिंशताततोबाणैःस्वर्णपुंखैःशिलाशितैः व्यधमत्कवचंक्रुद्धःसूतपुत्रस्यपांडवः सूतपुत्रोपिकौं
तेयंशरैःसंनतपर्वभिः पंचाशतामहाबाहुर्विव्याधभरतर्षभ रक्तचंदनदिग्धांगोशरैःकृतमहाव्रणो शोणिताक्तोव्यराजे

द्रो० १२४

तांचंद्रसूर्याविवोदितौ तौशोणितोक्षितगात्रैः शरैश्छिन्नतनुच्छदौ कर्णभीमौव्यराजेतांनिर्मुक्ताविवपन्नगौ व्याघ्राविवनर
व्याघ्रौदंष्ट्राभिरितरेतरं शरधाराम्बुजौवीरौमेघाविववर्षतुः वारणाविववान्योन्यंविषाणाभ्यामरिंदमौ निर्भिन्दन्तौस्वगात्राणि
सायकैश्चारुरेजतुः नादयंतौप्रहर्षेतौविक्रीडंतौपरस्परं मंडलानिविकुर्वाणौरथाभ्यांरथिसत्तमौ वृषाविववाशनर्दंतौबलि
नौवाशितांतरे सिंहाविवपराक्रांतौनरसिंहमहाबलौ परस्परंवीक्षमाणौक्रोधसंरक्तलोचनौ युयुधातेमहावीर्यौशक्रवै
रोचनीयथा ततोभीमोमहाबाहुर्बाहुभ्यांविक्षिपन्धनुः व्यराजतरणेराजन्सविद्युदिवतोयदः सनेमिघोषस्तनितश्चाप
विद्युच्छरांबुभिः भीमसेनमहामेघः कर्णपर्वतमावृणोत् ततःशरसहस्रेणसम्यगस्तेनभारत पांडवोवाकिरत्कर्णं
भीमोभीमपराक्रमः तत्रापश्यंस्तवसुताभीमसेनस्यविक्रमं सुपुंखैःकंकवासोभिर्यत्कर्णंछादयच्छरैः सनंदयन्रणे
पार्थंकेशवंचयशस्विनं सात्यकिंचक्ररक्षौचभीमःकर्णमयोधयत् विक्रमंभुजयोर्वीर्यंधैर्यंचविदितात्मनः पुत्रास्तवम
हाराजद्रष्टुंविमनसोभवन् ॥ ॥इतिद्रोणपर्वणिभीमसेनप्रवेशकर्णपराजयः संजयउ० भीमसेनस्यराधेयःश्रुत्वा
ज्यातलनिस्वनं [illegible]
नामृष्यतयथामत्तोगजःप्रतिगजंबलं सोपक्रम्यमुहूर्तंतुभीमसेनस्यगोचरात् पुत्रांस्तवददर्शाथभीमसेनेनपातितान् ता
न्वेक्ष्यनरश्रेष्ठविमनादुःखितस्तदा विनिश्वसन्दीर्घमुष्णंचपुनःपांडवमभ्ययात् सताम्रनयनःक्रोधाच्छ्वसन्निवमहोरगः ब
भौकर्णःशरानस्यन्रश्मीनिवदिवाकरः किरणैरिवसूर्यस्यमहीधरोभरतर्षभ कर्णचापच्युतैर्बाणैःप्राच्छा

सम० १२४

घतहकोदरः तेकर्णचापप्रभवाः शराः बर्हिणवाससः विविशुः सर्वतः पार्थवासापेवांडजाद्रुमं कर्णचापच्युतावाणाः संपतंत
स्ततस्ततः रुक्मपुंखाव्यराजंतहंसाः श्रेणीकृताइव चापध्वजोपस्करेभ्यश्छत्रादीषामुखाद्युगात् प्रभवंतोप्रदृश्यंतराज
न्नाधिरथेः शराः खंपूरयन्महावेगान्खगमान्गृध्रवाससः सुवर्णविकृतांश्चित्रान्मुमोचाधिरथिः शरान् तमंतकमिवाप
तमापततंवृकोदरः त्यक्त्वाप्राणानतिक्रम्यविव्याधनिशितैः शरैः तस्यवेगमसंह्यंसहत्वाकर्णस्यपांडवः महतश्चशरौघां
स्तान्न्यवारयतवीर्यवान् ततोविधम्याधिरथेः शरजालानिपांडवः दृष्ट्वातुभीमसेनस्यविक्रमंयुधि भारत अभ्यनंदंस्त्वदीया
श्चसंप्रहृष्टाश्चचारणाः भूरिश्रवाःकृपोद्रौणिर्मद्रराजोजयद्रथः उत्तमौजायुधामन्युः सात्यकिः केशवार्ज्जुनौ कुरुपांड
वप्रवरादशराजन्महारथाः साधुसाध्वितिवेगेनसिंहनादमथानदन् तस्मिन्समुच्छ्रितेशब्देतुमुलेलोमहर्षणे अभ्यभा
षत्पुत्रांस्तेराजन्दुर्योधनस्त्वरन् राज्ञःसराजपुत्रांश्चसोदर्यांश्चविशेषतः कर्णंगच्छतभद्रंवः परिप्संतोवृकोदरात्
पुराणिघ्नंतिराधेयंभीमचापच्युताःशराः तेयतध्वंमहेष्वासाःसूतपुत्रस्यरक्षणे दुर्योधनसमादिष्टाः सोदर्याः सप्तभारत
भीमसेनमभिद्रुत्यसंरब्धाः पर्यवारयन् तेसमासाद्यकौंतेयमावृण्वन्शरवृष्टिभिः पर्वतंवारिधाराभिः प्रावृषीवबलाह
काः तेपीडयन्भीमसेनंक्रुद्धाःसप्तमहारथाः प्रजासंहरणेराजन्सोमंसप्तग्रहाइव ततोवेगेनकौंतेयपीडयित्वा
शरासनं मुष्टिनापांडवोराजन्दृढेनसुपरिष्कृतं मनुष्यसमतांज्ञात्वासप्तसंधायसायकान् तेभ्योव्यसृजदायत्तः

६१ ॐ ४

द्रो० १५५ र्यरश्मिनिभान्प्रभुः निरस्यन्निव देहेभ्यस्तनयानामसंस्रव भीमसेनो महाराज पूर्ववैरमनुस्मरन् तेत्रिंशा भीमसेनेन श
राभारतभारतान् विदार्यखंसमुत्पेतुः स्वर्णपुंखाः शिलाशिताः तेषां विदार्य चेतांसि शरा हेमविभूषिताः व्यराजंत म
हाराज सुपर्णा इव खेचराः शोणितादिग्धवाजाग्राः सम हेमपरिष्कृताः पुत्राणां तव राजेंद्र पीत्वा शोणितमुद्गताः ते
शरैर्भिन्नमर्माणो रथेभ्यः प्रापतन्क्षितौ गिरिसानुरुहा भग्ना द्विपेनेव महाद्रुमाः शत्रुंजयः शत्रुसहश्चित्रश्चित्रायुधो दृढः
चित्रसेनो विकर्णश्च सप्तैते विनिपातिताः पुत्राणां तव सर्वेषां निहतानां वृकोदरः शोचत्यतिभृशं दुःखाद्विकर्णं पांडवः
प्रियं प्रतिज्ञेयं मयाऽऽहतानि हंतव्यास्तु संयुगे विकर्ण तेनासि हतः प्रतिज्ञा रक्षिता मया त्वमागाः संगरं वीर क्षात्रं धर्ममनु
नुस्मरन् विशेषतोस्मिन्पतेस्तथास्माकं हितेरतः न्यापतो व्याप ते नैवमेकः शोको महाद्युतिः तान्निह स्पमहा
वाहून्राधेयस्यैव पश्यतः सिंहनादरवं घोरमसृजत्पांडुनंदनः स रवस्तस्य शूरस्य धर्मराजस्य भारत आचख्या
विव तद्युद्धे विजयं चात्मनो महत् तं श्रुत्वा तु महानादं भीमसेनस्य धन्विनः बभूव परमा प्रीतिर्धर्मराजस्य धीमतः ततो हृ
ष्टमना राजन्वादित्राणां महास्वनैः सिंहनादरवं भ्रातुः प्रतिजग्राह पांडवः हर्षेण महता युक्तः कृतसंज्ञे वृकोदरे अ
भ्ययात्समरे द्रोणं सर्वशस्त्रभृतां वरः एकत्रिंशन्महाराज पुत्रांस्तव निपातितान् हतान्दुर्योधनो दृष्ट्वा क्षत्तुः स स्मा राम० १५५
रत्तद्वचः तदिदं समनुप्राप्तं क्षत्तुर्नैःश्रेयसं वचः इति संचिंत्य नैवासौ नोत्तरं प्रत्यपद्यत यद्द्यूतकाले दुर्बुद्धिरब्रवीत्तनयस्तव स
भामानाय्य पांचालीं कर्णेन सहितोऽल्पधीः

पञ्चकेऽगेद्ब्रवील्लक्ष्सांसभायांपरुषंवचः प्रमुखेपांडुपुत्राणांतवैवविशांपते श्रुतवानसितद्राजेंद्रकौरवाणांचसन्निधौ शः विन
ष्टाः पांडवाः कृष्णेशाश्वतंनरकंगताः पतिमन्यंवृणीष्वेतितस्येदंफलमागतं षण्ढषंढतिलादीनिपरुषाणितवात्मजैः श्रावि
ताःसमहात्मानःपांडवाःक्रोधयिष्णुभिः तंभीमसेनःक्रोधाग्निंत्रयोदशसमाहितं उद्गिरन्नवपुत्राणामंतंगच्छतिपांडवः विल
पंश्चबहुत्वन्नाशमंनालभन्ततांशि सपुत्रोभरतश्रेष्ठतस्यभुंक्ष्वफलोदयं त्वयावृद्धेनधीरेणाकार्यंतत्वार्थदर्शिना नकृतंसुहृदां
वाक्यंदैवमत्रपरायणं तन्माशुचोनरव्याघ्रतवैवापनयोमहान् विनाशहेतुःपुत्राणांभवानेवमतोमम हतोविक
र्णोराजेंद्रचित्रसेनश्चवीर्यवान् प्रवराश्चात्मजानांतेसुताश्चान्येमहारथाः यानन्यानदहशेवीरस्भूत्वविषयमागतान्
पुत्रांस्तवमहाराजत्वरयातान्जघानह त्वत्कृतेह्यहमद्राक्षंदह्यमानावरूथिनी सहस्रशःशरैर्मुक्तैःपांडवेनवृ
षेणच॥ ॥इतिद्रोणपर्वणिजयद्रथवधेभीमसेनप्रवेशे धृतराष्ट्रउवाच महानपनयःसूतममैवात्रविशे
षतः सइदानीमनुप्राप्तोमन्येसंजयशोचतः य[illegible]तत्तदृतमितिममासीन्मनसिस्थितं इदानीमत्रकिंकार्यंप्रक
रिष्यामिसंजय यथाह्येषत्वयावृत्तोमामापनयसंभवः वीराणांतन्ममाचक्ष्वस्थिरीभूतोस्मिसंजय संजयउवा
चकर्णोभीमोमहाराजपराक्रांतौमहाबलौ बाणवर्षाण्यसृजतांवृष्टिमंताविवांबुदौ भीमनामांकितावाणाःस्वर्णपुंखाः
शिलाशिताः विविशुःकर्णमासाद्यछिंदंतइवजीवितं तथैवकर्णनिर्मुक्ताःशराबर्हिणवाससः छादयांचक्रिरेवीरं
शतशोथसहस्रशः तयोःशरैर्महाराजसंपतद्भिःसमंततः बभूवतत्रसैन्यानांसंक्षोभःसागरोपमः भीमचापच्युतैर्बाणैस्त

कर्ण० १५६

वैसेन्मर्मारिंदम अवधीत्तच्च ममध्ये घोरराशीविषोपमैः वारणैः पतितैराजन्वाजिभिश्च नरैः सह अरदश पतन मही कीर्णा बा
तभंग्रैरिव द्रुमैः ते वध्यमानाः समरे भीमचापच्युतैः शरैः प्राद्रवंस्तावकाः योधाः किमेतदिति चाब्रुवन् ततो युद्धस्थं तत्से
न्यं सिंधुसौवीरकौरवं प्रोत्सारितं महावेगैः कर्णपांडवयोः शरैः ते शूरा हतभूयिष्ठा हताश्वरथवारणाः उत्सृज्य भीम
कर्णं च सर्वतो व्यद्रवन्दिशः नूनं पार्थार्थमेवास्मान्मोहयंति दिवौकसः यत्कर्णभीमप्रभवैर्वध्यते नो बलं शरैः एवं ब्रुवा
णा योधास्तावका भयपीडिताः शरपातं समुत्सृज्य स्थिता युद्धदिदृक्षवः ततः प्रावर्तत नदी घोररूपा रणाजिरे शूराणां
हर्षजननी भीरूणां भयवर्द्धिनी वारणाश्वमनुष्याणां रुधिरौघसमुद्भवा संवृता गतसत्वैश्च मनुष्यगजवाजिभिः सानु
कर्षपताकैश्च द्वीपाश्वरथभूषणैः स्यंदनैरपविद्धैश्च भग्नचक्राक्षकूबरैः जातरूपपरिष्कारैर्द्धनुर्भिः सुमहास्वनैः सु
वर्णपुंखैरिषुभिर्नाराचैश्च सहस्रशः कर्णपांडवनिर्मुक्तैर्निर्मुक्तैरिव पन्नगैः प्रासतोमरसंघातैः खड्गैश्च सपरश्वधैः सुव
र्णविकृतैश्चापि गदामुशलपट्टिशैः वज्रैश्च विविधाकारैः शक्तिभिः परिघैरपि शतघ्नीभिश्च चित्राभिर्बभौ भारत मेदि
नी कनकांगदहारैश्च कुंडलैर्मुकुटैस्तथा वलयैरपविद्धैश्च तत्रैवांगुलिवेष्टकैः चूडामणिभिरुष्णीषैः स्वर्णसूत्रैश्च मारिष
तनुत्रैः सतलत्रैश्च हारैर्निष्कैश्च भारत वस्त्रैश्छत्रैश्च विध्वस्तैश्चामरव्यजनैरपि गजाश्वमनुजैर्भिन्नैः शोणितार्द्रैश्च पत्रि
भिः तैस्तैश्च विविधैर्भिन्नैस्तत्र तत्र वसुंधरा पतितैरपविद्धैश्च विबभौ द्यौरिव ग्रहैः अचिंत्यमद्भुतं चैव तयोः कर्मातिमानु
षं दृष्ट्वा चारणसिद्धानां विस्मयः समजायत अग्नेर्वायुसहायस्य गतिः कक्ष इवाहवे आसीद्भीमसहायस्य रौद्रमाधि

राम० १५६

रेणिगतं निपातितध्वजरथं हतवाजिनरद्विपं गजाभ्यां संप्रयुक्ताभ्यामासीन्नलवनं यथा मेघजालनिभं सैन्यमासीत्तव नराधिप विम
र्दः कर्णभीमाभ्यामासीच्च परमो रणे ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे संजय उवाच ततः कर्णो महाराज भीमं विद्ध्वा
त्रिभिः शरैः मुमोच शरवर्षाणि विचित्राणि बहूनि च बध्यमानो महाबाहुः सूतपुत्रेण पांडवः न विव्यथे भीमसेनो भिद्यमान इवाचलः
स कर्णं कर्णिना कर्णे पीतेन निशितेन च विव्याध सुभृशं संख्ये तैलधौतेन मारिष स कुंडलं महच्चारु कर्णस्यापातयद्भुवि तपनीयं
महाराज दीप्तं ज्योतिर्गणं यथा अथापरेण भल्लेन सूतपुत्रं स्तनांतरे आजघान भृशं क्रुद्धो हसन्निव वृकोदरः पुनरस्य त्वरन्भीमो ना
राचान्दश भारत रणे प्रैषीन्महाबाहुर्निर्मुक्ताशीविषोपमान् ते ललाटं विनिर्भिद्य सूतपुत्रस्य भारत विविशुश्चोदितास्तेन वल्मी
कमिव पन्नगाः ललाटस्थैस्ततो बाणैः सूतपुत्रो व्यरोचत नीलोत्पलमयीं मालां धारयन्स पुरा यथा सोऽतिविद्धो भृशं कर्णः पांडवे
न तरस्विना रथकूबरमालंब्य निमीलयत लोचने समुहूर्तात्पुनः संज्ञां लेभे कर्णः परंतपः रुधिरोक्षितसर्वांगः क्रोधमाह
रत्परं ततः क्रुद्धो रणे कर्णः पीडितो दृढधन्वना वेगं चक्रे महावेगो भीमसेनरथं प्रति तस्मै कर्णः शतं राजन्निषूणां गार्द्धवा
ससां सामर्षी बलवान्क्रुद्धः प्रेषयामास भारत ततः प्रासृजदुग्राणि शरवर्षाणि पांडवः समरे तमनादृत्य तस्य वीर्यमचिंतयन्
कर्णस्ततो महाराज पांडवं नवभिः शरैः आजघानोरसि क्रुद्धः क्रुद्धरूपं परंतप तावुभौ नरशार्दूलौ शार्दूलाविव दंष्ट्रिणौ जीमूता
विव चान्योन्यं प्रववर्षतुराहवे तलशब्दरवैश्चैव त्रासयंतौ परस्परं शरजालैश्च विविधैस्त्रासयामासतुर्मृधे अन्योन्यं समरे क्रु

द्रो॰ १५७

द्रौ कृतप्रतिकृतैषिणो ततो भीमो महाबाहुः सूतपुत्रस्य भारत क्षुरप्रेणाधनुश्छित्वाननाद परवीरहा उदपास्य धनुश्छिन्नं सूत
पुत्रो महारथः अन्यत्कार्मुकमादत्त भारघ्नं वेगवत्तरं दृष्ट्वा मकुरुसौवीरसिंधुवीरबलक्षयं सर्वमेध्वजशस्त्रैश्च पतितैः सं
वृतां महीं हस्त्यश्वरथदेहांश्च गतासून्प्रेक्ष्य सर्वशः सूतपुत्रस्य संरंभाद्दीप्तं वपुरजायत स विस्फार्य महच्चापं कार्तस्व
रविभूषितं भीमं प्रैक्षत राधेयो घोरं दिव्येन चक्षुषा ततः क्रुद्धः शरानस्यन्सूतपुत्रो व्यरोचत मध्यंदिनगतोर्चिष्मान्शरदीव
दिवाकरः मरीचिविकचस्येव राजन्भानुमतो वपुः आसीदाधिरथेर्घोरं वपुः शरशताचितं कराभ्यामाददानस्य संदधा
नस्य चाशुगान् कर्षतो मुंचतः चाणान्नांतरं ददृशे रणे अग्निचक्रोपमं घोरं मंडलीकृतमायुधं कर्णस्यासीन्महीपाल
सव्यदक्षिणमस्यतः स्वर्णपुंखाः सुनिशिताः कर्णचापच्युताः शराः प्राच्छादयन्महाराजदिशः सूर्यस्य च प्रभाः ततः
कनकपुंखानां शराणां नतपर्वणां धनुश्च्युतानां वियति ददृशे बहुधा व्रजः बाणासनादाधिरथेः प्रभवंति स्म साय
काः श्रेणीकृता व्यरोचंत राजन्क्रौंचा इवांबरे गार्ध्रपत्रान्शिलाधौतान्कार्तस्वरविभूषितान् महावेगान्प्रदीप्ताग्रान्
मुमोचाधिरथिः शरान् ते तु चापबलोद्धूताः शातकुंभविभूषिताः अजस्रमपतन्बाणा भीमसेनरथं प्रति ते व्योम्नि रुक्म — राम॰ १५७
विकृता व्यकाशंत सहस्रशः शलभानामिव व्राताः शराः कर्णसमीरिताः चापादाधिरथेर्वीराः प्रपतंतस्त्वाकाशिरे एको
दीर्घ इवात्यर्थमेकमेकः स्थितः शरः पर्वतं वारिधाराभिश्छादयन्निव तोयदः कर्णः प्राच्छादयत्क्रुद्धो भीमसायकवृष्टिभिः तत्र भा
रत भीमस्य बलवीर्यपराक्रमं व्यवसायं च पुत्रास्ते ददृशुः सहसैनिकाः तां समुद्रमिवोद्धूतां शरवृष्टिं समुत्थितां ॥ ॥

फा२

अचिंतयित्वा भीमस्तु क्रुद्धः कर्णमुपाद्रवत् रुक्मपृष्ठं महाचापं भीमस्यासीद्विशांपते आकर्णान्मंडलीभूतं शक्रचापमिवापरं तस्मा
च्छराः प्रादुरासन्पूरयंतो रथांबरं सुवर्णपुंखैर्भीमेन सायकैर्नतपर्वभिः गगने रचिता माला कांचनीव व्यरोचत ततो व्योम्नि विष
क्तानि शरजालानि भागशः आहतानि व्यशीर्यंत भीमसेनस्य पत्रिभिः कर्णस्य शरजालौघैर्भीमसेनस्य चोभयोः अग्निस्फुलि
गसंस्पर्शैरंजोगतिभिराहवे तैस्तैः कनकपुंखानां घोरासीत्संवृतां व्रजैः न स्म सूर्यस्तदा भाति न स्म भाति समीरणः शरजालावृ
ते व्योम्नि न चाज्ञायत किंचन स भीमं छादयन्बाणैः सूतपुत्रः पृथग्विधैः उपारोहदनादृत्य तस्य वीर्यं महात्मनः तयोर्विसृजतो
स्तत्र शरजालानि मारिष वायुभूतान्यदृश्यंत संसक्तानीतरेतरं अन्योन्यशरसंस्पर्शात्तयोर्मनुजसिंहयोः आकाशे भरतश्रेष्ठ
पावकः समजायत तथा कर्णः शितान्बाणान्कर्मारपरिमार्जितान् सुवर्णविकृतान्क्रुद्धः प्राहिणोद्वधकांक्षया तानंतरि
क्षे विशिखैस्त्रिधैकैकमशातयत् विशेषयन्सूतपुत्रं भीमस्तिष्ठेति चाब्रवीत् पुनश्चासृजदुग्राणि शरवर्षाणि पांडवः अ
मर्षी बलवान्क्रुद्धो दिधक्षन्निव पावकः ततश्चटचटाशब्दो गोधापातादभूत्तयोः तालशब्दश्च सुमहान्सिंहनादश्च भैरवः
रथनेमिनिनादश्च ज्याशब्दश्चैव दारुणः योधा व्युपारमन्युद्धाद्दिदृक्षंतः पराक्रमं कर्णपांडवयो राजन्परस्परवधैषिणोः
देवर्षिसिद्धगंधर्वाः साधु साध्वित्यपूजयन् मुमुचुः पुष्पवर्षं च विद्याधरगणास्तथा ततो भीमो महाबाहुः संरंभी दृढविक्रमः अस्त्रै
रस्त्राणि संवार्य शरैर्विव्याध सूतजं कर्णोपि भीमसेनस्य निवार्येषून्महाबलः प्राहिणोन्नव नाराचानाशीविषसमान्रणे ताव

द्रो॰
१५८

द्रौरथतान्भीमो व्योम्निचिच्छेद पत्रिभिः नाराचान्सूतपुत्रस्य तिष्ठ तिष्ठेति चाब्रवीत् ततो भीमो महाबाहुः शरं क्रुद्धांतकोपमं मुमोच वा
धिरथये घोरं यमदंडमिवापरं तमापतंतं चिच्छेद राधेयः प्रहसन्निव त्रिभिः शरैः शरं राजन् पांडवस्य प्रतापवान् पुनश्चासृजदुग्राणि शर
वर्षाणि पांडवः तस्य तान्यासहे कर्णः सर्वाण्यस्त्राण्यभीतवत् युध्यमानस्य भीमस्य सूतपुत्रोस्त्रमायया तस्येषुधी धनुर्ज्यां च बाणैः स
न्नतपर्वभिः रश्मीन्योक्त्राणि चाश्वानां क्रुद्धः कर्णोछिनन्मृधे तस्याश्वांश्च पुनर्हत्वा सूतं विव्याध पंचभिः सोपसृत्य द्रुतं सूतो यु
धामन्यो रथं ययौ विहसन्निव भीमस्य क्रुद्धः कालानलद्युतिः ध्वजं चिच्छेद राधेयः पताकां च न्यपातयत् स विधन्वा महाबाहू रथशक्तिं
परामृशत् तामवासृजदाविध्य क्रुद्धः कर्णरथं प्रति तामाधिरथिरापातंतीं शक्तिं कांचनभूषणां आपतंतीं महोल्काभां चिच्छेद द
शभिः शरैः सापतद्दशधाछिन्ना कर्णस्याभिनिषितैः शरैः चर्मणः सूतपुत्रस्य मित्रार्थे चित्र योधिनः स चर्मादत्त कौंतेयो जात
रूपपरिष्कृतं खड्गं चानंतरप्रेप्सुः मृत्योरग्रे जयस्य वा तदस्य सहसा कर्णो व्यधमच्चर्म सुप्रभं शरैर्बहुभिरत्युग्रैः प्रहसन्निव भार
त स विचर्मा महाराज विरथः क्रोधमूर्छितः असिं प्रासृजदाविध्य त्वरन्कर्णरथं प्रति स धनुः सूतपुत्रस्य सज्यं छित्वा महा
नसिः पपात भुवि राजेंद्र क्रुद्धः सर्प इवांबरात् ततः प्रहस्याधिरथिरन्यदादाय कार्मुकं शत्रुघ्नं समरे क्रुद्धो दृढज्यं वेगवत्तरं व्या
यच्छत शरान् कर्णः कुंतीपुत्रजिघांसया सहस्रशो महाराज रुक्मपुंखान्सुतेजनान् स वध्यमानो बलवान् कर्णचापच्युतैः
शरैः वैहायसं प्राक्रमद्वै कर्णस्य व्यथयन्मनः स तस्य चरितं दृष्ट्वा संग्रामे विजयैषिणः लयमास्थाय राधेयो भीमसेनमवंच
यत् तं च दृष्ट्वा रथोपस्थे नि

राम॰
१५८

लीनं वापि विवेशाग्र्यं ध्वजमस्य समारुहत् ततस्तो भीमो महीतले तत्रस्थाः कुरवः सर्वे चारणाश्चाभ्यपूजयन् यदिदेयरथात्कर्णमहं तं ताहृ
इवेरणं सच्छिन्नधन्वा विरथः स्वधर्ममनुपालयन् स्वरथं पृष्ठतः कृत्वा युद्धायैव व्यवस्थितः तद्वृत्तमस्य राधेयस्तत्रैव समभ्य
यात् संरम्भात्पाण्डवं संख्ये युद्धाय समवस्थितं तौ समेतौ महाराज स्पर्द्धमानौ महाबलौ जीमूताविव घर्मान्ते गर्जमानौ नरर्षभौ ते
षामासीत्तं प्रहारः क्रुद्धयोरन्योन्यमभिहृष्योः अमृष्यमाणयोः संख्ये देवदानवयोरिव क्षीणशस्त्रस्तु कौन्तेयः कर्णेन समभिद्रुतः
दृष्ट्वार्जुनहतान्नागान्पतितान्पर्वतोपमान् रथमार्गविघातार्थं व्यायुधः प्रविवेश ह हस्तिनां व्रजमासाद्य रथदुर्गं प्रविश्य
च पाण्डवो जीविताकाङ्क्षी राधेयं नाभ्यहारयत् व्यवस्थानमथाकाङ्क्षन् धनञ्जयशरैर्हतं उद्यम्य कुञ्जरं पार्थस्तस्थौ परपु
रञ्जयः महौषधिसमायुक्तं हनुमानिव पर्वतं तमस्य विशिखैः कर्णो व्यधमत्कुञ्जरं पुनः हस्त्यङ्गान्यथ कर्णाय प्राहिणोत्
पाण्डुनन्दनः चक्राण्यश्वांस्तथा चान्यद्यद्यत्पश्यति भूतले तत्तदादाय चिक्षेप क्रुद्धः कर्णाय पाण्डवः तदस्य सर्वं चिच्छे
द निशितैः शरैः भीमोऽपि मुष्टिमुद्यम्य वज्रगर्भं सुदारुणं हन्तुमैच्छत्स तत्सुतं संस्मरन्नर्जुनं कृणान शक्तोऽपि
नावधीत्कर्णं समर्थः पाण्डुनन्दनः रक्षमाणः प्रतिज्ञां तां या कृता सव्यसाचिना तमेवं व्याकुलं भीमं भूयो भूयः शितैः
शरैः मूर्च्छयाभिपरीताङ्गमकरोत्सूतनन्दनः व्यायुधं नावधीच्चैनं कर्णः कुन्त्या वचः स्मरन् धनुषाग्रेण तं कर्णः सोऽभि
द्रुत्य परामृशत् धनुषा स्पृष्टमात्रेण क्रुद्धः सर्प इव श्वसन् आच्छिद्य स धनुस्तस्य कर्णं मूर्ध्न्यताडयत् ताडितो भीमसे
नेन क्रोधात्संरक्तलोचनः विहसन्निव राधेयो वाक्यमेतदुवाच ह पुनः पुनस्तूबरक मूढ कौदरिकेति च अकृतास्त्र

द्रो० १२९

केमोपोत्स्वीगेलसंग्रामकातर पत्रभोज्यंबहुविधंभक्ष्यपेयंचपांडव तत्रत्वंहुम्मितेयोग्येनयुद्धेषुकदाचन मल्लयुधापफला
हारेष्वेतेषुनियमेषुच उचितस्त्वंबनेभीमनत्वंयुद्धविशारदः कयुद्धंक्वमुनित्वंचवनंगच्छवृकोदर नत्वंयुद्धोचितस्तात्वनगा
मतिर्भवान् महानभक्ष्यजनान्दासांस्त्वंगहेतरपनभशं योगयत्नाद्धपितुं क्रोधाभेसितार्थीवृकोदर मुनिभि
लाप्यवाभीमफलान्माहरत्वबुम्मेते वनायवव्रजकौन्तेयनत्वंयुद्धविशारदः फलमूलशनेशक्तस्त्वंतथातिथिपूजने नत्वां
शस्त्रसमुद्योगेयोग्यंमन्येवृकोदर कौमारेयानिवृत्तानिविप्रियाणिविशांपते तानिसर्वाणिचाप्येवंहृत्वाराणपश्चात्परमदृश त्व
येनतत्रसंलीनमस्त्रशद्भृतुषापुनः प्रहसंश्चपुनर्वाक्यंभीममाहवृषस्तदा योद्धव्यंमारिषान्यत्रनयोद्धव्यंचमादृशैः मादृ
शैर्युध्यमानानामेतच्चान्यच्चविद्यते गच्छवातत्रतौकृष्णौतौत्वांरक्षिष्यतोरणे गृहंवागच्छकौन्तेयकिंतेयुद्धेनबालक
कर्णस्यवचनंश्रुत्वाभीमसेनोतिदारुणं उवाचकर्णंप्रहसन्सर्वेषांशृण्वतांवचः जितस्त्वमसकृद्दुष्टकत्थसेकिंवृथात्म
नः जयाजयौमहेंद्रस्यलोकेदृष्टौपुरातनौ मल्लयुद्धमयामार्द्धकुरुवंशकुलसंभव महाबलोमहाभोगीकीचकोनिहतो
यथा तथात्वांघातयिष्यामिपश्यतस्तुसर्वेराजसु भीमस्यमतमाज्ञायकर्णोबुद्धिमतांवरः विरराममरणात्तस्मात्पश्यतांस
र्वध[illegible]न्विनां एवंतंविरथंकृत्वाकर्णोराजन्व्यक[illegible]मन प्रमुखेवृष्णिसिंहस्यपार्थस्यचमहात्मनः ततोराजेन्द्रचिलाद्योतांद्ध
राध्याराणामगध्वजः प्राहिणोत्सूतपुत्रायकेशवेनप्रचोदितः ततःपार्थभुजोत्सृष्टाःशराःकनकभूषणाः गांडीव
प्रभवाःकार्णिहंसाःक्रौंचमिवाविशन् सभुजंगैरिवाविष्टैर्गांडीवप्रेषितैःशरैः भीमसेनादपासेधत्सूतपुत्रंधनंजय

राम० १२९

१५३

धन्वा भीमेन धनंजययशसा हतः कर्णो भीमाद्दयायासीद्दृष्ट्वानमहता द्रुतं भीमोऽपि सात्यकेर्वाहं समारुह्य नरर्षभः अन्वयाद्भ्रा
तरं संख्ये पांडवं सव्यसाचिनं ततः कर्णं समुद्दिश्य त्वरमाणो धनंजयः नाराचं क्रोधताम्राक्षो प्रैषीन्मृत्युमिवांतकः स गरु
त्मानिवाकाशप्रार्थयन्भुजगोत्तमं नाराचोऽभ्यपतत्कर्णं तूर्णं गांडीवचोदितः तमंतरिक्षे नाराचं द्रौणिश्छित्त्वा पत्रिणा
धनंजयभयात्कर्णमुज्जिहीर्षन्महारथः ततो द्रौणिं चतुःषष्ट्या विव्याध कुपितोऽर्जुनः शिलीमुखैर्महाराज मा गा इति चा
ब्रवीत् स तु मत्तगजाकीर्णमनीकं रथसंकुलं तूर्णमभ्याविशद्द्रौणिर्धनंजयशरार्दितः ततः सुवर्णपृष्ठानां चापानां कूजतां
रणे शब्दं गांडीवघोषेण कौंतेयोऽभ्यद्रवद्बली धनंजयः प्रयान्तं पृष्ठतो द्रौणिमभ्ययात् नातिदीर्घमिवाध्वानं शरैः संत्रा
सयन्बली विदार्य देहान्नाराचैर्नरवारणवाजिनां कंकबर्हिणवासोभिर्बलं व्यधमदर्जुनः तद्बलं भरतश्रेष्ठ सवाजिद्वि
पमानवं पाकशासनिरायत्तः पार्थः संनिजघान ह ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवेशे ॥ धृतराष्ट्र
उवाच अहन्यहनि मे दीप्तं यशः पतति संजय हता मे बहवो योधा मन्ये कालस्य पर्ययं धनंजयः सुसंक्रुद्धः प्रविष्टो
मामकं बलं रक्षितं द्रौणिकर्णाभ्यामप्रवेश्यं सुरैरपि ताभ्यामूर्जितवीर्याभ्यामाप्यायितपराक्रमः सहितः कृष्णभीमाभ्यां
शिनीनामृषभेण च तदाप्रभृति मां शोको दहत्यग्निरिवाशयं ग्रस्तानिव प्रपश्यामि भूमिपालान्ससैंधवान् अप्रियं सुमहत्कृ
त्वा सिंधुराजः किरीटिनः चक्षुर्विषयमापन्नः कथं जीवितमाप्नुयात् अनुमानाच्च पश्यामि नास्ति संजय सैंधवः युद्धं तु य
था हि तत्तन्ममाचक्ष्व तत्त्वतः यच्च विक्षोभ्य महतीं सेनामालोड्य चासकृत् एकः प्रविष्टः संक्रुद्धो नलिनीमिव कुंजरः तस्य वृष्णि

द्रो० १६० वीरस्य हि युद्धं तथा तथ्यं धनंजयपार्थिवक्तस्य कुशलो ह्यसि संजय संजय उवाच तथा तु वैकर्तनेन पीडितं तं भीमं प्रयांतं पुरुषव
वीरं समीक्ष्य रणे जन्यमुख्यमध्ये शिनिप्रवीरोनुययौ रथेन नरर्षभो वज्रधरप्रतापो ज्वलन्यथा जलदान्ते च सूर्यः निघ्नन्नमित्रा
न्धनुषा दृढेन संकंपयंस्तव पुत्रस्य सेनां तेषां तमश्वै रजतप्रकाशै रणे याधनेवीरतरं नरं तं नाशक्नुवन्वारयितुं त्वदीयाः सर्वे तथा
भारत माधवाग्र्यं अमर्षपूर्णस्त्वनिवृत्तयोधी शरासनी कांचनवर्मधारी अलंबुषः सात्यकिं माधवाग्र्यमवारयद्राजवरोभि
पत्य तयोरभूद्भारत संप्रहारो यथाविधो नैव बभूव कश्चित् प्रैक्षंत एवाहवशोभिनौ तौ योधास्त्वदीयाश्च परे च सर्वे अविध्य
देनं दशभिः पृषत्कैरलंबुषो राजवरः प्रसह्य अनागतानेव तु तान्पृषत्कांश्चिच्छेद बाणैः शिनिपुंगवोपि पुनः स बाणैस्त्रिभि
रग्निकल्पैराकर्णपूर्णैर्निशितैः सपुंखैः विव्याध देहावरणं विदार्य ते सात्यकेराविविशुः शरीरं तैः कायमस्यानिलवह्निभा
वैर्विदार्य मार्गैर्निशितैर्ज्वलद्भिः आजघ्निवांस्तान्रजतप्रकाशानश्वांश्चतुर्भिश्चतुरः प्रसह्य तथा तु तेनाभिहतस्तरस्वी
नप्ता शिनेश्चक्रधरप्रभावः अलंबुषस्योत्तमवेगवद्भिरश्वांश्चतुर्भिर्निजघान बाणैः अथास्य सूतस्य शिरो निकृत्य भल्ले
न कालानलसन्निभेन सकुंडलं पूर्णशशिप्रकाशं भ्राजिष्णु वक्त्रं निचकर्त देहात् निहत्य तं पार्थिवपुत्रपौत्रं संख्ये यदू
नामृषभः प्रमाथी ततोन्वयादर्जुनमेव वीरः सैन्यानि राजंस्तव संनिवार्य अन्वागतं वृष्णिवीरं समीक्ष्य तथारिमध्ये प रा० १६०
रिवर्तमानं घ्नंतं कुरूणामिषुभिर्बलानि पुनः पुनर्वायुमिवाभ्रपूगान् ततोवहन्सैंधवाः साधुदांताः गोक्षीरकुंदेंदुहि
मप्रकाशाः सुवर्णजालावतताः सदश्वा यतो यतः कामयते नृसिंहः अथात्मजास्ते सहिताभिपेतुरन्ये च योधास्त्वरितास्त्वदीयाः

लि

धनुरग्रं दुःशासनं त्वस्तुतमाजमीढ ते सर्वतः संपरिवार्य संख्ये शैनेयमाजघ्नुरनीकसाहाः स चापि तान्नरवरः सात्वतानां
महारथो बाणजालेन वीरः निवार्य तांस्तूर्णममित्रघाती नमाशिनेः पत्रिभिरग्निकल्पैः दुःशासनस्याभिजघान वाहानुद्यम्य
बाणासनमाजमीढ ततोऽर्जुनो हर्षमवाप संख्ये कृष्णश्च दृष्ट्वा पुरुषप्रवीरं ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे भीमसेन
प्रवेशे ॥ संजय उवाच तमुद्यतं महाबाहुं दुःशासनरथं प्रति त्वरितं त्वरणीयेषु धनंजयहितैषिणं त्रिगर्तानां महेष्वासाः
सुवर्णविकृतध्वजाः सेनासमुद्रमाविष्टमानर्तं पर्यवारयन् अथैनं रथवंशेन सर्वतः सन्निवार्य ते अवाकिरञ्छरव्रातैः
क्रुद्धाः परमधन्विनः अजयद्राजपुत्रांस्तान् भ्राजमानान्महारणे एकः पंचाशतं शत्रून्सात्यकिः सत्यविक्रमः सं
प्राप्य भारतीमध्यं तलघोषसमाकुलं असिशक्तिगदापूर्णमप्लवं सलिलं यथा तत्राद्भुतमपश्याम शैनेयचरितं
रणे प्रतीच्यां दिशि तं दृष्ट्वा प्राच्यां पश्याम लाघवात् उदीचीं दक्षिणां प्राचीं प्रतीचीं विदिशस्तथा नृत्यन्निवाचरच्छू
रो यथा रथशतं तथा तद्दृष्ट्वा चरितं तस्य सिंहविक्रान्तगामिनः त्रिगर्ताः संन्यवर्तन्त संतप्ताः स्वजनं प्रति तमन्ये शूरसे
नानां शूराः संख्ये न्यवारयन् नियच्छन्तः शरव्रातैर्मत्तं द्विपमिवांकुशैः तैर्व्यगाहरदप्यात्मा मुहूर्तमिव सात्यकिः त
तः कलिंगैर्युयुधे सोऽचिन्त्यबलविक्रमः तां च सेनामतिक्रम्य कलिंगानां दुरत्ययां अथ पार्थं महाबाहुर्धनंजयमुपा
सरत् तरन्निव जले श्रान्तो यथा स्थलमुपेयिवान् तं दृष्ट्वा पुरुषव्याघ्रं युयुधानः समाश्वसत् तमायान्तमभिप्रेक्ष्य
केशवः पार्थमब्रवीत् असावायाति शैनेयस्तव पार्थ पदानुगः एष शिष्यः सखा चैव तव सत्यपराक्रमः सर्वान्योधा

द्रो० १६१

स्तूणीकस्य विजिग्ये पुरुषर्षभः एष कौरवयोधानां कृत्वा घोरमुपद्रवं तव भ्रातोः प्रियतमः किरीटिन्नेति सात्यकिः एष
द्रोणानीकं तथा भोजं कृतवर्माणमेव च कदर्थीकृत्य विशिखैः फाल्गुनाभ्येति सात्यकिः धर्मराजप्रियान्वेषी हत्वा योधान्वरान्वरान्
शूरश्चैव कृतास्त्रश्च फाल्गुनाभ्येति सात्यकिः कृत्वा सुदुष्करं कर्म सैन्यमध्ये महाबलः तव दर्शनमन्विच्छन् पांडवाभ्येति सात्यकिः
बहूनेकरथेनाजौ योधयित्वा महारथान् आचार्यप्रमुखान्पार्थ प्रायात्येष हि सात्यकिः स्वबाहुबलमाश्रित्य विदार्य च वरूथिनीं
प्रेषितो धर्मराजेन पार्थ एकोऽभ्येति सात्यकिः यस्य नास्ति समो योधः कौरवेषु कथंचन सोयमायाति कौंतेय सात्यकिर्युद्धदुर्मदः कु
रुसैन्याद्विमुक्तो वै सिंहो मध्याद्गवामिव निहत्य बहुलाः सेनाः पार्थ एषोऽभ्येति सात्यकिः एष राजसहस्राणां वक्त्रैः पंकजसं
निभैः आस्तीर्य वसुधां पार्थ क्षिप्रमायाति सात्यकिः एष दुर्योधनं हित्वा भ्रातृभिः सहितं रणे निहत्य जलसंधं च क्षिप्र
मायाति सात्यकिः रुधिरौघवतीं कृत्वा नदीं शोणितकर्दमां तृणवद्व्यस्य कौरव्यानेष ह्यायाति सात्यकिः ततोऽप्रहृष्टः कौं
तेयः केशवं वाक्यमब्रवीत् न मे प्रियं महाबाहो यन्मामभ्येति सात्यकिः नहि जानामि वृत्तांतं धर्मराजस्य केशव सात्व
तेन विहीनः स यदि जीवति वा न वा एतेन हि महाबाहो रक्षितव्यः स पार्थिवः तमेष कथमुत्सृज्य मम कृष्ण पदानुगः रा
जा द्रोणाय चोत्सृष्टः सैंधवश्चानिपातितः प्रत्युद्याति च शैनेयमेष भूरिश्रवा रणे सोयं गुरुतरो भारः सैंधवार्थे समा
हितः ज्ञातव्यश्च हि मे राजा रक्षितव्यश्च सात्यकिः जयद्रथश्च हंतव्यो लंबते च दिवाकरः श्रांतश्चैष महाबाहु
रल्पप्राणश्च सांप्रतं परिश्रांता हयाश्चास्य हययंता च माधव न च भूरिश्रवाः श्रांतः ससहायश्च केशव अपीदानीं भ
वेदस्य ॥

राम० १६१

हैममस्मिन्समागमे कच्चिन्नसागरं तीर्त्वा सात्यकिः सत्यविक्रमः गोः पदं प्राप्य सीदेत महौजाः शिनिपुंगवः अपि कौरव्य
मुख्येन कृतास्त्रेण महात्मना समेत्य भूरिश्रवसमाप्तवलिमान सात्यकिर्भवेत अतिक्रममिमं मन्ये धर्मराजस्य केशव आचार्या
द्भयमुत्सृज्य यः प्रेषयत सात्यकिं ग्रहणं धर्मराजस्य खगः श्येन इवामिषं नित्यमाशंसते द्रोणः कच्चित्स्यात्कुशली नृपः॥ ॥२
ति द्रोणपर्वणि जयद्रथवधे संजय उवाच तमापतंतं संप्रेक्ष्य सात्वतं युद्धदुर्मदं क्रोधाद्भूरिश्रवा राजन्सहसा समुपाद्रवत्
तमब्रवीन्महाराज कौरव्यः शिनिपुंगवं अद्य प्राप्तोसि दिष्ट्या मे चक्षुर्विषयमच्युत चिराभिलाषितं काममहं प्राप्स्यामि संयुगे न
हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणं अद्य त्वां समरे हत्वा नित्यं शूरमभिमानिनं नंदयिष्यामि दाशार्ह कुरुराजं सुयोधनं
अद्य मद्बाणनिर्दग्धं पतितं धरणीतले द्रक्ष्यतस्त्वां रणे वीरौ सहितौ केशवार्जुनौ अद्य धर्मसुतो राजा श्रुत्वा त्वां निहतं मया स
व्रीडो भविता सद्यो येनासीह प्रवेशितः अद्य मे विक्रमं पार्थो विज्ञास्यति धनंजयः त्वयि भूमौ विनिहते शयाने रुधिरोक्षिते चि
राभिलषितो ह्येष त्वया सह समागमः पुरा देवासुरे युद्धे शक्रस्य बलिना यथा अद्य युद्धं महाघोरं तव दास्यामि सात्वत ततो
ज्ञास्यसि तत्त्वेन मद्वीर्यबलपौरुषं अद्य संयमनीं याता मया त्वं निहतो रणे यथा रामानुजेनाजौ रावणिर्लक्ष्मणेन ह अद्य कृष्ण
श्च पार्थश्च धर्मराजश्च माधव हते त्वयि निरुत्साहा रणं त्यक्ष्यंत्यसंशयं अद्य ते पचितिं कृत्वा शितैर्माधव सायकैः तात्स्त्रि
यो नंदयिष्यामि ये त्वया निहता रणे मच्चक्षुर्विषयं प्राप्तो न त्वं माधव मोक्ष्यसे सिंहस्य विषयं प्राप्तो यथा क्षुद्रमृगस्तथा

द्रो० १६२ सुपुत्रानक्षतं राजन्नूमस्तु वाच हसन्निव कौरवेय न संत्रासो विद्यते मम संयुगे नाहं भीषयितुं शक्यो वाङ्मात्रेण तु केवलं
स मां निहन्यात्संग्रामे यो मां कुर्यान्निरायुधं समास्तु शाश्वतीर्हन्याद्यो मां हन्याद्धि संयुगे किं वृथोक्तेन बहुना कर्मणा तु स
माचर शारदस्येव मेघस्य गर्जितं नि[illegible]ष्फलं हि ते श्रुत्वा तद्गर्जितं वीर हास्यं हि मम जायते चिरकालेप्सितं लोके युद्धमद्यास्तु
कौरव त्वरते मम ते सत्त्वात्तव युद्धाभिकांक्षिणी नाहत्वाहं निवर्तिष्ये त्वामद्य पुरुषाधम अन्योन्यं तौ तदा वाग्भिस्तक्षन्तौ नरपुंगवौ
जिघांसू परमक्रुद्धावभिजग्मतुराहवे समेतौ तौ महेष्वासौ शुष्मिणौ स्पर्धिनौ रणे द्विरदाविव संक्रुद्धौ वासितार्थे मदोत्कटौ भूरि
श्रवाः सात्यकिश्च ववर्षतुररिंदमौ शरवर्षाणि घोराणि परस्परं [illegible] सोमदत्तिस्तु शैनेयं प्रच्छाद्येषुभिराशुगैः जिघांसुर्भरतश्रे
ष्ठ विव्याध निशितैः शरैः दशभिः सात्यकिर्विद्धः सोमदत्तिरथापरान् मुमोच निशितान्बाणाञ्जिघांसुः शिनिपुंगव तान् नि
[illegible] स विशिखांस्तीक्ष्णान्नतीत्यैव विशांपते अप्राप्तानस्त्रमायाभिरग्रसत्सात्यकिः प्रभो तौ पृथक्शस्त्रवर्षाभ्यामवर्षेतां पर
स्परं उत्तमाभिजनौ वीरौ कुरुवृष्णियशस्करौ तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ रथशक्तिभिरन्योन्यं विशिखैश्चापकृन्ततां
निर्भिन्दन्तौ हि गात्राणि विक्षरन्तौ च शोणितं व्यस्तम्भयन्तावन्योन्यं प्राणद्यूताभिदेविनौ एवमुत्तमकर्माणौ कुरुवृष्णियशस्करौ
तौ [illegible] परस्परमयुध्येतां वारणाविव यूथपौ तावदीर्घेण कालेन राम० १६२
न ब्रह्मलोकपुरस्कृतौ जिगीषन्तौ परं स्थानमन्योन्यं संजगर्जतुः सात्यकिः सोमदत्तिश्च शरवृष्ट्या परस्परं हृष्टवद्धार्तरा[ष्ट्रा]
राणां पश्य

मेधा३४७

तामभ्यवर्षतां संख्ये स्यंतजनास्ते तु युध्यमानौ युधांपती रथाभ्यां वासिताहेतोः मे युद्धा विरथं कृतौ अन्योन्यस्य हयान् हत्वा धनुषी
विनिकृत्य च विरथावसियुद्धाय समेयातां महारणे आर्षभे चर्मणी चित्रे प्रगृह्य विपुले शुभे विकोशौ चाप्यसी कृत्वा समरे तौ
विचेरतुः चरंतौ विविधान्मार्गान्मंडलानि च भागशः मुहुराजघ्नतुः क्रुद्धावन्योन्यमरिमर्दनौ सखड्गौ चित्रवर्माणौ सनिष्कांगद
भूषणौ भ्रांतमुद्भ्रांतमाविद्धमाप्लुतं विप्लुतं स्रुतं संपातं समुदीर्णं च दर्शयंतौ यशस्विनौ असिभ्यां संप्रजह्नाते परस्परमरिंद
मौ उभौ छिद्रेषिणौ वीरावुभौ चित्रं च वाल्गतुः दर्शयंतावुभौ शिक्षां लाघवं सौष्ठवं तथा रणे रणकृतां श्रेष्ठावन्योन्यं परिकर्ष
तौ मुहूर्तमिव राजेंद्र समाहत्य परस्परं पश्यतां सर्वसैन्यानां वीरावाश्वसतां पुनः असिभ्यां चर्मणी चित्रे शतचंद्रे नराधिप
निकृत्य पुरुषव्याघ्रौ बाहुयुद्धं प्रचक्रतुः व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ बाहुभिः समसज्जेतामायसैः परिघैरिव
यो५ तौ [illegible]ाजन् भुजाघातनिग्रहप्रग्रहास्तथा शिक्षाबलसमुद्भूताः सर्वयोधप्रहर्षणाः तयोर्नरवरयो राजन्समरे युध्यमानयोः
भीमोभवन्महाशब्दो वज्रपर्वतयोरिव द्विपाविव विषाणाग्रैः शृंगैरिव महर्षभौ भुजयोक्त्रावबंधैश्च शिरोभ्यां चावघातनैः
पादाकर्षसंदानैस्तोमरांकुशपाशनैः पादोदरविबंधैश्च भूमावुद्भ्रमणैस्तथा गतप्रत्यागताक्षेपैः पातनोत्थानसंप्लुतैः
युयुधाते महात्मानौ कुरुसात्वतपुंगवौ द्वात्रिंशत्करणानि स्युर्यानि युद्धानि भारत तान्यदर्शयतां तत्र युध्यमानौ महाबलौ
क्षीणायुधे सात्वते युध्यमाने ततोब्रवीदर्जुनं वासुदेवः पश्यस्वैनं विरथं युध्यमानं रणे वरं सर्वधनुर्धराणां प्रविष्टो भारतीं भि

द्रो० १६३ ३६४२

त्वत्तत्वपांडवश्रेष्ठतः योधितश्च महावीर्यैः सर्वैर्भरतभारतैः परिश्रांतं युधांश्रेष्ठं संग्रामे भूरिदक्षिणः युद्धकांक्षी समायांत
लेतत्समभिवार्जुन ततो भूरिश्रवाः क्रुद्धः सात्यकिं युद्धदुर्मदः उद्यम्याभ्यहनद्राजन्मत्तोमत्तमिवद्विपं रथस्थौ योद्धुयोर्यु
द्धे योर्योधमुख्ययोः केशवार्जुनयोराजन्समरे प्रेक्षमाणयोः अथ कृष्णो महाबाहुरर्जुनं प्रत्यभाषत पश्य वृष्ण्यंधकव्या
घ्रं सौमदत्तिवशंगतं परिश्रांतं गतं भूमौ कृत्वा कर्म सुदुष्करं तवांतेवासिनं वीरं पालयार्जुन सात्यकिं न वशं यज्ञशीलस्य गच्छे
देष वरार्जुन त्वत्कृते पुरुषव्याघ्र तदाशु क्रियतां विभो अथाब्रवीद्धृष्टमना वासुदेवं धनंजयः पश्य वृष्णिप्रवीरेण क्री
डंतं कुरुपुंगवं महाद्विपेनेव वनेमत्तेन हरियूथप इत्येवं भाषमाणे तु पांडवे वै धनंजये संजयउवाच हाहाकारो महानासीत्सै
न्यानां भरतर्षभ यदुद्यम्य महाबाहुः सात्यकिं न्यहनद्भुवि स सिंह इव मातंगं विकर्षन्भूरिदक्षिणः व्यरोचत कुरुश्रेष्ठः सा
त्वतप्रवरं युधि अथ कोशान्निष्कृष्य खड्गं भूरिश्रवारणे मूर्द्धजेषु निजग्राह पदा चोरस्यताडयत ततोस्य छेत्तुमारब्धः शिरः का
यात्सकुंडलं तावत्तूर्णमिवात्वत्तोपि शिरः संभ्रमयंस्तदा यथारथांगं कौलालो दंडविद्धं तु भारत सहैव भूरिश्रवसो बाहुना
केशधारिणा तं तथा परिकृष्यंतं दृष्ट्वा सात्वतमाहवे वासुदेवस्ततो राजन्भूयोर्जुनमभाषत पश्य वृष्ण्यंधकव्याघ्रं सौमदत्ति
वशंगतं तव शिष्यं महाबाहो धनुष्यनवमं त्वया असत्यो विक्रमः पार्थ यत्र भूरिश्रवारणे विशेषयति वार्ष्णेयं सात्यकिं सत्यवि
क्रमं एवमुक्तो महाबाहुर्वासुदेवेन पांडवः मनसा पूजयामास भूरिश्रवसमाहवे विकर्षन्सात्वतश्रेष्ठं क्रीडमानमिवाहवे

मांमयं कुरूणांकीर्तिवर्द्धनः प्रवरंहन्मि वीराणांपश्यतह न्याद्भुसात्यकिं महाद्विपंवाराणेपमेगेन्द्र इव कर्षति एवंतुमनसा
राजन्पार्थः संपूज्यकौरवं वासुदेवंमहाबाहुरर्जुनः प्रत्यभाषत सैंधवेसक्तदृष्टित्वान्नैनंपश्यामिमाधव एषत्वसुकरंकर्म्म पा
दवार्थेकरोम्यहं इत्युक्त्वावचनंकुर्वन्वासुदेवस्य पांडवः ततः क्षुरप्रंनिशितंगांडीवेसमयोजयत पार्थबाहुविसृष्टः समहोल्के
वन्नभश्युता सखड्गंयज्ञशीलस्य सांगदंबाहुमच्छिनत्॥ ॥इति द्रोणपर्वणि जयद्रथवधे भूरिश्रवबाहुच्छेदः संजय
उ० सबाहुरपतद्भूमौसखड्गः सशुभांगदः आदधज्जीवलोकस्यजीवमुत्तममुत्तमः प्रहरिष्यन्हृतोबाहुरदृश्येनकिरीटि
ना वेगेनन्यपतद्भूमौपंचास्य इवपन्नगः समोघंकृतमात्मानंदृष्ट्वापार्थेनकौरवः उत्सृज्य सात्यकिं क्रोधाद्गर्हयामा
सपांडवं भूरिश्रवाउवाच नृशंसंवतकौंतेयकर्मेदंकृतवानसि अपश्यतोविषक्तस्ययन्मेबाहुमचिच्छिदः किंनुवक्ष्यसि
राजानंधर्मपुत्रंयुधिष्ठिरं किंकुर्वाणोमयासंख्येहतोभूरिश्रवारणे इदमिंद्रेणतेसाक्षादुपदिष्टंमहात्मना अस्त्रंरुद्रेण
वापार्थद्रोणेनाथकृपेणवा ननुनामास्त्रधर्मज्ञस्त्वंलोकेभ्यधिकंपरैः सोयुध्यमानस्यकथंरणेप्रहतवानसि नप्रमत्ता
यभीतायविरथाय प्रयाचते व्यसनेवर्त्तमानाय प्रहरंतिमनीषिणः इदंतुनीचाचरितमसत्पुरुषसेवितं कथमाचरितंपार्थप
यकर्मसुदुष्करं आर्येणसुकरंह्याहुरार्यकर्मधनंजय अनार्यकर्मत्वार्येणसुदुष्करंतमेभुवि येषुयेषुनरःपार्थयत्रयत्रचवर्त्त
ते आशुतच्छीलतामेतितदिदंत्वयिदृश्यते कथंहिराजवंशस्त्वंकौरवेयोविशेषतः क्षत्रधर्मादपक्रांतः सुवृत्तश्चरितव्रत
इदंतुयदतिक्षुद्रंवार्ष्णेयार्थेकृतंत्वया वासुदेवमतंनूनंनैतत्त्वय्युपपद्यते कोहिनामप्रमत्तायपरेणसहयुध्यते ईदृशंव्यस

द्रो० १६५ नं रघाघोनकस्त्समरेवोभवेत्त् ग्रास्ताः सुक्लिष्टकर्माणः प्रकृत्यैववगर्हिताः वृत्स्यंधकाः कथंपार्थप्रमाणंभवताकृताः एव
मुक्तोरणेपार्थोभूरिश्रवसमब्रवीत् अर्जुनउवाच व्यक्तंहिजीर्यमाणोपिबुद्धिंजरयतेनरः अनर्थकमिदंसर्वंयत्त्वयाव्या
हृतंप्रभो जानन्नेवहृषीकेशंगर्हसेमांचपांडवं संग्रामाणांहि धर्मज्ञः सर्वशास्त्रार्थपारगः नचाधर्ममहंकुर्यांजानंश्च
वहिमुह्यसे युध्यंतिक्षत्रियाः शत्रून्स्वैः स्वैः परिवृतानराः भ्रातृभिः पितृभिः पुत्रैस्तथासंबंधिबांधवैः वयस्यैरथमित्रैश्च
तेचबाहुंसमाश्रिताः सकथंसात्यकिंशिष्यंसुखसंबंधिमेवच अस्मदर्थेचयुध्यंतंत्यक्त्वाप्राणान्सुदुस्त्यजान् ममबाहु
रणेराजन् दक्षिणंयुद्धदुर्मदं नचात्मारक्षितव्योवैराजन्नणगतेनहि योयस्ययुज्यतेर्थेषुसवैरक्ष्योनराधिप तैरक्ष्यमा
णैः सनृपोरक्षितव्योमहामधे यद्यहंसात्यकिंयश्येयवध्यमानंमहारणे ततस्तस्यविपोगेनपापंमेनर्यतोभवेत् र
क्षितश्चमयापयस्मात्तस्मात्क्रुद्ध्यसिकिंमपि यच्चमेगर्हसेराजन्नन्येनसहसंगतं अहंत्वयाविनिकृतस्तत्रमेबुद्धिवि
भ्रमः कवचंधुन्वतस्तुभ्यंरथंचारोहतः स्वयं धनुर्ज्याकर्षतश्चैवयुध्यतः सहशत्रुभिः एवंरथगजाकीर्णेरथपत्तिसमा
कुले सिंहनादोद्धुतरवेगंभीरेसैन्यसागरे स्वैः परैश्चसमेतेभ्यः सात्वतेनचसंगमे एकस्यैकेनहिकथंसंग्रामः सभवि
ष्यति बहुभिः सहसंगम्यनिर्जितस्यचमहारथान् श्रांतस्यआनतवाहस्यविमनाःशस्त्रपीडितः ईदृशंसात्
राम० १६५

किं संख्ये निर्ज्जितस्य च महारथं अधिकं त्वं विजानीषे स्ववीर्येण समागतं छेत्स्यामि शिरश्चास्य अस्मिना हंतुमाहवे तथा हि च्छु
गतं चैव सात्वकिकः क्षमिष्यति त्वं वै विगर्हयात्मानमात्मानं यो न रक्षसि कथं करिष्यसे वीर यो वा त्वां संश्रयेज्जनः संजय उ०
एवमुक्तो महाबाहुर्यूपकेतुर्महायशाः युयुधानं समुत्सृज्य रणे प्रायमुपाविशत् शरानास्तीर्य सव्येन पाणिना सुरापलक्ष्म
णाः पिपासुर्ब्रह्मलोकाय प्राणान्प्राणेषु चाजुहोत् सूर्ये चक्षुः समाधाय प्रसन्नं सलिले मनः ध्यायन्महोपनिषदं यो
गयुक्तोऽभवन्मुनिः ततः स सर्वसेनायां जनः कृष्णधनंजयौ गर्हयामास तं चापि शशंस पुरुषर्षभं निंद्यमानौ तथा कृष्णौ
नोचतुः किंचिदप्रियं तथा प्रशस्यमानश्च नाहृष्यद्यूपकेतनः तांस्तथा वादिनो राजन् पुत्रांस्तव धनंजयः अमृष्यमाणो
मनसा तेषां तस्य च भाषितं असंक्रुद्धमना वाचः स्मारयन्निव भारत उवाच पांडुतनयः साक्षेपमिव फाल्गुनः मम सर्वे
पि राजानो जानंत्येतद्व्रतं महद् न शक्यो मामको हंतुं यो मे स्याद्बाणगोचरे यूपकेतो समीक्ष्येतन्मामर्हसि गर्हितुं नहि
धर्ममविज्ञाय युक्तं गर्हयितुं परं आत्तशस्त्रस्य हि रणे वृष्णिवीरं जिघांसतः यदहं बाहुमच्छैत्सं न स धर्मो विगर्हितः न्य
स्तशस्त्रस्य बालस्य विरथस्य विवर्मणः अभिमन्योर्वधं तात धार्मिकः को नु पूजयेत् एवमुक्तः स पार्थेन शिरसा भूमिमस्पृश
त् पाणिना चैव सव्येन प्राहिणोदस्य दक्षिणं एतत्पार्थस्य तु वचः ततः श्रुत्वा महाद्युतिः यूपकेतुर्महाराज तूष्णीमासीद
वाङ्मुखः अर्जुन उवाच या प्रीतिर्धर्मराजे मे भीमे च बलिनां वरे नकुले सहदेवे च सा मे त्वयि शलाग्रज मया त्वं समनुज्ञातः

द्रो० १६५

कृष्णेनचमहात्मना गच्छपुण्यकृतांल्लोकांछिबिरौशीनरोयथा वासुदेवउवाच येलोकाममविमलाः सकृद्विभांतिब्रह्मा
द्यैःसुरवृषभैरपीष्यमाणाः तान्क्षिप्रंव्रजसततामिहोत्रयाजिन्मत्तुल्योभवगरुडोत्तमांगयानः संजयउवाच उत्थितःसतुशै
नेयोविमुक्तःसोमदत्तिना खङ्गमादायचिच्छित्सुःशिरस्तस्यमहात्मनः निहतंपांडुपुत्रेणप्रसक्तंभूरिदक्षिणं इयेषसात्यकिः
र्हंतुंशलाग्रजमकल्मषं निकृत्तभुजमासीनंछिन्नहस्तमिवद्विपं क्रोशतांसर्वसैन्यानांनिंद्यमानःसुदुर्मनाः वार्यमाणः
सकृष्णेनपार्थेनचमहात्मना भीमेनचक्ररक्षाभ्यामश्वत्थाम्नाकृपेणच कर्णेनवृषसेनेनसैंधवेनतथैवच विक्रोश
तांचसैन्यानामवधीत्तंयतव्रतं प्रायोपविष्टायरणेपार्थेनछिन्नबाहवे सात्यकिःकौरवेयायखड्गेनापाहरच्छिरः नाभ्य
नंदंतसैन्यानिसात्यकिंतेनकर्मणा अर्जुनेनहतंपूर्वंयज्जघानकुरूद्वहं सहस्राक्षसमंचैवसिद्धचारणमानवाः भूरिश्रवं
समालोक्ययुद्धेप्रायोगतंहतं अपूजयंततंदेवाविस्मितास्तस्यकर्मभिः पक्षवादांश्चसुबहून्प्रावदंस्तवसैनिकाः नवार्ष्णे
यस्यापराधोभवितव्यंहितत्तथा तस्मान्मन्युर्नवःकार्यःक्रोधोदुःखतरोनृप हंतव्यश्चैववीरेणनात्रकार्याविचारणा वि
हितोयस्यधात्रैवमृत्युःसात्यकिराहवे सात्यकिरुवाच नहंतव्योनहंतव्यइतियन्मामभाषथ धर्मवादैरधर्मिष्ठाधर्मकंचुकमा
स्थिताः यदाबालःसुभद्रायाःसुतःशस्त्रविनाकृतः युष्माभिर्निहतोयुद्धेतदाधर्मःक्ववोगतः मयात्वेतत्प्रतिज्ञातंक्षेपेक
स्मिंश्चिदेवहि योमांनिष्पिष्यसंग्रामेजीवन्हन्यात्सहारुषा समेवध्योभवेच्छत्रुर्यद्यपिस्यान्मुनिव्रतः चेष्टमानंप्रतीघातेसभुजं
मांसचक्षुषः मन्यध्वमृतइत्ये

राम० १६५

वेमेतद्दृष्टं बुद्धिलाघवं युक्तोस्यप्रतीघातः कृतोमेकुरुपुंगवः यन्नुपार्थेनमांदृष्ट्वाप्रतिज्ञामभिरक्षता सखड्गोस्यहृतोबाहुरेते
नैवास्मिवंचितः भवितव्यंहियद्भाविदैवंचेष्टयतीवच सोयंहतोविमर्देस्मिन्किमत्राधर्मचेष्टितं अपिचायंपुरागीतः श्लोकेहाल्मि
किनाभुवि सर्वकालंमनुष्येणव्यवसायवतासदा पीडाकरममित्राणांयत्स्यात्कर्तव्यमेवतत् संजयउ० एवमुक्तेमहाराजसर्वेकौ
रवपुंगवाः नस्मकिंचिदभाषंतमनसानमपूजयन् मंत्रैरभिपूतस्यमहाध्वरेषुयशस्विनोभूरिसहस्रदस्य मुनेरिवारण्यगतस्यत
स्याननतस्यकश्चिद्वधमभ्यनंदत् सुनीलकेशंवरदस्यतस्यशूरस्यपारावतलोहिताक्षं अश्वस्यमेध्यस्यशिरोनिकृत्तंन्यस्तंहवि
[illegible]नमिवांतरेण सतेजसाशस्त्रहतेनपूतो महाहवेदेहवरंविसृज्य आक्रामदूर्ध्वंवरदोवराहैर्व्याप्यनभोधर्मपरेणरोद
सी॥ ॥इतिद्रोणपर्वणिजयद्रथवधे धृतराष्ट्रउवाच अजितोद्रोणराधेयविकर्णकृतवर्मभिः तीर्णःसैन्या
र्णवंवीरःप्रतिश्रुत्ययुधिष्ठिरे सकथंकौरवेयेनसमरेष्वनिवारितः निगृह्यभूरिश्रवसावलाद्भुविनिपातितः संजयउवाच
शृणुराजन्निहोत्पत्तिं शैनेयस्ययथापुरा यथाचभूरिश्रवसोयत्रतेसंशयोनृप अत्रेःपुत्रोभवत्सोमःसोमस्यतुबुधः
स्मृतः बुधस्यैलोमहेंद्राभःपुत्रश्चासीत्पुरूरवाः पुरूरवसआयुस्तुआयुषोनहुषःसुतः नहुषस्यययातिस्तुराजादे
वर्षिसंमितः ययातेर्देवयान्यांतुयदुर्ज्येष्ठोभवत्सुतः यदोरभूदन्ववायेदेवमीढइतिस्मृतः यादवस्तस्यतुसुतःशूरस्त्रैलो
क्यसंमतः शूरस्यशौरिर्नृवरोवसुदेवोमहायशाः धनुष्यनवरःशूरः कार्तवीर्यसमोयुधि तद्वीर्यश्चापितत्रैवकुलेशिनि
रभून्नृप एतस्मिन्नेवकालेतुदेवकस्यमहात्मनः दुहितुःस्वयंवरेराजन्सर्वक्षत्रसमागमे तत्रवैदेवकींदेवीवसुदेवा

[illegible]र्षमाप्नुवे निर्जित्यपार्थिवान्सर्वान्रथमारोपयद्विभिः तां हत्वा देवकीं शूरो रथपश्चात्पुरुषर्षभः नामृष्यत महातेजाः सो
मदत्तः शिनेर्नृपः तयोर्युद्धमभूद्राजन्दिनार्धं चित्रमद्भुतं बाहुयुद्धं सुबलिनोः प्रसक्तं पुरुषर्षभ शिनिना सोमदत्तस्तु
प्रसह्य भुवि पातितः असिमुद्यम्य केशेषु प्रगृह्य च पदाहतः मध्ये राजसहस्राणां प्रेक्षकाणां समंततः कृपया च पुनस्तेन स जी
वेति विसर्जितः तदवस्थः कृतस्तेन सोमदत्तोऽथ मारिष प्रसादयन्महादेवममर्षवशमास्थितः तस्य तुष्टो महादेवो वराणां वर
दः प्रभुः वरेणाच्छंदयामास स तु वव्रे वरं नृपः पुत्रमिच्छामि भगवन्यो निपात्य शिनेः सुतं मध्ये राजसहस्राणां पदा हन्याच्च
संयुगे तस्य तद्वचनं श्रुत्वा सोमदत्तस्य पार्थिव एवमस्त्विति तत्रोक्त्वा स देवोंऽतरधीयत स तेन वरदानेन लब्धवान्भूरिद
क्षिणं न्यपातयच्च समरे सौमदत्तिः शिनेः सुतं पश्यतां सर्वसैन्यानां पदा चैनमताडयत् एतत्ते कथितं राजन्यन्मां त्वं
परिपृच्छसि नहि शक्या रणे जेतुं सात्वता मनुजर्षभैः लब्धलक्ष्याश्च संग्रामे बहवश्चित्रयोधिनः देवदानवगंधर्वान्विजेता
रो ह्यविस्मिताः स्ववीर्यविजये युक्ता नैते परपरिग्रहाः न तुल्यं वृष्णिभिरिह दृश्यते किंचन प्रभो भूतं भव्यं भविष्यं च बलेन भरत
र्षभ न ज्ञातिमवमन्यंते वृद्धानां शासने रताः न देवासुरगंधर्वा न यक्षोरगराक्षसाः जेतारो वृष्णिवीराणां किं पुनर्मान
वा रणे ब्रह्मद्रव्ये गुरुद्रव्ये ज्ञातिद्रव्येऽप्यहिंसकाः एतेषां रक्षितारश्च ये स्युः कस्यांचिदापदि अर्थवंतो न चोत्सिक्ता ब्र
ह्मण्याः सत्यवादिनः समर्थान्नावमन्यंते दीनानभ्युद्धरंति च नित्यं देवपरा दांता दातारश्चाविकत्थनाः तेन वृष्णिप्रवी
राणां चक्रं न प्रतिहन्यते अपि मेरुं

वर्हेत्कथं च्चितेरहामकरालयं नतुरश्मिप्रवीराणांसमेतानांतंजनेन्द्रपः एततेसर्वमाख्यातंयच्चतेसंशयःप्रभो कुरुराजनर
श्रेष्ठतवह्यपनयोमहान्॥ ॥द्रोणपर्वणिजयद्रथवधे धृतराष्ट्रउवाच तस्मिन्हतेतस्मिन्नभूरिश्रवसिकौरवे यथाभूयो
भवद्युद्धंतन्ममाचक्ष्वसंजय संजयउवाच भूरिश्रवसिसंक्रांतेपरलोकायभारत वासुदेवंमहाबाहुरर्जुनःसमचोदय
त चोदयाश्वान्भृशंकृष्णयतोराजाजयद्रथः प्रतिज्ञांसफलांचापिकर्तुमर्हसिमेनघ अस्तमेतिमहाबाहोत्वरमाणोदिवाक
रः एतद्धिपुरुषव्याघ्रमहदभ्युद्यतंमया कार्यंसंरक्ष्यतेचैषकुरुसेनामहारथैः यथानाभ्येतिसूर्योस्तंयथासत्यंभवेद्व
चः चोदयाश्वांस्तथाकृष्णयथाहन्यांजयद्रथं ततःकृष्णोमहाबाहूरजतप्रतिमान्हयान् हयज्ञश्चोदयामासजयद्रथ
रथंप्रति तंप्रयांतममोघेषुमुत्पतद्भिरिवाशुगैः त्वरमाणामहाराजसेनामुख्याःसमाद्रवन् दुर्योधनश्चकर्ण
श्चवृषसेनोथमद्रराट् अश्वत्थामाकृपश्चैवस्वयमेवचसैंधवः समासाद्यचबीभत्सुःसैंधवंसमुपस्थितं नेत्राभ्यां
क्रोधदीप्ताभ्यांसंप्रेक्ष्यनिर्दहन्निव ततोदुर्योधनोराजाराधेयंत्वरितोब्रवीत् अर्जुनेप्रत्यसंयातेजयद्रथवधंप्रति उ
वाचराजसुतस्तत्रकर्णंराजासुयोधनः अयंसवैकर्तनयुद्धकालोविदर्शयस्वात्मबलंमहात्मन् यथानवध्येतरणेर्जु
नेनजयद्रथःकर्णतथाकुरुष्व अल्पावशेषोदिवसोनवीरविघातयस्वात्मरिपुंशरौघैः दिनक्षयंप्राप्यनरप्रवी
रध्रुवोहिनःकर्णजयोभविष्यति सैंधवेरक्ष्यमाणेतुसूर्यस्यास्तमनंप्रति मिथ्याप्रतिज्ञःकौंतेयःप्रवेक्ष्यतिहुता
शनं अनर्जुनायांचभुविमुहूर्तमपिमानद जीवितुंनोत्सहेरन्वैभ्रातरोस्यसहानुगाः विनष्टैःपांडवेयैश्चसशै

द्रो० लवनकाननां वसुंधरामिमां कर्णमोक्ष्यामो हतकंटकां दैवेनोपहतः पार्थो विपरीतश्च मानद कार्याकार्यमजाना
१६७ नः प्रतिज्ञां कृतवान् रणे नूनमात्मविनाशाय पांडवेन किरीटिना प्रतिज्ञेयं कृता कर्ण जयद्रथवधं प्रति कथं जीवन्हि दु
र्द्धर्षे त्वयि राधेय फाल्गुनः अनस्तंगत आदित्ये हन्यात्सैंधवकं नृप रक्षितं मद्रराजेन कृपेण च महात्मना जयद्रथं रणमु
खे कथं हन्याद्धनंजयः द्रौणिना रक्ष्यमाणं च मया दुःशासनेन च कथं प्राप्स्यति बीभत्सुः सैंधवं कालचोदितः युध्यंते
बहवः शूरा लंबते च दिवाकरः शंके जयद्रथं पार्थो नैव प्राप्स्यति मानद स त्वं कर्ण मया सार्द्धं शूरैश्चान्यैर्महारथैः द्रौ
णिना त्वं हि सहितो मद्रेशेन कृपेण च युध्यस्व यत्नमास्थाय परं पार्थेन संयुगे एवमुक्तस्तु राधेयस्तव पुत्रेण मारिष दु
र्योधनमिदं वाक्यं प्रत्युवाच कुरूत्तमं दृढलक्ष्येण वीरेण भीमसेनेन धन्विना भृशं भिन्नतनुः संख्ये शरजालैरनेकशः
स्थातव्यमिति तिष्ठामि रणे संप्रति मानद नांगमिंगति किंचिन्मे संतप्तस्य महेषुभिः योत्स्यामि तु यथाशक्त्या त्वद
र्थं जीवितं मम यथा पांडवमुख्योऽसौ न हनिष्यति सैंधवं न हि मे युध्यमानस्य सायकानस्यतः शितान् सैंधवं प्राप्स्यते
वीरः सव्यसाची धनंजयः यत्तु भक्तिमता कार्यं सततं हितकांक्षिणा तत्करिष्यामि कौरव्य जयो दैवे प्रतिष्ठितः अद्य यु
द्धं कुरुश्रेष्ठ मम पार्थस्य चोभयोः पश्यंतु सर्वसैन्यानि दारुणं लोमहर्षणं कर्णकौरवयोरेवं रणे संभाषमाणयोः अर्जु राम०
नो निशितैर्बाणैर्जघान तव वाहिनीं चिच्छेद निशितैर्बाणैः शूराणामनिवर्त्तिनां भुजान्परिघसंकाशान्हस्तिहस्तोपमा १६७
न्रणे शिरांसि च महाबाहुश्चिच्छेद निशितैः शरैः हस्तिहस्तान्हयग्रीवान् रथाक्षांश्च समंततः शोणिताक्तान्हयारोहान्गृहीतप्रास
न१

तोमरान् स्तुरेष्विच्छेदवीभत्सुर्द्विधैकैकं त्रिधैव च हयवारणमुख्यांश्च प्रापतंस्तसमंततः ध्वजांश्छत्राणि चापानि चा
मराणि शिरांसि च कक्षमग्निरिवोद्धूतः प्रददाह तव वाहिनीं अचिरेण महीं पार्थश्चकार रुधिरोत्तरां हतभूयिष्ठयोधं तत्
कृत्वा तव बलं बली आससाद दुराधर्षः सैंधवं सत्यविक्रमः बीभत्सुर्भीमसेनेन सात्वतेन च रक्षितः प्रबभौ भरतश्रेष्ठ
ज्वलन्निव हुताशनः तं तथा चस्थितं दृष्ट्वा त्वदीया वीर्यसंपदा नामृष्यंत महेष्वासाः पांडवं पुरुषर्षभाः दुर्योधनश्च क
र्णश्च वृषसेनोथ मद्रराट् अश्वत्थामा कृपश्चैव स्वयमेव च सैंधवः संनद्धाः सैंधवस्यार्थे समावृण्वन् किरीटिनं
नृत्यंतं रथमार्गेषु धनुर्ज्यातलनिःस्वनैः संग्रामकोविदं पार्थं सर्वे युद्धविशारदाः अभीताः पर्यवर्तंत व्यादितास्य
मिवांतकं सैंधवं पृष्ठतः कृत्वा जिघांसंतोच्युतार्जुनौ सूर्यास्तमनमिच्छंतो लोहितायति भास्करे ते भुजैर्भोगिभो
गाभैर्धुन्वंतश्चापान्यसायकान् मुमुचुः सूर्यरश्म्याभांश्छतशः फाल्गुनं प्रति तानस्तानस्यमानांश्च किरीटी युद्धदुर्मदः
द्विधा त्रिधाष्टधैकैकं भित्वाविध्यत तान्रथान् सिंहलांगूलकेतुस्तु दर्शयन्वीर्यमात्मनः शारद्वतीसुतो राजन्नर्जुनं
प्रत्यवारयत् सविध्वा दशभिः पार्थं वासुदेवं च सप्तभिः अतिष्ठद्रथमार्गेषु सैंधवं प्रतिपालयन् अथैनं कौरवश्रे
ष्ठाः सर्व एव समंततः महता रथवंशेन सर्वतः प्रत्यवारयन् विस्फारयंतश्चापानि विसृजंतश्च सायकान् सैंधवं पर्य
रक्षंत शासनात्तनयस्य ते ततः पार्थस्य शूरस्य बाह्वोर्बलमदृश्यत इषूणामक्षयत्वं च धनुषो गांडिवस्य च अस्त्रैरस्त्रा
णि संवार्य द्रौणेः शारद्वतस्य च एकैकं दशभिर्बाणैः सर्वानेव समार्पयत् तं द्रौणिः पंचविंशत्या वृषसेनश्च सप्तभिः

द्रो० १६८ दुर्योधनश्च संतत्या कर्णः शल्यस्त्रिभिस्त्रिभिः तएनमभिगर्जंतोविध्यंतश्च पुनः पुनः विधुन्वंतश्च चापानि सर्वतः प्रत्यवा
रयन् शीघ्रं च सर्वतश्चक्रुः रथमंडलमाशुते सर्पास्तमनमभितस्त्वरमाणा महारथाः तएनमभि नर्दंतोविधुन्वाना ध
नूंषि च सिषिचुर्मार्गणैस्तीक्ष्णैर्गिरिं मेघाइवांबुभिः तेमहास्त्राणि दिव्यानि तत्र राजन्न्यदर्शयन् धनंजयस्य गात्रेषु शूराः
परिघबाहवः हतभूयिष्ठयोधं तत्कृत्वा तं च बलं बली आससाद दुराधर्षः सैंधवं सत्यविक्रमः तं कर्णः संयुगे राजन्प्रत्यवार
पराम्युगेः मिषतोभीमसेनस्य सात्वतस्य च भारत तं पार्थो दशभिर्बाणैः प्रत्यविध्यद्रणाजिरे सूतपुत्रं महाबाहुः सर्वसैन्य
स्य पश्यतः सात्वतश्च त्रिभिर्बाणैः कर्णं विव्याध मारिष भीमसेनस्त्रिभिश्चैव पुनः पार्थश्च सप्तभिः तान्कर्णः प्रतिवि
पध्याय व्याध षष्ट्या महारथः तद्युद्धमभवद्राजन् कर्णस्य बहुभिः सह तत्राद्भुतमपश्याम सूतपुत्रस्य मारिष यदेकः समरे क्रुद्ध
स्त्रीन्रथान्पर्यवारयत् फाल्गुनस्तु महाबाहुः कर्णं वैकर्तनं रणे सायकानां शतेनैव सर्वमर्मस्वताडयत् रुधिरोक्षि
तसर्वांगः सूतपुत्रः प्रतापवान् शरैः पंचाशता वीरः फाल्गुनं प्रत्यविध्यत तस्य तल्लाघवं दृष्ट्वा नामृष्यत रणेऽर्जुनः ततः
पार्थो धनुश्छित्वा विव्याधैनं स्तनांतरे सायकैर्नवभिर्वीरस्त्वरमाणो धनंजयः वधार्थं तस्य समरे सायकं सूर्यवर्चसं राम० १६८
चिक्षेप त्वरया युक्तस्त्वराकाले धनंजयः तमापतंतं वेगेन द्रौणिश्चिछेद सायकं अर्द्धचंद्रेण तीक्ष्णेन सछिन्नः
प्रापतद्भुवि [illegible]

पान्यद्दनुरागायमनःपुत्रः प्रतापवान् सायकैर्बहुसाहस्रैश्छादयामासपांडवं तांशस्त्रवृष्टिंतुमुलांकर्णचापसमुच्छ्रि
तां अथमत्स्त्रायकैः पार्थः शलभानिवमारुतः छादयामाससंवतंसायकैरर्जुनेरणे पश्यतांसर्वयोधानांदर्शयन्
पाणिलाघवं कर्णोपिद्विषतांहंताछादयामासफाल्गुनं सायकैर्बहुसाहस्रैः कृतप्रतिकृतेप्सया तौहर्षाविवनर्दंतौ
नरसिंहौमहारथौ सायकैस्तुमतिछन्नंचक्रतुःखमजिह्मगैः अदृश्यंचशरौघैस्तौनिघ्नंताविन्नेरतरं कर्णपार्थोस्मितिष्ठस्व
कर्णहीतिचफाल्गुन इत्येवंतर्जयंतौतौवाक्यशल्यैस्तुदंतौतदा युध्यतांसमरेवीरौचित्रंलघुचसुष्ठुच प्रेक्षणीयावभवतांस
र्वयोधसमागमेप्रशस्यमानौसमरेसिद्धचारणवार्त्तिकैः अयुध्येतांमहाराजपरस्परवधैषिणौ ततोदुर्योधनोराजंस्ताव
कानभ्यभाषत यत्नाद्रक्षतराधेयंनाहत्वासमरेर्जुनं निवर्तिष्यतिराधेयइतिमामुक्तवान्वृषः एतस्मिन्नंतरेराजन्दृष्ट्वा
कर्णस्यविक्रमं आकर्णमुक्तैरिषुभिः कर्णस्यचतुरोहयान् अनयन्मृत्युलोकायचतुर्भिःश्वेतवाहनः सारथिंचास्यभ
ल्लेनरथनीडादपातयत् छादयामासचशरैस्तवपुत्रस्यपश्यतः संछाद्यमानःसमरेहताश्वोहतसारथिः मोहितःश
रजालेनकर्तव्यंनाभ्यपद्यत तंतथाविरथंदृष्ट्वारथमारोप्यतंतदा अश्वत्थामामहाराजभूयोर्जुनमयोधयत् मद्ररा
जश्चकौंतेयमविध्यत्त्रिंशताशरैः शारद्वतस्तुविंशत्यावासुदेवंसमार्प्पयत् धनंजयंद्वादशभिराजघानशिलीमुखैः
चतुर्भिःसिंधुराजश्चवृषसेनश्चसप्तभिः पृथक्पृथङ्महाराजविव्यधुः कृष्णपांडवौ तथैवतान्प्रत्यविध्यत्कुंती
पुत्रोधनंजयः द्रोणपुत्रंचतुःषष्ट्यामद्रराजंशतेनच सैंधवंदशभिर्वाणैर्वृषसेनंत्रिभिःशरैः शारद्वतंचविंशत्यावि

द्रो०
१६९

धाणार्येनिनारह। ते प्रतिज्ञाप्रतीघातमिच्छंतः सव्यसाचिनः सहितास्तावकास्तूर्णमभिपेतुर्धनंजयं अथार्जुनः सर्वतो
वारणास्त्रं प्रादुश्चक्रे त्रासयन्धार्तराष्ट्रान् तं प्रत्युदीयुः कुरवः पांडुपुत्रं रथैर्महार्हैः शरवर्षाणि प्रवर्षन् ततस्तु तस्मिंस्तु
मुलेसमुच्छ्रिते सुदारुणे भारत मोहनीये नामुह्यत प्राप्य स राजपुत्रः किरीटमाली व्यसृजंश्च शरोघान् राज्यप्रेप्सुः सव्यसाची कुरू
णां स्मरन्क्लेशान्द्वादशवर्षवृत्तान् गांडीवमुक्तैरिषुभिर्महात्मा सर्वा दिशो व्यावृणोदप्रमेयः प्रदीप्तोल्कमभवच्चांतरिक्षं
देहेषु भीरुन्यपतन्वयांसि तान्पिंगलज्येन किरीटमाली क्रुद्धो रिपून्नागणवेन हंति किरीटमाली महता महायशाः शरासने
नाम्यशरानतीकजित हयप्रवेकोत्तमनागवर्मितान कुरुप्रवीरानिषुभिर्व्यपानयत गदाश्च गुर्वीः परिघानयस्मयानसी
श्च शक्तीश्च रणे नराधिपाः महांति शस्त्राणि च भीमदर्शनाः प्रगृह्य पार्थं सहसाभिदुद्रुवुः ततो युगांताभ्रसमस्वनं म स ६
हन्महेंद्रचापप्रतिमं सगांडिवं विकर्षतो भीमविहसन्परंतपो दहंस्त्वरीपान्यमराष्ट्रवर्द्धने सतानुदीर्णान्सरथाश्च वार
णान् पदातिसंघांश्च महाधनुर्द्धरः विपन्नसर्वायुधजीवितान्रणे चकार वीरो यमराष्ट्रवर्द्धनान्॥ ॥इति द्रोणपर्वणि
जयद्रथवधे। संजय उवाच श्रुत्वा निनादं धनुषश्च तस्य विस्पष्टमुत्कृष्टमिवांतकस्य शक्राशनिस्फोटसमं सुघोरं वि
कृष्यमाणस्य धनंजयेन त्रासोद्विग्नं तत्र घोरं ततस्त्वदीयं तद्बलं नृप युगांतवातसंक्षुब्धं चलद्वीचितरंगिणं प्रनीलमीनम
करं सागरं भद्रवाभवत् सरणो मे चरत्पार्थः प्रेक्षमाणो धनंजयः युगपद्दिक्षु सर्वासु सर्वाण्यस्त्राणि दर्शयन् आ
हरानं ॥

राम०
१६९

महाराजसंधानंचपांडवं उत्कर्षंतंसजंतंवनस्मयपश्यामलाघवात् ततःक्रुद्धोमहाबाहुर्द्रुमस्त्रंदुरासदं प्रादुश्चक्रेमहाराजत्रा
सयन्सर्वभारतान् ततःशराःप्रादुरासन्दिव्यास्त्रप्रतिमंत्रिताः प्रदीप्ताश्चशिखिमुखाःशतशोथसहस्रशः आकर्णपूर्ण
निर्मुक्तैरग्न्यर्कांशुनिभैःशरैः नभोभवत्तदुल्काभिरिवसंवृतं ततःशस्त्रौघकारंतत्कौरवैःसमुदीरितं अशक्य
मनसाप्यन्यैःपांडवःसंभ्रमन्निव नाशयामासविक्रम्यशरैर्दिव्यास्त्रमंत्रितैः नैशंतमोंशुभिःक्षिप्रंदिनादाविवभास्करः
ततस्तुनावकसेसंदीप्तैःशरगभस्तिभिः आदित्यमध्ये हूनिनिदाघार्कइवप्रभुः ततोदिव्यास्त्रविदुषाप्रहिताःसायका
शवः समाहत्यतद्द्विषत्सैन्यंलोकंभानोरिवांशवः नध्यापरेसमुत्तस्थुर्विशिखास्तिग्मतेजसः हृदयान्याशुवीराणांविविशुःप्रि उस्यः ६
यवंधुवत् पतन्नभीपुःसमरेत्वयोधाःशूरमानिनः शलभाइवतेदीप्तमग्निंप्राप्यपपुःनृप एवंसमृद्गन्शत्रूणांजीवि
तानियशांसिच पार्थश्चचारसंग्रामेमृत्युर्विग्रहवानिव सकिरीटानिवक्त्राणिसांगदान्विपुलान्भुजान् स
कुंडलयुगान्कर्णान्केषांचिदहरच्छरैः सतोमरान्गजस्थानांसप्रासान्हयसादिनां सचर्मणःप्रदीप्ता
नांरथिनांसशरान्धनुः समंततोहरन्पार्थोबाहूंश्चिच्छेदपांडवः प्रदीप्तोग्रशरार्चिष्मान्बभौतत्रधनंजयः
सविस्फुलिंगाग्रशिखोज्वलन्निवहुताशनः तंदेवराजप्रतिमंसर्वशस्त्रभृतांवरं युगपद्दिक्षुसर्वासुरथस्थं
पुरुषर्षभं निक्षिपंतंमहास्त्राणिप्रेक्षणीयंधनंजयं नृत्यंतंरथमार्गेषुधनुर्ज्यातलनादितं निरीक्षितुंनशेकुस्ते
पलवंतोपिपार्थिवाः मध्यंदिनगतंसूर्यंप्रतपंतमिवांबरे दीप्तोग्रसंभृतशरःकिरीटीविरराजह वर्षास्विवोदीर्ण
जलःसेंद्रधन्वांबुदोमहान् महास्त्रसंप्लवेतस्मिन्जिष्णुनासंप्रवर्तिते सुदुस्तरेमहावीरेमग्नयोधपुंगवाः

द्रो० १७० उत्कृत्तवदनैर्देहैः शरीरैः कृत्तबाहुभिः भुजैश्च पाणिनिर्मुक्तैः पाणिभिश्चांगुलीकृतैः कृत्ताग्रहस्तैः करिभिः कृत्तदन्तैर्मदोत्क-
टैः हयैश्च विधुरग्रीवैः रथैश्च शकलीकृतैः निकृत्तान्त्रैः कृत्तपादैस्तथान्यैः कृत्तसन्धिभिः निश्चेष्टैर्विस्फुरद्भिश्च शतशो
ऽथ सहस्रशः मृत्योराघातललितं तत्तथायोधनं महत् अपश्याम महीपाल भीरूणां भयवर्द्धनं आक्रीडमि-
व रुद्रस्य पुराभ्यर्द्दयतः पशून् गजानां च रनिर्मुक्तैः करैः सभुजगेव भूः क्वचिद्भाति स्म ग्विराणीव वक्त्रपद्मैः समाचि-
ता विचित्रोष्णीषमुकुटैः केयूरांगदकुंडलैः स्वर्णचित्रैस्तनुत्रैश्च भांडैश्च गजवाजिनां किरीटशतसंकीर्णा तत्र त-
त्र समाचिता विरराज भृशं चित्रा मही नववधूरिव मज्जमेदःकर्दमिनी शोणितौघतरंगिणी मर्मास्थिभि-
रगाधा च केशशैवलशाद्वला शिरोबाहूपलतटा रुग्णाक्रोडास्थिसंकटा चित्रध्वजपताकाढ्या छत्रचापोर्मिमालि-
नी विगतासुमहाकाया गजेन्द्राभिसंकुला रथोडुपशताकीर्णा हयसंघाततोधसा रथचक्रयुगेषाक्षकूबरैः रतिदु-
र्गमा प्रासासिशक्तिपरशुविशिखाहिदुरासदा वलकंकमहानक्रा गोमायुमकरोत्करा गृध्रोदग्रमहाग्राहा शिवा-
विरुतभैरवा नृत्यत्प्रेतपिशाचाद्यैर्भूतानां शतसहस्रशः गतासुयोधनिश्चेष्टशरीरशतवाहिनी महाप्रतिभया
रौद्रा घोरा वैतरणीमिव नदीं प्रवर्त्तयामास भीरूणां भयवर्द्धिनीं तं दृष्ट्वा तस्य विक्रान्तमन्तकस्येव रूपिणः अभूतपू-
र्वं कुरुष्वभयमागाद्रणाजिरे ततस्त्वादाय वीराणामस्त्रैरस्त्राणि पाण्डवः आत्मानं रौद्रमाचष्ट रौद्रकर्म्मणि स्थि- एम० १७०
तः ततो रथवरान् राजन्नभ्यतिक्रामदर्जुनः मोहयन्निव नाराचैर्ज्योपद्रुत्यवधेश्वपा विसृजन्नरिसु सर्वाङ्गु

शराननिशितसारथिः सरथोऽप्यवर्त्तं तंस्मिन् हताश्रीयो धनंजयः अमंतरं वशारस्य शरप्राताः सहस्रशः आदर्शयंतो तरी हस्तस्य
शतशोऽथ सहस्रशः आददानं महेष्वासं संदधानं च सायकं विसृजंतं च कौंतेयं नानुपश्याम वै तदा तथा सर्वा दिशो
राजन् सर्वांश्च रथिनो रणे आकुलीकृत्य कौंतेयो जयद्रथमुपाद्रवत् विव्याध च चतुःषष्ट्या शराणां नतपर्व
णां सैंधवाभिमुखं पार्थो योधाः संप्रेक्ष्य पांडवं न्यवर्त्तन्त रणात्तस्मान्निराशास्तस्य जीविते योयोऽभ्यधावद्रणे जं. देता
वकः पांडवं रणे तस्य तस्यांतगा बाणाः शरीरे न्यपतंस्तु भो कबंधसंकुलं चक्रे तव सैन्यं महारथः अर्जुनो जयतां
श्रेष्ठः शरैरग्न्यंशुसंनिभैः एवं तत्तव राजेंद्र चतुरंगबलं तदा आकुलीकृत्य कौंतेयो जयद्रथमुपाद्रवत् द्रौणिं पंचा
शताविध्यद्वृषसेनं त्रिभिः शरैः कृपायमाना कौंतेयः कृपं नवभिरार्दयत् शल्यं षोडशभिर्बाणैः कर्णं द्वात्रिंशता
शरैः सैंधवं तु चतुःषष्ट्या विध्वा सिंहवद्यानदत् सैंधवस्तु तथा विद्धः शरैर्गांडीवधन्वना न चक्षमे सुसंक्रुद्ध
स्तोत्रार्दित इव द्विपः स वराहध्वजस्तूर्णं गार्ध्रपत्रानजिह्मगान् क्रुद्धाशीविषसंकाशान् कर्मारपरिमार्जि
तान् मुमोच निशितान् संख्ये सायकान् सव्यसाचिनः त्रिभिस्तु विद्ध्वा गोविंदं नाराचैः षड्भिरर्जुनं अष्टभि
र्वाजिनो विध्यत् ध्वजं चैकेन पत्रिणा स विद्धिप्यार्जुनस्तूर्णं सैंधवप्रहितान् शरान् युगपत्तस्य चिच्छेद शरा
भ्यां सैंधवस्य ह सारथेश्च शिरः कायाद्ध्वजं च समलंकृतं स च्छिन्नयष्टिः सुमहान् धनंजयशराहतः वराहः
सिंधुराजस्य पपाताग्निशिखोपमः एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे अब्रवीत्पांडवं राजंस्त्वरमाणो ज

द्रो०
१७१

नार्द्दनः एषमध्ये कृतः षड्भिः पार्थवीरैर्महारथैः जीवितेप्सुर्महाबाहो भीतस्तिष्ठति सैंधवः एतानानिर्जित्य रणे षड्रथान्पु
रुषर्षभ नशाक्यः सैंधवो हंतुं यत्तो निर्व्याजमर्जुन योगमत्र विधास्यामि सूर्यस्यावरणं प्रति अस्तंगत इति व्यक्तं द्रक्ष्यते
कसिंधुराट् हर्षेण जीविताकांक्षी विनाशार्थं तव प्रभो नगोप्स्यति दुराचारः स आत्मानं कथंचन तत्र छिद्रे प्रहर्त्तव्य
त्वयास्य कुरुसत्तम व्यपेक्षा नैव कर्त्तव्या गतोस्तमिति भास्कर त्वरीयान्स सुयोधाः पार्थनाशाय नराधिप तेम हृष्यरणे
राजन्नपह्नवन्सैनिकारयिं डत्याम्यवश्चाणिनदात चराजाजयद्रथः वीक्षमाणो जनस्तस्मिन् सिंधुराजे दिवाकरं
पुनरेवाब्रवीत्कृष्णो धनंजयमिदं वचः यस्य सिंधुपतिं वीरं प्रेक्षमाणो दिवाकरं मयं हि विपु मुख्येन तमोम
रतसत्तम अयं कालो महाबाहो वधायास्य दुरात्मनः छिंधि मूर्द्धानमस्याशु कुरु साफल्यमात्मनः इत्येवं केशवे
नोक्तः पांडुपुत्रः प्रतापवान् न्यवधीत्तावकं सैन्यं शरैरर्काग्निसंनिभैः कृपं विव्याध विंशत्या कर्णं पंचाशता शरैः
शल्यं दुर्योधनं चैव षड्भिः षड्भिरताडयत् वृषसेनं तथाष्टाभिः षष्ट्या सैंधवमेव च तथैवामान्महाबाहुस्त्व
दीयान्पांडुनंदनः गाढं विध्वा शरै राजन् जयद्रथमुपाद्रवन् तं समीपस्थितं दृष्ट्वा लेलिहानमिवानलं ज
यद्रथस्य गोप्तारः संशयं परमं गताः ततः सर्वे महाराज तव योधा जयैषिणः सिषिचुः शरधाराभिः पाकशा
सनिमाहवे संछाद्यमानः कौंतेयः शरजालैरनेकशः अक्रुध्यत्स महाबाहुरजितः कुरुनंदनः ततः शरमयं जा एम०
लं तु छलेपाकशासनिः व्यसृजत्पुरुषव्याघ्रस्तव सैन्यजिघांसया ते हन्यमाना वीरेण योधा राजन्रणे तव प्र १७१

न१

जद्रुः सैंधवं भीता द्रौसमं नाभ्यधावतां तत्राद्भुतमपश्याम कुंतीपुत्रस्य विक्रमं तादृक् भावी भूतो वा यच्चकार महायशाः
द्विपान्द्विपगतान्श्चैव हयान्हयगतानपि तथा सरथिनश्चैव यमइव नरद्रुःपशूनिव न तत्र समरे कश्चिन्मया दृष्टो नराधि
प गजो वाजी नरो वापि यो न पार्थशराहतः रजसा तमसा चैव योधाः संछिन्नचक्षुषः कश्मलं प्राविशन्घोरं न ज्ञानं च जा
नन् परस्परं ते शरैर्भिन्नमर्माणः सैनिकाः पार्थचोदिताः बभ्रमुश्च स्खलुः पेतुः सेदुर्म्मम्लुश्च भारत तस्मिन्म
हाभीषणके प्रजानामिव संक्षये रणे महति दुष्पारे वर्त्तमाने सुदारुणे शोणितेन प्रसेके न शीघ्रत्वादनिलस्य
च अशाम्यन्तद्रजो भौमं मसृक्सिक्ते धरातले आनाभि निरमज्जंश्च रथचक्राणि शोणिते मत्ता वेगवन्तो राजन्नला
वकाः नाराणा गणो हस्तिनश्च हतारोहा दारितांगाः सहस्रशः स्वान्यनीकानि मृद्नन्तः आर्त्तनादान्प्रदुद्रुवुः
हयाश्च पतितारोहाः पत्तयश्च नराधिप प्रदुद्रुवुर्भयाद्राजन् धनंजयशराहताः मुक्तकेशा विकवचाः स्रवन्तः क्ष
तजं रुतैः प्रपलायंत संत्रस्ताः त्यक्त्वा रणशिरो जनाः ऊरुग्राहगृहीताश्च केचित्तत्राभवन्भुवि हतानां चापरे
मध्ये द्विरदानां निलिल्यिरे एवं तव बलं राजन् द्रावयित्वा धनंजयः अवधीत्सायकैर्घोरैः सिंधुराजस्य रक्षिणः
कर्णं द्रौणिं कृपं शल्यं वृषसेनं सुयोधनं छादयामास तीव्रेण शरजालेन पांडवः न गृह्णन्न क्षिपन्राजन्न संदधच्च
चापि संदृश्यतार्ज्जुनः संख्ये शीघ्रास्त्रत्वात्प्रपंचवन् धनुर्म्मंडलमेवास्य दृश्यते स्मास्यतः सद

५१

द्रो०
१७२

सायकाश्च महदस्यंतनिश्चरंतः समंततः कर्णस्य तु धनुश्छित्वा वृषसेनस्य चैव ह शल्यस्य सूतं भल्लेन रथनीडादपातयत् गाढ
विद्धावुभौ कृत्वा शरैः स्वस्रीयमातुलौ अर्जुनो जयतां श्रेष्ठो द्रौणिशारद्वतौ रणे एवं तानाकुलीकृत्य त्वदीयानां म
हारथान् उज्जहार शरं घोरं पावकोनलसंनिभं इन्द्राशनिसमप्रख्यं दिव्यमस्त्राभिमंत्रितं सर्वभारसहं शश्वद्गंध
माल्यार्चितं महत् वज्रेणास्त्रेण संयोज्य विधिवत्कुरुनंदनः समादधन्महाबाहुर्गाण्डीवे क्षिप्रमर्जुनः अस्मिन्संधी
यमाने तु शरे ज्वलनतेजसि अंतरिक्षे महानादो भूतानामभवन्नृप अब्रवीच्च पुनस्तत्र त्वरमाणो जनार्दनः
धनंजय शिरः छिन्धि सैन्धवस्य दुरात्मनः अस्तं महीधरश्रेष्ठं पियासति दिवाकरः शृणुष्वेदं च वाक्यं मे जयद्रथ
वधं प्रति वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः स कालेनेह महता सैन्धवं प्राप्तवान्सुतं जयद्रथममित्रघ्नं तं चो म १
वाच पिता नृप अन्तर्हिता पुरा वाणी मेघदुन्दुभिनिस्वना तवात्मजोऽयं मनुष्येंद्र कुलशीलदमादिभिः द्वयोर्भवि
ष्यति विभो सदृशो वंशयोरुभयोः क्षत्रियः प्रवरो लोके नित्यं शूराभिसत्कृतः शत्रुभिर्युध्यमानस्य संग्रामे तु
स्य धन्विनः शिरश्छेत्स्यति संक्रुद्धः शत्रुरालक्षितो भुवि एतच्छ्रुत्वा सिन्धुराजो ध्यात्वा चिरमरिंदम ज्ञातीन्स
र्वान्निवाचेदं पुत्रस्नेहाभिचोदितः संग्रामे युध्यमानस्य वहतो महतीं धुरं धरण्यां मम पुत्रस्य पातयिष्यति यः
शिरः तस्यापि शतधा मूर्धा फलिष्यति न संशयः एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथं वृद्धक्षत्रो वनं या एम०
तस्तपश्चोग्रं समास्थितः सोऽयं तप्यति तेजस्वी तपो घोरं दुरासदं समन्तपञ्चकादस्माद्बहिर्वानरकेतन तस्मा १७२

द्विजयद्रथस्य त्वं शिरश्छित्वा महामृधे दिव्येनास्त्रेणारिपुहन् घोरेणाद्भुतकर्मणा सकुंडलं सिंधुपतेः प्रभंजनसुतानुज
उत्संगे पातय क्षिप्रं वृद्धक्षत्रस्य भारत अथ त्वमस्य मूर्धानं पातयिष्यसि भूतले तवापि शतधा मूर्धा फलिष्यति न संश
यः यथा चैतन्न जानीयात्स राजा तपसि स्थितः तथा कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः न ह्यसाध्यमकार्यं वा विद्यते त
व किंचन समस्तेष्वपि लोकेषु त्रिषु वासवनंदन एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन् इंद्राशनिसमस्पर्शं दि
व्यमंत्राभिमंत्रितं सर्वभारसहं शश्वद्गंधमाल्यार्चितं शरं विससर्जार्जुनस्तूर्णं सैंधवस्य वधे धृतं ततो धन
ंजयस्तूर्णं शरं तं भास्करत्विषं उज्जिहीर्षुः शिरः कायात्सैंधवस्य महात्मनः स पार्थध्वजनिर्मुक्तः शरः श्येनव
द्वाशुगः छित्वा शिरः सिंधुपतेरुत्पपात विहायसं तच्छिरः सिंधुराजस्य शरैरूर्ध्वमवाहयत् दुर्हृदाममह
र्षाय सुहृदां हर्षणाय च शरैः कदंबकीकृत्य कालेनास्मिंश्च पाण्डवः योधयामास तांश्चैव पाण्डवः षण्महारथा
न् ततः सुमहदाश्चर्यं तत्रापश्याम भारत समंतपंचकाद्बाह्यं शिरो यदहरत्ततः एतस्मिन्नेव काले तु वृ
द्धक्षत्रो महीपतिः संध्यामुपास्ते तेजस्वी संबंधी तव मारिष उपासीनस्य तस्याथ कृष्णकेशं सकुंडलं
सिंधुराजस्य मूर्धानमुत्संगे समपातयत् तस्योत्संगे निपतितं शिरस्तच्चारुकुंडलं वृद्धक्षत्रस्य नृपतेरल
क्षितमरिंदम ततो भीतस्य तस्याथ वृद्धक्षत्रस्य भारत सोत्तिष्ठतस्ततः सर्वाणि सैन्यानि विस्मयं जग्मुरुत्तमं
वासुदेवं च वीभत्सुं प्रशशंसुर्महारथं ततो विनिहते राजन् सिंधुराजे किरीटिना तमस्तद्वासुदेवेन सं धा

जातस्य हत्वा शिरो गच्छद्धरणीतलम् ततस्तस्य नरेन्द्रस्य पुत्रमूर्धा निपतत्तलम् । गतेतास्यापि सहस्र मधा शिखा दस्य नर

द्रो०
१७३

हतेभरतर्षभ पश्चात्तस्मिन्महीपालतनयपुत्रैःसहानुगैः वासुदेवप्रयुक्तेयंमायापेतिन्नृपसत्तम एवंसनिहतोराजन्पा
र्थेनामिततेजसा अक्षौहिणीरष्टहत्वाजामाताजवसैंधवः हतेजयद्रथंदृष्ट्वातवपुत्रान्नराधिप दुःखादश्रूणिमु
मुचुर्निराशाश्चाभवन्जये ततोजयद्रथेराजन्हतेपार्थेनकेशवः दध्मौशंखंमहाबाहुरर्जुनश्चपरंतप भीमश्चवृ त
ष्णिसिंहश्चयुधामन्युश्चभारत उत्तमौजाश्चविक्रान्तःशंखान्दध्मुःपृथक्पृथक् श्रुत्वामहान्तंतंशब्दंधर्मराजो
युधिष्ठिरः सैंधवंनिहतंमेनेफाल्गुनेनमहात्मना ततोवादित्रघोषेणस्वान्योधान्पर्यहर्षयन् अभ्यवर्तत
संग्रामेभारद्वाजंयुयुत्सया ततःप्रवृत्तेराजन्नस्तंगच्छतिभास्करे द्रोणस्यसोमकैःसार्द्धंसंग्रामोलोमहर्षणः
तेतुसर्वेप्रयत्नेनभारद्वाजंजिघांसवः सैंधवेनिहतेराजन्नयुध्यंतमहारथाः पांडवास्तुजयंलब्ध्वासैंध
वंविनिहत्यच अयोधयंस्ततोद्रोणंजयोन्मत्तास्ततस्ततः अर्जुनोपिततोयोधांस्तावकान्रथसत्तमान् अ
योधयन्महाबाहुर्हत्वासैंधवकंनृपं सदेवशत्रून्देवराजःकिरीटमालीव्यधमत्समंतात् तथातमांस्यभ्युदि
तस्तमोघ्नःपूर्वप्रतिज्ञांसमवाप्यवीरः इतिश्रीमहाभारतेद्रोणपर्वणिजयद्रथवधःसमाप्तः धृतराष्ट्रउ
वाच तस्मिन्विनिहतेवीरेसैंधवेसव्यसाचिना मामकायदकुर्वन्तत्तन्ममाचक्ष्वसंजय संजयउवाच
सैंधवंनिहतंदृष्ट्वारणेपार्थेनमारिष अमर्षवशमापन्नःकृपःशारद्वतस्ततः महताशरवर्षेणपांडवंस राम०
मवाकिरत् द्रोणिश्चाभ्यद्रवद्राजन्रथमास्थायफाल्गुनं तावेनंरथिनांश्रेष्ठौरथाभ्यांरथसत्तमं उभावु १७३

मपतत्ततो हृष्टो विशिखैरभ्यवर्षत । स तथा शरवर्षाभ्यां सुमहद्भ्यां महाभुजः पीड्यमानः परामार्तिमगमद्रथिनांवरः सोऽजि
घांसुर्युद्धे संख्ये गुरोस्तनयमेव च चकाराचार्यकं तत्र कुन्तीपुत्रो धनंजयः अतीत्य रस्त्राणि संवार्य द्रौणेः शारद्वतस्य च मंद
वेगानिषूंस्ताभ्यामजिह्मान्सुस्रुवानसृजत् नेत्रापि मर्शाभ्यघ्नन्विशिखाः पार्थचोदिताः यद्वृत्वानुपरामार्तिं शरसंगान्ताव
गच्छतां अथ शारद्वतो राजन्कौन्तेयशरपीडितः अवासीदद्रथोपस्थे मूर्छामभिजगाम च विह्वलं तमभिज्ञाय
भर्त्तारं शरपीडितं हतोऽयमिति च ज्ञात्वा सारथिस्तमपावहत् तस्मिन्भग्ने महाराज कृपे शारद्वते युधि अश्वत्था
माप्यपायासीत्पाण्डवेयाद्रणाजिरे दृष्ट्वा शारद्वतं पार्थो मूर्छितं शरपीडितं रथ एव महेष्वासः सकृपं पर्यदेव
यत् अश्रुपूर्णमुखो दीनो वचनं चेदमब्रवीत् पश्यन्निदं महाप्राज्ञो विदुरो राजानमुक्तवान् कुलान्तकरणे पा
पे जातमात्रे सुयोधने नीयतां परलोकाय साध्वयं कुलपांसनः अस्माद्धि कुरुमुख्यानां महदुत्पत्स्यते भयं तदि
दं समनुप्राप्तं वचनं सत्यवादिनः त्वत्कृते ह्यद्य पश्यामि शरतल्पगतं गुरुं धिगस्तु क्षत्रमाचारं धिगस्तु बलपौ
रुषं को हि ब्राह्मणमाचार्यमभिद्रुह्येन्मादृशः ऋषिपुत्रो ममाचार्यो द्रोणस्य दयितः सखा एष शेते रथोपस्थे
कृपो मद्बाणपीडितः अकामयानेन मया विशिखैरर्दितो भृशं अवसीदन्रथोपस्थे प्राणान्पीडयतीव मे
पुत्रशोकाभितप्तस्य शरैरभ्यर्दितेन च अभ्यस्तो बहुभिर्बाणैर्दशधर्मगतेन वै शोचयत्येव नियतं भूयः पुत्रवधाद्
हि मां कृपणं स्वरथे सन्नं पश्य तं कृपमागतं उपाकृत्य हि विद्यां ये आचार्येभ्यो नरर्षभाः प्रयच्छन्तीह कामान्वै दे
वत्वमुपयान्ति ते ये च विद्यामुपादाय गुरुभ्यः पुरुषाधमाः घ्नन्ति तानेव दुर्वृत्तास्ते वै निरयगामिनः तदिदं नरकायो

द्रो०
७५

घटतेव मम पार्थ आचार्य शरवर्षिणो रथे सात्यकिना हृदयं यत्तान्स्वर्यमनुपाकुर्वन्नर्जुनो मामब्रवीद्रणे न कथं च न कोऽरिष्यमह
तं वयं जुगुप्सितिति न हि दिदं वचनं साधोराचार्यस्य महात्मनः नानुष्ठितं तनमेवाजौ विशिखैरभिवर्षता नमस्तस्मै सुपर्णाय गोतमाय
पलायिने धिगस्तु मम वार्ष्णेय पदस्पृश्यमहं राम्महं तथा विलपमानेनु सत्यमसाचिनिनतं प्रति सैंधवं निहतं दृष्ट्वा राधेयः समु
पाद्रवत् तमायान्तं तराधेयमर्जुनस्तस्थ मति योवाप्तो सात्यकिश्चैव सह सात्यकिमुपाद्रवत् उपयांतं तु राधेयं दृष्ट्वा पार्थो
महारथः प्रहसन्देवकीपुत्रमिदं वचनमब्रवीत् एष प्रयात्याधिरथिः सात्यकेः स्यन्दनं प्रति नमृष्यति हतं नूनं भूरि
श्रवसमाहवे यत्र यातेऽषतत्रत्वं चोदयाश्वान् जनार्दन मा सौमदत्तिपदवीं गमयेत्सात्यकिं वृषः एवमुक्तो महाबाहुः
केशवः सव्यसाचिना प्रत्युवाच महातेजाः कालयुक्तमिदं वचः अलमेष महाबाहुः कर्णायैकोऽपि पाण्डव किं पुनर्द्रौ
पदेयाभ्यां सहितः सात्वतर्षभः न च तावत्क्षमः पार्थ कर्णेन सह संगमः प्रज्वलन्ती महोल्केव तिष्ठत्यस्य हि वा
सवी त्वदर्थं पूज्यमानेषा रक्ष्यते परवीरहन् अतः कर्णं प्रयात्वत्र सात्वतस्य यथा तथा अहं ज्ञास्यामि कौन्तेय
कालमस्य दुरात्मनः यत्रैनं विशिखैस्तीक्ष्णैः पातयिष्यसि भूतले धृतराष्ट्र उवाच योऽसौ कर्णेन वीरस्य वा
र्ष्णेयस्य समागमः हते तु भूरिश्रवसि सैन्धवे च निपातिते सात्यकिश्चापि विरथः कं समारूढवान्रथं चक्ररक्षौ
च पाञ्चाल्यौ तन्ममाचक्ष्व संजय संजय उवाच हन्त ते वर्णयिष्यामि यथावृत्तं महारणे शुश्रूषस्व स्थिरो भूत्वा दु एम०
राचरितमात्मनः एवमेव हि कृष्णस्य मनोगतमिदं प्रभो विजेतव्यो यथा वीरः सात्यकिः सोमदत्तिना अतीता १७५
नागतमेतद्धि वेत्ति जनार्दनः ततः सूतं समादाय दारुकं संदिदेश ह रथो मे युज्यतां काल्यमिति राजन्महाबलः

तेर

नहि देवा न गंधर्वा न यक्षोरगराक्षसाः मानवा वापि जेतारः कृष्णयोः संति केचन पितामहपुरोगाश्च देवाः सिद्धाश्च तं विदुः
तयोः प्रभावमतुलं शृणु युद्धं च तद्यथा सात्यकिं विरथं दृष्ट्वा कर्णं चाभ्युद्यतं रणे दध्मौ शंखं महानादं माधवेनाथ वायु-
नः दारुकोऽपि संदेशं श्रुत्वा शंखस्य च स्वनं रथमन्वानयत्तस्मै सुपर्णोच्छ्रितकेतनं स केशवस्यानुमतो रथं दारुकसं-
युतं आरुरोह शिनेः पुत्रो ज्वलनादित्यसंनिभं कामगैः शैब्यसुग्रीवमेघपुष्पबलाहकैः हयोदग्रैर्महावेगैर्हेमभां-
डविभूषितैः युक्तं समारुह्य च तं विमानप्रतिमं रथं अभ्यद्रवत राधेयं प्रवपन् सायकान् बहून् चक्ररक्षावपि
तदा युधामन्यूत्तमौजसौ धनंजयरथं हित्वा राधेयं प्रत्युदीयतुः राधेयोऽपि महाराज शरवर्षं समुत्सृजन् अभ्य-
द्रवत्सुसंक्रुद्धो रणे शैनेयमच्युतं नैव दैवं न गांधर्वं नासुरं न च राक्षसं तादृशं भुवि नो युद्धं दिवि वा श्रुतमित्युत उपा-
रमत तत्सैन्यं सरथाश्वनरद्विपं तयोर्दृष्ट्वा महाराज कर्म संमूढचेतनं सर्वे च समपश्यंत तद्युद्धमतिमानुषं तयोर्नृ-
वरयो राजन् सारथ्यं दारुकस्य च गतप्रत्यागतावृत्तैर्मंडलैः संनिवर्तनैः सारथेस्तु रथस्थस्य काश्यपेयस्य विस्मि-
ताः नभस्तलगताश्चैव देवगंधर्वमानवाः अतीतावहिता द्रष्टुं कर्णशैनेययो रणं मित्रार्थे तौ पराक्रांतौ शुष्मि-
णौ स्पर्धिनौ रणे कर्णश्चामरसंकाशो युयुधानश्च सात्यकिः अन्योन्यं तौ महाराज शरवर्षैरवर्षतां प्रममा-
थ शिनेः पौत्रः कर्णं सायकवृष्टिभिः अमृष्यमाणो निधनं कौरव्यजलसंधयोः कर्णः शोकसमाविष्टो महो-
रग इव श्वसन् स शैनेयं रणे क्रुद्धः प्रदहन्निव चक्षुषा अभ्यधावत वेगेन पुनः पुनररिंदम तं तु सक्रोधमा-

द्रो०
१७५

लोकसात्यकिः समभ्युद्ध्यत महता शरवर्षेण गजः प्रतिगजं यथा तौ समेतौ नरव्याघ्रौ व्याघ्राविव तरस्विनौ अन्योन्यं संततक्षा
तेरणेनुपमविक्रमौ ततः कर्णं शिनेः पौत्रः सर्वपारसवैः शरैः विभेद सर्वगात्रेषु पुनः पुनररिंदमं सारथिं चास्य भल्लेन रथ
नीडादपातयत् अश्वांश्च चतुरः श्वेतान्निजघान शितैः शरैः छित्वा ध्वजं रथं चैव शतधा पुरुषर्षभ चकार विरथं कर्णं त
व पुत्रस्य पश्यतः ततो विमनसो राजंस्तावकास्ते महारथाः वृषसेनः कर्णसुतः शल्यो मद्राधिपस्तदा द्रोणपुत्रश्च शैने
यं सर्वतः पर्यवारयन् ततः पर्याकुलं सर्वं न प्राज्ञायत किंचन तथा सात्यकिना वीरे विरथे सूतजे कृते हाहाकारस्त
तो राजन् सर्वसैन्येष्वभून्महान् कर्णोपि विरथो राजन् सात्वतेन कृतः शरैः दुर्योधनरथं तूर्णमारुरोह विनिःश्वसन् मा
नयंस्तव पुत्रस्य बाल्यात्प्रभृति सौहृदं कृतां राज्यप्रदानेन प्रतिज्ञां परिपालयन् तथा तु विरथं कर्णं पुत्रांश्च तव पार्थि
व दुःशासनमुख्यांश्च शूरान्नावधीत्सात्यकिर्वशी रक्षन् प्रतिज्ञां भीमेन पार्थेन च कृतां पुरा विरथान् विह्वलांश्च
क्रे न तु प्राणैर्व्ययोजयत् भीमसेनेन तु वधः पुत्राणां ते प्रतिश्रुतः पुनर्द्यूते च पार्थेन वधः कर्णस्य संश्रुतः व
धे त्वकुर्वन् यत्नं ते तस्य कर्णमुखास्तदा नाशक्नुवंस्ततो हन्तुं सात्यकिं प्रवरा रथाः द्रोणिश्च कृतवर्मा च तथैवा
न्ये महारथाः निर्जिता धनुषैकेन शतशः क्षत्रियर्षभाः कांक्षता परलोकं च धर्मराजस्य च प्रियं कृष्णयोः सदृशो
वीर्ये सात्यकिः शत्रुतापनः जितवान् सर्वसैन्यानि तावकानि हसन्निव कृष्णो वापि भवेल्लोके पार्थो वापि धनुर्द्धरः
शैनेयो वा नरव्याघ्र चतुर्थस्तु न विद्यते धृतराष्ट्र उवाच अजय्यं वासुदेवस्य रथमास्थाय सात्यकिः विरथं कृतवान् क एम०
१७५

एवं वासुदेवसमो युधि दारुकेण समायुक्तः स्वबाहुबलदर्पितः कच्चिदंसेन मा रक्ष सात्यकिः शत्रुतापनः एतद्धि सर्वमहं श्रोतुं कु
लः एतद्धि सर्वमहं श्रोतुं कुशलो ह्यसि भाषितुं असद्यतमहं मन्ये तन्ममाचक्ष्व संजय संजय उवाच शृणु राजन् यथावृत्तं रथमस्य
महामतेः दारुकस्यानुजस्तूर्णं कल्पनाविधिकल्पितं आयसैः काञ्चनैश्चापि पट्टैः सन्नद्धकूबरं तारासहस्रखचितं सिंहध्व
जपताकिनं अश्वैर्वातजवैर्युक्तं हेमभाण्डपरिच्छदैः सैन्धवैरिन्दुसंकाशैः सर्वशब्दातिगैर्दृढैः चित्रकाञ्चनसन्नाहैर्वाजिमुख्यैर्वि
शांपते घण्टाजालाकुलं रौद्रं शक्तितोमरविद्युतं युक्तं सांग्रामिकैर्द्रव्यैर्बहुशस्त्रपरिच्छदं रथं संपादयामास मेघगंभीरनिस्व
नं तं समारुह्य शैनेयस्तवानीकमुपाद्रवत् दारुकोपि यथाकामं प्रययौ केशवान्तिकं कर्णस्यापि रथं राजन् शङ्खगोक्षीरपा
ण्डुरैः चित्रकाञ्चनसन्नाहैः सदश्वैर्वेगवत्तरैः हेमकक्ष्याध्वजोपेतं तूणयन्त्रपताकिनं अग्र्यं रथं सुयन्तारं बहुशस्त्रपरिच्छदं उपा
जह्रुस्तमास्थाय कर्णोप्यभ्यद्रवद्रिपून् एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि भूयश्चापि निबोध त्वमनयात्तव यन्नं
नृप एकत्रिंशत्तव सुता भीमसेनेन पातिताः दुर्मुखं प्रमुखे कृत्वा सततं चित्रयोधिनं शतशो निहताः शूराः सात्वते
नार्जुनेन च भीष्मं प्रमुखतः कृत्वा भगदत्तं च भारत एवमेष क्षयो वृत्तो राजन् दुर्मन्त्रिते तव महाभारते द्रोणपर्वणि प ४
धृतराष्ट्र उवाच तथा गतेषु शूरेषु तेषां मम च संजय किं स्म भीमार्जुनौ तत्र सात्यकिर्वाकरोत्तदा संजय उवाच वि
रथो भीमसेनो वै कर्णवाक्शल्यपीडितः अमर्षवशमापन्नः फाल्गुनं वाक्यमब्रवीत् पुनः पुनस्तूबरक मूढ औदरिकेति
च अकृतास्त्रक मा योत्सीर्बालसंग्रामकातर इति मामब्रवीत्कर्णः पश्यतस्ते धनंजय एवं वक्ता च मे वध्यस्तेन चोक्तो
सि भारत एतद्धि मे महाबाहो त्वया सह कृतं मया यथैतन्मम कौन्तेय यथा तव न संशयः तस्मात्त्वं नरश्रेष्ठ स्मरे -

द्रो० १७६ न द्यूतनं मम यथा भवति तत्त्वं तथा कुरु धनंजय तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः ततोऽर्जुनोऽब्रवीत् कर्णं किंचिद् भ्येत
संयुगे कर्णाकर्णाभ्यागाद्येस तच्छ्रुत्वात्मसंभूत अथ मंत्रदुःशासनमेव त्वा वहूयामि सा मतं द्विविधं कर्म शत्रूणां प्रदेन
पराजयो नो चाप्यनिर्मोक्ष्य धर्षवासवस्यापि युध्यतः कुम्भकर्णो विगानेन विरथो विकलेन्द्रियः मह्यक्षत्वमिति ज्ञात्वा जित्वा
जीवन्विसर्जितः यदुक्तः पारुषो भीमं युध्यमानेन महाबलं कथं चिद्धि रथं हित्वा यात्वेर स मम भाषिताः अधर्मस्त्वेष सुमहाननार्य
चरितं च तत्त्वादि जित्वा विकर्षते न च जल्पति दुर्वचः न च कंचन निंदति सततः शूर तानेषभाः त्वं तु मा शूनविता न स तत्त्वद
सित तज्जेव द्भुबहुमतः कर्णपच वापलाद्परीक्षितं युध्यमानेन पराक्रान्तेन शूरमापतितेरणे यदब्रवीः सोऽप्रियं भीमं नेत तत्त्वते
वचस्तव यच्छ्रुत्वा सर्वसैन्यानां केशवस्य ममैव च विरथो भीमसेनेन कृतोसि बहुशो रणे न चेत्वा परुषं किंचिदुक्तवान्पां
डुनंदनः यस्मात्तु बहुरूक्षं च श्रावितस्ते वृकोदरः यदि दस्य च सौभद्रो युध्यमानो निहतो मम तस्माद्स्याव लेपस्य त
द्यः फलमवाप्नुहि त्वया तस्य धनुश्छिन्नमात्मनाशाय दुर्मते तस्माद्वध्योसि मे मूढ सभृत्यबलवाहनः कुरु
त्वं सर्वकृत्यानि महत्ते भयमागतं हंतासि वृषसेनं ते प्रेक्षमाणस्य संयुगे ये चान्येप्युपयास्यंति बुद्धिमोहेन मां
नृपाः तोंश्च सर्वान्हनिष्यामि सत्येनायुधमालभे त्वां च मूढाकृतप्रज्ञमतिमानिनमाहवे दृष्ट्वा दुर्योधनो मं
दो मंस्यति पातितं अर्जुनेन प्रतिज्ञाते वधे कर्णसुतस्य तु महान्सुतुमुलः शब्दो बभूव रथिनां तदा त
स्मिन्नाकुलसंग्रामे वर्तमाने महाभये मंदरश्मिः सहस्रांशुरस्तं गिरिमुपाद्रवत् ततो राजन् हृषीकेशः संग्रा
मशिरसि स्थितं तीर्णप्रतिज्ञं [illegible] १७६

विभत्सुं परिष्वज्यैनमब्रवीत् दिष्ट्या संपादिता जिष्णो प्रतिज्ञा महती त्वया दिष्ट्या विनिहतः पार्थ वृद्धक्षत्रः सहात्मजः धार्त्तरा
ष्ट्रबलं प्राप्य देवसेनापि भारत सीदेत समरे जिष्णो नात्र कार्या विचारणा न तं पश्यामि लोकेषु चिंतयन् पुरुषं क्वचित् त्वदृते पु
रुषव्याघ्र य एतद्योधयेद्बलं महाप्रभावा बहवस्त्वया तुल्याधिका पि वा समेताः पृथिवीपाला धार्त्तराष्ट्रस्य कारणात् ते त्वां
प्राप्य रणे क्रुद्धा नाभ्यवर्त्तंत दंशिताः तव वीर्यं बलं चैव रुद्रशक्रांतकोपमं नेदृशं शक्नुयात्कश्चिद्रणे कर्तुं पराक्रमं
यादृशं कृतवानद्य त्वमेकः शत्रुतापनः एवमेव हते कर्णे सानुबंधे दुरात्मनि वर्द्धयिष्यामि भूयस्त्वां विजितारिं हतद्वि
षं तमर्जुनः प्रत्युवाच प्रसादात्तव माधव प्रतिज्ञेयं मयोत्तीर्णा विबुधैरपि दुस्तरा अनाश्चर्यो जयस्तेषां येषां
नाथोसि केशव त्वत्प्रसादान्महीं कृत्स्नां संप्राप्स्यति युधिष्ठिरः तवैव भारो वार्ष्णेय तवैव विजयः प्रभो वर्द्ध
नीयास्तव वयं प्रेष्याश्च मधुसूदन एवमुक्तस्ततः कृष्णः शनकैर्वाहयन्हयान् दर्शयामास पार्थाय क्रूरमा
योधनं महत् कृष्ण उवाच प्रार्थयंतो जयं युद्धे प्रथितं च महद्यशः पृथिव्यां शेरते शूराः पार्थिवास्त्वच्छरैर्हताः
विकीर्णशस्त्राभरणा विपन्नाश्वरथद्विपाः संछिन्नभिन्नमर्माणो वैक्लव्यं परमं गताः ससत्वा गतसत्वाश्च
प्रभया परया युताः सजीवा इव लक्ष्यंते गतसत्वा नराधिपाः तेषां शरैः स्वर्णपुंखैः शस्त्रैश्च विविधैः शितैः
वाहनैरायुधैश्चैव संपूर्णां पश्य मेदिनीं वर्म्मभिश्चर्म्मभिर्हारैः शिरोभिश्च सकुंडलैः उष्णीषैर्मुकुटैः स्रग्भिश्चू
डामणिभिरंबरैः कंठसूत्रैरंगदैश्च निष्कैरपि च सुप्रभैः अन्यैश्चाभरणैश्चित्रैर्भाति भारत मेदिनी अनुकर्षै

द्रो०
१८७

रूपासंगैः पताकाभिर्ध्वजैस्तथा उपस्करैरधिष्ठानैरीषादंडकबंधुरैः चक्रैः प्रमथितैर्जिह्वैरक्षैश्च बहुधा रणे युगैर्योक्त्रैः कलापैश्च धनु
र्भिः सायकैस्तथा परिस्तोमैः कुथाभिश्च परिघैरंकुशैस्तथा शक्तिभिर्भिंडिपालैश्च तूणैः शूलैः परश्वधैः प्रासैश्च तोमरैश्चैव कुंतैर्यष्टिभि
रेव च शतघ्नीभिर्भुशुंडीभिः खड्गैः परशुभिस्तथा मुशलैर्मुद्गरैश्चैव गदाभिः कुणपैस्तथा सुवर्णविकृताभिश्च कशाभिर्भरतर्षभ घंटा
भिश्च गजेंद्राणां भांडैश्च विविधैरपि स्रग्भिश्च नानाभरणैर्वस्त्रैश्चैव महाधनैः अपविद्धैर्बभौ भूमिर्ग्रहैर्द्यौरिव शारदी पृथिव्यां प
तिभिर्हतैः पृथिवीपतयो हताः पृथिवीमुपगूह्यांगैः प्रियाः कांतामिव प्रियां इमांश्च गिरिकूटाभान्नागानैरावतोपमान्
स्रवतः शोणितं भूरि शस्त्रच्छिद्रैर्दरीमुखैः दरीमुखैरिव गिरीन्गैरिकांबुपरिस्रवान् तेषु चावाग्हतान्वीरपश्यन्निघ्नतः स्थितो
हयांश्च पतितान्पश्यन्स्वर्णभांडविभूषितान् गंधर्वनगराकारान्रथांश्च निहतेश्वरान् छिन्नध्वजपताकाक्षांश्चक्रान
हतसारथीन् निकूजहूवरयुगान्भग्नेषान्वंधुरान्प्रभो पश्य पार्थ हतान्भूमौ विमानोपमदर्शनान् पत्तींश्च निह
तांश्चीरशतशोथसहस्रशः धनुर्भृतश्चर्मभृतः शयानान्रुधिरोक्षितान् महीमालिंग्य सर्वांगैः पांसुध्वस्तशिरोरुहान्
पश्य योधान्महाबाहो त्वच्छरैर्भिन्नविग्रहान् निपातितद्विपरथवाजिसंकुलं असृग्वसापिशितसमृद्धकर्दमं निशाचर
श्वृकपिशाचमोदनं महीतलं नरवर पश्य दुर्दृशं इदं महत्त्वय्युपपद्यते प्रभो रणाजिरे कर्म यशोभिवर्द्धनं शतक्रतौ चापि
च किरीटिनो हि जनार्दनस्तामरिमर्दनं जसा अयं जातशत्रुं समुपेत्य पांडवं निवेदयामास हतं जयद्रथं इति महाभार
ते द्रोणपर्वणि संजय उवाच ततो राजानमभ्येत्य धर्मपुत्रं युधिष्ठिरं ववंदे स मुदायुक्तो हते पार्थेन सैंधवे दिष्ट्या व
र्द्धसि राजेंद्र हतशत्रुर्नरोत्तम दिष्ट्या निस्तीर्णवांश्चैव प्रतिज्ञामनुजस्तव सत्वेवमुक्तः कृष्णेन हृष्टः परपुरंजयः अव

द्रो०
१८७

तौ परिष्वज्य राजा च पुण्डरीकाक्षकेशवौ संप्रहृष्टमना राजन् धर्मराजो युधिष्ठिरः संहृष्टेन्द्रियचित्तात्मा नाशकत्तु मौजसा मुहूर्त्तमिव हर्षेण
नत्संभीभृत्वा महामतिः ततो हर्षान्वितो राजा हर्षाश्रुप्लुतलोचनः उवाच परमप्रीतः स गद्गदमिदं वचः प्रियमेतदुपश्रुत्य त्व
त्तः पुष्करलोचन नान्तं गच्छामि हर्षस्यातितीर्षुरुदधेरिव असम्भूतमिदं कृष्ण कृतं पार्थेन धीमता त्वत्प्रसादेन गोविंद प्राप्तमपाप
जयद्रथं किं तु नात्यद्भुतं तेषां येषां नस्त्वं समाश्रयः स्थितः सर्वात्मना नित्यं प्रियेषु च हितेषु च त्वां चैवास्माभिराश्रित्य प्रभूतः
शत्रूणां मुजं शस्त्रसमुद्यमः सुरैरिवासुरवधे शक्रेणेव जनार्दन असंभाव्यमिदं कर्म देवैरपि जनार्दन त्वद्बुद्धिबलवीर्येण कृतवानेष फाल्गु
नः बाल्यात्प्रभृति ते कृष्ण कर्माणि श्रुतवानहं अमानुषाणि दिव्यानि महान्ति च बहूनि च यदैवानुगृहीताः स्म त्वया
स्नेहात्सुरगणैः नरेवाहत्वा सिंहशत्रून् हत्वा न प्राप्तां च मेदिनीं मार्कंडेयः पुराणर्षिः श्रावितं त्वत्तवानघ माहात्म्यमनु
भावं च पुराणर्षिर्नियतात्मा मुनिः असितो देवलश्चैव नारदश्च महातपाः पितामहश्च मे व्यासस्त्वामाहुर्विधिमुत्तमं
त्वं तेजस्त्वं परं ब्रह्म त्वं सत्यं त्वं महत्तपः त्वं श्रेयस्त्वं यशश्चाग्र्यं कारणं जगतस्तथा त्वया सृष्टमिदं सर्वं जगत्स्थावरजं
गमं प्रलये समनुप्राप्ते त्वय्येव निविशते पुनः अनादिनिधनं देवं विश्वमीशं प्रजापते धातारमजमव्यक्तमाहुर्वेदवि
दो जनाः भूतात्मानं महात्मानमनन्तं विश्वतोमुखं अपि देवा न जानन्ति गुह्यं लोकाधिपं जगत्पते नारायणं परं देवं
परमात्मानमीश्वरं ज्ञानयोनिं हरिं विष्णुं मुमुक्षूणां परायणं परं पुराणं पुरुषं पुराणानां परं च यत् एवमादि

द्रो० गुणानां ते कर्मणां हि विचेह च   अतीतस्य तु भव्यानां संख्यानात्र न विद्यते   सर्वतो रक्षणीयाः स्मः सशक्राणां दिवौकसां   येस्त्वं सर्वगुणो
१७८ पेतः सुहृद्भिरुपपादितः   इत्येवं धर्मराजेन हरिरुक्तो महायशाः   अनुरूपमिदं वाक्यं प्रत्युवाच जनार्दनः भवतान्तपसोग्रेण धर्मेण परमेण
च साधुत्वादार्जवाच्चैव हतः पापो जयद्रथः   अयं च पुरुषव्याघ्र त्वदनुध्यानरक्षितः   हत्वा योधसहस्राणि न्यहनज्जिष्णुर्जयद्रथं
कृतित्वे बाहुवीर्ये च तथैवासम्भ्रमेपि च शीघ्रतामोघबुद्धित्वे नास्ति पार्थसमः क्वचित्   तदयं भरतश्रेष्ठ भ्राता ते यदर्जुनः सैन्यस्य
येरणे कृत्वा सिंधुराजशिरो हरत्   ततो धर्मसुतो जिष्णुं परिष्वज्य विशांपते   प्रमृज्य वदनं तस्य पर्यश्वासयत प्रभुः   अतीव सुमहत्क
र्म कृतवानसि फाल्गुनः   असह्यं चाविषह्यं च देवैरपि सवासवैः   दिष्ट्या निस्तीर्णभारोसि हतारिश्चासि शत्रुहन्   दिष्ट्या सत्या
प्रतिज्ञेयं हत्वा पापं जयद्रथं   एवमुक्त्वा गुडाकेशं धर्मराजो महायशाः   यस्य शत्रुगणं येन पस्पर्शे हस्तेन पार्थिवः   इत्युक्तौ तौ
महात्मानावुभौ केशवपांडवौ   तावब्रूतां तदा कृष्णौ राजानं पृथिवीपतिं   तव क्रोधाग्निना दग्धः पापो राजा जयद्रथः   उदी
र्णं चापि सुमहद्धार्त्तराष्ट्रबलं रणे   हन्यते निहतं चैव विनंक्ष्यति च भारत   तव क्रोधहता ह्येते कौरवाः शत्रुसूदनः   त्वां हि च
सुहृदं वीरं कोपयित्वा सुयोधनः   समित्रबंधुः समरे प्राणांस्त्यक्ष्यति दुर्मतिः   तव क्रोधहतः पूर्वं देवैरपि सुदुर्जयः   शरत
ल्पगतः शेते भीष्मः कुरुपितामहः   दुर्लभो विजयस्तेषां संग्रामे रिपुघातिनां   यतो मृत्युवशं जे ये येषां क्रुद्धोसि पांडव   ए
षां प्राणाः श्रियः पुत्राः सौख्यानि विविधानि च   अचिरात्तस्य नश्यंति येषां क्रुद्धोसि मानद   विनष्टान्कौरवान्मन्ये सपुत्र   रम०
पशुबांधवान्   राजधर्मपरे नित्यं त्वयि क्रुद्धे परंतप   ततो भीमो महाबाहुः सात्यकिश्च महारथः   अभिवाद्य गुरुं ज्येष्ठं   १७८
मार्गणैः क्षतविक्षतौ   स्थितावास्तां महेष्वासौ पांचाल्यपरिवारितौ   तौ दृष्ट्वा मुदितौ वीरौ प्रांजली चाग्रतः स्थितौ   अ

अश्वपनंदनकौंतेयस्तावुभौभीमसात्वकी दिष्ट्यापश्यामि वार्ष्णेय विमुक्तौसेनसागरात् द्रोणाद्धाहृदुराधर्षाद्धार्दिक्यमद्र
[illegible]शल्यात् दिष्ट्याचनिर्जिताःसंख्येपार्थिवाःसर्वपार्थिवाः युवांविजयिनौचापि दिष्ट्यापश्यामिसंयुगे
दिष्ट्याद्रोणोजितःसंख्येहार्दिक्यश्चमहाबलः दिष्ट्याविकर्णोऽभिःकर्णोरणोनीतःपराभवं विमुखश्चकृतःशल्यो
वाम्यपुरुषर्षभौ दिष्ट्यायुवांकुशलिनौसंग्रामात्पुनरागतौ पश्यामिरथिनांश्रेष्ठावुभौयुद्धविशारदौ ममवाक्य
परौवीरौममगौरवयंत्रितौ सेनार्णवंसमुत्तीर्णौदिष्ट्यापश्यामिवामहं समरश्लाघिनौवीरौसमरेष्वपराजितौ
ममप्राणसमौचैवदिष्ट्यापश्यामिवामहं इत्युक्त्वापांडवोराजायुयुधानवृकोदरौ सस्वजेपुरुषव्याघ्रौहर्षाद्बाष्पंप्र
मोचह ततःप्रमुदितंसर्वंबलमासीद्विशांपते पांडवानांरणेहृष्टंयुद्धायचमनोदधे महाभारतेद्रोणपर्वणि
संजयउवाच सैंधवेनिहतेराजन्पुत्रस्तवसुयोधनः अश्रुपूर्णमुखोदीनोनिरुत्साहोद्विषज्जये दुर्मनानिः
श्वसन्दुष्टोभग्नदंष्ट्रइवोरगः आगस्कृत्सर्वलोकस्यपुत्रस्तार्तिमगात् दृष्ट्वातत्कृतंघोरंबलक्षयंकृतंमह
त् जिष्णुनाभीमसेनेनसात्वतेनचसंयुगे सविवर्णःकृशोदीनोबाष्पसंप्लुतलोचनः अमन्यतार्जुनसमोन
योधोभुविविद्यते नद्रोणोनचकर्णश्चिद्रवारपत सर्वथाहतमेवेदंकौरवाणांमहद्बलं नह्यस्यविद्यतेत्रातासाक्षाद
पिपुरंदरः यमुपाश्रित्यसंग्रामेकृतःशस्त्रसमुद्यमः सकर्णोनिर्जितःसंख्येहतश्चैवजयद्रथः यस्यवीर्यस
माश्रित्यपांडवानवमंतवान् सकर्णोनिर्जितःसंख्येहतश्चैवजयद्रथः परुषाणिसभामध्येप्रोक्तवान्योहिपांडु
वान् सकर्णोनिर्जितःसंख्येहतश्चैवजयद्रथः यस्यवीर्यसमाश्रित्यशममपाचेतमच्युतं तरणवञ्चमहंमन्येसक
रथेपोनाश्वत्थामाकृपेनच क्रुद्धस्यसमरेस्थातुंपर्याप्ताइतिमारिष निर्जित्यहिरणेपार्थःसर्वान्नमहारथान् सत्वधीत्सैन्धवंसंख्येनच ४

द्रो०
१७८

णो निर्जितो युधि एवं ज्ञानमना राजन्पुत्रः पार्थाद्द्रोणमाचितं अभ्यगच्छत्सर्वलोकस्य पुत्रस्ते भरतर्षभ ततस्तत्सर्वमाचख्यौ कुरूणां
वैशसं महत् परांश्च विजयतश्चापि धार्तराष्ट्रान्निमज्जतः दुर्योधन उवाच पश्य मूर्धाभिषिक्तानामाचार्य कदनं महत् कृत्वा प्र
मुखतः शूरं भीष्मं मम पितामहं ॥ तं निहत्य प्रलुब्धोयं शिखंडी पूर्णमानसः पांचालैः सहितैः सर्वैः सेनाग्रमभिकर्षति अप
रश्चापि दुर्धर्षः शिष्यस्ते सव्यसाचिना अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः अस्मद्विजयकामानां सुहृदामुपकारिणां
गंतास्मि कथमानृण्यं गतानां यमसादनं ये मदर्थं परीप्संते वसुधां वसुधाधिपाः ते हित्वा वसुधैश्वर्यं वसुधामधिशेरते सो
हं कापुरुषः कृत्वा मित्राणां क्षयमीदृशं नाश्वमेधसहस्रेण पावितुं नस्मुत्सहे मम लुब्धस्य पापस्य तथा धर्मापचायिनः व्या
यच्छतो जिगीषंतः प्राप्ता वैवस्वतक्षयं कथं पतितवृत्तस्य पृथिवी सुहृदां द्रुहः विवरं नाशकद्दातुं मम पार्थिवसंसदि योहं रु
धिरसिक्तांगं राज्ञां मध्ये पितामहं ॥ शयानं नाशकं त्रातुं भीष्ममायोधने हतं तं मामनार्यपुरुषं मित्रद्रुहमधार्मिकं किं स वक्ष्य
ति दुर्धर्षः समेत्य परलोकजित् जलसंधं महेष्वासं पश्य सात्यकिना हतं मदर्थमुद्यतं शूरं प्राणांस्त्यक्त्वा महारथं कांबोजं
निहतं दृष्ट्वा तथालंबुषमेव च अन्यान्बहूंश्च सुहृदो जीवितार्थोद्य को मम आयुध्यंतो हताः शूराः मदर्थे ये परान्मुखाः
यतमानाः परं शक्त्या विजेतुमहितान्मम तेषां गत्वाहमानृण्यमद्य शक्त्या परंतप तर्पयिष्यामि तानेव जलेन यमुनाम
नु सत्यं ते प्रतिजानामि सर्वशस्त्रभृतां वर इष्टापूर्तेन च शपे वीर्येण च सुतैरपि निहत्य तान्रणे सर्वान्पांचालान्पां
डवैः सह शांतिं लब्धास्मि तेषां वा रणे गंतास्मि लोकजित् सोहं तत्र गमिष्यामि यत्र ते पुरुषर्षभाः हता मदर्थे संग्रामे युध्य
मानाः किरीटिना न हीदानीं सहाया मे परे सत्युपलक्षिताः श्रेयो हि पांडून्मन्यंते न तथास्मान्महाभुज स्वयं हि मृत्युर्विहितः एम०
सत्यसंधेन संयुगे भवानुपेक्षां कुरुते शिष्यत्वादर्जुनस्य हि अतो विनिहताः सर्वे ये स्मज्जयचिकीर्षवः कर्णमेवाद्य पश्यामि १७८

मित्संप्रमस्यस्यनुयेषिणो योहि मित्रमविज्ञाय याथातथ्येन मंदधीः मित्रार्थे योजयत्येनं तस्य सोर्थोवसीदति तादृशं
कृत मिदं मम कार्यं सुहृत्तमैः मोहाल्लुब्धस्य पापस्य जिह्मस्य धनमीहतः हतो जयद्रथश्चैव सौमदत्तिश्च वी
र्यवान् अभीषाहाः शूरसेनाः शिवयोथवसातयः सोहं गच्छामि तत्रैव यत्र ते पुरुषर्षभाः हता मदर्थं संग्रामे युध्य
मानाः किरीटिना नहि मे जीवितेनार्थस्तानृते पुरुषर्षभान् आचार्यः पाण्डुपुत्राणामनुजानातु नो भवान् महा
भारते द्रोणपर्वणि धृतराष्ट्र उ॰ सिंधुराजे हते तात समरे सव्यसाचिना तथैव भूरिश्रवसि किमासीद्वो मनस्तदा
दुर्योधनेन च द्रोणस्तथोक्तः कुरुसंसदि किमुक्तवान्परं तस्मात्तन्ममाचक्ष्व संजय संजय उवाच निष्टानको
महानासीत्सैन्यानां तव भारत सैंधवं निहतं दृष्ट्वा भूरिश्रवसमेव च मंत्रितं तव पुत्रस्य ते सर्वमवमेनिरे येन मं
त्रेण निहताः शतशः क्षत्रियर्षभाः द्रोणस्तु तद्वचः श्रुत्वा पुत्रस्य तव दुर्मनाः मुहूर्तमिव तु ध्यात्वा भृशमार्त्तोभ्यभाष
त द्रोण उवाच दुर्योधन किमेवं मां वाक्शरैरपि कृंतसि अजय्यं सततं संख्ये ब्रुवाणं सव्यसाचिनं एतेनैवार्जुनं ज्ञातु
मलं कौरव संयुगे यच्छिखंड्यवधीद्भीष्मं पाल्यमानः किरीटिना अवध्यं निहतं दृष्ट्वा संयुगे देवमानुषैः तदैवाज्ञासि
षमहं नेयमस्तीति भारती यं पुंसां त्रिषु लोकेषु सर्वशूरं स्म मेनिरे तस्मिन्विनिहते शूरे किं शेषं पर्युपास्महे पांसव

द्रो०
१८०

तान् ग्लहते तात शकुनिः कुरुसंसदि अहत्वा न्ते ह्यानिशिता याणास्ते शत्रुतापनाः न एते हुं जितं लगात विशिखाः पार्थचोदिताः तो
स्तदा ख्याप्यमानस्य विदुरेणानबुद्धवान पात्सा विलपतश्चापि विदुरस्य महात्मनः धारस्य वा चोनाक्रोषाः ह्येमाप यदतः शिवः
न दिदं वर्त्तते घोरमागते वैशसे महत् नस्याप मानाद्धूकस्य दुर्योधन त्वतेनच योवमन्यव चः पथ्यं सुहृद्भिर्मामसकारिणो
स्वमते कुरु तेम ठः सशो श्चोनचिरादिव यद्वानः से समारणानो हृत्स्या मानी यनः स भो क्त्वानहतीकुलेजातोसर्वधर्मानुवारि
णो नस्याधर्मस्यगोधारे फलं प्राप्तमिदं महत् नो चेमा पंपरे लोके त्वमर्ध्याल तोधिकं पत्र तान्पाण्डवान्घृतंविष
मेणाविजिस्वह प्राभ्राजयस्तदारण्ये कौरव्याजिनवाससः प्रत्रा णामिवचेतेषां धर्म्मस्य चरतां सदा दुष्टात्को नुनरो लो
के मद्न्यो भ्रातृणां भुवः पाण्डवानामयं लोकस्त्वया शकुनिनासह आहृतो धनएषु स्य संमते कुरुसंसदि दुःशास
नेन सत्रुक्तः कर्णेन परिवीक्षितः सत्तु वक्षिममनादस्त्वयानस्तं पुनः पुनः यतान्सर्वे परम्परतः पयवारयतार्जुनं सिं
धुराजानमाश्रित्य सर्वोमध्ये कथं हतः कथं त्वपि च कर्णो च कृपेशस्ये च जीवति अश्वत्थाम्नि च कौरव्याणि धनं सैं
धवोगमत् पठत्तान्सर्वराजानस्तेजस्तिग्ममुपासते सिंधुराज्ञं परित्राणं सर्वोमध्ये कथं हतः मद्ये वहि विशेषेण
न ह्यानुर्योधनं त्वपि आशंसन्तपरित्राणमर्जुनात्सुमहीपतिः ततस्तस्मिन परित्राणमलब्धवतिफाल्गुना
त नकिंचिद्भयस्थामिजीवितत्राणमात्मनः मज्जन्तमिव चात्मानं धृष्टद्युम्नस्य किल्विषे यश्यामि हंत्यापां
वीला सह नेन शिखंडिना तन्मो किमसिततष्यं तेवा कृपैरेव हंत तस्मिन्नशक्तः सिंधुराजस्य भक्त्या त्राणाय मा

द्रो०
१८०

रत सौवर्णसिंहसंयस्यध्वजमालिख्यकर्म्मणः अपश्यन्युधिभीष्मस्य कथमाशंससेजयं मध्येमहारथानांचपत्रा
हत्वाजसैंधवः हतोभूरिश्रवश्चैवशिष्टेष्वेतत्रमन्यसे कृपएवचदुर्द्धर्षोयदिजीवतिपार्थिव योनागात्सिंधुराजस्यवर्त्मतंपूज
यास्यहं यत्रापश्यंहतंभीष्मंपश्यतस्तेवजनस्यवै दुःशासनस्यकौरव्यकृत्वाणंकर्म्मदुष्करं अवध्यकल्पंसंस्तामेद्वैर
पिसर्वासवैः ननैवसुंधरांलीनितदाहंचिंतयन्नप रमात्मिपांडवानांच [illegible] सृंजयानांचभारत अनीकान्याद्र
वंतेमांसहितान्यस्यभारत नाहत्वासर्वपांचालान्कवचस्यविमोक्षणं कर्त्तास्मिसमरेकर्म्मधार्त्तराष्ट्रहितंतव रा
जन्वृत्पाःशृणुत्वंमेत्वंमध्यमामानमाहवे नसोमकाःप्रमोक्ष्यंत्याजीवितंपरिरसता यच्चापिमांशिष्टोसितद्वचःप
रिपालय आनृशंस्येद्रमेसत्तोचार्ज्जवेचस्थिरोभव धर्मार्थकामकुशलोधर्मार्थावप्यपीडयन् धर्मप्रधानःका
र्य्याणिकुर्वीथेतिपुनःपुनः चक्षुर्मनोभ्यांसंतोप्याविप्राःप्रसाद्याश्चशक्तितः नचैषांविप्रियंकार्यंतेहिवह्निशिखोप
माः एवत्वहमनीकानिप्रविशाम्यरिसूदन रणायमहतेराजंस्त्वयावाक्छल्यपीडितः त्वंचदुर्य्योधनबलंयदि
शक्तोसिपालय रात्रावपिचयोत्स्यंतेसंरब्धाःकुरुसंजयाः एवमुक्त्वाततःप्रायाद्द्रोणःपांडवसृंजयान् मुष्णन्
क्षत्रियतेजांसिनक्षत्राणामिवांशुमान् महाभारतेद्रोणपर्वणि संजयउवाच ततोदुर्य्योधनोराजाद्रोणे
नैवमचोदितः अमर्षवशमापन्नोयुद्धायैवमनोदधे अब्रवीत्तनदाकर्णंदुर्य्योधनस्तव पश्यकृ
ष्णसहायेनपांडवेनाकिरीटिना आचार्यविहितंव्यूहंभित्वादेवैःसुदुर्भिदं तवव्यायच्छमानस्यद्रोणस्य

द्रो० १८१

च महात्मनः । मिषतां यो धनुष्मतां सैंधवो विनिपातितः । पश्य राधेय पृथ्वीशाः पृथिव्यां प्रवरा युधि पार्थेनैकेन निहताः
सिंहेनैवेतरे मृगाः । मम ह्याप्रच्छमानस्य समरे शत्रुसूदन । अल्पावशेषं सैन्यं मे कृतं शक्रात्मजेन ह । कथं नियच्छमान
स्य द्रोणस्य युधि फाल्गुनः । भिंद्यात्सुदुर्भिदं सैन्यं यतमानस्य संयुगे । प्रतिज्ञायाः गतः पारं हत्वा सैंधवमर्जुनः । पश्य
राधेय पृथ्वीशान् पृथिव्यां पतितान् बहून् । पार्थेन निहतान्संख्ये महेन्द्रोपमविक्रमान् । अनिघ्नतः कथं वीर द्रो
णस्य युधि पाण्डवः । रक्ष्या सुदुर्भिदं व्यूहं यतमानस्य शुष्मिणः । दयितः फाल्गुनो नित्यमाचार्यस्य महात्मनः । ततो
स्य दत्तवान् द्वारमयुद्धेनैव शत्रुहन् । अभयं सिंधुराजाय दत्वा द्रोणः परंतपः । प्रादात्किरीटिने द्वारं पश्य निर्गुणतां मयि
प्रादास्यं यद्यनुज्ञां वै पूर्वमेव गृहान्प्रति । प्रस्थातुं सिंधुराजस्य नाभविष्यज्जनक्षयः । जयद्रथो जीवितार्थी गच्छमा
नो महात्मनि । मयानार्येण संरुद्धो द्रोणात्प्राप्याभयं स्वके । अद्य मे भ्रातरः क्षीणाश्चित्रसेनादयो रणे । भीमसेनं स
मासाद्य पश्यतां नो दुरात्मनः । कर्ण उवाच । आचार्यं माविगर्हस्व शक्त्यासौ युध्यते द्विजः । यथाबलं यथोत्साहं त्यक्त्वा
जीवितमात्मनः । यद्येनं समतिक्रम्य प्रविष्टः श्वेतवाहनः । नात्र सूक्ष्मोऽपि दोषः स्यादाचार्यस्य कथंचन । कृती दक्षो
युवा शूरः कृतास्त्रो लघुविक्रमः । दिव्यास्त्रयुक्तमास्थाय रथं वानरलक्षणम् । कृष्णेन च गृहीताश्वमभेद्यकवचावृ
तः । गांडीवमजरं दिव्यं धनुरादाय वीर्यवान् । प्रवर्षन्निशितान्बाणान्बाहुद्रविणदर्पितः । यदर्जुनोऽभ्ययाद्द्रोणम
भ्युपपन्नं हि तस्य तत् । आचार्यः स्थविरो राजञ् शीघ्रयाने तथाक्षमः । बाहुव्यायामचेष्टायामशक्तश्च नराधिप । ते

रम० १८१

नैवमभ्यतिक्रांतः श्वेताश्वः कृष्णसारथिः तस्माद्दोषं न पश्यामि द्रोणस्यानेन हेतुना अजय्यान् पांडवान् मन्ये द्रोणे
नास्त्रविदां वरे तथा ह्येनमतिक्रम्य प्रविष्टः श्वेतवाहनः दैवादृष्टोन्यथा भावो न मन्ये विद्यते क्वचित् यतो नो
युध्यमानानां परं शक्त्या सुयोधन सैंधवो निहतो युद्धे दैवमत्र परं स्मृतं परं यत्नं कुर्वतां च त्वया सार्द्धं रणाजिरे ह
त्वास्माकं पौरुषं वै दैवं पश्चात्करोति नः सततं चेष्टमानानां निकृत्या विक्रमेण च दैवोपसृष्टः पुरुषो यत् क
र्म कुरुते क्वचित् कृतं कृतं हि तत्कर्म दैवेन विनिपात्यते यत्कर्त्तव्यं मनुष्येण व्यवसायवता सता तत्कार्यम
विशंकेन सिद्धिर्दैवे प्रतिष्ठिता निकृत्या वंचिताः पार्था विषयोगैश्च भारत दग्धा जतुगृहे चापि द्यूतेन च पराजि
ताः एवं नीतिं क्रिया क्रियमहिताश्च वञ्चनेनैव यत्नेन च कृतं ततं दैवेन विनिपातितं युध्यस्व यत्नमास्थाय मृत्युं कृ
त्वा निवर्त्तनं यततां तत्र तेषां च दैवं मार्गेण यास्यति न तेषां मतिपूर्वं हि सुकृतं दृश्यते क्वचित् दुष्कृतं तव वा वी
र बुध्या हितं कुरूद्वह दैवं प्रमाणं सर्वस्य सुकृतस्येतरस्य वा अनन्यकर्म दैवं हि जागर्त्ति स्वपतामपि बहूनि
न बलं सैन्यं योधाश्च बहवस्तव न तथा पांडुपुत्राणामेवं युद्धमवर्त्तत तैरल्पैर्बहवो यूयं क्षयं नीताः प्रहारिणः शं
के दैवस्य तत् कर्म पौरुषं येन नाशितं एवं संभाषमाणानां बहु तत्र जनाधिप पांडवानामनीकानि समदृश्यन्त संयुगे

द्रो० १८१ ततः प्रवृत्ते युद्धे व्यतिषक्तरथद्विपे तावकानां परैः सार्द्धं राजन्दुर्मंत्रिते तव इति द्रोणपर्वणि संजय उवाच तदुदी
र्णगजानीकं बलं तव जनाधिप पांडुसेनामतिक्रम्य योधयामास सर्वतः पांचालाः कुरवश्चैव योधयंतः परस्परं यमराष्ट्राय म
हते परलोकाय दीक्षिताः शूराः शूरैः समागम्य शरतोमरशक्तिभिः विव्यधुः समरे ऽन्योन्यं निन्युश्चैव यमक्षयं रथिनां रथि
भिः सार्द्धं रुधिरस्रावदारुणं प्रावर्त्तत महद्युद्धं निघ्नतामितरेतरं वारणाश्च महाराज समासाद्य परस्परं विषाणैर्दा
रयामासुः सुसंक्रुद्धा मदोत्कटाः हयारोहान्हयारोहाः प्रासशक्तिपरश्वधैः विभिदुस्तुमुले युद्धे प्रार्थयंतो महद्यशः
पत्तयश्च महाबाहो शतशः शस्त्रपाणयः अन्योन्यमार्दयन्राजन्नित्यं यत्ताः पराक्रमे गोत्राणां नामधेयानां कुला
नां चैव मारिष श्रवणाद्धि विजानीमः पांचालाः कुरुभिः सह ते ऽन्योन्यं समरे योधाः शरशक्तिपरश्वधैः प्रेषयन्
यमलोकाय विचरंतो ह्यभीतवत् शरैर्दश दिशो राजंस्तेषां प्रमुक्तैः सहस्रशः न प्राज्ञायंत यथा तत्त्वं भास्करे ऽस्तं गते ऽपि च
तथा प्रयुज्यमानेषु पांडवेयेषु निर्भयः दुर्योधनो महाराज व्यवगाहत तद्बलं सैंधवस्य वधे चैव भृशं दुःखसमन्वितः
मर्त्तव्यमिति संचिंत्य प्राविशत्तद्द्विषद्बलं नादयन्रथघोषेण कंपयन्निव मेदिनीं अभ्यवर्त्तत पुत्रस्ते पांडवा
नामनीकिनीं स संनिपातस्तुमुलस्तस्य तेषां च भारत अभवत्सर्वसैन्यानामभावकरणो महान् यथा मध्यंदि
ने सूर्यः प्रतपंस्तु गभस्तिभिः तथा तव सुतो मध्ये प्रतपंस्तं शरार्चिभिः न शेकुर्भरतश्रेष्ठ पांडवाः समुदीक्षितुं पलाय राम० १८१
ने कृतोत्साहा निरुत्साहा द्विषज्जये पर्यधावंत पांचाला वध्यमाना महात्मना रुक्मपुंखैः प्रसन्नाग्रैस्तव पुत्रे

णाषचिना अर्धमर्म्मणाः शरैस्तैः सन्यपतन्पांडुसैनिकाः ततो दशशरानेकम्मर्म्मकृन्तवेतस्ततनावकः याहशंकृन्तवात्रा
जापुत्रस्तव विशांपते पुत्रेण तव सा सेना पांडुवी मथिता रणे नलिनी द्विरदेनेव समंतात्कुश्चपंकजा सीराजनोमा
निलाघ्नाभ्यां हतत्विडिव पद्मिनी यमरूव पांडवी सेना तव पुत्रस्य तेजसा पांडुसेनां हतां दृष्ट्वा तव पुत्रेण भारत भी
मसेनपुरोगास्तु पांचालाः समुपाद्रवन् सभीमसेनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः विराटद्रुपदौ षड्भिः शतेन च
शिखंडिनं धृष्टद्युम्नं च सप्तत्या धर्मपुत्रं च सप्तभिः केकयांश्चैव चेदींश्च बहुभिर्निशितैः शरैः सात्वतं पंचभिर्वि
द्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः घटोत्कचं च समरे विध्वा सिंह इवानदत् शतशश्चापरान्योधान् सद्विपांश्च महार
णे शरैरवचकर्तोग्रैः क्रुद्धोंतक इव प्रजाः सा तेन पांडवी सेना वध्यमाना शिलीमुखैः तव पुत्रेण संग्रामे वि
दुद्राव नराधिप तं तपंतमिवादित्यं कुरुराजं महाहवे नाशक्नुवन्वीक्षितुं राजन्पांडुपुत्रस्य सैनिकाः ततो युधिष्ठिरो
राजा कुपितो राजसत्तम अभ्यधावत्कुरुपतिं तव पुत्रं जिघांसया तावुभौ युधि कौरव्यौ समीयतुररिंदमौ स्वार्थ
हेतोः पराक्रांतौ दुर्योधनयुधिष्ठिरौ ततो दुर्योधनः क्रुद्धः शरैः सन्नतपर्वभिः विव्याध दशभिस्तूर्णं ध्वजं चिच्छेद चे
षुणा इंद्रसेनं त्रिभिश्चैव ललाटे जघ्निवान्नृप सारथिं दयितं राजन् पांडवस्य महात्मनः धनुश्चापुनरन्येन चकर्त
ऽस्य महारथः चतुर्भिश्चतुरश्चैव वाहांश्च विव्याध वाजिनः ततो युधिष्ठिरः क्रुद्धो निमेषादिव कार्मुकं अन्यदा
दाय वेगेन कौरवं प्रत्यवारयत् स शरांस्सर्वरुक्माभ मनुष्यमनिवारणं हाहेतोसीति राजानमब्रवीत्तं च युधिष्ठिरः

द्रो०
१८३

सतेनाकर्णमुक्तेन विद्धो वाणेन कौरवः । निषसाद रथोपस्थे नृशंसो मूर्छ्चेतनः ॥ ततः पांचालसेनानां प्रशमासीद्भयो महान् । हतो
राजेति राजेंद्र मुदितानां समंततः ॥ वाणशब्दरवश्चोग्रः शुश्रुवे तत्र मारिष । अथ द्रोणोऽर्जुनं तत्र प्रमदस्य तु संयुगे । दृष्ट्वा दुर्योधनश्चा
पि दृढमादाय कार्मुकं । तिष्ठ तिष्ठेति राजानं ब्रुवन् पांडवमभ्ययात् । प्रत्युद्ययुस्त्वरिताः पांचाला जयगृद्धिनः । तान् द्रोणः प्र
तिजग्राह परीप्सन्कुरुसत्तमं । चंडवातोद्धुतान्मेघान्निघ्नन् रश्मिमुचो यथा ॥ ततो राजन्महानासीत्संग्रामो भूरिवर्द्धनः
[illegible]
[illegible] तावकानां परेषां च समेतानां युयुत्सया ॥ इति महाभारते द्रोणपर्वणि ॥ धृतराष्ट्र उवाच ॥ यत्तदाप्राविशत्पांडूना
चार्यः कुपितो वली । उक्त्वा दुर्योधनं मंदं मम शास्त्रातिगं सुतं ॥ प्रविश्य विचरंतं च रणे शूरमवस्थितं । कथं द्रोणं महेष्वासं
पांडवाः पर्यवारयन् । केऽरक्षन्दक्षिणं चक्रमाचार्यस्य महाहवे ॥ के चोत्तरमरक्षंत निघ्नतः शात्रवान्रणे । के चास्य
पृष्ठतोऽन्वयासंश्च वीरा वीरस्य योधिनः । के पुरस्तादवर्तंत रथिनस्तस्य शत्रवः ॥ मन्ये तानस्पृशच्छीतमतिवेलमनार्तवं । मन्ये
ते समवेपंत गावो वै शिशिरे यथा ॥ यत्प्राविशन्महेष्वासः पांचालानपराजितः । नृत्यन्स रथमार्गेषु सर्वशस्त्रभृतां वरः

निर्दहन्सर्वसैन्यानि पांचालानां नरर्षभः ३४

✓ धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् ॥ संजय उवाच ॥ सायाह्ने सैंधवं हत्वा राज्ञा पार्थः समेत्य च । सात्यकिश्च महेष्वा
सो द्रोणमेवाभ्यधावतां । तथा युधिष्ठिरस्तूर्णं भीमसेनश्च पांडव । पृथक्चमूभ्यां संयत्तौ द्रोणमेवाभ्यधावतां । तथैव
नकुलो धीमान् सहदेवश्च दुर्जयः । धृष्टद्युम्नः सहानीको विराटश्च सकेकयः । मत्स्याः शाल्वेयसेनाश्च द्रोणमेव ययुर्यु

एम०
१८३

षि द्रुपदश्च तथा राजा पांचालैरभिरक्षितः धृष्टद्युम्नपिता राजन् द्रोणमेवाभ्यवर्तत हैडिंब्या महेष्वासा राक्षसश्च घटोत्क
चः ससैन्यास्तेभ्यवर्तंत द्रोणमेव महाद्युतिं सोमकाश्च पांचालाः षट्सहस्राः प्रहारिणः द्रोणमेवाभ्यवर्तंत पुरस्कृत्य
शिखंडिनं तथेतरे नरव्याघ्राः पांडवानां महारथाः सहिताः समवर्तंत द्रोणमेव द्विजर्षभ तेषु शूरेषु युद्धाय गतेषु भरतर्ष
भ बभूव रजनी घोरा भीरूणां भयवर्द्धिनी योधानामशिवा रौद्रा राजन्नंतकगामिनी कुंजराश्वमनुष्याणां प्राणांतक
रणी तदा तस्यां रजन्यां घोरायां नदंत्यः सर्वतः शिवाः न्यवेदयंत घोरं सज्वालकवलैर्मुखैः उलूकाश्चाप्यदृश्यंत
शंसंतो विपुलं भयं विशेषतः कौरवाणां ध्वजिन्यामतिदारुणाः ततः सैन्येषु राजेंद्र शब्दः समभवन्महान् भेरीशब्देन मह
ता मृदंगानां स्वनेन च गजानां बृंहितैश्चापि तुरगाणां च हेषितैः खुरशब्दनिपातैश्च तुमुलः सर्वतो भवत् ततः सम
भवद्युद्धं संध्यायामतिदारुणं द्रोणस्य च महाराज सृंजयानां च सर्वशः तमसा चावृते लोके न प्राज्ञायत किंचन सैन्ये
न रजसा चैव समंतादुत्थितेन ह नरस्याश्वस्य नागस्य समसज्जत शोणितं नापश्याम रजो भौमं कश्मलेनाभिसंवृताः
रात्रौ वेणुवनस्येव दह्यमानस्य पर्वते घोरश्चटचटाशब्दः शस्त्राणां पततामभूत् मृदंगानकनिह्रादैर्झल्लरीपटहै
स्तथा फे[illegible]त्कारैर्हेषितैः शब्दैः सर्वमेवाकुलं बभौ नैव स्वे न परे राजन् प्राज्ञायंत तमोवृते उन्मत्तमिव तत्सर्वं बभूव
रजनीमुखे भौमं रजोथ राजेंद्र शोणितेन प्रशामितं शातकुंभमयैश्चैव वर्मभिर्भूषणैश्च तमोभ्यगात् ततः सा भारती सेना
मणिहेमविभूषिता द्यौरिवासीत्सनक्षत्रा रजन्यां भरतर्षभ गोमायुबलसंघुष्टा शक्तिध्वजसमाकुला वारणा

द्रो०
१८४

भिरुग्राघोराह्यवर्त्ततोऽस्तुघनादिता ॥ तत्रासवन्महाशब्दस्तुमुलो लोमहर्षणः ॥ समावृण्वन्दिशः सर्वा महेन्द्राशनिनिस्व-
नः ॥ सा निशीथे महाराजसेना हृष्टप्रभारत ॥ अंगदैः कुंडलैर्निष्कैः शस्त्रैश्चैवावभासिता ॥ तत्र नागा रथाश्चैव जांबू-
नदविभूषिताः ॥ निशायां प्रत्यदृश्यंत मेघा इव सविद्युतः ॥ ऋष्टिशक्तिगदाबाणमुशलप्रासपट्टिशाः ॥ संपतंतो व्यदृ-
श्यंत भ्राजमाना इवाग्नयः ॥ दुर्योधनपुरोवातां रथनागबलाहकां ॥ वादित्रघोषस्तनितां चापविद्युद्ध्वजैर्वृतां ॥ द्रोणपा-
ण्डवपर्जन्यां खड्गशक्तिगदाशनीं ॥ शरधारास्त्रपवनां भृशं शीतोष्णसंकुलां ॥ घोरां विस्मापनीमुग्रां जीवितछेदविप्लवां ॥
तां प्राविशन्नतिभयां सेनां युद्धचिकीर्षवः ॥ तस्मिन्रात्रिमुखे घोरे महाशब्दनिनादिते ॥ भीरूणां त्रासजनने शूराणां
हर्षवर्द्धने ॥ रात्रियुद्धे महाघोरे वर्त्तमाने सुदारुणे ॥ द्रोणमभ्यद्रवन्क्रुद्धाः सहिताः पांडुसृंजयाः ॥ ये ये प्रवर्त्तंत राजन्न
वर्त्तंत महात्मनः ॥ तान्सर्वान्विमुखांश्चक्रे कांश्चिन्निन्ये यमक्षयं ॥ तानि नागसहस्राणि रथानामयुतानि च ॥ पदाति
हयसंघानां प्रयुतान्यर्बुदानि च ॥ द्रोणेनैकेन नाराचैर्भिन्नानि निशामुखे ॥ ॥ द्रोणपर्वणि रात्रियुद्धे ॥ धृत
राष्ट्र उवाच ॥ तस्मिन्प्रविष्टे दुर्धर्षे सृंजयानमितौजसि ॥ अमृष्यमाणे संरब्धे का वोऽभूद्वै मतिस्तदा ॥ दुर्योधनेन तथाज्ञप्ते
पुत्रेणाशास्त्रवर्त्तिना मम ॥ यत्प्राविशदमेयात्मा किं पार्थाः प्रत्यपद्यत ॥ निहते सैंधवे वीरे भूरिश्रवसि चैव हि ॥ यदभ्यगान्म-
हातेजाः पांचालानपराजितः ॥ किममन्यत दुर्धर्षं प्रविष्टे शत्रुतापने ॥ दुर्योधनस्तु किं कृत्यं प्राप्तकालममन्यत ॥ के च
तं वरदं वीरमन्वयुर्द्विजसत्तम ॥ के चास्य पृष्ठतो गच्छन्वीराः शूराः प्रयुध्यतः ॥ के पुरस्तादवर्त्तंत निघ्नतः शात्रवान्रणे ॥

रा०
१८४

मन्येहं पांडवान्सर्वान्नाराचैः शरार्दितान् शिविरे कंपमानान्वै कृष्णागावरवमनो प्रविश्य समरे ह्यासः पांचालान
रिमर्दनः ॥ कथं नु दुर्योधनो ग्रः पंचत्वमुपजग्मिवान् सर्वेषु क्षितिपालेषु वसंगतेषु दारुणेषु समेतेषु महारथेषु संलोड्य
मानेषु पर्यस्वलेषु वै तत्र दानीं मतिमंतमासन् हतांश्चैव विषण्णांश्च पराभूतांश्च शंससि रथिनो विरथांश्चैव कृता
न् युद्धेषु मामकान् तेषां संलोड्यमानानां पांडवैर्हतचेतसां अधिनमस्ति मन्यानां मम वत्साम ति त्वदार्य हृष्टांश्चा
पुरस्थांश्च संतुष्टांश्चैव पांडवान् शंससे हासमहृष्टांश्च विमनस्कांश्चैव मामकान् वृथामेषां न दातव्यं पार्थाना
मपलायिनां प्रकाशम भवद्रूपं कुरुषु सत्तम ॥ ॥ संजय उवाच एतस्मिन्युद्धे तदा राजन् वर्तमाने सुदारु
णे द्रोणमभ्यद्रवन्सर्वे पांडवाः सहसोमकैः ततो द्रोणः केकयांश्च धृष्टद्युम्नस्य चात्मजान् संप्रैषयन्प्रे घु १
तलोकं सर्वानिषुभिराशुगैः तस्य प्रमुखतो राजन् पर्यवर्तत महारथाः तान्सर्वान्प्रेषयामास पितृलोकं सभा
रत प्रमथ्नंतं तदा वीरान् भारद्वाजं महारथं अभ्यवर्तत संक्रुद्धः शिवी राजन्प्रतापवान् तमापतंतं संप्रेक्ष्य पांडवानां म
हारथं विव्याध दशभिर्बाणैः सर्वपारशवैः सितैः तं शिविः प्रतिविव्याध त्रिंशता निशितैः शरैः सारथिं चास्य भल्ले
न स्मयमानो न्यपातयत् तस्य द्रोणो हयान्हत्वा सारथिं च महात्मनः अथास्य सशिरस्त्राणं शिरः कायादु
पाहरत् ततोस्य सारथिं क्षिप्रमन्यं दुर्योधनोदिशत् स तेन संगृहीताश्वः पुनरभ्यद्रवद्रिपून् कलिंगानामनीके
न कालिंगस्य सुतो रणे पूर्वं पितृवधात्क्रुद्धो भीमसेनमुपाद्रवत् स भीमं पंचभिर्विद्ध्वा पुनर्विव्याध सप्त

द्रो० १८५

भिः विशोकं त्रिभिराजन्छित्वा ध्वजमेकेन पत्रिणा कलिंगानां तु तेनाथ रं क्रुद्धः क्रुद्धो वृकोदरः रथादाप्लुत्य समभिद्रुत्य मुष्टिनाभि
जघान ह तस्य मुष्टिहतस्याजौ पाण्डवेन बलीयसा सर्वाण्यस्थीनि सहसा प्रापतन्वै पृथक्पृथक् तं कर्णो भ्रातरश्चास्य नाम
र्षयन्त परंतप ते भीमसेनं नाराचैस्तुदन्तो विषोपमैः ततः शत्रुरथं त्यक्त्वा भीमो ध्रुवरथं गतः ध्रुवं चास्यन्तमनिशं मुष्टिना
समपोथयत् स तथा पाण्डुपुत्रेण बलिना निहतोपतत् तं निहत्य महाराज भीमसेनो महाबलः जयरातरथं प्राप्य मुहुः सिं
हवान्नदत् जयरातमथाक्षिप्य नदन्सव्येन पाणिना तलेन नाशयामास कर्णस्यैवाग्रतः स्थितः कर्णस्तु पाण्डवे शक्तिं कां
चनीं समवासृजत् ततस्तामेव जग्राह प्रहसन्पाण्डुनन्दनः कर्णायैव च दुर्धर्षां चिक्षेपाजौ वृकोदरः तामापतन्तीं चिच्छे
द शकुनिस्तैलपायिना एतत्कृत्वा महत्कर्म रणेऽद्भुतपराक्रमः पुनः स्वरथमास्थाय दुद्राव वरूथिनीं तमायां
तं जिघांसन्तं भीमं क्रुद्धमिवान्तकं न्यवारयन्महाबाहुं तव पुत्रा विशांपते महता शरवर्षेण छादयन्तो महारथाः
दुर्मदस्य ततो भीमः प्रहसन्निव संयुगे सारथिं च हयांश्चैव शरैर्निन्ये यमक्षयं दुर्मदस्तु ततो यानं दुष्कर्णस्याव
चक्रमे तावेकरथमारूढौ भ्रातरौ परतापनौ संग्रामशिरसो मध्ये भीमं द्वावभ्यधावतां ॥ ॥ ॥ यथाम्बु
पतिमित्रौ हि तारकं दैत्यसत्तमं ॥ ॥ ततस्तु दुर्मदश्चैव दुष्कर्णश्च तवात्मजौ रथमेकं समारूढौ भीमं बाणैरविध्यतां
ततः कर्णस्य मिषतो द्रौणेर्दुर्योधनस्य च कृपस्य सोमदत्तस्य बाह्लीकस्य च पाण्डवः दुर्मदस्य च वीरस्य दुष्कर्णस्य च तं रम०
रथं पादप्रहारेण धरां प्रावेशयदरिंदमः ततः सुतौ तव बलिनौ शूरौ दुष्कर्णदुर्मदौ मुष्टिनाहत्य संक्रुद्धः ममर्द चन ८५

यद्वितर्केकयापुधिष्ठिरस्यापि परांमुदंपयौ ॥ वृकोदरं महाराज दृष्ट्वा पंचाल्य ते प्रयान्धकेप्रतानिहतेतद्गुरुः ततःसुता ३ X गांदि

नर्दश्च ततो हाहाकृतमेसैन्यं दृष्ट्वा भीमं न पाण्डवम् हतोऽयं भीमसेनेन धार्त्तराष्ट्रे युयुत्सति एवमुक्त्वा पला
यन्ते सर्वे भारत पार्थिवाः विसंज्ञा वा हयं चाहान् न च दृष्टेस्म हयावतः ततो बलेषु भग्नेषु लितेनिशाम्य खेद्र
पूजितो न परघर्षके वृकोदरः महाबलः कमललोचनो युधिष्ठिरं नृपतिं मपूजयद्बली ततो यमौ द्रु
ले वरुणान् मजौ यमौ सवान्विताः सह गुरुणा महात्मना वृकोदरं सरथ्यपदाति कुंजरा युवान्सवौ भशाम
भियर्पावारयन् ते ततो भवति निरघ्नमेरिवावृते महाभये भयप्रमतीवदारुणं निशामवैवृद्धवलग
प्रमोदनं महात्मनो न पवर युद्धमद्भुतं ॥ ॥इति श्रीमहाभारते द्रोणपर्वणि एत्रिवुडे ॥ ॥
संजय उवाच मायोपविष्टे तु हते पुत्रे सात्यकिना तदा सोमदत्तो महाशंकुद्धः सात्यकिं वाक्यमब्रवी
त् क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः तं त्वं सात्वत संत्यज्य दस्युधर्मे कथं रतः पराङ्मुखायदीना

द्रो० १८६

पश्यतस्तव शस्त्राणि सात्यके सत्रधर्मरतः सन् कथं तु साधुरूपो वृष्णिष्वेव किल ख्यातौ नान्यत्र ख्यातौ महारथौ प्रद्युम्नश्च महाबा
हुस्त्वं चैव युधि सात्वत कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे नृशंसं पतनीयं च तादृशं कृतवानसि कर्मणस्तस्य दुर्वृ
त्त फलं प्राप्नुहि संयुगे अद्य तेऽहं सायकैर्मूढ शिरो विक्रम्य पत्रिणा शपे सात्वत पुत्राभ्यामिष्टेन सुकृतेन च अन
तीतामिमां रात्रिं यदि त्वां वीरमानिनं अरक्ष्यमाणं पार्थेन जिष्णुना ससुतानुजं न हन्यां नरके घोरे पतेयं वृष्णिपांसन
एवमुक्त्वा सुसंक्रुद्धः सोमदत्तो महाबलः दध्मौ शंखं च तरसा सिंहनादं ननाद च ततः कमलपत्राक्षः सिंहदंष्ट्रो
दुरासदः सात्वतो भृशसंक्रुद्धः सोमदत्तमथाब्रवीत् कौरवेय न मे त्रासः कथंचिदपि विद्यते त्वया सार्धमथा
न्यैश्च युध्यतो हृदि कश्चन यदि सर्वेण सैन्येन गुप्तो मां योधयिष्यसि तथापि न व्यथा काचित्त्वयि स्यान्मम कौ
रव युद्धसारेण वाक्येन असतां संमतेन च नाहं भीषयितुं शक्यः क्षत्रवृत्ते स्थितस्त्वया यदि ते युद्धलालसम
या सह नराधिप निर्दयो निशितैर्बाणैः प्रहर प्रहरामि ते हतो भूरिश्रवा वीरस्तव पुत्रो महारथः शलश्चैव महाराज
भ्रातरः व्यसनकर्शिताः त्वां चापि हनिष्यामि सपुत्रं सहबान्धवं तिष्ठेदानीं रणे यत्तः कौरवोऽसि महारथः यस्मिन् द न्
नं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा अनपायीनि सर्वाणि नित्यं राज्ञि युधिष्ठिरे मृदंगकेतोस्तस्य त्वं तेजसा निह द्रो०
तः पुरा सकर्णसौबलः संख्ये विनाशमुपयास्यसि शपेऽहं कृष्णचरणाविष्टापूर्तेन चैव ह यदि त्वां ससुतं पा १८६

पंनहन्यांयुधिरोधिनः अपयास्यसि चेत्यक्त्वा ततोऽक्रोमं वियास्यसि एवमाभाष्य चान्योन्यं क्रोधसंरक्तलोचनौ प्रवृ
त्तौ शरसंपातं कर्तुं पुरुषर्षभौ ततो रथसहस्रेण नागानामयुतेन च दुर्योधनः सोमदत्तं परिवार्य व्यवस्थितः शकुनि
श्च सुसंक्रुद्धः सर्वशस्त्रभृतां वरः पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेंद्रविक्रमैः श्यालस्तव महाबाहुर्वज्रसंहननो युवा साग्रं
शतसहस्रं तु हयानां तस्य धीमतः सोमदत्तं महेष्वासं समंतात्पर्यरक्षत रक्ष्यमाणश्च बलिभिश्छादयामास सात्यकिं
तं छाद्यमानं विशिखैर्दृष्ट्वा संनतपर्वभिः धृष्टद्युम्नोऽभ्ययात्क्रुद्धः प्रगृह्य महतीं चमूं चंडवाताभिसृष्टानां समुद्राणामि
व स्वनः आसीद्राजन्बलौघानामन्योन्यमभिनिघ्नतां विव्याध सोमदत्तस्तु सात्वतं नवभिः शरैः सात्यकिर्दशभिश्चै
नमवधीत्कुरुपुंगवं सोऽतिविद्धो बलवता समरे दृढधन्विना रथोपस्थं समासाद्य मुमोह गतचेतनः तं विमूढं स
मालक्ष्य सारथिस्त्वरयान्वितः अपोवाह रणाद्वीरं सोमदत्तं महारथं तं विसंज्ञं समालक्ष्य युयुधानशरार्दितं अभ्य
धावत्ततो द्रोणो यदुवीरजिघांसया तमायांतमभिप्रेक्ष्य युधिष्ठिरपुरोगमाः परिवव्रुर्महात्मानं परीप्संतो यदूत्तमं त
तः प्रववृते युद्धं द्रोणस्य सह पांडवैः बलेरिव सुरैः पूर्वं त्रैलोक्यजयकांक्षया ततः सायकजालेन पांडवानीकमावृ
णोत् भारद्वाजो महातेजा विव्याध च युधिष्ठिरं सात्यकिं दशभिर्बाणैर्विंशत्या पार्षतं शरैः भीमसेनं च नवभि
र्नकुलं पंचभिस्तथा सहदेवं तथाष्टाभिः शतेन च शिखंडिनं द्रौपदेयान्महाबाहुः पंचभिः पंचभिः शरैः विराटम टं१ राम०

उभ्य३ स५ ५२

दे०
१८७

स्यमच्छादयद्दृष्टपरःशतैर्निशितैः शरैः युधामन्युस्त्रिभिः षड्भिरुत्तमौजसमाहवे अन्योन्यं सैनिकान्विद्धा युधिष्ठिरस्तु पाण्डवान
निवध्यमानान्द्रोणेन पाण्डुपुत्रस्य सैनिकाः माद्रवेयौ यथा राजन्साश्विनौ दश दश ते काश्यमानेन तत्सैन्यं दृष्ट्वा द्रोणेन फा
ल्गुनः किंचिदागतसंरम्भो राजन्पार्थो धनंजयः दृष्ट्वा द्रोणं ततो बीभत्सुरभिदुद्राव माहवे संरब्धं ततस्तत्सैन्यं पुनर्युधि
ष्ठिरं नृप ततो ऽभवन्महद्युद्धं भारद्वाजस्य पाण्डवैः द्रोणस्तु बहुतेजेन सर्वतः परिवारितः व्यधमत्पाण्डुसैन्यानि तूलराशि
शिमिवानलः तं ज्वलन्तमिवादित्यं दीप्तानलसमद्युतिं एवं निशम्य तं दृष्ट्वा द्रोणं शराचिंषं मण्डलीकृतधन्वानं तपन्त
मिव भास्करं दहन्तमहितान्सैन्ये नैनं कश्चिदवारयत् यो यो हि समुखे तस्य तस्थौ द्रोणो हि पुरुषः तस्य तस्य शिरश्छित्वा
ययौ द्रोणशराः क्षितिं एवं सा पाण्डवी सेना वध्यमाना महात्मना प्रदुद्राव पुनर्भीताः पश्यतः सव्यसाचिनः सं
प्रमग्नं बलं दृष्ट्वा द्रोणेन निशि भारत गोविन्दमब्रवीज्जिष्णुर्गच्छ द्रोणरथं प्रति ततो रजतगोक्षीरकुन्देन्दुसदृशप्रभान्
चोदयामास दाशार्हो हयान्द्रोणरथं प्रति भीमसेनोपि तं दृष्ट्वा यान्तं द्रोणाय फाल्गुनं स्वसारथिमुवाचेदं द्रोणा
नीकाय मां वह सोपि तस्य वचः श्रुत्वा विशोको वाहयद्धयान् पृष्ठतः सत्यसंधस्य जिष्णोर्भरतसत्तम तौ दृष्ट्वा भ्रात
रौ यत्तौ द्रोणानीकमभिद्रुतौ पाञ्चालाः सृञ्जया मत्स्याश्चेदिकारूषकोसलाः अन्वगच्छन्महाराज केकयाश्च महारथाः त
तो राजन्नभूद्घोरः संग्रामो लोमहर्षणः बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः महद्भ्यां रथवृन्दाभ्यां बलं जगृहतुस्तदा तौ दृष्ट्वा
पुरुषव्याघ्रौ भीमसेनधनंजयौ धृष्टद्युम्नोऽभ्ययाद्राजन्सात्यकिश्च महाबलः चेकितानो विपन्नानां युधि स्थानाय वै तथा
स्यासीद्राजन्बलौघानां तदान्योन्यमभिघ्नतां सागरस्येव धानं तु वीरस्यासीत्तदाहवे द्रोणिरभ्यद्रवद्राजंश्च धावंस्तत

सम०
१८७

लो३

निश्चयः तमापतंतं संप्रेक्ष्य ऐन्द्रेपत्यं प्रति भैमसेनिः प्रसंक्रुद्धः प्रत्यमित्रमथापतत् कार्ष्णायसं महाघोरमृक्षचर्मपरिच्छदं महांतं रथमास्था
य त्रिंशन्नल्वांतरांतरं विहितं सर्पं सन्नाहं महामेघौघनिस्वनं तदृक्षगजनिभैर्वाहैर्न हयैर्नापि वारणैः विहितमपक्षचरणैर्विवृत्ताक्षेण
कूजता ध्वजेनोच्छ्रितदंडेन गृध्रराजेन राजता लोहितार्द्रपताकं तमंत्रमालाविभूषितं अष्टचक्रसमायुक्तमास्थाय विपुलं रथं
शूलमुद्गरधारिण्या शैलपादपहस्तया रक्षसां घोररूपाणामक्षौहिण्या समावृतः तमुद्यतमहाचापं निशाम्य व्यथिता नृपाः युगांतका
लसमयं दंडहस्तमिवांतकं ततस्तं गिरिशृंगाभं भीमरूपं भयावहं दंष्ट्राकरालोग्रमुखं शंकुकर्णं महाहनुं ऊर्ध्वकेशं विरूपाक्षं दीप्ता
स्यं निम्नितोदरं महाश्वभ्रगलावर्तं किरीटच्छन्नमूर्धजं त्रासनं सर्वभूतानां व्यात्ताननमिवांतकं वीक्ष्य दीप्तमिवापतंतं रिपुविक्षोभका
रिणं तमुद्यतमहाचापं राक्षसेंद्रं घटोत्कचं भयार्दिता प्रचुक्षोभ पुत्रस्य तव वाहिनी वायुना क्षोभितावर्ता गंगेवोर्ध्वतरंगिणी
घटोत्कचप्रयुक्तेन सिंहनादेन भीषिता प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशं ततोऽश्मवृष्टिरत्यर्थमासीत्तत्र समं ततः
संध्याकालाधिकबलैः प्रमुक्ता राक्षसैः क्षितौ आयसानि च चक्राणि भुशुंड्यः प्रासतोमराः पतंत्यविरलाः शूलाः शतघ्न्यः पट्टि
शास्तथा तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिपाः तनयास्तव कर्णश्च व्यथिताः प्राद्रवन्दिशः तत्रैकोऽस्त्रबलश्लाघी द्रौणिर्मा
नी न विव्यथे व्यधमच्च शरैर्मायां घटोत्कचविनिर्मितां विहतायां तु मायायाममर्षात्स घटोत्कचः विससर्ज शरान्घोरांस्ते
श्वत्थामानमाविशन् भुजंगा इव वेगेन वल्मीकं क्रोधमूर्छिताः ते शरा रुधिराक्तांगा भित्त्वा शारद्वतीसुतं विविशुर्धरणीं शी
घ्रा रुक्मपुंखाः शिलाशिताः अश्वत्थामा तु संक्रुद्धो लघुहस्तः प्रतापवान् घटोत्कचमभिक्रुद्धं बिभेद दशभिः शरैः घटो
त्कचोऽतिविद्धस्तु द्रोणपुत्रेण मर्मसु चक्रं शतसहस्रारमगृह्णाद्व्यथितो भृशं क्षुरांतं बालसूर्याभं मणिवज्रविभूषितं अ

श्वत्थाम्नि समाविष्टे भैमसेनिर्जिघांसया वेगेन महता राजन् द्रौणिना शरैः अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि घटोत्क
चस्ततस्तूर्णं दृष्ट्वा चक्रं निपातितं द्रौणिं प्राछादयद्बाणैः स्वर्भानुरिव भास्करं घटोत्कचसुतः श्रीमान् भिन्नांजनचयोपमः रुरोध द्रौ
णिमायांतं प्रभंजनमिवाद्रिराट् पौत्रेण भीमसेनस्य शरैः सोंजनपर्वणा वभौ मेघेन धाराभिर्गिरिर्मेरुरिवावृतः अश्वत्था
मा त्वसंभ्रांतो रुद्रोपेंद्रेंद्रविक्रमः ध्वजमेकेन वाणेन चिछेदांजनपर्वणः द्वाभ्यां तु रथयंतारं त्रिभिश्चास्य त्रिवेणुकं धनुरेकेन
चिछेद चतुर्भिश्चतुरो हयान् विरथस्योद्यतं हस्तात् हेमविंदुभिराचितं विशिखेन सुतीक्ष्णेन खड्गमस्य द्विधाकरोत् गदा हेमांगदा
राजंस्तूर्णं हैडिंविसूनुना भ्राम्योत्क्षिप्ता शरैः सापि द्रौणिनाभ्याहतापतत् ततोंतरीक्षमुत्पत्य कालमेघ इवोन्नदन् ववर्षांज
नपर्वा स द्रुमवर्षं नभस्तलात् ततो मायाधरं द्रौणिर्घटोत्कचसुतं दिवि मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः सोवती
र्य पुनस्तस्थौ रथे हेमविभूषिते महीगत इवात्युग्रः श्रीमानंजनपर्वतः तमयस्मयवर्माणं द्रौणिर्भीमात्मजात्मजं ज
घानांजनपर्वाणं महेश्वर इवांधकं अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महावलं द्रोणेः सकाशमभ्येत्य रोषात्प्रचलि
तांगदः प्राह वाक्यमसंभ्रांतो वीरं शारद्वतीसुतं दहंतं पांडवानीकं वनमग्निमिवोच्छ्रितं घटोत्कच उवाच तिष्ठ तिष्ठ
न मे जीवन् द्रोणपुत्र गमिष्यसि त्वामद्य निहनिष्यामि क्रौंचमग्निसुतो यथा अश्वत्थामोवाच गच्छ वत्स सहा ८५
मरैस्त्वं युध्यस्वामरविक्रम नहि पुत्रेण हैडिंवे पिता न्याय्यः प्रवाधितुं कामं खलु न मे रोषो हैडिंवे विद्यते त्वयि किं तु रो
षान्वितो जंतुर्हन्यादात्मानमप्युत संजय उवाच श्रुत्वैतत्क्रोधताम्राक्षः पुत्रशोकसमन्वितः अश्वत्थामानमायस्तो भै
मसेनिरभाषत किमहं कातरो द्रौणे पृथग्जनवदाहवे यन्मां भीषयसे वाग्भिरसदेतद्वचस्तव भीमात्खल्वहमुत्पन्नः कु
रूणां विपुले कुले पांडवानामहं पुत्रः समरेष्वनिवर्तिनां रक्षसामधिराजोहं दशग्रीवसमो वले तिष्ठ तिष्ठ न मे जीवन् द्रोण

श्री१

पुत्रगमिष्यति धृष्टद्युम्नस्त्वमहं चैव विनिघ्नामि रणाजिरे रक्षस्त्वाक्रोधसंतप्तास्सोदरास्ते सुमहाबलाः द्रौणिमभ्यद्रवत्क्रुद्धो हैडिंबिर्निवर्हकेस
रा रथात्स्वमात्रेषिभिरभ्यवर्षन्घटोत्कचः रथिनामृषभं द्रौणिं धाराभिरिव तोयदः शरवृष्टिं शरैर्द्रौणिरप्राप्तां तामशातयत
ततोंतरिक्षे बाणानां संग्रामोन्यइवाभवत् अथास्त्रसंमर्दकृतैर्विस्फुलिंगैस्तदा बभौ विभावरीमुखे व्योम खद्योतैरिव चित्रितं
निशम्य निहतां मायां द्रौणिना रणशालिना घटोत्कचस्ततो मायां ससर्जांतर्हितः पुनः सोभवद्गिरिरत्युच्चः शिखरैस्तरुसं
कटैः शूलप्रासासिमुसलजलप्रस्रवणो महान् तमंजनगिरिप्रख्यं द्रौणिर्दृष्ट्वा महीधरं प्रपतद्भिश्च बहुभिः शस्त्रसं
घैर्न विव्यथे ततो हसन्निव द्रौणिर्वज्रमस्त्रमुदीरयत् स तेनास्त्रेण शैलेंद्रः क्षिप्तः क्षिप्रमनश्यत ततः स तोयदो भूत्वा नीलः सें
द्रायुधो दिवि अश्मवृष्टिभिरत्युग्रो द्रौणिमाच्छादयद्रणे अथ संधाय वायव्यमस्त्रमस्त्रविदांवरः व्यधमद्द्रोणतनयो
नीलमेघं समुत्थितं स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वशः शतं रथसहस्राणां जघान द्विपदांवरः स दृष्ट्वा पुनरायां
तं रथेनायतकार्मुकं घटोत्कचमसंभ्रांतं राक्षसैर्बहुभिर्वृतं सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमैः नानाशस्त्रधरैर्वी
रैर्नानाकवचभूषणैः महाबलैर्भीमरवैः संरंभोद्धृतलोचनैः उपस्थितैस्ततो युद्धे राक्षसैर्युद्धदुर्मदैः विषण्णमभिसं
प्रेक्ष्य पुत्रं ते द्रौणिरब्रवीत् तिष्ठ दुर्योधनाद्य त्वं न कार्यः संभ्रमस्त्वया सहैभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेंद्रविक्रमैः निहनिष्याम्यमि
त्रांस्ते नास्ति ते पराजयः सत्यं ते प्रतिजानामि पर्याश्वासय वाहिनीं दुर्योधन उवाच न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः अ
स्मासु च परा भक्तिस्तव गौतमिनंदन संजय उवाच अश्वत्थामानमुक्त्वैवं ततः सौबलमब्रवीत् शतैः रथसहस्राणां हयानां रण
योधिनां षष्ट्या सहस्रैश्च प्रयाहि त्वं धनंजयं कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च उदीच्याः कृतवर्मा च पुरुमित्रः दु
तापनः दुःशासनो निकुंभश्च कुंडभेदी उरुक्रमः पुरंजयो दृढरथः पताकी हेमकंपनः शल्यारुणींद्रसेनाश्च संजयो विजयो जयः
कमलाक्षः पुरुः क्राथी जयवर्मा सुदर्शनः एते त्वामनुयास्यंति पत्तीनामयुतानि षट् जहि भीमं यमौ चोभौ धर्मराजं च मातुलं

५३ ५८

द्रो० असुराणि वरैर्देवांजयाशामेव्यपिच्छिनन् । हतिन्तान् द्रोणेनाबाणैर्भृशंविज्ञातविग्रहान् । जहिमातुलकौंतेयानसुराणिवयावहिः
१८५ एवमुक्तोयथाशीघ्रं पुत्रेणानवसोबलः । पिप्रीवुतस्तुता राजन्द्रियन्सुश्चैवपांडवान् । अथप्रववृतेयुद्धं द्रोणराक्षसयोर्मृधे । वि
भावयांकुर्भकेशश्रृतं रणोरिव । ततोघटोत्कचोबाणैः शूलमिश्चैर्गतिमा सुते जघानोरसिसंक्रुद्धोविषाग्निप्रतिमैर्दृढैः । सतेनरभ्याह
तोगाढं शरैर्भीमसुतेरितैः । चचालरथमध्यस्थो वातोद्धूतइवद्रुमः । मूर्छयाभिपरीतांगो नापमार्गतोनमहाप्रभं । द्रोणिर्हस्तस्थितं
चापं विछेद हघटोत्कचः । ततोमहद्द्रोणिराहायधनुर्वीरःसहस्रजं ववर्षविशिखांस्तीक्ष्णान्धाराधाराधरोयथा । ततःशा
रद्वतीपुत्रः प्रेषयामासभारत । सुवर्णपुंखानशत्रुघ्नान् खचरान्खचरंप्रति । तद्बाणौरर्दितंयूथं रक्षसां नवक्षसां सिंहै
रिवबभौमत्तगजानांसंकुलंकुलं विधमवाणैःसहितंवाणैः सास्वसूतरथान्द्विपान् । ददाह भगवान्वह्निर्भूतानीवयुगक्षये
सदग्ध्वाक्षौहिणींबाणैर्नैऋतीं रुचेनृप । पुराविस्त्रिपुरंदग्ध्वादिविदेवो महेश्वरः । युगांतेसर्वभूतानिदग्ध्वेववसुरुल्बणः
रराजजयतांश्रेष्ठोद्रोणपुत्रस्तवाहितान् । ततोघटोत्कचःक्रुद्धोरक्षसांभीमकर्मणां । द्रोणिंहतेतिमहतींचोदयामास
तांचमूं । घटोत्कचस्यताम्राज्ञांप्रतिगृह्याथराक्षसाः । दंष्ट्रोज्ज्वलामहावक्त्राघोररूपाभयानकाः व्यात्ताननाघोरजि
ह्वाः क्रोधताम्रेक्षणाभृशं । सिंहनादेनमहतानादयंतोवसुंधरां । हंतुमभ्यद्रवन्द्रौणिंनानाप्रहरणायुधाः । शक्तीःशत
घ्नीःपरिघानशनीःशूलपट्टिशान् । खड्गान्गदाभिंदिपालान्मुशलानिपरश्वधान् । प्रासानसींस्तोमरांश्च कणपान्कं
पनांशितान् । हलान्भुशुण्डिश्मगदास्थूणाःकार्ष्णायसांस्तथा । मुद्गरांश्चमहाघोरान्समरेशत्रुदारणान् । द्रोणिमू
र्ध्न्यसृजन्नरक्षसाभीमविक्रमाः । चिक्षिपुःक्रोधताम्राक्षाःशतशोथसहस्रशः । तच्छस्त्रवर्षंसुमहद्द्रोणपुत्रस्यमू
र्ध्नि । पतमानंसमीक्ष्याथयोधास्तेव्यथिताभवन् । द्रोणपुत्रस्तुविक्रांतस्तद्वर्षंघोरमुच्छ्रितं । शरैर्विध्वंसयामासवज्रक १५०
ल्पैःशिलाशितैः । ततोन्यैर्विशिखैस्तूर्णं स्वर्णपुंखैर्महामनाः । निजघ्नेराक्षसान्द्रौणिर्दिव्यास्त्रप्रतिमंत्रितैः । तद्बा १८५

रक्षसांपीनवक्षसां सिंहीरिववभौसैन्यंनानानागाकुलंकुलं तेनाश्वसाः ससंक्रुद्धोद्रौणपुत्रेणताडिताः क्रुद्धः स्मप्राद्रवन्द्रौणिं जिघांसं
तोमहाबलाः तत्राद्भुतमिमंद्रौणिर्दर्शयामासविक्रमं अशक्यंकर्तुमन्येनसर्वभूतेषुभारत यदेकोराक्षसींसेनांक्षणाद्द्रौणिर्महास्त्रवित्
ददाहज्वलितैर्बाणैराक्षसेंद्रस्यपश्यतः सहत्वाराक्षसानीकंराजन्द्रौणिरहैव अतेघटोत्कचाद्रौणिंक्षिप्तैः स्मसेन्द्राम्महाबलात् सपत्नीत
स्वरुक्मोभ्रातृद्धान्तलोचनः तलंतलेनसंहत्यसंदश्यदशनच्छदं स्वंरथमब्रवीत्क्रुद्धोद्रौणपुत्रायमांवह सययौघोररूपेणतेनजैत्रपता
किना द्वैरथंद्रौणपुत्रेणपुनरप्यरिसूदन सविनद्यमहानादंसिंहवद्भीमविक्रमः चिक्षेपाविध्यसंग्रामेद्रौणपुत्रायराक्षसः अष्टघंटां
महाघोरामशनिंदेवनिर्मितां तामवप्लुत्यजग्राहद्रौणिर्न्यस्यरथेधनुः चिक्षेपचैनांतस्यैवस्यंदनात्सोवपुप्लुवे साश्वसूतध्वजंवाहम्
स्मकृत्वामहाप्रभा विवेशवसुधांभित्वासाशनिर्भृशदारुणा द्रौणेस्तत्कर्मदृष्ट्वातुसर्वभूतान्यपूजयन् यदवप्लुत्यजग्राहघोरांशंकरनि
र्मितां धृष्टद्युम्नरथंगत्वाभैमसेनिस्ततोनृप स्वर्णपुंखान्विशिखान्द्रौणपुत्रस्यवक्षसि ततःप्रमोचनाराचान्द्रौणिस्तस्यसहस्रशः
तावप्यग्निशिखाभैर्जघ्नतुस्तस्यमार्गणान् + धनुर्घोरंसमादायमहद्विद्युदुपमं मुमोचनिशितान्वाणान्सुनेद्रौणेर्महोरसि
धृष्टद्युम्नस्त्वसंभ्रान्तोमुमोचाशीविषोपमान् + अनियोधंमहद्युद्धंतयोःपुरुषसिंहयोः योधानांप्रीतिजननंद्रौणेश्चभरतर्षभ ततो
रथसहस्रेणद्विरदानांशतैस्त्रिभिः षड्भिर्वाजिसहस्रैश्चभीमस्तंदेशमाव्रजत् ततोभीमात्मजंरक्षोधृष्टद्युम्नंचसानुगं अयोधयतधर्मा
त्माद्रौणिरक्लिष्टविक्रमः तत्राद्भुततमंद्रौणिर्दर्शयामासविक्रमं अशक्यंकर्तुमन्येनसर्वभूतेषुभारत निमेषान्तरमात्रेणसाश्वसूतरथ

म·द्रो०
१८०

द्विषं श्वसोहिंसां राक्षसानां शितैर्बाणैर्घोरशातयत् भिषनेभीमसेनस्य हैडिंबेः पार्षतस्य च यमयोर्द्रौपदेयानां विजयस्याच्युतस्य च
प्रगाढमंजोगतिभिन्नांगानि चैव भिन्नानि दारिताः निपेतुर्द्विरदा भग्नाः सशृंगा इव पर्वताः निकृत्तैर्हैलिहैस्तैश्च विचलद्भिस्ततस्ततः राजवद्धाको
र्णा विमर्दैर्विद्धैर्वोरगैः श्लिष्टैः कांचनरत्नैश्च स्नपछैत्रैः क्षितिर्विबभौ श्रोणितोरित्र व्याघ्रकीर्णा महाकीर्णा गुणस्थिपे मज्जाभ्रमन्तकं भैरवी विली
र्णां छत्रैर्हंसावलीजुष्टैर्हेमतोमरमालिनीं कंकगृध्रमहाग्राहां नैकायुधझषाकुलां छिन्नांगगजपाषाणां हतास्वमकराकुलां
रथक्षिप्तमहावप्रां पताकारुचिरद्रुमां शरमीनां महारौद्रां प्रासशक्त्यृष्टिडुण्डुभां मज्जामांसमहापंकां कबन्धावर्जितोडुपां केशशैवलकल्मा
षां भीरूणां कश्मलावहां नागेन्द्रहययोधानां शरीरव्ययसंभवां शोणितौघमहावेगां द्रोणिः प्रावर्तयन्नदीं योधार्तनादनिर्घोषां स्तनजोर्मिसमा
कुलां प्रयातिभिर्महाघोरां यमराष्ट्रमहोदधिं निहत्य राक्षसान्बाणैर्द्रोणिर्हैडिम्बमार्दयत् पुनरप्यतिसंक्रुद्धः सवृकोदरपार्षतान् सनाराच
गणैः पार्थान्द्रोणिर्विद्ध्वा महाबलः जघान सुरथं नाम द्रुपदस्य सुतं विभुः पुनः शत्रुंजयं नाम सुरथस्यात्मजं रणे बलानीकं जयानीकं
जयाश्वं चाभिजघ्निवान् पुनः शरेणातितीक्ष्णेन द्रोणिः सिंहरथोऽन्वहन् जघान स पृषध्रं च चन्द्रदेवं च मानिनं कुन्तिभोजसुतांश्चाजौ दशभि
र्देशाजघ्निवान् सुतान्द्रुपदराजानं द्रोणिर्निमेषमध्यये त्रिभिस्त्रामेः शरैस्तीक्ष्णैः सपुत्रं हेममालिनं शत्रुंजयं च बलिनं शक्रलोकं नि
नायसः अश्वत्थामा ससंक्रुद्धः संधायोग्रमजिह्मगं मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमं यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचं स भित्त्वा
हृदयं तस्य राक्षसस्य महाशरः विवेश वसुधां शीघ्रं सपुंखः पृथिवीपते तं हतं पतितं ज्ञात्वा धृष्टद्युम्नो महारथः द्रोणेः सकाशाद्राजेन्द्र अपनि
न्ये रथोत्तमं ततः पराङ्मुखरथं सैन्यं यौधिष्ठिरं नृप पराजित्य रणे वीरो द्रोणपुत्रो ननाद ह पूजितः सर्वभूतैश्च तव पुत्रैश्च भारत अथ शरश एम
१८०

तमिवक्रुद्धं तैर्दैत्यैर्दैत्यपतिं तैः शूलपाणिभिः सपर्यन्नात् निधनं समुपागतैर्महाकं तामरुत्रिशिखिवैगिरुद्रुमानितिरोद्धा तं निहत्य गंधर्वपिशाचसंघानागाः
सपर्णाः पितरो वयांसि रक्षोगणा भूतगणाश्च द्रौणिमपूजयन्नप्सरसः सुराश्च ॥ इति द्रोणपर्वणि रात्रियुद्धे ॥ संजय उवाच ॥ द्रुपदस्यात्मजान्दृष्ट्वा
कुंतिभोजसुतांस्तथा द्रोणपुत्रेण निहतान्राक्षसांश्च सहस्रशः युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः युयुधानश्च संयत्ता युद्धायैव मनो द-
धुः सोमदत्तः पुनः क्रुद्धो दृष्ट्वा सात्यकिमाहवे महता शरवर्षेण छादयामास भारत ततः समभवद्युद्धमतीव भयवर्द्धनं त्वदीयानां परेषां च घो-
रं विजयकांक्षिणां तं दृष्ट्वा समुपायान्तं रुक्मपुंखैः शिलाशितैः दशभिः सात्वतस्यार्थे भीमो विव्याध सायकैः सोमदत्तोपि तं वीरं शतेन प्रत्यवि-
ध्यत सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभिप्लुतं वृद्धमृद्धं गुणैः सर्वैर्ययातिमिव नाहुषं विव्याध दशभिस्तीक्ष्णैः शरैर्वज्रनिपातनैः शक्त्या चैनं
विनिर्भिद्य पुनर्विव्याध सप्तभिः ततस्तु सात्यकेरर्थे भीमसेनो नवं दृढं मुमोच परिघं घोरं सोमदत्तस्य मूर्द्धनि सात्यकिश्चाग्निसंकाशं मुमोच श-
रमुत्तमं सोमदत्तोरसि क्रुद्धः सुपत्रं निशितं युधि युगपत्पेततुर्वीरौ घोरौ परिघमार्गणौ शरीरे सोमदत्तस्य सपपात महारथः व्यामोहिते
तु तनये बाह्लीकः समुपाद्रवत् विसृजञ्छरवर्षाणि कालवर्षीव तोयदः भीमोथ सात्वतस्यार्थे बाह्लीकं नवभिः शरैः प्रपीडयन्महात्मानं विव्या-
ध रणमूर्द्धनि प्रातिपीयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि निचखान महाबाहुः पुरंदर इवाशनिं स तयाभिहतो भीमश्चकंपे च मुमोह च
प्राप्य चेतश्च बलवान्गदामस्मै ससर्ज ह सा पांडवेन प्रहिता बाह्लीकस्य शिरोहरत् सपपात हतः पृथ्व्यां वज्राहत इवाद्रिराट् तस्मिन्विनिहते
वीरे बाह्लीके पुरुषर्षभ पुत्रास्तेभ्यर्दयन्भीमं दश दाशरथेः समाः नागदत्तो दृढरथो वीरबाहुरयोभुजः दृढः सुहस्तो विरजाः प्रमाथ्युग्रोनुया-
यिन् तान्दृष्ट्वा चुक्रुधे भीमो जगृहे भारसाधनान् एकमेकं समुद्दिश्य पातयामास मर्मसु ते विद्धा व्यसवः पेतुः स्यंदनेभ्यो हतौजसः चं

द्रो॰ प॰

१८७

ऽभ्यागात्प्रभग्नास्त्रपर्वता याम्यमहीरुहः नाराचैर्दशभिर्भीमस्तान्विहत्य तवात्मजान् कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत् ततो वृकरथो नाम
भ्राता कर्णस्य विश्रुतः जघान भीमं नाराचैस्तमप्यभ्यद्रवद्बली ततः सप्त रथान्वीरः स्यालानां तव भारत निहत्य भीमो नाराचैः शतचन्द्रमपोथय
त् अमर्षयन्तो निहतं शतचन्द्रं महारथं शकुनेर्भ्रातरो वीराः गजाक्षः शरभो विभुः सुभगो भानुदत्तश्च शूराः पञ्च महारथाः अभिद्रुत्य शरैस्ती
क्ष्णैर्भीमसेनमताडयन् स ताड्यमानो नाराचैर्वृष्टिवेगैरिवाचलः जघान पञ्चभिर्वीरः पञ्चैवातिरथान्बली तान्दृष्ट्वा निहतान्वीरान्विचेलु
र्नृपसत्तमाः ततो युधिष्ठिरः क्रुद्धस्तवानीकमशातयत् मिषतः कुम्भयोनेश्च पुत्राणां तव चानघ अम्बष्ठान्मालवाञ्छूरान्त्रिगर्तान्सशिबीन
पि प्राहिणोन्मृत्युलोकाय क्रुद्धो युद्धे युधिष्ठिरः अभीषाहान्शूरसेनान्बाह्लीकान्सवसातिकान् निकृत्य पृथिवीं राजा चक्रे शोणितकर्दमां
यौधेयान्मालवान्राजन्मद्रकाणां गणान्युधि प्राहिणोन्मृत्युलोकाय शूरान्बाणैर्युधिष्ठिरः हताहरत गृह्णीत विध्यत व्यवकृन्तत इत्या
सीत्तुमुलः शब्दो युधिष्ठिररथं प्रति सैन्यानि द्रावयन्तं तं द्रोणो दृष्ट्वा युधिष्ठिरं चोदितस्तव पुत्रेण सायकैरभ्यवाकिरत् द्रोणस्तु परमक्रुद्धो
वायव्यास्त्रेण पार्थिवं विव्याध सोऽपि तद्दिव्यमस्त्रमस्त्रेण जघ्निवान् तस्मिन्विनिहते चास्त्रे भारद्वाजो युधिष्ठिरे वारुणं याम्यमाग्नेयं त्वाष्ट्रं जे४
सावित्रमेव च चिक्षेप परमक्रुद्धो जिघांसुः पाण्डुनन्दनं क्षिप्तानि क्षिप्यमाणानि तानि चास्त्राणि धर्मजः जघानास्त्रैर्महाबाहुः कुम्भयोने
रवित्रसत् सत्यां चिकीर्षमाणस्तु प्रतिज्ञां कुम्भसम्भवः प्रादुश्चक्रेऽस्त्रमैन्द्रं वै प्राजापत्यं च भारत जिघांसुर्धर्मतनयं तव पुत्रहिते रतः पतिः
कुरूणां गजसिंहगामी विशालवक्षाः पृथुलोहिताक्षः प्रादुश्चकारास्त्रमहीनतेजा माहेन्द्रमन्यं स जघान तेन विहन्यमानेष्वस्त्रेषु द्रोणः
क्रोधसमन्वितः युधिष्ठिरवधप्रेप्सुर्ब्राह्ममस्त्रमुदीरयत् ततो नाज्ञासिषं किंचित् घोरेण तमसा वृते सर्वभूतानि च परं त्रासं जग्मुर्महीपते राम

१८८

अस्यात्त्वसंघतं दृष्ट्वा कुंतीपुत्रो युधिष्ठिरः अस्त्राद्वैरावणाजेंद्रं नदहं वसमवापयत ततः सैनिकमुख्यास्ते प्रशशंसुर्न्नरर्षभौ द्रोणपार्थौ महेष्वासौ सर्वयुद्ध
विशारदौ ततः प्रमुच्य कौंतेयं द्रोणो द्रुपदवाहिनीं अथ सक्रोधतां प्राप्तो वायव्यास्त्रेण भारत ते हन्यमाना द्रोणेन पांचालाः प्राद्रवन्भयात पश्यतो भी
मसेनस्य पार्थिवस्य महात्मनः ततः किरीटी भीमश्च सहसा समवर्त्ततां महद्भ्यां रथवंशाभ्यां परिगृह्य बलं तव बीभत्सुर्दक्षिणं पार्श्वमुत्तरं च वृकोदरः
माद्रूजे शरौघाभ्यां महद्भ्यां समवर्षतां तौ तदा संजयाश्चैव पांचालाश्च महौजसः अन्वगच्छन्महाराज मत्स्याश्च सहसोमकैः ततः सा भारती सेना
वध्यमाना किरीटिना तमसा निद्रया चैव पुनरेव व्यशीर्यत द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च नाशक्यंत महाराज योधा वारयितुं तदा इति द्रो
णपर्व्वणि रात्रियुद्धे संजय उवाच उदीर्यमाणं तद्दृष्ट्वा पांडवानां महद्बलं अविषह्यं च मन्वानः कर्णं दुर्योधनोब्रवीत अयं स कालः संप्राप्तो मित्राणां
मित्रवत्सल त्रायस्व समरे कर्ण सर्वान्योधान्महारथान पांचालैर्मत्स्यकैकेयैः पांडवैश्च महारथैः वृतान्समंतात्संक्रुद्धैर्निःश्वसद्भिरिवोरगैः
एते नदंति संहृष्टाः पांडवा जितकाशिनः शक्रोपमाश्च बहवः पांचालानां रथव्रजाः कर्ण उवाच परित्रातुमिह प्राप्तो यदि पार्थं पुरंदरः तमप्या
शु पराजित्य ततो हंतास्मि पांडवं सत्यं ते प्रतिजानामि समाश्वसिहि भारत हंतास्मि पांडुतनयान्पांचालांश्च समागतान जयं ते प्रतिदास्यामि
वासवस्येव पावकिः प्रियं तव मया कार्यमिति जीवामि पार्थिव सर्वेषामेव पार्थानां फाल्गुनो बलवत्तरः तस्यामोघां विमोक्ष्यामि शक्तिं शक्रवि
निर्मितां तस्मिन्हते महेष्वासे भ्रातरस्तस्य मानद तव वश्या भविष्यंति वनं यास्यंति वा पुनः मयि जीवति कौरव्य विषादं मा कृथाः क्वचित अ
हं जेष्यामि समरे सहितान्सर्वपांडवान पांचालान्केकयांश्चैव वृष्णींश्चापि समागतान बाणौघैः शकलीकृत्य तव दास्यामि मेदिनीं संजय उवाच
एवं ब्रुवाणं कर्णं तु कृपः शारद्वतोब्रवीत स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः शोभनं शोभनं कर्ण सनाथः कुरुपुंगवः त्वया नाथेन राधेय व यो

तम४

द्रो॰ प

१५८२

सापदिसिद्धानि वहुशः कच्छेसकर्णकौ अस्मत्समीपतः नतनेविक्रमः कश्चिद्दृष्टपूर्वस्तेफलमेववामसमागमः पांडुसुतैर्दृष्टस्त्वंवहुशोयुधि सर्वत्रनिर्जित
श्चासिपांडवैःसुतनंदन ह्रियमाणेनराकर्णगंधर्वैर्हृतएवहि तदायुध्यंतसैन्यानि त्वमेकोग्रतःपलायिथाः विराटनगरेचापिसमेताःसर्वकौरवाः पार्थेन
निर्जितायुद्धेत्वंचकर्णसहानुजः एकस्याप्यसमर्थस्त्वंफाल्गुनस्यरणाजिरे कथमुत्सहसेजेतुंसकृष्णान्सर्वपांडवान् स्वयुवनकर्णयुध्यस्वकच्छेसत्व
दुस्तरम् स्वनुस्काविक्रमंयत्स्तनैहूस्तसुरुषम् ... गर्जितंवासूतपुत्रत्वंशारशम्भमिवानलं निष्फलोदृश्यसेकर्णत्वंराजानवुध्यसे तावद्गर्जसिराधेय
यावत्पार्थंनपश्यसि यावत्पार्थंहितंदृष्ट्वापुंसंगर्जितंपुनः त्वमनार्याघ्नतानवाप्यनफाल्गुनप्रतिगर्जसि पार्थसायकविद्धस्यदुर्लभं गर्जितं ग
तव वाहुभिः क्षत्रियाः शूरावाग्मिःशूराद्विजातयः धनुषाफाल्गुनःशूरःकर्णःशूरोमनोरथैः तोषितोयेनरुद्रोपिकःपार्थंप्रतिघातयेत् एवंसंरुषितस्ते
नतदाशल्यहुतेनह कर्णःप्रहास्तोभ्येषःकृपंवाक्यमथाब्रवीत् शूरागर्जंतिसततंप्रावृषीववलाहकाः फलंचाशुप्रयच्छंतिवीजमुप्तमृताविव दोषमत्र
नपश्यामिशूराणांरणमूर्द्धनि नतद्विकत्थमानानांभारंवोढुंहतोमये यंभारंपुरुषोवोढुंमनसाहिव्यवस्यति दैवमस्यध्रुवंतत्रसाहाय्यायोपपद्यते
व्यवसायद्वितीयोहंमनसाभारमुद्वहन् हत्वापांडुसुतान्राजन्सकृष्णान्सहसात्वतान् गर्जामियद्यहंविप्रतत्रचाकिंतत्रनश्यति वृथाशूरानगर्जंति
शाख्यहत्रवतोपराः सामर्थ्यमात्मनोज्ञात्वाततोगर्जंतिपंडिताः सोहमद्यरणेयत्तोसहितौकृष्णपांडवौ उत्सहेमनसाजेतुंततोगर्जामिगौतम
पश्यत्वंगर्जितस्यास्यफलंमेविप्रसानुगान् हत्वापांडुसुतान्राजन्सहकृष्णान्ससात्वतान् दुर्योधनायदास्यामिपृथ्वींहतकंटकां कृप उवाच
मनोरथप्रलापामेनग्राह्यास्तवसूतज सदाक्षिपसिवैकृष्णंधर्मराजंचपांडवं ध्रुवस्तत्रजयःकर्णयत्रयुद्धविशारदौ देवगंधर्वयक्षाणांमनुष्योरग
रक्षसां दंशितानामपिरणेजय्यौकृष्णपांडवौ ब्रह्मण्यःसत्यवाग्दांतोगुरुदेवतपूजकः नित्यंधर्मरतश्चैवकृतास्त्रश्चविशेषतः धृतिमांश्चकृत एम

१५८२

तेषु धर्मपुत्रो युधिष्ठिरः भ्रातरश्चास्य बलिनः सर्वास्त्रेषु कृतश्रमाः गुरुवृत्तिपराः प्राज्ञा धर्मनित्या यशस्विनः संबंधिनश्च इंद्रवीर्याः स्वनुरक्ताः प्रहारि
णः धृष्टद्युम्नः शिखंडी चेदीशो मुक्तिजिन्नेमजयः चंद्रसेनो हृद्रसेनः कीर्तिधर्मा अकृतोधाः वसुचंद्रो दामचंद्रः सिंहचंद्रः सुवेधनः द्रुपदस्य तथा पुत्रा द्रु
पदश्च महास्त्रवित् येषामर्थाय संयत्तो मत्स्यराजः सहानुजः शतानीकः सुदर्शनः श्रुतानीकः श्रुतध्वजः बलानीको जयानीको जयाश्वो रथवाहनः
चंद्रोदयः समरथो विराटभ्रातरः शुभाः यमौ च द्रौपदेयाश्च राक्षसश्च घटोत्कचः येषामर्थाय युध्यंते न तेषां विद्यते क्षयः एते चान्ये च बहवो गणाः पांडु
सुतस्य वै कामं खलु जगत्सर्वं सदेवासुरमानवं सयक्षराक्षसगणं सभूतभुजगद्विपं निःशेषमस्त्रवीर्येण कुर्वीत भीमफाल्गुनौ युधिष्ठिरश्च पृ
थिवीं निर्दहेद्घोरचक्षुषा अप्रमेयबलः शौरिर्येषामर्थे च दंशितः कथं तान्संयुगे कर्ण जेतुमुत्सहसे रणे महानपनयस्त्वेष नित्यं हि तव सूतज
यस्त्वमुत्सहसे योद्धुं समरे शौरिणा सह संजय उवाच एवमुक्तस्तु राधेयः प्रहसन्भ्रातरर्षभ अब्रवीच्च तदा कर्णो गुरुं शारद्वतं कृपं सत्यमुक्तं त्वया ब्रह्मन्
पांडवान्प्रति यद्वचः एते चान्ये च बहवो गुणाः पांडुसुतेषु वै अजय्याश्च रणे पार्था देवैरपि सवासवैः सदैत्ययक्षगंधर्वपिशाचोरगराक्षसैः तथापि पा
र्थान्जेष्यामि शक्त्या वासवदत्तया मम ह्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज एतया निहनिष्यामि सव्यसाचिनमाहवे हते तु पांडवे कृष्णो भ्रातरश्चास्य
सोदराः अनर्जुना न शक्ष्यंति महीं भोक्तुं कथंचन तेषु नष्टेषु सर्वेषु पृथिवीयं ससागरा अयत्नात्कौरवेंद्रस्य वशे स्थास्यति गौतम सुनीतैरिह सर्वा
र्थाः सिद्ध्यंते नात्र संशयः एतमर्थमहं ज्ञात्वा ततो गर्जामि गौतम त्वं तु विप्रश्च वृद्धश्च अशक्तश्चापि संयुगे कृतस्नेहश्च पार्थेषु मोहान्मामवमन्यसे
यद्येवं वक्ष्यसे भूयो मामप्रियमिह द्विज ततस्ते खड्गमुद्यम्य जिह्वां छेत्स्यामि दुर्मते यच्चापि पांडवान्विप्र स्तोतुमिच्छसि संयुगे भीषयन्सर्वसैन्यानि
कौरवेयाणि दुर्मते अत्रापि शृणु मे वाक्यं यथावद्वदतो द्विज दुर्योधनश्च द्रोणश्च शकुनिर्दुर्मुखो जयः दुःशासनो वृषसेनो मद्रराजस्त्वमेव च सोम

द्रो·
१८३

वि
दत्तश्च भूरिश्रवास्तथा द्रोणि(वि)र्विंशतिः तिष्ठत्सु दीप्तिमत्सु यत्र सर्वे युद्धविशारदाः जयेदेतान्नराः कोनु शक्रतुल्यबलोप्यरिः शूराश्च हि कृतास्त्राश्च बलिनः
स्वर्गलिप्सवः धर्मज्ञा युद्धकुशलाः हन्युर्युद्धे सुरानपि एते स्थास्यंति संग्रामे पांडवानां वधार्थिनः जयमाकांक्षमाणा हि कौरवेयस्य दंशिताः दैवायत्तम
हमन्ये जयं सुबलिनामपि यत्र भीष्मो महाबाहुः शेते शरशताचितः विकर्णश्चित्रसेनश्च बाह्लीकोथ जयद्रथः भूरिश्रवा जयश्चैव जलसंधः सुदक्षिणः
शलश्च रथिनां श्रेष्ठो भगदत्तश्च वीर्यवान् एते चान्ये च राजानो दैवैरपि सुदुर्जयाः निहताः समरे शूराः पांडवैर्बलवन्नृप किमन्यद्दैवसंयोगान्मन्यसे
पुरुषाधम यांश्च तांस्तौषि सततं दुर्योधनारिपून् द्विज तेषामपि हताः शूराः शतशोथ सहस्रशः क्षीयंते सर्वसैन्यानि कुरूणां पांडवैः सह प्रभावान्ना
त्र पश्यामि पांडवानां कथंचन यांस्तान् बलवतो नित्यं मन्यसे त्वं द्विजाधम यतिष्येहं यथाशक्ति योद्धुं तैः सह संयुगे दुर्योधनहितार्थाय जयो दैवे प्रति
ष्ठितः इति द्रोणपर्वणि त्रिपुष्टे संजय उवाच तथा परुषितं दृष्ट्वा सूतपुत्रेण मातुलं खड्गमुद्यम्य वेगेन द्रौणिरभ्यपतद्द्रुतं ततः परमसंक्रुद्धः सिं
हो मत्तमिव द्विपं प्रेक्षतः कुरुराजस्य द्रौणिः कर्णं समभ्ययात् अश्वत्थामोवाच यदर्जुनगुणांस्तथ्यान् कीर्तयानं नराधिप शूरं द्वेषात्सुदुर्बुद्धे त्वम
र्भर्त्सयसे मातुलं विकत्थमानः शौर्येण सर्वलोकधनुर्धरं दर्पोत्सेकगृहीतोद्य न किंचिद्गणयन् मृधे क्व ते वीर्यं क्व चास्त्राणि यत्त्वां निर्जित्य संयुगे
गांडीवधन्वा हृतवान् प्रेक्षतस्ते जयद्रथं येन साक्षान्महादेवः योधितः समरे पुरा तमिच्छसि वृथा जेतुं सूताधम मनोरथैः यं हि कृष्णेन सहितं सर्वश
स्त्रभृतां वरं जेतुं न शक्ताः सहिताः सेंद्रा अपि सुरासुराः लोकैकवीरमजितमर्जुनं सूत संयुगे किं पुनस्त्वं सुदुर्बुद्धे सहैभिर्वसुधाधिपैः कर्ण पश्य सुदुर्बु
द्धे तिष्ठेदानीं नराधम एष तेद्य शिरः कायादुद्धरामि सुदुर्मते संजय उवाच तमुद्यतं तु वेगेन राजा दुर्योधनः स्वयं न्यवारयन्महातेजाः कृपश्च द्विपदांव
रः कर्ण उवाच शूरोयं समरश्लाघी दुर्मतिश्च द्विजाधमः आसादयतु मद्वीर्यं मुंचेमं कुरुसत्तम अश्वत्थामोवाच तवैतत्क्षम्यतेस्माभिः सूतात्मज सु रम·
१८३

मा१

४

दुर्म्मते दर्प्पमुत्सिक्तमेतत्तेफाल्गुनोनाशयिष्यति दुर्य्योधनउवाच अश्वत्थामन्प्रसीदस्वक्षंतुमर्हसिमानद कोपःखलुनकर्त्तव्यःसूतपुत्रेकथं
चन त्वयिकर्णेकृपेद्रोणेमद्रराजेसौबले महत्कार्य्यंसमायत्तंप्रसीदद्विजसत्तम एतेह्यभिमुखाःसर्वेराधेयेनयुयुत्सवः आयांतिपांडवाब्रह्मन्समा
ह्वयंतःसमंततः संजयउवाच प्रसाद्यमानस्तुराज्ञाद्रौणिर्महामनाः प्रससादमहाराजक्रोधमन्युसमन्वितः ततःकृपउवाचेदमाचार्यःसुमहाम
नाः सौम्यस्वभावाद्राजेंद्रक्षिप्रमागतमार्द्दवः कृपउवाच नैवतस्मिन्मतेस्माभिःसूतात्मजसुदुर्म्मते दर्प्पमुत्सिक्तमेतत्तेफाल्गुनोनाशयिष्यति संजयउ
वाच ततस्तेपांडवाराजन्पांचालाश्चयशस्विनः आजग्मुःसहिताःकर्णंतर्जयंतःसमंततः कर्णोपिरथिनांश्रेष्ठश्चापमुद्यम्यवीर्यवान् कौरवाग्र्यैःप
रिवृतःशक्रोदेवगणैरिव पर्य्यतिष्ठततेजस्वीस्ववाहुवलमाश्रितः ततःप्रववृतेयुद्धंकर्णस्यसहपांडवैः भीषणंसमहाराजसिंहनादविराजितं ततस्तेपांडवाराज
न्पांचालाश्चयशस्विनः दृष्ट्वाकर्णंमहावाहुमुच्चैःशब्दमथानदन् अयंकर्णःकुतःकर्णस्तिष्ठकर्णमहारणे युध्यस्वसहितोस्माभिर्दुरात्मन्पुरुषाधम
अन्येतुदृष्ट्वाराधेयंक्रोधरक्तेक्षणाब्रुवन् हन्यतामयमुत्सिक्तःसूतपुत्रोल्पचेतनः सर्वैःपार्थिवशार्द्दूलैर्न्नानेनार्थोस्तिजीवता अत्यंतवैरीपार्थानांसततं
पापपूरुषः एषमूलमनर्थानांदुर्य्योधनमतेस्थितः हतैनमितिजल्पंतःक्षत्रियाःसमुपाद्रवन् महताशरवर्षेणछादयंतोमहारथाः वधार्थंसूत
पुत्रस्यपांडवेयेनचोदिताः तांस्तुसर्वांस्तथादृष्ट्वाधावमानान्महारथान् नविव्यथेसूतपुत्रोनचत्रासमगच्छत दृष्ट्वानगारकल्पंतसंकुलंसैन्यसागरं
पिप्रीषुस्तवपुत्राणांसंग्रामेष्वपराजितः सायकौघेनवलवान्क्षिप्रकारीमहावलः वारयामासतत्सैन्यंसमंतान्नरर्षभ ततस्तुशरवर्षेणपार्थि
वास्तमवारयन् धनूंषिविधुन्वानाःशतशोथसहस्रशः अयोधयंतराधेयंशक्रंदैत्यगणाइव शरवर्षंतुतंकर्णःपार्थिवैःसमुदीरितं शरवर्षेणम
हतासमंताद्व्यकिरत्प्रभो तद्युद्धमभवत्तेषांकृतप्रतिकृतैषिणां यथादेवासुरेयुद्धेशक्रस्यसहदानवैः तत्राद्भुतमपश्याम सूतपुत्रस्यलाघवं यदेनंसर्वतोय

१५४ तानाप्लुवंतिपरेयुधि निवार्यचशरौघांस्तान्पार्थिवानांमहात्मनः पुत्रेषांपात्रछत्रेषुध्वजेषुचहयेषुच आत्मनामाकिनान्वाणान्राधेयः प्राहिणोच्छि
तान् ततस्तेष्वाकुलीभूताराजानःकर्णपीडिताः वभ्रमुस्तत्रतत्रैवगावःसिंहार्दिताइव हयानांवध्यमानानांगजानांरथिनांतथा तत्रैवाभ्यवेक्षाम
संग्रामेकर्णेनताडितान् शिरोभिःपतितैराजन्वाहुभिश्चसमंततः आस्तीर्णावसुधासर्वाशूराणामनिवर्त्तिनां हतैश्चहन्यमानैश्चनिष्टनद्भिश्चसर्व
शः वभूवायोधनंरौद्रंवैवस्वतपुरोपमं ततोदुर्योधनोराजादृष्ट्वाकर्णस्यविक्रमं अभ्यद्रवत्माधवास्मिनतदुवाचह युध्यतेसौरणेकर्णोदंशितःसर्वपा
र्थिवैः यथैतांद्रवंतीसेनांकर्णसायकपीडितां कार्त्तिकेयेनविध्वस्तामासुरींपृतनामिव दृष्ट्वैतांनिर्जितांसेनांरणेकर्णेनधीमता अभियासेववीभत्सुः स
तपुत्रजिघांसया तथाप्रेक्ष्यमाणानांसूतपुत्रंमहारथं ततःस्वास्थांडवःसंख्येतथानीतिर्विधीयतां ततोद्रोणिःकृपःशल्योहार्दिक्यश्चमहारथः प्रत्युद्ययु
स्तथापार्थंसूतपुत्रपरीप्सया आयांतंवीक्ष्यकौन्तेयंशक्रंदैत्यचमूमिव वीभत्सुरपिराजेन्द्रपांचालैरभिसंवृतः प्रत्युद्ययौतदाकर्णंपथावृत्रःशतक्रतो ध
तराष्ट्रउवाच संरब्धंफाल्गुनंदृष्ट्वाकालांतकयमोपमं कर्णोवैकर्त्तनःसूतप्रत्यपद्यतकिमुत्तरं सख्यस्पर्द्धतपार्थेननित्यमेवमहारथः आशंसतेचवीभत्सुंयुद्धे
जेतुंसुदारुणं सतुतंसहसाप्राप्तंनित्यमत्यंतवैरिणं कर्णोवैकर्त्तनःसूत[redacted]किमुत्तरमपद्यत संजयउवाच आयांतंपांडवंदृष्ट्वागजंप्रतिगजोयथा असंभ्रांतोरणेकर्णःप्रत्युद्ययौधनंजयं तमापतंतंवे
गेनवैकर्त्तनमजिह्मगैः वारयामासतेजस्वीपांडवःशत्रुतापनः तंकर्णःशरजालेन छादयामासभारत विव्याधचसुसंक्रुद्धःशरैस्त्रिभिरजिह्मगैः त
स्यतल्लाघवंपार्थोनामृष्यतमहाबलः तस्मैवाणांशिलाधौतान्प्रसन्नाग्रानजिह्मगान् प्राहिणोत्सूतपुत्रायत्रिंशतंशत्रुतापनः विव्याधचैनंसंर
ब्धोवामेनैकेनवीर्यवान् सव्येभुजाग्रेवलवान्नाराचेनहसन्निव तस्यविद्धस्यवाणेनकरात्चापंपपातह पुनरादायतच्चापंनिमेषार्द्धान्महाबलः छा एम

१५४

दयामास बाणौघैः फाल्गुनं कृतहस्तवत् शरवृष्टिं तां मुक्तां सूतपुत्रेण भारत अथ मच्छादवर्षेणास्मयन्निव धनंजयः तेनापसव्यमासाद्य शरवर्षेण पा
र्थिवः । छादयंतं महेष्वासो कृतप्रतिकृते स्थितो तदद्भुतं महद्युद्धं कर्णपांडवयोर्मृधे कुरूणां विस्मितान् हेतोरिन्द्रयोर्गजयोरिव ततः पार्थो महेष्वासो दृ
ष्ट्वा कर्णस्य विक्रमं मुष्टिदेशे धनुस्तस्य चिच्छेद त्वरयान्वितः अश्वांश्चतुरो भल्लैर्नयद्यमसादनं सारथेश्च शिरः कायाद्धरच्छत्रुतापनः अथैनं छिन्नध
न्वानं हताश्वं हतसारथिं विव्याध सायकैः पार्थश्चतुर्भिः पांडुनंदनः हताश्वात्तु रथात्तूर्णमवप्लुत्य नरर्षभः आरुरोह रथं तूर्णं कृपस्य शरपीडितः स
न्तप्तोऽर्जुनबाणौघैरार्चितः शल्यकोपमया जीवितार्थमभिप्रेप्सुः कृपस्य रथमारुहत् एवं च निर्जितं दृष्ट्वा तावकाश्च भरतर्षभ धनंजयशरैर्नुन्नाः प्राद्र
वन्त दिशो दश द्रवतस्तान्समालोक्य राजा दुर्योधनो नृप निवर्तयामास तदा वाक्यमेतदुवाच ह अलं द्रुतेन वः शूराः तिष्ठध्वं क्षत्रियर्षभाः एष पार्थवधाया
हं स्वयं गच्छामि संयुगे अहं पार्थान्हनिष्यामि सपांचालान्ससोमकान् अद्य मे युध्यमानस्य सह गांडीवधन्वना द्रक्ष्यन्ति विक्रमं पार्थाः कालस्येव युग
क्षये अद्य मद्बाणजालानि विमुक्तानि सहस्रशः द्रक्ष्यन्ति समरे योधाः शलभानामिवायतीः अद्य बाणमयं वर्षं सृजतो मम धन्विनः जीमूतस्येव
घर्मान्ते द्रक्ष्यन्ति युधि सैनिकाः जेष्याम्यद्य रणे पार्थं सायकैर्नतपर्वभिः तिष्ठध्वं समरे शूरा भयं त्यजत फाल्गुनात् न हि मद्वीर्यमासाद्य फाल्गुनः प्रस
हिष्यति यथा वेलां समासाद्य सागरो मकरालयः इत्युक्त्वा प्रययौ राजा सैन्येन महतावृतः फाल्गुनं प्रति दुर्धर्षः क्रोधात्संरक्तलोचनः तं प्रयान्तं महा
बाहुं दृष्ट्वा शारद्वतस्तदा अश्वत्थामानमासाद्य वाक्यमेतदुवाच ह एष राजा महाबाहुरमर्षी क्रोधमूर्छितः पतंगवृत्तिमास्थाय फाल्गुनं योद्धुमिच्छति
यावन्नः पश्यमानानां प्राणान्पार्थेन संगतः न जह्यात्पुरुषव्याघ्रस्तावद्वारय कौरवं यावत्फाल्गुनबाणानां गोचरं नाधिगच्छति कौरवः पार्थिवो वीर
स्तावद्वारय संयुगे यावत्पार्थशरैर्घोरैर्निर्मुक्तोरगसन्निभैः न भस्मीक्रियते राजा तावद्युद्धान्निवार्यतां अयुक्तमिव पश्यामि तिष्ठत्स्वस्मासु मानद स्वयं फ ५

द्रो॰प युद्धायपद्यात्मापार्थपासमहायवान दुर्लभंजीवितंमन्येकौरवस्यकिरीटिना युध्यमानस्यपार्थेनशार्दूलेनेवहस्तिनः मातुलेनैवमुक्तस्तेद्रो
१८५४ णाःशस्त्रभृतांवरः दुर्योधनमिदंवाक्यंत्वरितःसमभाषत मयिजीवतिनांधारेनयुद्धंगंतुमर्हसि ~~मामनादृत्यपार्थेनशार्दूलेनेवहस्तिनः मातु~~
~~लेनैवमुक्तस्तेद्रोणाः~~ शस्त्रभृतांवरः दुर्योधनमिदंवाक्यंत्वरितःसमभाषत ~~मयिजीवतिनांधारेनयुद्धंगंतुमर्हसि~~ मामनादृत्यकौरव्यतववनिस्
चित्रांनहितेष हितेसंभ्रमःकार्यःपार्थस्यविजयंप्रति अहमावारयिष्यामिपार्थंतिष्ठसुयोधन दुर्योधनउ॰ आचार्यःपांडुपुत्रान्वैपुत्रवत्परिरक्षति त्वमप्युपेक्षां
कुरुषेतेषुनित्यंद्विजोत्तम ममत्वमंदभाग्यत्वान्मंदस्तेविक्रमोयुधि धर्मराजप्रियार्थंवाद्रौपद्यावानवियनत धिगस्तुममलुब्धस्ययेनसर्वेवांध
वाः सुखार्हाःपरंदुःखंत्वंप्राप्नुवंसपराजिताः कोहिशस्त्रविदांमुख्योमहेष्वाससमोयुधि शत्रुन्नक्षपयेत्क्रोधोनस्याद्गौतमीसुतः अश्वत्थामन्नसोर
त्वन्मशयैतान्समाहितान् नवाद्येगोचेशक्ताःस्तान्देवानदानवाः पांचालान्सोमकांश्चैवजहिद्रोणमहानुगान् वयंशेषान्हनिष्यामस्त्वयैव
परिरक्षिताः एतेहिसोमकाविप्रपांचालाश्चयशस्विनः ममसैन्येषुसंक्रुद्धाविचरंतिदवाग्निवत् तान्वारयमहाबाहोकेकयांश्चनरोत्तम पुरुकु
र्वंतिनिःशेषांरक्ष्यमाणाःकिरीटिना अश्वत्थामंस्त्वरयुक्तोयाहिशीघ्रमरिंदम आद्यैवायदिवापश्चात्तवेदंकर्म्ममारिष त्वमुत्पन्नोमहाबाहोपां
चालानांवधंप्रति करिष्यसिजगत्सर्वंमपांचामपांचालंकिलाप्युत एवंसिद्धाब्रुवन्वाचोभविष्यतितत्तथा तस्मात्त्वंपुरुषव्याघ्रपांचालान्जहि ८।४
सानुगान् नतेस्तगोचेशक्ताःस्यात्देवाःसवासवाः। किमुपार्थाःसपांचालाःसत्यमेतद्ब्रवीमिते नत्वांसमर्थाःसंग्रामेपांडवाःसहसोमकैः
वलाद्योधयितुंवीरसत्यमेतद्ब्रवीमिते गच्छगच्छमहावाहोनतःकालात्ययोभवेत इयंहिद्रवतेसेनापार्थसायकतापिता शक्तोह्यसिमहावा
होरक्षितुंतेजसा निग्रहेपांडुपुत्राणांपांचालानांचमानद द्रोणपर्वणित्रिपुढे संजयउवाच दुर्योधनेनैवमुक्तोद्रौणिराहवदुर्म्मदः सत्य रम॰
११०५

वाचमहाबाहुस्तवपुत्रमिदंवचः सस्मेमन्नमहाबाहोयथावदसिकौरव प्रियाह्मिपांडवानित्यंममचापिपितुस्तुमे नत्वेवावांप्रियोतेषांनरयुद्धेकुरुद्व
ह शक्तितस्तात्पुद्धावस्सत्कामाणानभीनवत अहंकर्णाश्चशल्यश्चकृपोहार्दिक्यएवच निमेषासांडवींसेनांक्षपयेमनरपोत्तम तेचापिकौर
वींसेनांनिमेषार्द्धात्कुरूद्वह क्षपयेयुर्महाबाहोनस्यामपरिसंयुगे युध्यतांपांडवांस्तुत्वान्तेषांवास्मान्युपुत्सतां तेजस्तेजःसमासाद्यप्रशममेयातिभा
रत अशक्यंतरसाजेतुंपांडवानामनीकिनी जीवत्सपांडुपुत्रेषुतेह्मिसत्यंब्रवीमिते आत्मानंयुध्यमानास्तेसमर्थाःपांडुनंदनाः किमर्थंतवसैन्या
निनहनिष्यंतिभारत तेरूत्युक्त्वातमोराजन्विरूक्तनितस्युकौरवः सर्वाभिमानीशंकोचनतोस्मानभिशंकसे मन्येत्वंकुत्सितोराजन्पापात्मापाप
पूरुषः अस्मानपिस्तनःक्रुद्धःशंकसेपायभावितः अहंत्वयत्नमास्थायत्वदर्थेसत्यजीवितः एषगच्छामिसंग्रामेत्वत्कृतेकुरुसत्तम योत्स्येहंशत्रुभिः
सार्द्धंहनिष्यामिचवाहनान पांचालैःसहयोत्स्यामिसोमकैःकैकयैस्तथा पांडवैयेश्चसंग्रामेत्वत्प्रियार्थमरिंदम अद्यमद्बाणनिर्दग्धाःपांचालाः
सोमकास्तथा सिंहेनेवार्दितानागाविद्रविष्यंतिसर्वशः अद्यधर्मसुतोराजादृष्ट्वाममपराक्रमं अमपश्यामस्यलोकंमन्येतसहसोमकैः आ
गमिष्यतिनिर्वेदंधर्मपुत्रोयुधिष्ठिरः दृष्ट्वाविनिहतान्संख्येपांचालान्सोमकैःसह येमांयुद्धेभियोत्स्यंतितान्हनिष्यामिभारत नहितेवीरमोक्ष्यं
तेमद्बाहृत्तरमागताः एवमुक्त्वामहाबाहुःपुत्रंदुर्योधनंतव अभ्यवर्तत्युद्धायत्रासयन्सर्वधन्विनः चिकीर्षुस्तवपुत्राणांप्रियंप्राणाभृतांवरः त
तोब्रवीत्सकैकेयान्पांचालान्गौतमीसुतः प्रहरध्वमितःसर्वेममगात्रेमहारथाः स्थिराभूतास्युध्यध्वंदर्शयंतोस्त्रलाघवं एवमुक्तास्तेसर्वेशस्त्र सु२
वृष्टीमपातयन द्रौणिंप्रतिमहाराजजलंजलधराइव तान्निहत्यशरान्द्रौणिर्दशवीरानपोथयत प्रमुखेपांडुपुत्राणांधृष्टद्युम्नस्यचप्रभो तेहन्य
मानाःसमरेपांचालाःसृंजयास्तथा परित्यज्यरणेद्रौणिंव्यद्रवंतदिशोदश तान्दृष्ट्वाद्रवतःशूरान्पांचालान्सहसोमकान धृष्टद्युम्नोमहाराजद्रौ

णिमभ्यद्रवद्रणे ततः कांचनचित्राणां सजलांबुदनादिनां हतः शतेन शूराणां रथानामनिवर्त्तिनां पुत्रः पांचालराजस्य धृष्टद्युम्नो महारथः द्रौणिमभ्यद्र
वीद्वाक्यं दृष्ट्वा योधान्निपातितान आचार्यपुत्र दुर्बुद्धे किमन्यैर्निहतैस्तव समागच्छ मया सार्द्धं यदि शूरोसि संयुगे अहं त्वां निहनिष्यामि तिष्ठेदानीं ममाग्रतः त
तस्तमाचार्य्यसुतं धृष्टद्युम्नः प्रतापवान मर्म्मभिद्भिः शरैस्तीक्ष्णैर्ज्जघान भरतर्षभ ते तु पंक्तीकृता द्रौणिं शरा विविधुराशुगाः रुक्मपुंखाः प्रसन्नाग्राः सर्वकायावद
रणाः मध्वर्थिन इवोद्दामा भ्रमराः पुष्पितं द्रुमं सोतिविद्धो भृशं क्रुद्धः पदाक्रान्त इवोरगः मानी द्रौणिरसंभ्रान्तो बाणपाणिरभाषत धृष्टद्युम्न स्थिरो भूत्वा मुहूर्त्तं प्र
तिपालय यावत्त्वां निशितैर्बाणैः प्रेषयामि यमक्षयं द्रौणिरेवमथाभाष्य पार्षतं परवीरहा छादयामास बाणौघैः समन्ताल्लघुहस्तवत सच्छाद्यमानः सम
रे द्रौणिना युद्धदुर्म्मदः द्रौणिं पांचालतनयो वाग्भिरातर्ज्जयत्तदा न जानीषे प्रतिज्ञां मे विप्रोत्पत्तिं तथैव च द्रोणं हत्वा किल मया हन्तव्यस्त्वं सुदुर्म्मते ततस्त्वाहं न
हन्म्यद्य द्रोणे जीवति संयुगे इमां तु रजनीं प्राप्तामप्रभातां सुदुर्म्मते निहत्य पितरं तेद्य ततस्त्वामपि संयुगे नेष्यामि प्रेतलोकाय एतन्मे मनसि स्थितं यत्ते पा
र्थेषु विद्वेषो या भक्तिः कौरवेषु च तां दर्शय स्थिरो भूत्वा न मे जीवन्विमोक्ष्यसे यो हि ब्राह्मण्यमुत्सृज्य क्षत्रधर्मरतो द्विजः स वध्यः सर्वलोकस्य यथा त्वं पुरुषा
धमः इत्युक्तः परुषं वाक्यं पार्षतेन द्विजोत्तमः क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत निर्द्दहन्निव चक्षुर्भ्यां पार्षतं सोभ्यवेक्षत छादयामास च शरैर्निःश्वसन
पन्नगो यथा सच्छाद्यमानः समरे द्रौणिना राजसत्तम सर्वपांचालसेनाभिः संवृतो रथसत्तमः नाकंपत महाबाहुः स्ववीर्यं समुपाश्रितः सायकांश्चैव विविधा
नश्वत्थाम्नि मुमोच ह तौ पुनः संन्यवर्त्तेतां प्राणद्यूतपरावुभौ निवारयन्तौ बाणौघैः परस्परममर्षिणौ उत्सृजन्तौ महेष्वासौ शरवृष्टीः समन्ततः द्रौणिपा
र्षतयोर्युद्धं घोररूपं भयानकं दृष्ट्वा संपूजयामासुः सिद्धचारणवातिकाः शरौघैः पूरयन्तौ तावाकाशं सदिशस्तथा अलक्ष्यौ समपद्येतां सह कृत्वा शरै
स्तमः नृत्यमानाविव रणे मंडलीकृतकार्मुकौ परस्परवधे यत्तौ परस्परजयैषिणौ अयुध्येतां महाबाहू चित्रं लघु च सुष्ठु च संपूज्यमानौ समरे योधमुख्यैः स

हतश्च ते प्रयुद्धौ रणे दृष्ट्वा वने वन्यौ गजाविव उभयोः सेनयोर्हर्षस्तुमुलः समपद्यत सिंहनादरवाश्चासन्दध्मुः शंखांश्च मारिष वादित्राण्यवादयन्त शतशो
ऽथ सहस्रशः तस्मिन्सुतुमुले युद्धे भीरूणां भयवर्द्धने मुहूर्तमपि तद्युद्धं समरूपं तदाभवत् ततो द्रौणिर्महाराज पार्षतस्य महात्मनः ध्वजं धनुस्तथा छत्रमुभौ
च पार्ष्णिसारथी सूतमश्वांश्च चतुरो निहत्याभ्यद्रवद्रणे पांचालांश्चैव तान्सर्वान्बाणैः सन्नतपर्वभिः व्यद्रावयदमेयात्मा शतशोऽथ सहस्रशः ततस्तु विव्यथे से
ना पांडवी भरतर्षभ दृष्ट्वा द्रौणेर्महत्कर्म वासवस्येव संयुगे शतेन च शतं हत्वा पांचालानां महारथः त्रिभिश्च निशितैर्बाणैर्हत्वा त्रीन्सुमहारथान् द्रौणिर्द्रुपदपुत्रस्य
फाल्गुनस्य च पश्यतः नाशयामास पांचालान्भूयिष्ठं ये व्यवस्थिताः ते वध्यमानाः पांचालैः समरे सहसृंजयैः अगच्छन्द्रौणिमुत्सृज्य विप्रकीर्णरथध्वजाः स
जित्वा समरे शत्रून्द्रोणपुत्रो महारथः ननाद सुमहानादं तपान्ते जलदो यथा स निहत्य बहूञ्छूरानश्वत्थामा व्यरोचत युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः
सम्पूज्यमानो युधि कौरवेयैर्विजित्य संख्ये रिपुगणान्सहस्रशः व्यरोचत द्रोणसुतः प्रतापवान्यथा महेन्द्रोऽरिगणान्निहत्य ह इति द्रोणपर्वणि त्रिषष्टे ॥ सं
जय उवाच ततो युधिष्ठिरश्चैव भीमसेनश्च पांडवः द्रोणपुत्रं महाराज समन्तात्पर्यवारयन् ततो दुर्योधनो राजा भारद्वाजेन संवृतः अभ्ययात्पांडवान्संख्ये त
तो युद्धमवर्तत घोररूपं महाराज भीरूणां भयवर्द्धनं अम्बष्ठान्मालवान्वंगाञ्छिबींस्त्रैगर्तकानपि प्राहिणोन्मृत्युलोकाय गणान्क्रुद्धो युधिष्ठिरः अभीषा
हान्शूरसेनांश्च क्षत्रियान्युद्धदुर्मदान् निकृत्य पृथिवीं चक्रे भीमः शोणितकर्दमां यौधेयानट्टरान्राजन्मद्रकान्मालवानपि प्राहिणोन्मृत्युलोकाय किरी
टी निशितैः शरैः प्रगाढमञ्जोगतिभिर्नाराचैरभिताडिताः निपेतुर्द्विरदा भूमौ द्विशृंगा इव पर्वताः निकृत्तैर्हस्तिहस्तैश्च चेष्टमानैस्ततस्ततः राजवसुधाकीर्णा
विसर्पद्भिरिवोरगैः क्षिप्तैः कनकचित्रैश्च नृपच्छत्रैः क्षितिर्बभौ द्यौरिवादित्यचंद्राद्यैर्ग्रहैः कीर्णा युगक्षये हत प्रहरताभीता विध्यत व्यवकृन्तत इत्यासीत्सुमहा
ञ्छब्दः शोणाश्वस्य रथं प्रति द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण संयुगे व्यधमत्तान्महाबाहुर्मेघानिव दुरत्ययः ते हन्यमाना द्रोणेन पांचालाः प्राद्रवन्भयात्

पश्यतो भीमसेनस्य पार्थस्य च महात्मनः ततः किरीटी भीमश्च सहसा तमभ्यवर्ततां महता रथवंशेन परिगृह्य बलं महत् बीभत्सुर्द्रौणिं पार्श्वमुत्तरं त
वृकोदरः भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षतां तौ तथा संजयाश्चैव पांचालाश्च महौजसः अन्वगच्छन्महाराज योधा वारयितुं तदा सा पांडुपुत्रस्य श
रैर्वार्यमाणा महाचमूः तमसा संवृते लोके द्रवत्सर्वतो मुखी उत्सृज्य भाति सेनां हन्यमाना किरीटिना तमसा निद्रया चैव पुनरेव महीपते द्रोणेन वा
र्यमाणास्त्वयं तव सुतेन च नाशक्यंत महाराज योधा वारयितुं तदा सा पांडुपुत्रस्य शरैर्दार्यमाणा महाचमूः तमसा संवृते लोके अद्रवत्सर्वतो मुखी
उत्सृज्य शतशो वाहांस्तत्र केचिन्नराधिपाः प्राद्रवंत महाराज भयाविष्टाः समंततः इति द्रोणपर्वणि रात्रियुद्धे संजय उवाच सोमदत्तं तु संप्रेक्ष्य विधुन्वा
नं महद्धनुः सात्यकिः प्राह यंतारं सोमदत्ताय मां वह न ह्यहत्वा रणे शत्रुं बाह्लीकं कौरवाधमं निवर्तिष्ये रणात्सूत सत्यमेतद्वचो मम ततः संप्रेषयद्यंता सैं
धवांस्तान्मनोजवान् तुरगान्शंखवर्णान् सर्वशब्दातिगान् रणे तेऽवहन्युयुधानं तु मनो मारुतरंहसः यथेंद्रं हरयो राजन्पुरा दैत्यवधोद्यतं तमा
पतंतं संप्रेक्ष्य सात्वतं रभसं रणे सोमदत्तो महाबाहुरसंभ्रांतो न्यवर्तत विमुंचन्शरवर्षाणि पर्जन्य इव वृष्टिमान् छादयामास शैनेयं जलदं भास्करं यथा
असंभ्रांतश्च समरे सात्यकिः कुरुपुंगव छादयामास बाणौघैः समंताद्भरतर्षभ सोमदत्तस्तु तं षष्ट्या विव्याधोरसि माधवं सात्यकिश्चापि तं राजन्नविध्य
त्सायकैः शितैः तावन्योन्यं शरैः कृत्तौ व्यराजेतां नरर्षभौ सुपुष्पौ पुष्पसमये पुष्पिताविव किंशुकौ रुधिरोक्षितसर्वांगौ कुरुवृष्णियशस्करौ परस्परम
वेक्षेतां दहंताविव लोचनैः रथमंडलमार्गेषु चरंतावरिमर्दनौ घोररूपौ हि तावास्तां वृष्टिमंताविवांबुदौ शरसंभिन्नगात्रौ तौ सर्वतः शकलीकृतौ श्वा
विधाविव राजेंद्र दृश्येतां शरविक्षतौ सुवर्णपुंखैरिषुभिराचितौ तौ व्यराजतां खद्योतैरावृतौ राजन्प्रावृषीव वनस्पती संप्रदीपितसर्वांगौ सायकैस्तैर्म
हारथौ अदृश्येतां रणे क्रुद्धावुल्काभिरिव कुंजरौ ततो युधि महाराज सोमदत्तो महारथः अर्धचंद्रेण चिच्छेद माधवस्य महद्धनुः अथैनं पंचविंश

शत्या सायकानां समार्पयत् त्वरमाणस्तत्कालेन पुनर्दशभिः शरैः अथान्यद्धनुरादाय सात्यकिर्वेगवत्तरं पंचभिः सायकैस्तूर्णं सोमदत्तमवि
ध्यत ततोपरेण भल्लेन ध्वजं चिच्छेद कांचनं बाह्लिकं तु रणे राजन् सात्यकिः प्रहसन्निव सोमदत्तस्त्वसंभ्रान्तो दृष्ट्वा केतुं निपातितं शैनेयं पंचवि
शत्या सायकानां समाचिनोत् सात्वतोपि रणे क्रुद्धः सोमदत्तस्य धन्विनः धनुश्चिच्छेद समरे क्षुरप्रेण शितेन ह अथैनं रुक्मपुंखानां शतेन नतपर्व
णां आचिनोद्बहुधा राजन् भग्नदंष्ट्रमिव द्विपं अथान्यद्धनुरादाय सोमदत्तो महारथः सात्यकिं छादयामास शरवृष्ट्या महाबलः सोमदत्तं ततः क्रुद्धो र
णे विव्याध सात्यकिः सात्यकिं शरजालेन सोमदत्तोप्यपीडयत् दशभिः सात्वतस्यार्थे भीमोऽहनद्बाह्लिकात्मजं सोमदत्तोप्यसंभ्रान्तः शैनेयमवधी
च्छरैः ततस्तु सात्वतस्यार्थे भीमसेनो नवं दृढं मुमोच परिघं घोरं सोमदत्तस्य वक्षसि तमापतंतं वेगेन परिघं घोरदर्शनं द्विधा चिच्छेद समरे प्रहस
न्निव कौरवः स पपात द्विधा छिन्न आयसः परिघो महान् महीधरस्येव महच्छिखरं वज्रदारितं ततस्तु सात्यकी राजन् सोमदत्तस्य संयुगे धनुश्चिच्छे
द भल्लेन हस्तावापं च पंचभिः चतुर्भिश्च तथा बाणैस्तांश्चतुरस्तुरगोत्तमान् समीपं प्रेषयामास प्रेतराजस्य भारत सारथेश्च शिरः कायाद्भल्लेन नतपर्वणा
जहार शिनिशार्दूलः प्रहसञ्छिनिपुंगवः ततः शरं महाघोरं ज्वलंतमिव पावकं मुमोच सात्वतो राजन् स्वर्णपुंखं शिलाशितं स विमुक्तो बलवता शैनेये
न शरोत्तमः घोरस्तस्योरसि विभो निपपाताशु भारत सोतिविद्धो महाराज सात्वतेन महारथः सोमदत्तो महाबाहुर्निपपात ममार च तं दृष्ट्वा नि
हतं तत्र सोमदत्तं महारथाः महता शरवर्षेण युयुधानमुपाद्रवन् छाद्यमानं शरैर्दृष्ट्वा युयुधानं युधिष्ठिरः महत्या सेनया सार्द्धं द्रोणानीकमुपाद्रव
त् ततो युधिष्ठिरः क्रुद्धस्तावकानां महाबलं शरैर्विद्रावयामास भारद्वाजस्य पश्यतः सैन्यानि द्रावयंतं तु द्रोणो दृष्ट्वा युधिष्ठिरं अभिदुद्राव वेगेन
क्रोधसंरक्तलोचनः ततः सुनिशितैर्बाणैः पार्थं विव्याध सप्तभिः युधिष्ठिरोपि संक्रुद्धः प्रतिविव्याध पंचभिः सोतिविद्धो महाबाहुः सृक्किणी परिसंलि

द्रो॰ प
१९८

घि१

हन युधिष्ठिरस्यापि छित्वा ध्वजं कार्मुकमेव च स विधन्वा विरथश्चैव कालेनैवोत्तमः अन्यदादत्त वेगेन कार्मुकं समरे दृढं ततः शरसहस्रेण द्रोणं विव्या
ध पार्थिवः साश्वसूतध्वजरथं तदद्भुतमिवाभवत् ततो मुहूर्तं व्यथितः शरघातप्रपीडितः निषसाद रथोपस्थे द्रोणो भरतसत्तम प्रतिलभ्य ततः संज्ञां
मुहूर्ताद्द्विजसत्तमः क्रोधेन महताविष्टो वायव्यमस्त्र मवासृजत् असंभ्रान्तस्ततः पार्थो धनुराकृष्य वीर्यवान् ततस्तदस्त्रमस्त्रेण स्तंभया
मास भारत ततोऽब्रवीद्वासुदेवः कुन्तीपुत्रं युधिष्ठिरं युधिष्ठिर महाबाहो यत्त्वां वक्ष्यामि तच्छृणु उपारमस्व युद्धाय द्रोणाद्भरतसत्तम गृध्यते हि सदा द्रो
णस्त्वद्ग्रहणे त्वत्संयुगे नानुरूपमहं मन्ये युद्धमस्य त्वया सह योऽस्य सृष्टो विनाशाय स एनं श्वो हनिष्यति परिवर्ज्य गुरुं याहि यत्र राजा सुयोधनः राज्ञा
राज्ञा हि योद्धुमीनाराज्ञा युद्धमिष्यते तत्र त्वं गच्छ कौन्तेय हस्त्यश्वरथसंवृतः यावन्मात्रेण च मया सहायेन धनंजयः भीमश्च रथशार्दूलो युध्यते कौरवैः
सह वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः मुहूर्तं चिन्तयित्वा तु ततो दारुणमाहवे प्रायाद्द्रुतममित्रघ्नो यत्र भीमो व्यवस्थितः विनिघ्नंस्तावका
न्योधान्व्यादितास्य इवान्तकः रथघोषेण महता नादयन्वसुधातलं पर्जन्य इव घर्मान्ते नादयन्वै दिशो दश भीमस्य निघ्नतः शत्रून्पार्ष्णिं जग्राह
पाण्डवः द्रोणोऽपि पाण्डुपाञ्चालान्व्यधमद्रजनीमुखे द्रोणपर्वणि रात्रियुद्धे संजय उवाच वर्तमाने तथा युद्धे घोररूपे भयावहे तमसा संवृते लोके र
जसा च महीपते नापश्यन्त रणे योधाः परस्परमवस्थिताः अनुमानेन संज्ञाभिर्युद्धं तद्ववृते महत् नरनागाश्वमथनं परमं रोमहर्षणं द्रोणकर्ण
कृपा वीरा भीमपार्षतसात्यकाः अन्योन्यं क्षोभयामासुः सैन्यानि नृपसत्तम वध्यमानानि सैन्यानि समन्ततो महारथैः तमसा रजसा चैव समन्ताद्वि
प्रदुद्रुवुः ते सर्वतो विद्रवन्तो योधा वित्रस्तचेतनाः अहन्यन्त महाराज धावमानाश्च संयुगे महारथसहस्राणि जघ्नुरन्योन्यमाहवे अन्धे तमसि मूढा
नि पुत्रस्य तव मन्त्रिते ततः सर्वाणि सैन्यानि सेनागोपाश्च भारत व्यमुह्यन्त रणे तत्र तमसा संवृते तथा धृतराष्ट्र उवाच तेषां संलोड्यमानानां पाण्डवैर्नि एम
१९८

स१

हैतो जनस्यास्य धतमसि मग्नानामासीत्कावो गतिस्तदा कथं प्रकाशस्तेषां वा मम सैन्यस्य वा पुनः बभूव लोके तमसा तथा संजय संयुगे संजय उवाच ततः
सर्वाणि सैन्यानि हतशिष्टानि यानि वै सेनागोप्तॄनथादिश्य पुनर्व्यूहमकल्पयत् द्रोणः पुरस्ताज्जघने तु शल्यस्तथा द्रौणिः पार्श्वतः सौबलश्च स्वयं तु स
र्वाणि बलानि राजन्राजाभ्ययात्पाण्डवान्वै निशायां उवाच सर्वांश्च पदातिसंघान्दुर्योधनः पार्थिव सान्त्वपूर्वं उत्सृज्य सर्वे परमायुधानि गृह्णीत हस्तैर्ज्वलिता
न्प्रदीपान् ते चोदिताः पार्थिवसत्तमेन ततः प्रहृष्टा जगृहुः प्रदीपान् देवर्षिगन्धर्वसुरर्षिसंघा विद्याधराश्चाप्सरसां गणाश्च नागाः सयक्षोरगकिंनराश्च हृ
ष्टा दिविस्था जगृहुः प्रदीपान् दिग्भ्यश्च तेभ्यश्च समापतन्तो दृश्यन्त दीपाः सुगन्धितैलाः विशेषतो नारदपर्वताभ्यां संबोध्यमानाः कुरुपाण्डवार्थं सा भूय एव
ध्वजिनी विभक्ता व्यरोचताग्निप्रभया निशायां महाधनैराभरणैश्च दिव्यैः शस्त्रैः प्रदीप्तैरभिसंपतद्भिः रथे रथे पञ्च विदीपिकास्तु प्रदीपिका मत्तगजे त्रयश्च प्र
त्यश्वमेकश्च महाप्रदीपः कृतास्तु ताः पाण्डवैः कौरवेयैः क्षणेन सर्वे विहिताः प्रदीपाः प्रदीपयन्तश्च ध्वजिनीं तवाशु सर्वास्तु सेना व्यतिसेव्यमानाः पदातिभिः
पावकतैलहस्तैः प्रकाशमाना ददृशुर्निशायां यथान्तरिक्षे जलदास्तडिद्भिः प्रकाशितायां तु तथा ध्वजिन्यां द्रोणोऽग्निकल्पः प्रतपन्समन्तात् राजन्नरेन्द्र
सुवर्णवर्मा मध्यंगतः सूर्य इवांशुमाली जाम्बूनदेष्वाभरणेषु चैव निष्केषु शुद्धेषु शरासनेषु पीतेषु शस्त्रेषु च पावकस्य प्रतिप्रभास्तत्र ततो बभूवुः गदाश्च शै
क्याः परिघाश्च शुभ्रा रथेषु शक्त्यश्च विवर्तमानाः प्रतिप्रभा रश्मिभिराजमीढ पुनः पुनः संजनयन्ति दीपाः छत्राणि बालव्यजनानि खड्गा दीप्ता महोल्काश्च त
थैव राजन् व्याघूर्णमानाश्च सुवर्णमाला व्यायच्छतां तत्र तदा विरेजुः शस्त्रप्रभाभिश्च विराजमाना दीपप्रभाभिश्च तदा बलं तत् प्रकाशितं चाभरणप्र
भाभिर्भृशं प्रकाशं नृपते बभूव पीतानि शस्त्राण्यसृगुक्षितानि वीरावधूतानि तनुत्रदाणि दीप्तां प्रभां प्राजनयन्त तत्र तपात्यये विद्युदिवान्तरिक्षे प्रकं
पितानामभिघातवेगैरभिघ्नतां चापततां जवेन वक्त्राण्यशोभन्त तदा नराणां वाय्वीरितानीव महाम्बुजानि महावने दाव इव प्रदीप्ते यथा प्रभा भास्कर

भ२

स्थापितस्तत्र तथा तदासीत्ध्वजिनी प्रदीप्ता महाभया भारत भीमरूपा ततः संप्रदीप्तं बलमस्य दीप्तं निशाम्य पार्थास्त्वरितास्तथैव सर्वेषु सैन्येषु पदा
१०।ए तिसंघानचोदयंस्तेपि चक्रुः प्रदीपान् गजे गजे सप्त कृताः प्रदीपा रथे रथे चैव दश प्रदीपाः द्वावश्वपृष्ठे परिपार्श्वतोन्ये ध्वजेषु चान्ये सेनासु सर्वासु च पार्श्व जद२
तोन्ये पश्चात्पुरस्ताच्च समंततश्च मध्ये तथान्ये ज्वलिताग्निहस्ता अदीपयन्पांडुसुतस्य सेनां मध्ये तथान्ये ज्वलिताग्निहस्ताः सेनाद्वयेपि स्म नरा विचेरुः
सर्वेषु सैन्येषु पदातिसंघा विमिश्रिता हस्तिरथाश्ववृंदैः अदीपयंस्ते ध्वजिनीं प्रदीप्तां तथा बलं पांडवपाभिगुप्तं तेन प्रदीपेन तथा प्रदीप्तं बलं तवासीद्बलव
द्बलेन भाः कुर्वता भानुमता ग्रहेण दिवाकरेणाग्निरिवाभिगुप्तः तयोः प्रभाः पृथिवीमंतरिक्षं सर्वा अतिक्रम्य दिशश्च वृद्धाः तेन प्रकाशेन भृशं प्रकाश
शं बभूव तेषां तव चैव सैन्ये तेन प्रकाशेन दिवंगमेन संबोधिता देवगणाश्च राजन् गंधर्वयक्षासुरसिद्धसंघाः समागमन्नप्सरसश्च सर्वाः तद्देवगंधर्वसमाकु
लं च यक्षासुरोद्गाप्सरसां गणैश्च हतैश्च वीरैर्दिवमारुहद्भिरायोधनं दिव्यकल्पं बभूव रथाश्वनागाकुलदीपदीप्तं संरब्धयोधं हतविद्रुताश्वं महद्बलं व्यूहरथा
श्वनागं सुरासुरव्यूहसमं बभूव तच्छक्तिसंघाकुलचंडवातं महारथाभ्रं गजवाजिघोषं शस्त्रौघवर्षं रुधिरांबुधारं निशि प्रवृत्तं रणदुर्दिनं तत्र तस्मिन्महाग्नि
प्रतिमो महात्मा संतापयन्पांडवान्विप्रमुख्यः गभस्तिभिर्मध्यगतो यथार्को वर्षात्यये तद्वदभून्नरेंद्र ॥ द्रोणपर्वणि रात्रियुद्धे ॥ संजय उवाच ॥ प्रकाशि
ते तदा लोके रजसा तमसावृते समाजग्मुरथो वीराः परस्परवधैषिणः ते समेताः रणे राजञ्शस्त्रप्रासासिधारिणः परस्परमुदैक्षंत परस्परकृतागसः प
दीपानां सहस्रैश्च दीप्यमानैः समंततः स्वर्णचित्रैः सुगंधैश्च गंधतैलावसिक्तैः देवगंधर्वदीपाद्यैः प्रभाभिरधिकोज्ज्वलैः विराजत तदा भूमिर्ग्रहैर्द्यौरिव भा
रत उल्काशतैः प्रज्वलितै रणभूमिर्व्यराजत दह्यमानेव लोकानामभावे च वसुंधरा प्रदीप्यंत दिशः सर्वाः प्रदीपैस्तैः समंततः वर्षाप्रदोषे खद्योतैर्वृ राम
ता वृक्षा इवाबभुः असज्जंत ततो वीरा वीरेष्वेव पृथक्पृथक् नागा नागैः समाजग्मुस्तुरगाः सह वाजिभिः रथा रथवरैरेव समाजग्मुर्मुदान्विताः तस्मि

१०।ए

१०

त्वाद्विमखेवेयोरेतव पुत्रस्य शासनात् चतुरंगस्य सैन्यस्य सेनापतिस्त्वमहानभूत् ततोऽर्जुनो महाराज कौरवाणामनीकिनीं प्रथमस्यायायुक्तःप्रप
पन्नर्वपार्थिवान् धृतराष्ट्र उवाच तस्मिन्नभिविषेचैममपुत्रस्य वाहिनीं अप्रमत्तमा तो दृष्ट्वा कथमासीन्मनो हिवः किमकुर्वत सैन्यानि प्रविविक्षपर
पांडवे दुर्योधनस्य किं कि संग्रामकालममम्नत केचैनं समरे वीरं प्रत्यघ्नु हिमाः द्रोणं च केऽभ्यरक्षंस्तं प्रविशंतं चनवाहिने कास्तं दक्षिणं चक्रं केच
द्रोणस्य सव्यतः केऽपृष्ठतस्त्वाथ भवन्वीरान्वीरान्विनिघ्नतः केषुस्ता राष्ठेतनिघ्नतःशात्रवाद्रणे यत्नाविशेमहेष्वासः पांचालानपराजितः न
सन्निवनायाघ्रोत्थमार्गेषु वीर्यवान् यो दहन्निव शोरैर्णः पांचालानां पृथग्ञान् धूमकेतुरिवक्रुद्धः कथंमत्युरुपेयिवान् अव्यग्रानेव हि यानकथयस
पराजितान् हष्ठात्रशैर्ण संग्रामेन तथा हतममामकान् हतांश्चैव विह्रीर्णांश्च विप्रकीर्णांश्च शंससि रथिनो विरथांश्चैव कृतान्युद्धेषु मामकान्
संजय उवाच द्रोणस्य मतमाज्ञाय योद्धुकामस्य तां निशां दुर्योधनो महाराज वश्यात्मानमुवाच ह विकर्णं चित्रसेनं च महाबाहुं च कौरवं दुर्हदीर्
घबाहुं चेत्येवं चैनं बांपदानुगाः द्रोणं यत्ताः पराक्रांतामेवेशक्ततपष्ठतः हार्दिक्यो दक्षिणं चक्रं शल्यश्चैवोत्तरं तथा त्रिगर्तानां च ये शूरा हतशिष्टा महार
थाः तांश्चैव पुरतः सर्वान्पुत्रस्ते समचोदयत् आचार्यो हि सुसंयत्तो भृशं यत्ताश्च पांडवाः तं रक्षत सुसंयत्ता निघ्नंतं शात्रवान्रणे द्रोणो हि बलवा
न्युद्धे क्षिप्रहस्तः प्रतापवान् निर्जयेत्रिदशान्युद्धे किमु पार्थान्ससोमकान् ते यूयं सहिताः सर्वे भृशं यत्ता महारथाः द्रोणं रक्षत पांचालाद्धृष्टद्यु
म्नान्महारथात् पांडवेयेषु सैन्येषु न तं पश्याम कंचन यो योधयेद्रणे द्रोणं धृष्टद्युम्नादृते नृप तस्मात्सर्वात्मना मन्ये भारद्वाजस्य रक्षणं सगुप्तः
पांडवान्हन्यात्संजयांश्च ससोमकान् संजयेषु च सर्वेषु निहतेषु चमूमुखे धृष्टद्युम्नं रणे द्रोणो हनिष्यति न संशयः तथार्जुनं च राधेयो हनिष्य
ति महारथः भीमसेनमहं चापि युद्धे जेष्यामि दीक्षितः शेषांश्च पांडवान्योधाः प्रसभं हीनतेजसः सोऽयं मम जयो व्यक्तो दीर्घकालं भविष्यति तस्मा

द्रो: १००

दृश्यतसंग्रामेद्रोणमेवमहारथं दृष्ट्वाभारतश्रेष्ठपुत्रोदुर्योधनस्तव आश्विनेयानथाश्वेत्यंतमभिस्तमभिद्रावतो ततःप्रवृत्तेयुद्धंरौद्रोभारतसत्तम
उभयोःसेनयोर्घोरंपरस्परजिगीषया अर्जुनःकौरवंसैन्यमर्जुनंचापिकौरवाः नानाशस्त्रसमावापैरन्योन्यमपीडयन द्रोणिःपांचाल्यराजंचमा
हाराजश्वसृंजयान छादयांचक्रिरेसंख्येशरैःसन्नतपर्वभिः पांडुपांचालसैन्यानांकौरवाणांचभारत आसीत्त्रिशंकुघोरोऽनिघ्नतामितरेतरं नै
वास्माभिस्तथापूर्वैर्दृष्टपूर्वंनतथाविधं श्रुतंवापादृशंयुद्धंपुरुमासीत्सुदारुणंभयानकं ॥ द्रोणपर्वणित्रिपुष्टे ॥ संजयउवाच वर्तमानेतदारौद्रे
त्रिपुष्टेविशांपते सर्वभूतक्षयकरोधर्मपुत्रोयुधिष्ठिरः अब्रवीत्पांडवांश्चैवपांचालांश्चैवसोमकान मनुष्याश्वनागानामभावेनराधिप युधिष्ठिरो ९५
ब्रवीद्राजास्वानयोधान्मनुजाधिप अभिद्रवतसंयातद्रोणमेवजिघांसया एतस्तेवचनाद्राजन्पांचालाःसृंजयास्तथा द्रोणमेवाभ्यवर्तंत
नदंतोभैरवान्नादान तेतस्तंप्रतिगर्जंतःससघाताःसमर्थिनाः यथाशक्तियथोत्साहंयथासत्वंचसंयुगे कृतवर्माततोहार्दिक्योयुधिष्ठिरमुपाद्रवत
द्रोणंप्रतिसमायांतंमत्तोमत्तमिवद्विपं शैनेयंशरवर्षाणिविकिरंतंसमंततः अभ्यपालकौरवोराजन्भूरिसंग्राममूर्धनि सहदेवमथायांतंद्रोणप्रे
प्समहारथं कर्णोवैकर्तनोराजन्वारयामासपांडवं भीमसेनमथायांतंव्यादितास्यमिवांतकं स्वयंदुर्योधनोराजाप्रतीपंमृत्युमाव्रजत नकु
लंचयुधांश्रेष्ठंसर्वयुद्धविशारदं शकुनिःसौबलोराजन्वारयामाससौबलः शिखंडिनमथायांतंरथेनरथिनांवरं कृपःशारद्वतोराजन्वारयामा
ससंयुगे प्रतिविंध्यमथायांतंमयूरसदृशैर्हयैः दुःशासनोमहाराजयत्नोयत्तमवारयत भैमसेनिमथायांतंमायाशतविशारदं अश्वत्थामापि
तंमानीकुर्वाणःप्रत्यषेधयत द्रुपदंवृषसेनस्तुससैन्यंसपदानुगं वारयामाससमरेद्रोणप्रेप्सुर्महारथं विराटंद्रुतमायांतंद्रोणस्यनिधनंप्रति
मद्रराजःसुसंक्रुद्धोवारयामासभारत शतानीकमथायांतंनाकुलिंरभसंरणे चित्रसेनोहरोधाशुशरैर्द्रोणपरीप्सया अर्जुनंचयुधांश्रेष्ठंप्राद्रवंतंम एम्

२००

१

गदाभिर्मुसलैश्चैव नानाशस्त्रैश्च संयुगे ४

हारथे अलंबुषो महाराज रक्षसेंद्रो न्यवारयत् तथा द्रोणं महेष्वासं निघ्नंतं शात्रवान् रणे धृष्टद्युम्नोथ पांचाल्यो हृष्टरूपमवारयत् तथान्यान्पांडुपुत्रा
णां समापततो महारथान् तावकास्थितो राजन्वारयामास सौजसा गजारोहा गजैस्तूर्णं संनिपत्य महामृधे योधयंतः स्म दृश्यंते शतशोथ सहस्रशः नि
शीथे तुरगा राजन्नभ्यधावंत परस्परं समदृश्यंत वेगेन पक्षवंतो यथाद्रयः सादिनः सादिभिः सार्द्धं प्रासशक्त्यृष्टिपाणयः समागच्छन्महाराज विनदंतः पृथ
क्पृथक् नरास्तु बहवस्तत्र समाजग्मुः परस्परं [redacted] कृतवर्मा तु हार्दिक्यो धर्मपुत्रं युधिष्ठिरं वारयामास संक्रुद्धो वेले
वोद्धृतमर्णवं युधिष्ठिरस्तु हार्दिक्यं विद्ध्वा पंचभिराशुगैः पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति चाब्रवीत् कृतवर्मा तु संक्रुद्धो धर्मपुत्रस्य मारिष धनुश्चि
च्छेद भल्लेन तं च विव्याध पंचभिः अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः हार्दिक्यं दशभिर्बाणैर्बाह्वोरुरसि चार्पयत् माधवस्तु रणे विद्धो धर्मपुत्रेण मारिष वृ५
प्राकंपत च रोषेण सप्तभिश्चार्दयच्छरैः तस्य पार्थो धनुश्छित्वा हस्तावापं निकृत्य च प्राहिणोन्निशितान्बाणान्पंच राजन् शिलाशितान् ते तस्य कवचं
भित्वा हेमचित्रं महाधनं प्राविशन्धरणीमुग्रा वल्मीकमिव पन्नगाः अक्ष्णोर्निमेषमात्रेण सोन्यदादाय कार्मुकं विव्याध पांडवं षष्ट्या सूतं च नव
भिः शरैः तस्य शक्तिममेयात्मा पांडवो भुजगोत्तमां चिक्षेप भारत व्यग्रा रथे न्यस्य महद्धनुः सा हेमचित्रा महती पांडवेन प्रवेरिता निर्भिद्य दक्षिणं बाहुं
प्राविशद्धरणीतलं एतस्मिन्नेव काले तु गृह्य पार्थः पुनर्धनुः हार्दिक्यं छादयामास शरैः सन्नतपर्वभिः ततस्तु समरे शूरो वृष्णीनां प्रवरो रथी अश्वान्
न्यथं चक्रे निमेषार्द्धान्नृप युधिष्ठिरं ततस्तु पांडवो ज्येष्ठः खड्गं चर्म समाददे तस्य निशितैर्बाणैर्व्यधमन्माधवो रणे तोमरं तु ततो गृह्य स्वर्णदंडं दुरासदं
प्रैषयत्समरे तूर्णं हार्दिक्यस्य युधिष्ठिरः तमापतंतं सहसा धर्मराजभुजच्युतं द्विधा चिच्छेद हार्दिक्यः कृतहस्तः स्मयन्निव ततः शरशतेनाजौ धर्मपुत्रमवाकि
रत् कवचं चास्य संक्रुद्धः शरैस्तीक्ष्णैरशातयत् हार्दिक्यशरसंछिन्नं कवचं तन्महायशाः व्यशीर्यत रणे राजंस्ताराजालमिवांबरात् सच्छिन्नधन्वा विरथः

द्रो० २०१ शीर्णवर्मा शरार्दितः अपयासीद्रणात्तूर्णं धर्मपुत्रो युधिष्ठिरः कृतवर्माणं निर्जित्य धर्मात्मानं युधिष्ठिरं पुनर्द्रोणमनुप्रेक्ष्य चक्रमेव महात्मनः द्रोणपर्वणि
रात्रियुद्धे संजय उवाच भूरिस्तमथो राजन्नार्श्यशृङ्गिनं रणे आपतन्तमपासेधत्प्रमत्तमिव कुञ्जरं अथैनं सात्यकिः क्रुद्धः पञ्चभिर्निशितैः शरैः विव्याध
हृदये तूर्णं प्रावहत्तस्य शोणितं तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदं दशभिर्विशिखैस्तीक्ष्णैरविध्यत्तभुजान्तरे तावन्योन्यं महाराज ततक्षाते शरैर्भृशं क्रोध
संरक्तनयनौ क्रोधाद्विस्फार्य कार्मुके तयोरासीन्महाराज शस्त्रवृष्टिः सुदारुणा क्रुद्धयोः सायकमुचोर्यमान्तकनिकाशयोः तावन्योन्यं शरै राजन् संछाद्य सम
वस्थितौ मुहूर्तं चैव तद्युद्धं समरूपमिवाभवत् ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव धनुश्चिच्छेद समरे कौरव्यस्य महात्मनः अथैनं छिन्नधन्वानं नवभिर्नि
शितैः शरैः विव्याध हृदये तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः धनुरन्यत्समादाय सात्वतं प्रत्यविध्यत स विद्ध्वा सात्वतं
बाणैस्त्रिभिरेव विशाम्पते धनुश्चिच्छेद भल्लेन सुतीक्ष्णेन हसन्निव छिन्नधन्वा महाराज सात्यकिः क्रोधमूर्छितः प्रजहार महावेगां शक्तिं तस्य महोरसि
स तु शक्त्या विभिन्नाङ्गो निपपात रथोत्तमात् लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया तं तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः अभ्यधावत वेगेन शैनेयं प्र
ति संयुगे तिष्ठ तिष्ठेति चाभाष्य शैनेयं स नराधिप अभ्यवर्षच्छरौघेण मेरुं वृष्ट्या यथाम्बुदः तमापतन्तं संरब्धं शैनेयस्य रथं प्रति घटोत्कचोऽब्रवीद्राजन्नादं
मुक्त्वा महारथः तिष्ठ तिष्ठ न मे जीवन् द्रोणपुत्र गमिष्यसि एष त्वाद्य हनिष्यामि महिषं स्कन्दो यथा युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे इत्युक्त्वा क्रोध
ताम्राक्षो राक्षसः परवीरहा द्रौणिमभ्यद्रवत्क्रुद्धो गजेन्द्रमिव केसरी रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः रथिनामृषभं द्रौणिं धाराभिरिव तोयदः शरवृष्टिं तु तां
प्राप्तां शरैराशीविषोपमैः शातयामास समरे तरसा द्रौणिरुत्स्मयन् ततः शरशतैस्तीक्ष्णैर्मर्मभेदिभिराशुगैः समाचिनोद्राक्षसेन्द्रं घटोत्कचमरिंदम स
शरैराचितस्तेन राक्षसो रणमूर्धनि व्यकाशत महाराज श्वाविच्छललितो यथा ततः क्रोधसमाविष्टो भैमसेनिः प्रतापवान् शरैरवचकर्तोग्रैर्द्रौणिं द्राश एम २०१

निमग्नैः श्यामैर्हृदि चैर्हेमनाराचैः सशिलीमुखैः बाह्लकौ नीलीकैलीसौ सौष्ठ्वाधिविकृतिभिः तां शस्त्रवृष्टिमतुलां वज्राशनिसमस्वनां पतंतीमुप
रि क्रुद्धो द्रोणिरग्रसत् विप्रियः स्मृतः महेश्वरो घोरां दिव्यास्त्रप्रतिमंत्रितैः अथ यत्तो महातेजा महास्त्राण्यवमाहरत् ततो नरप्रेरिताः गाः नानाः संग्रामेमास्मरन्नान
वत घोररूपो महारणो नयोधानां हर्षवर्द्धनः ततो ह्यग्नेसमयमं ... स्फुलिंगैः समंततः वभौ निशामुखे भास्वत्येवानैव संवृतं समार्गणस्तोद्रोणिर्दि
शः प्रच्छादयन्सर्वतः प्रियार्थं तव पुत्राणां राक्षसं समभ्यपातयत् ततः प्रवृत्ते युद्धे द्रोणिराक्षसयोर्मृधे विशिखैस्तैर्मध्ये शक्रवृत्रयोरिव ततो घटोत्क
चो वाणैर्दशभिर्द्रोणिमाहवे जघानोरसि संक्रुद्धः कालाग्निसमतेजसः सतेनाभ्याहतो विद्धो राक्षसेन महाबलः चचाल समरे द्रोणिर्वातनुन्न इव द्रुमः सं
मोहमनुसंप्राप्तो ध्वजयष्टिं समाश्रितः ततो हाहाकृतं सैन्यं तव सर्वं जनाधिप हतं स्म मेनिरे सर्वे तावकास्तं विशांपते तं तु दृष्ट्वा तथावस्थमश्वत्थामानमा
हवे पांचालाः सृंजयाश्चैव सिंहनादं प्रचक्रिरे प्रतिलभ्य ततः संज्ञामश्वत्थामा महाबलः धनुः प्रपीड्य वामेन करेणामित्रकर्शनः मुमोचाकर्णपूर्ण
नधनुषा शरमुत्तमं यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचं स भित्वा हृदयं तस्य राक्षसस्य शरोत्तमः विवेश वसुधामुग्रः सपुंखः पृथिवीपते सोतिवि
द्धो महाराजा थोपस्थउपाविशत् राक्षसेंद्रः सवलवान् द्रोणिना रणशालिना दृष्ट्वा विमूढं हैडिंबं सारथिस्तं रणाजिरात् द्रोणेः सकाशात्संभ्रांतस्त्वपनि
न्ये त्वरान्वितः तथा तु समरे विद्धा राक्षसेंद्रं घटोत्कचं ननाद सुमहानादं द्रोणपुत्रो महारथः पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत वपुषाति प्रजज्वाल
मध्याह्न इव भास्करः भीमसेनं तु युध्यंतं भारद्वाजरथं प्रति स्वयं दुर्योधनो राजा प्रत्यविध्यच्छितैः शरैः तं भीमसेनो दशभिः शरैर्विव्याध मारिष दुर्योध
नोपि विंशत्या शराणां प्रत्यविध्यत तौ सायकैरवच्छन्नावदृश्येतां रणाजिरे मेघजालसमाच्छन्नौ नभसीवेंदुभास्करौ अथ दुर्योधनो राजा भीमं विव्याध
पत्रिभिः पंचभिर्भरतश्रेष्ठ तिष्ठ तिष्ठेति चाब्रवीत् तस्य भीमो धनुश्छित्त्वा ध्वजं च दशभिः शरैः विव्याध कौरवश्रेष्ठं नवत्या नतपर्वणां ततो दुर्योधनः

द्रो: क्रुद्धो भीमसेनस्य मारिष । चिक्षेप सेशात्राजन पश्यतां सर्वधन्विनां । तांश्छित्त्वा सहसा शरान्भीमो दुर्योधनधनुश्च्युतान् । कौरवं पंचविंशत्या क्षुद्रकाणां समार्पयत्
२०२ दुर्योधनस्ततः क्रुद्धो भीमसेनस्य मारिष । क्षुरप्रेण धनुश्छित्वा दशभिः प्रत्यविध्यत । अथान्यद्धनुरादाय भीमसेनो महाबलः । विव्याध नृपतिं तूर्णं सप्तभिर्निशितैः
शरैः । तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवत् । द्वितीयं च तृतीयं च चतुर्थं पंचमं तथा । आततमात्तं महाराज भीमस्य धनुरच्छिनत् । तव पुत्रो महाराज जितकाशी
मदोत्कटः । स तथा छिद्यमानेषु कार्मुकेषु पुनः पुनः । शक्तिं चिक्षेप समरे सर्वपारसवीं शुभां । मृत्योरिव स्वसारं हि दीप्तां केतुशिखामिव । सीमंतमिव कुर्वंतीं नभ
सोऽग्निसमप्रभां । अप्राप्तामेव तां शक्तिं त्रिधा चिच्छेद कौरवः । पश्यतः सर्वलोकस्य भीमस्य च महात्मनः । ततो भीमो महाराज गदां गुर्वीं महाप्रभां । चिक्षेपाविध्य
वेगेन दुर्योधनरथं प्रति । ततः सा सहसा वाहांस्तव पुत्रस्य संयुगे । सारथिं च गदा गुर्वी ममर्द भरतर्षभ । पुत्रस्तु तव राजेन्द्र रथाद्धेमपरिष्कृतात् । आप्लुतः स
हसा यानं नंदकस्य महात्मनः । ततो भीमो हतं मत्वा तव पुत्रं महारथं । सिंहनादं महच्चक्रे तर्जयन्निव कौरवान् । तावकाः सैनिकाश्चापि मेनिरे निहतं नृ
पं । ततो विचुक्रुशुः सर्वे हा हेति च समंततः । तेषां तु निनदं श्रुत्वा त्रस्तानां सर्वयोधिनां । भीमसेनस्य नादं च श्रुत्वा राजन्महात्मनः । ततो युधिष्ठिरो राजा हतं म
त्वा सुयोधनं । अभ्यवर्त्तत वेगेन यत्र पार्थो वृकोदरः । पांचालाः केकया मत्स्याः संजयाश्च विशांपते । सर्वोद्योगेनाभिजग्मुर्द्रोणमेव युयुत्सया । तत्रासीत्सुमह
द्युद्धं द्रोणस्याथ परैः सह । घोरे तमसि मग्नानां निघ्नतामितरेतरं ॥ इति द्रोणपर्वणि रात्रियुद्धे संजय उवाच । सहदेवमथायांतं द्रोणप्रेप्सुं विशांपते
कर्णो वैकर्त्तनो युद्धे वारयामास भारत । सहदेवस्तु राधेयं विद्ध्वा नवभिराशुगैः । पुनर्विव्याध दशभिर्निशितैर्नतपर्वभिः । तं कर्णः प्रतिविव्याध शतेन नत
पर्वणां । सज्यं चास्य धनुः शीघ्रं चिच्छेद लघुहस्तवत् । ततोऽन्यद्धनुरादाय माद्रीपुत्रः प्रतापवान् । कर्णं विव्याध विंशत्या तदद्भुतमिवाभवत् । तस्य कर्णो हया
न्हत्वा शरैः सन्नतपर्वभिः । सारथिं चास्य भल्लेन तूर्णं निन्ये यमक्षयं । विरथः सहदेवस्तु खड्गं चर्म समाददे । तदप्यस्य शरैः कर्णो व्यधमत्प्रहसन्निव । अथ एम
२०२

गुर्वीं महाघोरां हेमचित्रां महागदां प्रेषयामास संक्रुद्धो वैकर्तननाथं प्रति तामापतन्तीं सहसा सहदेवप्रवीरहा अस्त्रैर्भयंकरैः कर्णो भूमौ चैनामपातयत्
गदां विनिहतां दृष्ट्वा सहदेवस्त्वरान्वितः शक्तिं चिक्षेप कर्णाय तामप्यस्य च्छिनच्छरैः ससंभ्रमं ततस्तूर्णमवप्लुत्य रथोत्तमात् सहदेवो महाराज दृष्ट्वा क-
र्णमवस्थितं रथचक्रं प्रगृह्याजौ मुमोचाधिरथिं प्रति तमापतन्तं सहसा कालचक्रमिवोद्यतं शरैरनेकसाहस्रैश्छिनत्सूतनन्दनः तस्मिंस्तु विहते चक्रे
सूतजेन महात्मना ईषादण्डकयोक्त्राणि युगानि विविधानि च हस्त्यङ्गानि तथाश्वांश्च मृतांश्चापि नरान्बहून् विक्षेप कर्णमुद्दिश्य कर्णस्तान्व्यधमच्छरैः
स निरायुधमात्मानं ज्ञात्वा माद्रवतीसुतः वार्यमाणस्तु विशिखैः सहदेवो रणं जहौ तमभिद्रुत्य राधेयो मुहूर्ताद्भरतर्षभ अब्रवीत्प्रहसन्वाक्यं सहदेवं वि-
शांपते मा युध्यस्व रणे वीर विशिष्टै रथिभिः सह सदृशैर्युध्य माद्रेय वचो मे मा विशंकिथाः अथैनं धनुषोऽग्रेण तुदन्भूयोऽब्रवीद्वचः एषोऽर्जुनो रणे यत्तो
युध्यते कुरुभिः सह तत्र गच्छस्व माद्रेय गृहं वा यदि मन्यसे एवमुक्त्वा ततः कर्णो रथेन रथिनां वरः प्रायात्पाञ्चालपाण्डूनां सैन्यानि प्रहसन्निव वधप्रा-
प्तं तु माद्रेयं नावधीत्समरेऽरिहा कुन्त्याः स्मृत्वा वचो राजन्सत्यसन्धो महायशाः सहदेवस्ततो राजन्विमनाः शरपीडितः कर्णवाक्शरसंतप्तो जीवि-
तान्निरविद्यत आरुरोह रथं चापि पाञ्चाल्यस्य महात्मनः जनमेजयस्य समरे त्वरायुक्तो महारथः विराटं सहसेनं तु द्रोणार्थे द्रुतमागतं मद्रराजः शरौघै-
श्छादयामास धन्विनं तयोः समभवद्युद्धं समरे दृढधन्विनोः यादृशं ह्यभवद्राजञ्जम्भवासवयोः पुरा मद्रराजो महाराज विराटं वाहिनीपतिं आज-
घ्ने त्वरितस्तूर्णं शतेन नतपर्वणां प्रतिविव्याध तं राजा नवभिर्निशितैः शरैः पुनश्चैव त्रिसप्तत्या भूयश्चैव शतेन ह तस्य मद्राधिपो हत्वा चतुरो रथ-
वाजिनः सूतं ध्वजं च समरे रथोपस्थादपातयत् हताश्वात्तु रथात्तूर्णमवप्लुत्य महीपतिः तस्थौ विस्फारयंश्चापं विमुञ्चंश्च शितान्शरान् शतानी-
कस्ततो दृष्ट्वा भ्रातरं हतवाहनं रथेनाभ्ययात्तूर्णं सर्वलोकस्य पश्यतः शतानीकमथायान्तं मद्रराजो महामृधे विशिखैर्बहुभिर्विद्ध्वा ततो निन्ये

यमक्षयं तस्मिन्सुनिहते वीरे विराटो रथसत्तमः आरोहद्रथमन्यं तु तमेव ध्वजमालिनं ततो विस्फार्य नयने क्रोधाद्द्विगुणविक्रमः मद्रराजरथं तू

२०३ र्णं छादयामास पत्रिभिः ततो मद्राधिपः क्रुद्धः शतेनानतपर्वणां आजघानोरसि दृढं विराटं वाहिनीपतिं सोऽतिविद्धो महाराज रथोपस्थ उपाविश

त् कश्मलं चाविशत्तीव्रं विराटो भरतर्षभ सारथिस्तमपोवाह समरे शरविक्षतं ततः सा महती सेना प्राद्रवन्निशि भारत वध्यमाना शरशतैः श

ल्येनाहवशोभिना तां दृष्ट्वा विद्रुतां सेनां वासुदेवधनंजयौ प्रयातौ तत्र राजेंद्र यत्र शल्यो व्यवस्थितः तौ तु प्रत्युद्ययौ राजन्राक्षसेन्द्रो ह्यलम्बुषः अष्ट

चक्रसमायुक्तमास्थाय प्रवरं रथं तुरंगममुखैर्युक्तं पिशाचैर्घोरदर्शनैः लोहितार्द्रपताकं तं रक्तमाल्यविभूषितं कार्ष्णायसमयं घोरमृक्ष

चर्मसमावृतं रौद्रेण चित्रपक्षेण विवृताक्षेण कूजता ध्वजेनोच्छ्रितदंडेन गृध्रराजेन राजता स बभौ राक्षसो राजन्भिन्नांजनचयोपमः रुरो

धार्जुनमायांतं प्रभातं न ध्वांक्षकाकबलूलूकंककगोमायुपूर्वकं ततोऽर्जुनः शतेनैव पत्रिणां समपातयत् नवभिश्च शितैर्बाणैर्ध्वजं चिच्छेद भा

रत सारथिं च त्रिभिर्बाणैस्त्रिभिरेव त्रिवेणुकं धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान् विरथस्योद्यतं खड्गं शरेणास्य द्विधाकरोत् अथैनं निशितै

र्बाणैश्चतुर्भिर्भरतर्षभ पार्थोऽर्दयद्राक्षसेन्द्रं स विद्धः प्राद्रवद्भयात् तं विजित्यार्जुनस्तूर्णं द्रोणांतिकमुपाययौ किरन्शरगणान्राजन्नरवारणवा

जिषु वध्यमाना महाराज पांडवेन यशस्विना सैनिका न्यपतन्नुर्व्यां वातनुन्ना इव द्रुमाः तेषु तूत्साद्यमानेषु फाल्गुनेन महात्मना संप्राद्रवद्बलं स

र्वं पुत्राणां ते विशांपते द्रोणपर्वणि त्रिपुटे ॥ संजय उवाच शतानीकं शरैस्तूर्णं निर्दहंतं चमूं तव चित्रसेनस्तव सुतो वारयामास भारत

नाकुलिश्चित्रसेनं तु नाराचेनार्दयद्भृशं स च तं प्रतिविव्याध दशभिर्निशितैः शरैः चित्रसेनो महाराज शतानीकं पुनर्युधि नवभिर्निशितै

र्बाणैराजघान स्तनांतरे नाकुलिस्तस्य विशिखैर्वर्म संनतपर्वभिः गात्रात्संच्यावयामास तदद्भुतमिवाभवत् सोऽपेतवर्मा पुत्रस्ते विरराज भृश २०३

प्रभंजनमिवाद्रिराट् किरन्बाणगणान्राजन्... ततो रणमूर्द्धनि ... प्रमहायुद्धं नरर ... ससपोसह ... द्भुतं प्रीतिजननं सर्वं जातं +

७४ ६२

न्य उत्सस्र्ज काले ऽर्जुनो निर्मोकमिव पन्नगः ततोऽस्य निशितैर्बाणैर्ध्वजं चिच्छेद नाकुलिः धनुश्चैव महाराज यतमानस्य संयुगे स छिन्नधन्वा
समरे विवर्मा स महारथः धनुरन्यन्महाराज जग्राहाशिविदारणं ततस्तूर्णं चित्रसेनो नाकुलिं नवभिः शरैः विव्याध समरे क्रुद्धो भारत नाम महार
थः शतानीकोऽथ संक्रुद्धश्चित्रसेनस्य मारिष जघान चतुरो वाहान्सारथिं च नरोत्तमः अवप्लुत्य रथात्तस्माच्चित्रसेनो महारथः नाकुलिं
पंचविंशत्या शराणामार्दयद्बली तस्य तत्कुर्वतः कर्म नकुलस्य सुतो रणे अर्धचंद्रेण चिच्छेद चापं रत्नविभूषितं स छिन्नधन्वा विरथो हता
श्वो हतसारथिः आरुरोह रथं तूर्णं हार्दिक्यस्य महात्मनः द्रुपदस्य सहानीकं द्रोणिप्रेप्सुं महारथं वृषसेनोऽभ्ययात्तूर्णं किरंछरशतैस्तदा यज्ञसेन
सुतः समरे कर्णपुत्रं महारथं षष्ट्या शराणां विव्याध बाह्वोरुरसि चानघ वृषसेनस्तु संक्रुद्धो यज्ञसेनात्मजं स्थितं बहुभिः सायकैस्तीक्ष्णैराजघान स्त
नांतरे तावुभौ शरनुन्नांगौ शरकंटकिनौ रणे व्यभ्राजेतां महाराज श्वाविधौ शललैरिव रुक्मपुंखैः प्रसन्नाग्रैः शरैश्छिन्नतनुच्छदौ रुधिरौघप
रिक्लिन्नौ व्यभ्राजेतां महामृधे तपनीयनिभौ चित्रौ कल्पवृक्षाविवाद्भुतौ किंशुकाविव चोत्फुल्लौ व्यकाशेतां रणाजिरे वृषसेनस्ततो राजन्द्रुपदं
नवभिः शरैः विद्ध्वा विव्याध सप्तत्या पुनरन्यैस्त्रिभिस्त्रिभिः ततः शरसहस्राणि विमुंचन्विबभौ तदा कर्णपुत्रो महाराज वर्षमाण इवांबुदः द्रु
पदस्तु ततः क्रुद्धो वृषसेनस्य कार्मुकं द्विधा चिच्छेद भल्लेन पीतेन निशितेन च सोऽन्यत्कार्मुकमादाय रुक्मबद्धं नवं दृढं तूणादाकृष्य विमलं भल्लं
पीतं सितं दृढं कार्मुके योजयित्वा तं द्रुपदं सन्निरीक्ष्य च आकर्णपूर्णं मुमुचे त्रासयन्सर्वसोमकान् हृदयं तस्य भित्त्वा च जगाम वसुधातलं क
श्मलं प्राविशद्राजा वृषसेनशराहतः सारथिस्तमपोवाह स्मरन्सारथिचेष्टितं तस्मिन्नभग्ने राजेन्द्र पांचालानां महारथे ततस्तु द्रुपदानीकं शरैः
छिन्नतनुच्छदं संप्राद्रवद्रणाद्राजन्निशीथे भैरवे सति प्रदीपैर्हि परित्यक्तैर्ज्वलद्भिस्तैः समंततः आराजत मही मही राजन्वीताभ्रा द्यौरिव ग्रहैः तथा

द्रो॰ गोर्द्रीपतितैर्भाराजन वसुंधरा प्रावृट्काले महाराज विद्युद्भिरिव तोयदाः ततः कर्णसुतात्रस्ताः सोमका विप्रदुद्रुवुः यथेंद्रभयवित्रस्ता दानवा भा
रकामये तेनार्द्यमानाः समरे द्रवमाणास्तु सोमकाः आराजंत महाराज प्रदीपैरवभासिताः तांस्तु निर्जित्य समरे कर्णपुत्रो व्यरोचत मध्यंदिनम
२०४ नुप्राप्तो घर्म्मांशुरिव भारत तेषु राजसहस्रेषु तावकेषु परेषु च एक एव ज्वलंस्तस्थौ वृषसेनः प्रतापवान् सविजित्य रणे शूरान् सोमकानां महारथान्
जगाम त्वरितस्तत्र यत्र राजा युधिष्ठिरः प्रतिविंध्यमथ क्रुद्धं प्रदहंतं रणे रिपून् दुःशासनस्तव सुतः प्रत्युद्गच्छन्महारथः तयोः समागमो राजंश्चित्ररू
पो बभूव ह व्यपेतजलदे व्योम्नि बुधभास्करयोरिव प्रतिविंध्यं तु समरे कुर्वाणं कर्म्म दुष्करं दुःशासनस्त्रिभिर्बाणैर्ललाटे समविध्यत सोतिविद्धो
बलवता तव पुत्रेण धन्विना विरराज महाबाहुः सशृंग इव पर्वतः दुःशासनं तु समरे प्रतिविंध्यो महारथः नवभिः सायकैर्विद्ध्वा पुनर्विव्याध सप्तभिः
तत्र भारत पुत्रस्ते कृतवान् कर्म्म दुष्करं प्रतिविंध्यहयानुग्रैः पातयामास पत्रिभिः सारथिं चास्य भल्लेन ध्वजं च समपातयत् रथं च तिलशो राजन् व्य
धमत्तस्य धन्विनः पताकाश्च सतूणीरा रश्मीन् योक्त्राणि चाभिभो चिच्छेद तिलशः क्रुद्धः शरैः सन्नतपर्वभिः विरथः स तु धर्म्मात्मा धनुष्पाणिरवस्थितः
अयोधयत्तव सुतं किरन् शरशतान् बहून् क्षुरप्रेण धनुस्तस्य चिच्छेद कृतहस्तवत् अथैनं दशभिर्बाणैश्छिन्नधन्वानमार्द्दयत् तं दृष्ट्वा विरथं तत्र भ्रातरो
ऽस्य महारथाः अन्ववर्त्तंत वेगेन महत्या सेनया सह आप्लुतः स ततो यानं सुतसोमस्य भास्वरं धनुर्गृह्य महाराज विव्याध तनयं तव ततस्तु तावकाः
सर्वे परिवार्य सुतं तव अभ्यवर्त्तंत संग्रामे महत्या सेनया वृताः ततः प्रववृते युद्धं तव तेषां च भारत निशीथे दारुणे काले यमराष्ट्रविवर्द्धनं ॥ द्रो
णपर्व्वणि रात्रियुद्धे संजय उवाच नकुलं समरे क्रुद्धं निघ्नंतं वाहिनीं तव अभ्ययात् सौबलः क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् कृतवैरौ तु तौ वीरावन्योन्य राम
वधकांक्षिणौ शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः यथैव नकुलो राजन् शरवर्षाण्यमुंचत तथैव सौबलो राजन् शिक्षां संदर्शयन् युधि तावु २०४

भीतमभ्येत्य रोशकं रक्तिनो गतो अभ्यासेनं तां महाराज रथाद्विधी शलवलेरिव हताश्च पुत्रांस्तिसांकैः शौंछित्रं तत्र रुद्धैरा रुधिरौघपरिक्लिन्नो अभ्यातेनं तां महार-
थो तपनीयविभूषितो चित्रो कल्पवृक्ष इव विद्रुमो किंशुक इव चासौ फुल्लो प्रकाशते रणाजिरे तावुभौ समभ्येत्य शौ शकरं रक्तिनो नरा आगतेनं तां महाराज कं-
टकीव शाल्मली सजितं प्रेक्षमाणौ तौ चाजगिहृत लोचनौ क्रोधसंरक्तनयनौ निर्दहन्तौ परस्परं श्यालस्ते तव संक्रुद्धो माद्रीपुत्रं हसन्निव कर्णिने-
केन विव्याध हृदये निशितेन नरः नकुलस्तु भृशं विद्धः श्यालेन तव धन्विना निषसाद रथोपस्थे कश्मलं चैनमाविशत् अत्यंतवैरिणं दृष्ट्वा शत्रुं
तथागतं ननाद शकुनी राजन् तपान्ते जलदो यथा प्रतिलभ्य ततः संज्ञां नकुलः पांडुनन्दनः अभ्ययात्सौबलं भूयो व्यात्तानन इवान्तकः संक्रुद्धः श-
कुनिं षष्ट्या विव्याध भरतर्षभ पुनश्चैनं शतेनैव नाराचानां स्तनान्तरे अथास्य सशरं चापं मुष्टिदेशे स छिन्नवान् ध्वजं च लघु तूर्णं स रथाद्भूमावपातयत् विशि-
खेन च तीक्ष्णेन पीतेन निशितेन च ऊरू निर्भिद्य चैकेन नकुलः पांडुनन्दनः श्येनं सपक्षं व्याधेन पातयामास तं तदा सोऽतिविद्धो महाराज रथोपस्थ-
मुपाविशत् तं विसंज्ञं निपतितं दृष्ट्वा श्यालं तवानघ अपोवाह रथेनाशु सारथिर्ध्वजिनीमुखात् ततः संचुक्रुशुः पार्था ये च तेषां पदानुगाः
निर्जित्य तं रणे शत्रुं नकुलः शत्रुतापनः अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय मां वह तस्य तद्वचनं श्रुत्वा [illegible]पुत्रस्य धीमतः प्रायात्तेन रणे राजन् येन
द्रोणोऽन्वयुध्यत शिखंडिनं तु समरे द्रोणप्रेप्सुं विशांपते कृपः शारद्वतो यत्तः प्रत्युद्गच्छत्सवेगितः गौतमं द्रुतमायान्तं द्रोणानीकमरिन्दमं विव्याध
नवभिर्भल्लैः शिखंडी प्रहसन्निव तमाचार्यो महाराज विद्ध्वा पंचभिराशुगैः पुनर्विव्याध विंशत्या पुत्राणां प्रियकृत्तव महद्युद्धं तयोरासीत् घोररूपं
भयानकं यथा देवासुरे युद्धे शंबरामरराजयोः शरजालावृतं व्योम चक्रतुस्तौ महारथौ मेघाविव तपापाये वीरौ समरदुर्मदौ प्रकृत्या घोररूपं तदासी-
द्भूतं पुनः रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनां कालरात्रिनिभा ह्यासीत् घोररूपा भयानका शिखंडी तु महाराज गौतमस्य महद्धनुः अर्ध-

रा५

द्रो॰प चंद्रोणाच्चिच्छेदसज्जंसविशिखंतदा तमपक्रुद्धःकृपोराजंभल्लेनविक्षेपयत्तलात् स्वर्णदंडामकुंठाग्रांकर्मारपरिमार्जितां तामापतंतींचिच्छेदशितैः
शैर्बहुभिःशरैः सापतन्मेदिनींशीघ्रमाभावयंतीमहाप्रभा अथान्यद्धनुरादायपौत्रोनमोधिनांवरः प्राच्छादयच्छितैर्बाणैर्महाराजशिखंडिनं सछा
२०५ द्यमानःसमोरेणतमेनयशस्विना अपीडयतधोपस्थेशिखंडीरथिनांवरः सीदंतंचैनमालोक्यकृपःशारद्वतोयुधि आजघ्नेबहुभिर्बाणैर्जिघांस
न्निवभारत विमुखंतंरणेदृष्ट्वापाण्ड्यनिमिनिमहारथं पांचालाःसोमकाश्चैवपरिवव्रुःसमंततः तथैवतवपुत्राश्चपरिवव्रुर्द्विजोत्तमं महत्सोसेनया
पार्थिततोयुद्धमवर्तत रथिनांचरणेराजन्नन्योन्यमभिधावतां बभूवतुमुलःशब्दोमेघानांनदतामिव द्रवतांसादिनांचैवगजानांचविशांपते
अन्योन्यमभितोराजन्क्रूरमायोधनेऽभवत् पत्तीनांद्रवतांचैवपदशब्देनमेदिनी अकंपतमहाराजभयत्रस्तेवचांगना रथारथान्समासाद्यप्रद्रुता
वेगवत्तरं न्यगृह्णन्बहवोराजंशलभान्वायसाइव तथागजान्प्रभिन्नांश्चसुप्रभिन्नामहागजाः तस्मिन्नेवपदेयत्तानिगृह्णंतिस्मभारत सादीसादि
नमासाद्यपदातिःपदातिनं समासाद्यरणेऽन्योन्यंसंरब्धानातिचक्रमुः धावतांद्रवतांचैवपुनरावर्ततामपि बभूवतत्रसैन्यानांशब्दःसुविपुलोनिशि
दीप्यमानाःप्रदीपाश्चरथवारणवाजिषु अदृश्यंतमहाराजमहोल्काइवखाच्च्युताः सानिशाभारतश्रेष्ठप्रदीपैरवभासिता दिवसप्रतिमाराजन्ब
भूवरणमूर्द्धनि आदित्येनयथाव्याप्तंतमोलोकेप्रणश्यति तथानष्टंतमोघोरंदीपैर्दीप्तैरलंकृतं शस्त्राणांकवचानांचमणीनांचमहात्मनां
अंतर्दधुःप्रभाःसर्वादीपैस्तैरवभासिताः तस्मिन्कोलाहलेयुद्धेवर्तमानेनिशामुखे नकेचिद्विदुरात्मानमयमस्मीतिभारत अवधीत्समरेपुत्रंपि
ताभारतसत्तम पुत्रश्चपितरंमोहात्सखायंचसखातथा संबंधीमातुलंचापिसंबंधीयश्चापिमातुलं स्वेस्वान्परेपरांश्चापिनिजघ्नुरितरेतरं नि रम
र्मर्यादमभूद्युद्धंरात्रौभीरुभयानकं ॥ द्रोणपर्वणिरात्रियुद्धे संजयउवाच तस्मिन्सुतुमुलेयुद्धेवर्तमानेभयावहे धृष्टद्युम्नोमहाराजद्रोण २०५

मेवाभ्यवर्त्तत। समज्जानो धनुः श्रेष्ठं ज्यां विकर्षंस्ततः पुनः। अभ्यद्रवत द्रोणमसं रथं हेमविभूषितं धृष्टद्युम्नमथायान्तं द्रोणस्यान्तचिकीर्षया परि
वव्रुर्महाराज पांचालाः पांडवैः सह तथा परिवृतं दृष्ट्वा द्रोणमाचार्यसत्तमं पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे बलार्णवौ ततस्तौ तु समेयातां नि
शामुखे वातोद्धूतौ क्षुब्धसत्त्वौ भैरवौ सागराविव ततो द्रोणो महाराज पांचाल्यं पंचभिः शरैः विव्याध हृदये तूर्णं सिंहनादं ननाद च तं द्रोणः पं
चविंशत्या विद्ध्वा भारत संयुगे चिच्छेदास्येन भल्लेन धनुस्सुमहास्वनं धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ उत्ससर्ज धनुस्तूर्णं संदश्य दशनच्छदं
ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान् आददे सशरं धनुः श्रेष्ठं द्रोणस्यान्तचिकीर्षया सन्निकृष्य धनुश्चित्रमाकर्णात्स वीरहा द्रोणस्यान्तकांक्षी विससर्ज
सायकं ततः स विसृष्टो बलवता शरो घोरो महामृधे नादयामास तत्सैन्यं दिवाकर इवोदितः तं दृष्ट्वा शरं घोरं देवगन्धर्वमानवाः स्वस्त्यस्तु समरे राजन्
द्रोणायेत्यब्रुवन् वचः तं तु सायकमप्राप्तमाचार्यस्य रथं प्रति कर्णो द्वादशधा राजंश्चिच्छेद कृतहस्तवत् स छिन्नो बहुधा राजन् सूतपुत्रेण धन्विना नि
पपात शरस्तूर्णं निर्विषो भुजगो यथा दुर्योधनस्तु विंशत्या शकुनिश्चापि पंचभिः पांचाल्यं त्वरिता विव्यधुः सर्व एव महारथाः स विद्धः समभिघोरैर्द्रोण
त्राणार्थमाहवे सर्वानसंभ्रमाद्राजन्नभ्यविध्यत्त्रिभिस्त्रिभिः द्रोणं द्रौणिं च कर्णं च विव्याध च तवात्मजं ते भिन्ना धन्विना तेन धृष्टद्युम्नं पुनर्मृधे वि
व्यधुः पंचभिस्तूर्णमेकैकं रथिनां वराः द्रुमसेनस्तु संक्रुद्धो राजन् विव्याध पत्रिणा त्रिभिश्चान्यैः शरैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् स तु तं प्रति विव्याध
त्रिभिस्तीक्ष्णैरजिह्मगैः स्वर्णपुंखैः शिलाधौतैः प्राणान्तकरैर्युधि भल्लेनान्येन तु पुनः स्वर्णोज्ज्वलकुंडलं निचकर्त शिरः कायाद्द्रुमसेनस्य
वीर्यवान् तच्छिरो न्यपतद्भूमौ संदष्टौष्ठपुटं रणे महाराज समद्भूतं पक्वं तालफलं यथा तांश्च विद्ध्वा पुनर्वीरान् वीरः सुनिशितैः शरैः राधेयस्याच्छि
नद्भल्लैः कार्मुकं चित्रयोधिनः न तु तन्ममृषे कर्णो धनुषश्छेदनं तथा निकर्तनमिवात्युग्रं लांगूलस्य महाहरिः सोऽन्यद्धनुः समादाय क्रोधाद्रक्तेक्षणः

२०६ सबलन अभ्यद्रवच्छैनेयस्त्वरयुक्तं महाबलं दृष्ट्वा कर्णात्मजं वीरं तेन वीराः पञ्चस्त्रयर्षभाः पांचाल्यपुत्रं त्वरिताः परिवव्रुर्जिघांसया ह्यस्मं योधप्रवीराणां तानावक्य
तांपुरस्कृते मत्तेनाराम्यसमृप्राधेयस्यर्भिद्गुप्तमंस्मृि एतस्मिन्नेव काले तु हाशाराणोर्दीर्घविक्रिरेद्धारान वृषप्रपुत्रं प्रारूढं तं सात्यकिः प्रत्यपद्यत तमापतन्तम
हेषां समासत्यकिं युयुत्सुर्दुर्मर्षं एवंपारदशभिर्वाणैः प्रत्यविध्यच्छिनिप्रवीरः तं सात्यकिर्महाराज विव्याध दशभिः शरैः परपताहर्वीराणामाणासितेषु च्छित्वा व्यवीत
समासेके नववलिनः कर्णस्यचमहात्मनः आसीत्समागमो राजन्बलिनोः सव्ययोरिव ग्रामपंक्त तयोधराप्रत्रियान्भ्रातृयर्षभः एतौ बलोचनेकर्णासा
सकिः प्रत्यविध्यत कंपपत्रिवधोषेणा धनुषोवस्मभातृत्वो सूतपुत्रो महाराज सात्यकिं प्रत्यपीडयत विपाठकर्णिनाराचैर्वत्सदन्तैः क्षुरैरपि कर्णः शरश
तैस्तथापि शैनेयं प्रत्यविध्यत तथैवयुध्यमानोपिवृष्णीनां प्रवरो रथः अभ्यवर्षच्छरैः कर्णं तद्युद्धमभवत्समं तावकास्तु महाराज कर्णपुत्राश्च दंशिताः
सात्यकिं विव्यधुस्तूर्णं सर्वतस्तीक्ष्णैः शरैः अस्त्रैरस्त्राणि संवार्य तेषां कर्णस्य चाविभो अविध्यत्सात्यकिः क्रुद्धो वृषसेनं स्तनान्तरे तेन बाणेन निर्वि
द्धो वृषसेनो विशांपते न्यपतत्स्यन्दने मूढो धनुरुत्सृज्य वीर्यवान् ततः कर्णो हतं मत्वा वृषसेनं महारथं पुत्रशोकाभिसंतप्तः सात्यकिं प्रत्यपीडयत्
पीड्यमानस्तु कर्णेन युयुधानो महारथः विव्याध बहुभिः कर्णं त्वरमाणः पुनः पुनः स कर्णं दशभिर्विद्ध्वा वृषसेनं च सप्तभिः सहस्तावापधनुषी तयो
श्चिच्छेद सात्वतः तावन्ये धनुषी सज्ये कृत्वा शत्रुभयंकरे युयुधानमविध्येतां समन्तान्निशितैः शरैः वर्तमाने तु संग्रामे तस्मिन्वीरवरक्षये अतीव शु
श्रुवे राजन्गाण्डीवस्य महास्वनः श्रुत्वा तु रथनिर्घोषं गाण्डीवस्य च निःस्वनं सूतपुत्रोऽब्रवीद्राजन्दुर्योधनमिदं वचः एष सर्वान्शिबीन्हत्वा मुख्यशश्च नरा
र्षभान् पौरवांश्च महेष्वासो विक्षिपन्नुत्तमं धनुः पार्थस्तत्रैव निपतत् [illegible] निनदो महान् अपनेष्यत्यघोषस्तु यादवस्येव नर्दतः कौन्तेयः पाण्डवोऽप्य
[illegible] कर्मैवापकमात्मनः एषा विदीर्यते राजन्बहुधा भारती चमूः विप्रकीर्णान्यनेकानि न हि तिष्ठन्ति कर्हिचित् वातेनेव समुद्धूतमभ्रजालं विदीर्यते राम २०६

सव्यसाचिनमासाद्य मित्रानीतोविसागरे दृष्टवंतोपोधमुख्यो नोगांडीवप्रेषितैः शरैः सिंहानां शतेराजननश्रूयतेनिःस्वनोमहान् सिंगादुंदुभिनिर्घोषमर्जं
नमस्यथंप्रति अयंमध्येस्थितोस्माकंसात्यकिःसात्वतोवरः दृढवेध्यपतेलक्ष्यंकृत्वानतेष्यामहेपरान् एषपांचाल्यराजस्यपुत्रोद्रोणेनसंगतः
सर्वतःसंवृतोराजनशूरैस्तवमहारथैः सात्यकिंपरिहत्याशमथधृष्टद्युम्नंचपार्षतं अर्जुनेशयमहाराजध्रुवोनोविजयोभवेत् सोमदत्तंसिमंशौरिंपरिवार्यमहारथौ
प्रयतामोमहाराजनिहंतुंवृष्णिपार्षतौ समसारवीपुरोभ्येतिद्रोणानीकायभानेन संसक्तंसात्यकिंज्ञात्वाबहुभिःकुरुपुंगवैः तत्रगच्छतवहवःप्रवराःयमसत्तमाः
पावसार्थेनज्ञानातिसात्यकिंबहुभिर्वृतं तेत्वरध्वंतथाशूराःशरानमोक्षतोमृशं यथान्तिहव्रजेत्येषपरलोकायमाधवः कर्णस्यमतमाज्ञाय
पुत्रस्तेप्राहसौबलं यथेंद्रःसमरेराजनप्राहविष्णुंयशस्विनं वृतःसहस्रैर्दशभिर्गजानामनिवर्तिनां रथैश्वदशसाहस्रैर्वृतोयाहिधनंजयं दुः
शासनोदुर्विषहःसुबाहुर्दुःप्रधर्षणाः एतेत्वामनुयास्यंतिपत्तिभिर्बहुभिर्वृताः जहिकृष्णौमहाबाहोधर्मराजंचमातुल नकुलंसहदेवंचभीमसेनंत
थैवच देवानामिवदेवेंद्रजयाशास्त्वयिमेस्थिता जहिमातुलकौंतेयानसुरानिवपावकिः एवमुक्तोययौपार्थानपुत्रेणतवसौबलः महत्यासेनया
सार्धंसहपुत्रैस्तवैविभो प्रियार्थंतवपुत्राणांदिधक्षुःपांडुनंदनान् ततःप्रववृतेयुद्धंतावकानांपरैःसह प्रयातेसौबलेराजनपांडवानामनीकि
नी बलेनमहतायुक्तःसूतपुत्रःससात्वतं अभ्ययात्वरितोयुद्धेकिरञ्छरशतान्बहून् तथैवपार्थिवाःसर्वेसात्यकिंपर्यवारयन् भारद्वाजस्ततोगत्वा
धृष्टद्युम्नरथंप्रति महद्युद्धंतदासीत्तुद्रोणस्यनिशिभारत धृष्टद्युम्नेनवीरेणपांचालैश्वसहाद्भुतं ॥ द्रोणपर्वणिरात्रियुद्धे ॥ संजयउ· ततस्तेप्राद्रवन्सर्वे
त्वरितायुद्धदुर्मदाः अमृष्यमाणाःसंरब्धायुयुधानरथंप्रति तेरथैःकल्पितैराजनहेमरूप्यविभूषितैः सादिभिश्वगजैश्चैवपरिवव्रुःसमंततः अथै
नंकोष्ठकीकृत्यसर्वेतस्तेमहारथाः सिंहनादांस्ततश्चक्रुस्तर्जयंतिस्मसात्यकिं तेभ्यवर्षंछरैस्तीक्ष्णैःसात्यकिंसत्यविक्रमं त्वरमाणामहावीर्यामा

५

२०७ ध्वजस्यचैवविशांपते तानदृष्ट्वापततस्तूर्णंशैनेयःपर्वतोपमान प्रत्यगृह्णान्महाबाहुःप्रमुंचन्विशिखानबहून तत्रवीरोमहेष्वासःसात्यकिर्युद्धदुर्म्मदः शिर

कर्णशिरांस्युग्रैःशरैःसन्नतपर्वभिः हस्तिहस्तानहयग्रीवानबाहूनपिचमारिष क्षुरप्रैःशातयामासतावकानांसमाधवः पतितैश्चामरैश्चैवश्वेतछत्रैश्च

मारिष बभूवधरणीपूर्णानक्षत्रैर्द्यौरिवप्रभो एतेषांयुयुधानेनयुध्यतांयुधिमारिष बभूवशब्दःसुमहान्प्रेतानामिवक्रंदतामिव तेनशब्देनमहतापूरि

ताभूद्वसुधा रात्रिःसमभवच्चैवतीव्ररूपाभयावहा दीर्यमाणंबलंदृष्ट्वायुयुधानशराहतंश्रुत्वाचविपुलंनादंनिशीथेलोमहर्षणं सुतस्तवाब्रवीद्राजन

सारथिंरथिनांवरः यत्रैषशब्दस्तत्राश्वांश्चोदयेतिपुनःपुनः तेनसंचोद्यमानस्तुसूतस्तांस्तुरगोत्तमान सूतःसंचोदयामासयुयुधानरथंप्रति ततो

दुर्योधनःक्रुद्धोदृढधन्वाजितक्लमः शीघ्रहस्तश्चित्रयोधीयुयुधानमुपाद्रवत ततःपूर्णायतोत्सृष्टैःशरैःशोणितभोजनैः दुर्योधनोद्वादशभिर्मा

धवंप्रविभेदह दुर्योधनेनसतथापूर्वमेवार्दितःशरैः शैनेयोदशभिर्वीरःप्रत्यविध्यदमर्षितः ततःसमभवद्युद्धमाकुलंभरतर्षभ पांचालानां

चसर्वेषांभारतानांचदारुणं शैनेयस्तुरणेक्रुद्धस्तवपुत्रंमहारथं सायकानामशीत्यातुविव्याधोरसिभारत तस्यवाहान्समरेशरैर्निन्येयमक्ष

यं सारथिंचास्यतूर्णंपातयामासपत्रिणा हताश्वेतुरथेतिष्ठन्पुत्रस्तवविशांपते मुमोचनिशितानबाणानशैनेयस्यरथंप्रति शरानपंचाश

तस्तांस्तुशैनेयःकृतहस्तवत चिच्छेदसमरेराजन्प्रेषितांस्तनयेनते अथापरेणभल्लेनमुष्टिदेशेमहद्धनुः चिच्छेदतरसायुद्धेतवपुत्रस्यमारिष वि

रथोविधनुष्कश्चसर्वलोकेश्वरःप्रभुः आरुरोहरथंतूर्णंभास्वंतंकृतवर्मणः दुर्योधनेपराव्रत्तेशैनेयस्तववाहिनीं द्रावयामासविशिखैर्निशामध्येवि

शांपते शकुनिश्चार्जुनंराजन्परिवार्यसमंततः रथैरनेकसाहस्रैर्गजैश्चापिसहस्रशः तथाहयसहस्रैश्चनानाशस्त्रैरवाकिरत तेमहास्त्राणिसं

वीर्याणिविकिरंतोर्जुनंप्रति अर्जुनंचाभ्ययुध्यंतक्षत्रियाःकालचोदिताः तान्यर्जुनःसहस्राणिरथवारणवाजिनां प्रत्यवारयदायस्तःप्रकुर्व राम २०७

तोध

नविव्यथेसपुनः ततस्तमसौम्यःशकुनिःसौवलस्तदा विव्याधनिशितैर्वाणैरर्ज्जुनंप्रहसन्निव पुनश्चैवशतेनास्यसंरुरोधमहारथं तमर्ज्जु
नस्तुविंशत्याविव्याधयुधिमानिनं अथेतरान्महेष्वासांस्त्रिभिस्त्रिभिरविध्यत निवार्यतान्वाणगणैर्युधिराजन्धनंजयः जघानतावकान्यो
धान्वज्रपाणिरिवासुरान् भुजैश्छिन्नैर्महीपालहस्तिहस्तोपमैर्मृधे समाकीर्णामहीभातिपंचास्यैरिवपन्नगैः शिरोभिःसकिरीटैश्चसुनसैश्चा
रुकुंडलैः संदष्टोष्ठपुटैःक्रुद्धैस्तथैवोद्वृत्तलोचनैः निष्कचूडामणिधरैःक्षत्रियाणांप्रियंवदैः पंकजैरिवविन्यस्तैःपर्यस्तैर्विबभौमही कृत्वातत्क
र्मवीभत्सुरुग्रपराक्रमः विव्याधशकुनिंभूयःपंचभिर्नतपर्वभिः उलूकंचत्रिभिरेवतथाशरैः उलूकस्तथाविद्धोवासुदेवमता
डयत ननादचमहानादंपूरयन्निवमेदिनीं अर्ज्जुनःशकुनेश्चापंसायकैश्छिन्नदूरणे निन्येचतस्यवाहान्यमस्यसदनंप्रति ततोरथादव
प्लुत्यसौवलोभरतर्षभ उलूकस्यरथंतूर्णमारुरोहविशांपते तावेकरथमारूढौपितापुत्रौमहारथौ पार्थंसिषिचतुर्वाणैर्गिरिंमेघाविवां
वुभिः तौतुविद्ध्वामहाराजपांडवोनिशितैःशरैः विद्रावयंस्तवचमूंशतशोव्यधमच्छरैः अनिलेनयथाभ्राणिविच्छिन्नानिसमंततः वि
छिन्नानितथाराजन्बलान्यासन्विशांपते तद्बलंभरतश्रेष्ठवध्यमानंतथानिशि प्रदुद्रावदिशःसर्वावीक्ष्यमाणंभयार्दितं उत्सृज्यवाहान्स
मरेचोदयंतस्तथापरे संभ्रांताःपर्यधावंततस्मिन्समसिदारुणे विजित्यसमरेयोधांस्तावकान्भरतर्षभ दध्मतुर्मुदितौशंखौवासुदेवधनंज
यौ धृष्टद्युम्नोमहाराजद्रोणंविद्ध्वात्रिभिःशरैः चिच्छेदधनुषस्तूर्णंज्यांशरेणशितेनह तन्निधायधनुर्भूमौद्रोणःक्षत्रियमर्दनः आददे
न्यद्धनुःशूरोवेगवत्सारवत्तरं धृष्टद्युम्नंततोद्रोणोविद्ध्वासप्तभिराशुगैः सारथिंपंचभिर्वाणैराजन्विव्याधसंयुगे तन्निवार्यशरैस्तूर्णंधृ
ष्टद्युम्नोमहारथः अधमत्कौरवींसेनांमघवानिव वध्यमानेवलेतस्मिंस्तवपुत्रस्यमारिष प्रावर्त्ततनदीघोराशोणितौघतरंगिणी

उभयोः सेनयोर्मध्ये नराश्वद्विपवाहिनी। यथा वैतरणी राजन् यमराष्ट्रपुरं प्रति द्रावयित्वा ततः सैन्यं धृष्टद्युम्नः प्रतापवान् अभ्याजगततेज
द्रो० स्वी शक्रो देवगणेष्विव अथ दृष्टमहात्मानं धृष्टद्युम्नशिखण्डिनौ यमौ च युयुधानश्च पाण्डवश्च वृकोदरः जित्वा रथसहस्राणि तावकानां
२०८ महारथाः सिंहनादरवांश्चक्रुः पौरवाजिनि काशिनः पश्यतस्तव पुत्रस्य कर्णस्य च रणोत्कटाः तथा द्रोणस्य शूरस्य द्रौणेश्चैव विशांपते ॥
द्रोणपर्वणि णणत्रिपुडेः संजय उवाच विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्मभिः क्रोधेन महताविष्टः पुत्रस्तव विशांपते अभ्येत्य सहसा कर्णं
द्रोणं च जयतां वरं अमर्षवशमापन्नो वाक्यज्ञो वाक्यमब्रवीत् भवद्भ्यामिह संग्रामः क्रुद्धाभ्यां संप्रवर्तितः आहवे निहतं दृष्ट्वा सैन्धवं सव्यसाचि
ना निहन्यमानं पाण्डूनां बलेन मम वाहिनीं भूत्वा तद्विजये शक्तावशक्ताविव पश्यतः यद्यहं भवतोस्त्याज्यो न वाच्योस्मि तदेव हि आवां पाण्डुसु
तान्संख्ये जेष्याव इति मानदौ तदैवाहं वचः श्रुत्वा भवद्भ्यामनुसंमतं नाकरिष्यमिदं पार्थैर्वैरं योधविनाशनं यदि मां हि परित्याज्यो भवद्भ्यां
पुरुषर्षभौ युध्यतामनुरूपेण विक्रमेण सुविक्रमौ वाक्यप्रतोदेन तौ वीरौ प्रणुन्नौ तनयेन ते प्रावर्तयेतां संग्रामं घट्टिताविव पन्नगौ ततस्
तौ रथिनां श्रेष्ठौ सर्वलोकधनुर्धरौ शैनेयप्रमुखान्पार्थानभिदुद्रुवतू रणे तथैव सहिताः पार्थाः सर्वसैन्येन संवृताः अभ्यवर्तन्त तौ वीरौ नर्द
मानौ मुहुर्मुहुः अथ द्रोणो महेष्वासो दशभिः शिनिपुङ्गवं अविध्यत्त्वरितं क्रुद्धः सर्वशस्त्रभृतां वरः कर्णश्च दशभिर्बाणैः पुत्रश्च तव सप्तभिः
दशभिर्वृषसेनश्च सौबलश्चापि सप्तभिः एते कौरवसंक्रन्दे शैनेयं पर्यवारयन् दृष्ट्वा च समरे द्रोणं निघ्नन्तं पाण्डवीं चमूं विव्यधुः सोमकास्तूर्णं
समन्ताच्छरवृष्टिभिः ततो द्रोणोहरत्प्राणान्क्षत्रियाणां विशांपते रश्मिभिर्भास्करो राजंस्तमांसीव समंततः द्रोणेन वध्यमानानां पाञ्चालानां वि
शांपते शुश्रुवे तुमुलः शब्दः क्रोशतामितरेतरं पुत्रानन्ये पितॄनन्ये भ्रातॄनन्ये च मातुलान् भागिनेयान्वयस्यांश्च तथा संबन्धिबान्धवान् एम
२०८

उत्सृज्योत्सृज्य गच्छंति लीयंतो जीवितेप्सवः अथ ते मोहिता मोहात्तमेवाभिमुखा ययुः पांडवानां रणे योधाः परलोकं गताः परे सा तथा पांड
वी सेना पीड्यमाना महात्मना निशि संप्राद्रवद्राजन्नुत्सृज्योल्काः सहस्रशः पश्यतो भीमसेनस्य विजयस्याच्युतस्य च यमयोर्धर्मपुत्रस्य
पार्षतस्य च पश्यतः तमसा संवृते लोके न प्राज्ञायत किंचन कौरवाणां प्रकाशेन दृश्यंते विद्रुताः परे द्रवमाणं तु तत्सैन्यं द्रोणकर्णौ महा
रथौ जघ्नतुः पृष्ठतो राजन्किरंतौ सायकान्बहून् पांचालेषु प्रभग्नेषु क्षीयमाणेषु सर्वतः जनार्दनो दीनमनाः प्रत्यभाषत फाल्गुनं द्रोणक
र्णौ महेष्वासावेतौ पार्षतसात्यकी पांचालांश्चैव सहितौ जघ्नतुः सायकैर्भृशं एतयोः शरवर्षेण प्रभग्ना नो महारथाः वार्यमाणापि कौंतेय पृत
ना नावतिष्ठते तावावां सहसैन्यैश्च ह्यहेः सम्यग्गुरायुधैः द्रोणं च सूतपुत्रं च प्रयतावः प्रबाधितुं एतौ हि बलिनौ शूरौ कृतास्त्रौ जितकाशिनौ
उपेक्षितौ तव बलं त्वेतौ नाशयेतां निशामिमां तयोः संवदतोरेवं भीमकर्मा महाबलः आयातस्तु वृकोदरः शीघ्रं पुनरावर्त्य वाहिनीं वृकोदरमथा
यांतं दृष्ट्वा तत्र जनार्दनः पुनरेवाब्रवीद्राजन्हर्षयन्निव पांडवं एष भीमो रणश्लाघी वृतः सोमकपांडवैः रुषितोऽभ्येति वेगेन द्रोणकर्णौ महारथौ
एतेन सहितो युध्य पांचालैश्च महारथैः आश्वासनार्थं सैन्यानां सर्वेषां पांडुनंदन ततस्तौ पुरुषव्याघ्रावुभौ माधवपांडवौ द्रोणकर्णौ समा
साद्य धिष्ठितौ रणमूर्द्धनि संजय उ० ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् ततो द्रोणश्च कर्णश्च परान्ममृदतुर्युधि स संप्रहारस्तुमुलो निशि
प्रत्यभवन्महान् यथा सागरयो राजंश्चंद्रोदयविवृद्धयोः ततउत्सृज्य पाणिभ्यः प्रदीपांस्तव वाहिनी युयुधे पांडवैः सार्द्धमुन्मत्तेव तदाकुले
रजसा तमसा चैव संवृते भृशदारुणे केवलं नामगोत्रेण प्रायुध्यंत जयैषिणः अश्रूयंत हि नामानि श्राव्यमाणानि पार्थिवैः प्रहारिभिर्महाराज
स्वयंवार इवाहवे निःशब्दमासीत्सहसा पुनः शब्दो महानभूत् क्रुद्धानां युध्यमानानां जीयतां जयतामपि यत्र यत्र स्म दृश्यंते प्रदीपाः कुरुसत्तम

द्रो
रायु
२०१५

तत्रतत्रव्यदृश्यंतनियतंतनिपतंगवत् तथासंयुध्यमानानांविराटासीन्महानिशा पांडवानांचराजेन्द्रकौरवाणांचसर्वशः द्रोणपर्वणिरा
त्रियुद्धे संजयउवाच ततःकर्णोरणेदृष्ट्वापार्षतंपरवीरहा आजघानोरसिशरैर्दशभिर्मर्मभेदिभिः प्रतिविव्याधतंकर्णंधृष्टद्युम्नोपिमारिष
दशभिःसायकैर्हृष्टस्तिष्ठतिष्ठेतिचाब्रवीत् तावन्योन्यंशरैःसंख्येसंछाद्यसुमहारथौ पुनःपूर्णायतोत्सृष्टैर्विव्यधातेपरस्परं ततःपांचालमुख्यस्य
धृष्टद्युम्नस्यसंयुगे सारथिंचतुरश्चाश्वान्कर्णोविव्याधसायकैः कार्मुकप्रवरंचापिप्रचिच्छेदशितैःशरैः सारथिंचास्यभल्लेनरथनीडादपातयत्
धृष्टद्युम्नस्तुविरथोहताश्वोहतसारथिः गृहीत्वापरिघंघोरंकर्णस्याश्वानपीपिषत् विद्धश्चबहुभिस्तेनशरैराशीविषोपमैः ततोयुधिष्ठिरानीकंपद्भ्या
मेवान्वपद्यत आरोहद्रथंचापिसहदेवस्यमारिष प्रयाणकामःकर्णायवारितोधर्मसूनुना कर्णोपिसुमहातेजाःसिंहनादविमिश्रितं धनुः
शब्दंमहच्चक्रेदध्मौतारेणवाम्बुजं दृष्ट्वाविनिर्जितंयुद्धेपार्षतंतेमहारथाः अमर्षवशमापन्नाःपांचालाःसहसोमकाः सूतपुत्रवधार्थायशस्त्रा
ण्यादायसर्वशः प्रययुःकर्णमुद्दिश्यमृत्युंकृत्वानिवर्तनं कर्णस्यापिरथेवाहानन्यान्सूतोप्ययोजयत् शंखवर्णान्महावेगान्सैंधवान्साधुवा
हिनः लब्धलक्षस्तुराधेयःपांचालानांमहारथान् अभ्यपीडयद्यत्नेनशरैर्मेघइवाचलान् सापीड्यमानाकर्णेनपांचालानांमहाचमूः संप्रा
द्रवत्सुसंत्रस्तासिंहेनेवार्दितामृगाः पतितास्तुरगेभ्यश्चगजेभ्यश्चमहीतले रथेभ्यश्चनरास्तूर्णमदृश्यंततस्ततः धावमानस्ययोधस्यक्षुरप्रैः
समहामृधे बाहूचिच्छेदवैकर्णःशिरश्चैवसकुंडलं ऊरूचिच्छेदचान्यस्यगजस्थस्यविशांपते वाजिपृष्ठगतस्यापिभूमिष्ठस्यचमारिष नाज्ञासिषु
र्धावमानाबहवश्चमहारथाः संछिन्नान्यात्मगात्राणिवाहनानिचसंयुगे तेवध्यमानाःसमरेपांचालाःसृंजयैःसह तृणप्रस्पंदनाच्चापिसूतपुत्रं
स्ममेनिरे अपिस्वंसमरेयोधंधावमानंविचेतसः कर्णमेवाभ्यमन्यंततद्भीतादुद्रुवुस्ततः तान्यनीकानिभग्नानिद्रवमाणानिभारत अभ्यद्रव

रम.
रायु

१२ ६७

ततंकर्णः पषतोविकिरंछरान अवेक्षमाणालभ्योमां हसस्मृतविवेत एनाशक्त्यावज्रकल्पोत्तुकाल्यमानामहात्मना कौंतेनाभ्याहताराजन्पांचालाः प
रिमृष्टिभिः द्रोणेनचदिशःसर्वा वीक्षमाणाः प्रदुद्रुवुः ततोयुधिष्ठिरोराजादृष्ट्वासैन्यंप्रेक्ष्यविद्रुतं अपयानेमनःकृत्वाफाल्गुनंवाक्यमब्रवीत पश्यकर्णंमहेष्वासंध
नुष्पाणिमवस्थितंनिशीथेदारुणेकालेतपंतमिवभास्करं कर्णसायकनुन्नानांक्रोशतामेवनिस्वनः अनिशंश्रूयतेपार्थत्वद्बंधूनामनाथवत यथावि
सृजतश्चास्यसंदधानस्यचाशुगान् पश्यामिनाततोपार्थक्षपयिष्यतिनोध्रुवं यदत्रानंतरंकार्यंप्राप्तकालेचपश्यसि कर्णस्यवधसंयुक्तंतत्कुरुष्वधनंजय
एवमुक्तोमहाराजपार्थः कृष्णमथाब्रवीत भीतःकुंतीसुतोराजाराधेयस्यातिविक्रमात् एवंगतेप्राप्तकालेकर्णानीकेपुनःपुनः भवानध्यवसत्क्षिप्रं
द्रवतेहिवरूथिनी द्रोणसायकनुन्नानांभग्नानांमधुसूदन कौरवैस्त्रास्यमानानामवस्थानंनविद्यते पश्यामिचतथाकर्णंविचरंतमभीतवत द्र
वमाणंरथोदारंकिरंतंनिशितैःशरैः नैनंशक्ष्यामिसंसोढुंचरंतंरणमूर्धनि प्रसर्पंतंयथाशार्दूलंपादस्पर्शमिवोरगः सभवानत्रयात्वाशुयत्र
कर्णोमहारथः अहमेनंहनिष्यामिपांचैवमधुसूदन वासुदेवउवाच पश्यामिकर्णंकौंतेयदेवराजमिवाहवे विचरंतंनरव्याघ्रमतिमानुषविक्र
मं नैतस्यान्योस्तिसंग्रामेप्रत्युद्याताधनंजय ऋतेत्वांपुरुषव्याघ्रराक्षसाद्वाघटोत्कचात् नतुतावदहंमन्येप्राप्तकालंतवानघ समागमंमहाबाहो
सूतपुत्रेणसंयुगे दीप्यमानामहोल्केवतिष्ठत्यस्यहिवासवी त्वदर्थंहिमहाबाहोसूतपुत्रेणसंयुगे रक्ष्यतेशक्तिरेषाहिरौद्ररूपंबिभर्तिच घटोत्कचस्तु
राधेयंप्रत्युद्यातुमहाबलः सहिभीमेनबलिनाजातःसुरपराक्रमः तस्मिन्नस्त्राणिदिव्यानिराक्षसान्यासुराणिच सततंचानुरक्तोवोहितैषीचघटो
त्कचः विजेष्यतिरणेकर्णमितिमेनात्रसंशयः एवमुक्तोमहाबाहुःपार्थःपुष्करलोचनः आजुहावाथतद्रक्षःतच्चासीत्प्रादुरग्रतः कवचीसशरः
खड्गीसधन्वाचविशांपते अभिवाद्यततःकृष्णंपांडवंचधनंजयं अब्रवीच्चतदाकृष्णमयमस्म्यनुशाधिमां ततस्तंदीप्तसंकाशंदीप्तास्यंदीप्तकुंडलं

अभ्यभाषत हैडिंबिं हर्षाद्धि: प्रहसन्निव वासुदेव उवाच घटोत्कच विजानीहि यत्त्वां वक्ष्यामि पुत्रक प्राप्तो विक्रमकालोयं तव नान्यस्य कस्यचित्
समवाप्नज्जमानानां बंधूनां त्वं प्लवो भव विविधानि तवास्त्राणि संति माया च राक्षसी पश्य कर्णेन हैडिंबे पांडवानामनीकिनी काल्यमानाय
थागाव: पालेन रणमूर्द्धनि एष कर्णो महेष्वासो मतिमान्दृढविक्रम: पांडवानामनीकेषु निहंति क्षत्रियर्षभान् किरत: शरवर्षाणि महांति दृढध
न्विन: न शक्नुवंत्यवस्थातुं पीड्यमाना: शरार्चिषा निशीथे सूतपुत्रेण शरवर्षेण पीडिता: एते द्रवंति पांचाला: सिंहेनेवार्दिता मृगा: एतस्यैवं
प्रवृद्धस्य सूतपुत्रस्य संयुगे निषेद्धा विद्यते नान्यस्त्वामृते भीमविक्रम सत्वं कुरु महाबाहो कर्म युक्तं महात्मन: मातुलानां पितृणां च तेजसोस्त्र
केन च एतदर्थं हि हैडिंबि पुत्रानिच्छंति मानवा: कथं न तारयेत् दु:खात्सत्वं तारय बांधवान् इच्छंति पितर: पुत्रान्स्वार्थहेतोर्घटोत्कच इहलो
कात्परे लोके त्राणार्थं तेपहिता: तव चास्त्रबलं भीमं मायाश्च तव दुस्तरा: संग्रामे युध्यमानस्य सततं भीमनंदन पांडवानां प्रभग्नानां कर्णेन नि
शि सायकै: मज्जतां धार्तराष्ट्रेषु भव पारं परंतप राक्षसा हि भूयो भवंत्यमितविक्रमा: बलवंत: सुदुर्द्धर्षा: शूरा विक्रांतचारिण: जहि कर्णं
महेष्वासं निशीथे मायया रणे पार्था द्रोणं वधिष्यंति धृष्टद्युम्नपुरोगमा: संजय उ॰ केशवस्य वच: श्रुत्वा बीभत्सुरपि राक्षसं अभ्यभाषत कौरव्य
घटोत्कचमरिंदमं घटोत्कच भवांश्चैव दीर्घबाहुश्च सात्यकि: मतो मे सर्वसैन्येषु भीमसेनश्च पांडव: तद्भवान्यातु कर्णेन द्वैरथं युध्यतां निशि
सात्यकि: पृष्ठगोपस्ते भविष्यति महारथ: जहि कर्णं रणे शूरं सात्वतेन सहायवान् यथेंद्रस्तारकं पूर्वं स्कंदेन सह जघ्निवान् घटोत्कच उवाच अलमे
वास्मि कर्णाय द्रोणायालं च भारत अन्येषां क्षत्रियाणां च कृतास्त्राणां महात्मनां अद्य दास्यामि संग्रामं सूतपुत्राय तं निशि यं जना: संप्रवक्ष्यंति या
वद्भूमिर्धरिष्यति न चात्र शूरान्मोक्ष्यामि न भीतान्च कृतांजलीन् सर्वानेव वधिष्यामि राक्षसं धर्ममास्थित: संजय उवाच एवमुक्त्वा महाबाहुर्है

डिंवः परवीरहा अभ्ययात्समरे कर्णं तव सैन्यं विभीषयन् तमापतन्तं संक्रुद्धं दीप्तास्यमिव पन्नगं अभ्ययात्स परमेष्वासः प्रतिजग्राह सूतजः
तयोः समभवद्युद्धं कर्णराक्षसयोर्मृधे गर्जतो राजशार्दूल शक्रप्रह्लादयोरिव द्रोणपर्वणि एतत्रिपुद्धे सञ्जय उवाच दृष्ट्वा घटोत्कचं राजन्सूतपुत्र
वधं प्रति आयान्तं तु तथा युक्तं जिघांसुं कर्णमाहवे अब्रवीत्तव पुत्रस्तु दुःशासनमिदं वचः एतद्रक्षो रणे तूर्णं दृष्ट्वा कर्णस्य विक्रमं अभियाति द्रुतं क
र्णं तद्वारय महारथं वृतः सैन्येन महता याहि यत्र महाबलः कर्णो वैकर्तनो युद्धे राक्षसेन युयुत्सति रक्षः कर्णं रणे यत्तो वृतः सैन्येन मानद मा कं
र्णं राक्षसो घोरः प्रमादान्नाशयिष्यति एतस्मिन्नन्तरे राजञ्जटासुरसुतो बली दुर्योधनमुपागम्य प्राह प्रहरतां वरः दुर्योधन तवामित्रान्प्रख्यातान्युद्धदुर्मदा
न् पाण्डवान्हन्तुमिच्छामि लब्धपदानुगान् जटासुरो मम पिता रक्षसां ग्रामणीः पुरा प्रयुज्य कर्म रक्षोघ्नैः क्षुद्रैः पार्थैर्निपातितः तस्यापचिति
मिच्छामि त्वद्दिष्टां तमीप्सया तमब्रवीत्ततो राजा प्रीयमाणः पुनः पुनः द्रोणकर्णादिभिः सार्धं पर्याप्तोहं द्विषद्वधे त्वं तु गच्छ मयाज्ञप्तो जहि युद्धे
द्धे घटोत्कचं राक्षसं क्रूरकर्माणं रक्षोमानुषसंभवं पाण्डवानां हिते नित्यं हस्त्यश्वरथघातिनं वैहायसगतं युद्धे प्रेषय यमसादनं तथेत्युक्त्वा
महाकायः समाहूय घटोत्कचं जटासुरिर्भैमसेनिं नानाप्रहरणैरवाकिरत् अलंबुषं च कर्णं च कुरुसैन्यं च दुस्तरं हैडिम्बिः प्रममाथैको महावातोऽम्बु
दानिव ततो मायाबलं दृष्ट्वा रक्षस्तूर्णमलंबुषः घटोत्कचं शरव्रातैर्नानालिङ्गैः समार्दयत् भित्वा च बहुभिर्बाणैर्भैमसेनिमलंबुषः व्यद्रा
वयच्छरव्रातैः पाण्डवानामनीकिनीं तेन विद्राव्यमाणानि पाण्डुसैन्यानि भारत निशीथे विप्रकीर्यन्त वातनुन्ना घना इव घटोत्कचशरैर्नुन्ना त
थैव तव वाहिनी निशीथे प्राद्रवद्राजन्नुत्सृज्योल्काः सहस्रशः अलंबुषस्ततः क्रुद्धो भैमसेनिं महामृधे आजघ्ने दशभिर्बाणैस्तोत्रैरिव महा
द्विपं तिलशस्तस्य तं वाहं सूतं सर्वायुधानि च घटोत्कचः प्रचिच्छेद प्रणदन्सुविदारुणं ततः कर्णं शरव्रातैः कुरूनन्यान्सहस्रशः अलंबुसं चाभ्य

जि५

द्रो॰ वर्षन्मेघो मेरुमिवाचलं ततः संचुक्षुभे सैन्यं कुरूणां राक्षसार्दितं उपर्युपरि चान्योन्यं चतुरंगं ममर्द ह जटासुरिर्महाराज विरथो हतसारथिः घटोत्क
२११ चं रणे क्रुद्धो मुष्टिनाभ्यहनद्दृढं मुष्टिनाभिहतस्तेन प्रचचाल घटोत्कचः क्षितिकंपे यथा शैलः सवृक्षगणगुल्मवान् ततः सपरिघाभेन द्विषद्घ
घ्नेन बाहुना जटासुरिं भैमसेनिर्निरवधीन्मुष्टिना भृशं तं प्रमथ्य ततः क्रुद्धस्तूर्णं हैडिंबिराक्षिपत् दोर्भ्यामिन्द्रध्वजाभाभ्यां निष्पिपेष च भूतले अलं
बुसो विनिक्षिप्य समुत्थाय च आशु सः घटोत्कचं रणे राजन्निष्पिपेष महीतले तयोः समभवद्युद्धं गर्जतोरतिकाययोः घटोत्कचालंबुसयोस्तुमु
लं लोमहर्षणं विशेषयन्तावन्योन्यं मायाभिरतिमानिनौ युयुधाते महावीर्याविंद्रवैरोचनाविव पावकांबुनिधी भूत्वा पुनर्गरुडतक्षकौ पुनर्मे
घमहावातौ पुनर्वज्रमहाबलौ पुनः कुंजरशार्दूलौ पुनः स्वर्भानुभास्करौ एवं मायाशतसृजावन्योन्यवधकांक्षिणौ भृशं विचित्रमयुध्येतामलंबुस
घटोत्कचौ परिघैश्च गदाभिश्च प्रासमुद्गरपट्टिशैः मुशलैः पर्वताग्रैश्च तावन्योन्यं विनिघ्नतुः हयाभ्यां च गजाभ्यां च पदातिरथिनौ पुनः युयुधाते
महामायौ राक्षसप्रवरौ युधि ततो घटोत्कचो राजन्नलंबुसवधेप्सया उत्पपात भृशं क्रुद्धः श्येनवन्निपपात च गृहीत्वा च महाकायं राक्षसेंद्रमलंबुसं
उद्यम्य न्यवधीद्भूमौ मयं विष्णुरिवाहवे ततो घटोत्कचः खड्गमुद्गृह्याद्भुतदर्शनं चकर्त कायाद्धि शिरो भीमं विकृतदर्शनं स्फुरतस्तस्य समरे नदतश्चाति
भैरवं चिच्छेद स महाराज शत्रोरमितविक्रमः शिरस्तद्रुधिरसंग्रथितकेशं रुधिरोक्षितं ययौ घटोत्कचस्तूर्णं दुर्योधनरथं प्रति अभ्येत्य च महाबाहुः स्म
यमानः स राक्षसः शिरोऽस्य निक्षिप्य विकृताननमूर्धजं प्राणदद्भैरवं नादं प्रावृषीव बलाहकः अब्रवीच्च ततो राजन्दुर्योधनमिदं वचः एष ते नि
हतो बंधुस्त्वया दृष्टः स्वविक्रमः पुनर्द्रष्टासि कर्णं त्वं निष्ठामेतां तथात्मनः स्वधर्ममर्थं कामं च त्रितयं योऽभिवांछति रिक्तपाणिर्न पश्येत राजानं ब्राह्म
णं स्त्रियं सप्रीतस्तावत्तिष्ठस्व यावत्कर्णं वधाम्यहं एवमुक्त्वा ततः प्रायात्कर्णं प्रति नरेश्वर किरंछरशतांस्तीक्ष्णान्विमुंचत्कर्णमूर्धनि ततः सम एम॰

२११

भवयुद्धंघोररूपंभयानकं विस्मापनंमहाराजनानाशस्त्रसमागमे ॥ द्रोणपर्व्वणिरात्रियुद्धेअलंबुसवधः धृतराष्ट्रउवाच यत्तद्वैकर्त्तनःकर्णोराक्ष
सश्चघटोत्कचः निशीथेसमसज्जेतांतद्युद्धमभवत्कथं कीदृशंचाभवद्रूपंतस्यघोरस्यरक्षसः कथंचकीदृशंतस्यहयाःसर्वायुधानिच किंप्रमाणा
रूपात्तस्यघटोत्कचस्यधनुस्तथा कीदृशंवर्म्म चैवास्यशिरस्त्राणंचकीदृशं पृष्टस्त्वमेतदाचक्ष्वकुशलोह्यसिसंजय संजयउवाच लोहिताक्षोमहा
कायस्ताम्रास्योनिम्नितोदरः ऊर्द्ध्वरोमाहरिश्मश्रुःशंकुकर्णोमहाहनुः आकर्णाद्दारितास्यश्चतीक्ष्णदंष्ट्रःकरालवान् सुदीर्घताम्रजिह्वोष्ठोलंबभ्रूःस्थू
लनासिकः नीलांगोलोहितग्रीवोगिरिवर्ष्माभयंकरः महाकायोमहाबाहुर्महाशीर्षोमहाबलः विकृतःपरुषस्पर्शोविकटोद्बद्धपिंडिकः स्थूलस्फि
ग्गूढनाभिश्चशिथिलोपचयोमहान् तथैवहस्ताभरणीमहामायोंगदीतथा उरसाधारयन्निष्कमग्निमालांयथाचलः तस्यहेममयंचित्रंबहुरू
पांगशोभितं तोरणप्रतिमंशुभ्रंकिरीटंमूर्द्ध्न्यशोभत कुंडलेबालसूर्याभेमालांहेममयींशुभां धारयन्विपुलंकांस्यंकवचंचमहाप्रभं किंकिणी
शतनिर्घोषंरक्तध्वजपताकिनं ऋक्षचर्मावनद्धांगंनल्वमात्रंमहारथं सर्वायुधवरोपेतमास्थितंध्वजमालिनं अष्टचक्रसमायुक्तंमेघगंभीरनिस्वनं
मत्तमातंगसंकाशालोहिताक्षाविभीषणाः कामवर्णजवायुक्ताबलवंतोश्वतंहयाः वहंतोराक्षसंघोरंबलवंतोजितश्रमाः विपुलाभिःसटाभिस्तेह्रे
षमाणाःमुहुर्मुहुः राक्षसोस्यविरूपाक्षःसूतोदीप्तास्यकुंडलः रश्मिभिःसूर्यरश्म्याभैःसंजग्राहहयान्रणे सतेनसहितस्तस्थावरुणेनयथारविः स
सक्तइवचाभ्रेणयथाद्रिर्महतामहान् दिविस्पृक्सुमहान्केतुःस्यंदनेस्यसमुच्छ्रितः रक्तोत्तमांगःक्रव्यादोगृध्रःपरमभीषणः वासवाशनिनिर्घोषंदृ
ढमाविक्षिपन् व्यक्तंकिष्कुपरीणाहंद्वादशारत्निकार्मुकं रथाक्षमात्रैरिषुभिःसर्वाःप्रच्छादयन्दिशः [redacted] तस्यांवीरापहारिण्यांनिशायांअभ्यात् समकंपंतसर्वाणिसैन्यानि

कर्णमभ्यपाततस्यागच्छतश्चापंस्यविष्फारितकतस्य अशनिरूपतधनुर्घोषोविस्फूर्जितमिवाशनेः तेनवित्रास्यमानानितवसैन्यानि

द्रो० रिवमहोर्म्मयः तमापतन्तं संप्रेक्ष्य विस्फार्य सुविभीषणं उत्तमं परिघं घोरं विधुन्वन्समरे तदा ततः कर्णो महाबाहुः समन्तात्संप्रवर्तितः
२१२ न मातंगमिवमातंगं प्रत्यर्पयन्निवर्षभः समन्निपातस्तयोरासीत्तयोः हिंसां प्रति कर्णस्य राक्षसस्य च तत्र तूर्णं तयोरिह तौ परस्परं महा
वेगवन्तौ भीमौ मन्निमन्त्रे प्रहारयेतामन्योन्यं समरे घोरमात्मनो महेषुभिः ततः पूर्णायतोत्सृष्टैः शिलीमुखैर्नतपर्वभिः निवारयेतामन्योन्यं कायम्
निर्भिद्य वर्मणी तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ रथशक्तिभिरन्योन्यं विशिखैश्च ततस्ततः संछिन्दन्तौ च गात्राणि संदधानौ च सायकैः
दहन्तौ च शरोल्काभिर्दुष्प्रेक्षौ च बभूवतुः तौ तु विक्षतसर्वांगौ रुधिरौघपरिप्लुतौ व्यभ्राजेतां यथा वारि स्रवन्तौ गैरिकाचलौ तौ शराग्रविभिन्नाङ्गौ
निर्भिन्दन्तौ परस्परं नाकम्पयेतामन्योन्यं यतमानौ महाद्युती तत्प्रवृत्तं निशायुद्धं चिरं सममिवाभवत् प्राणयोर्दीव्यतोस्तत्र कर्णराक्षसयोर्मृधे
तस्य संदधतस्तीक्ष्णांश्छरांश्चासक्तमस्यतः धनुर्घोषेण वित्रस्ताः स्वेपरे च तदाभवन् घटोत्कचं यदा कर्णो विशेषयति नो नृप ततः प्रादुष्करोद्दि
मस्त्रे५ अमस्त्रं विदांवरः कर्णेन विहितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः प्रादुश्चक्रे महामायां राक्षसः पाण्डुनन्दनः शूलमुद्गरधारिण्या शैलपादपहस्तया रक्षसां
घोररूपाणां महत्या सेनया वृतः तमुद्यतमहाचापं दृष्ट्वा ते पार्थिवा नृपाः भूतान्तकमिवायान्तं कालदण्डोग्रधारिणं घटोत्कचप्रमुक्तेन सिंहनादेन भी
षिताः प्रचस्खलुर्गजाः मूत्रं विव्यथुश्च नरा भृशं ततोऽश्मवृष्टिरत्युग्रा महत्यासीत्समन्ततः अर्धरात्रेऽधिकबलैर्विमुक्ता रक्षसां बलैः आयसानि च चक्रा
णि भुशुण्ड्यः शक्तितोमराः पतन्त्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिप पुत्राश्च तव योधाश्च व्यथिता विप्रदुद्रुवुः
तत्रैकोऽस्त्रबलश्लाघी कर्णो मानी न विव्यथे व्यधमच्च शरैर्मायां घटोत्कचविनिर्मितां मायायां तु प्रहीणायाममर्षात्स घटोत्कचः विससर्ज शरान्
घोरान्सूतपुत्रं त आविशन् ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे विविशुर्धरणीं बाणाः संक्रुद्धा इव पन्नगाः सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्र लम
६५ ७२ २१२

तापवान् घटोत्कचमतिक्रम्य विभेद दशभिः शरैः घटोत्कचो ऽपि निर्भिन्नः सूतपुत्रेण मर्मसु चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितो भृशं क्षुरान्तं बालसू
र्याभं मणिरत्नविभूषितं चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघांसया प्रविद्धमतिवेगेन विक्षिप्तं कर्णसायकैः अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि
घटोत्कचस्तु संक्रुद्धो दृष्ट्वा चक्रं निपातितं कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करं सूतपुत्रस्त्वसंभ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः घटोत्कचरथं तूर्णं छा
दयामास पत्रिभिः घटोत्कचेन क्रुद्धेन गदा हेमाङ्गदा तदा क्षिप्ता भ्राम्य शरैः सापि कर्णेनाभ्याहतापतत् ततो ऽन्तरिक्षमुत्पत्य कालमेघ इवोन्नदन् प्र
ववर्ष महाकायो द्रुमवर्षं नभस्तलात् ततो मायाविनं कर्णो भीमसेनसुतं दिवि मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः तस्य सर्वान्हयान्हत्
वा संछिद्य शतधा रथं अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान् न चास्यासीदनिर्भिन्नं गात्रे द्व्यङ्गुलमन्तरं सो ऽदृश्यत मुहूर्तेन श्वाविच्छललितो य
था न हयान्न रथं तस्य न ध्वजं न घटोत्कचं दृष्टवन्तः स्म समरे शरौघैरभिसंवृतं स तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण शातयन् मायायुद्धेन मायावी सू
तपुत्रमयोधयत् सो ऽयोधयत्तदा कर्णं मायया लाघवेन च अलक्ष्यमाणानि दिवि शरजालानि चापतन् भैमसेनिर्महामायो मायया कुरुसत्त
म विचचार महाकायो मोहयन्निव भारत स तु कृत्वा विरूपाणि वदनान्यशुभानि च अग्रसत्सूतपुत्रस्य दिव्यान्यस्त्राणि मायया पुनश्चापि महा
कायः संछिन्नः शतधा रणे गतसत्त्वो निरुत्साहः पतितः खादृश्यत तं हतं मन्यमानाः स्म प्राणदन्कुरुपुंगवाः अथ देहैर्नवैरन्यैर्दिक्षु सर्वास्वभा
रत पुनश्चापि महाकायः शतशीर्षः शतोदरः अदृश्यत महाबाहुर्मैनाक इव पर्वतः अङ्गुष्ठमात्रो भूत्वा च पुनरेव स राक्षसः सागरोर्मिरिवो
द्धूतस्तिर्यगूर्ध्वमवर्तत वसुधां दारयित्वा च पुनरप्सु न्यमज्जत अदृश्यत तदा तत्र पुनरुन्मज्जितो ऽन्यतः सो ऽवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते
क्षितिं द्यां च दिशश्चैव माययाभ्येत्य दंशितः गत्वा कर्णरथाभ्याशं विचलत्कुण्डलाननः प्राह वाक्यमसंभ्रान्तः सूतपुत्रं विशांपते तिष्ठेदानीं क्व मे

श्लो४

जीवन्नतःपुत्रगमिष्यसि पुष्कृष्टामहतेनघविनेद्यामिरराजिरे ह्रसुल्काएषतास्त्राश्वोक्षः क्रापणाक्रमं । उत्तपातांततोश्लंचत्रहायवचतुविलां
कर्णोमस्यहतेनैवघराजेस्त्वेषकेसरी । थोऽश्मांत्रेशिष्वभिःप्स्यवर्षेद्घटोत्कचः रथिनामृषभंकर्णोधारामिविवनोपदः शास्त्रपिंचंतांकर्णोद्धूएतत्राग्राम
शातयत दृष्ट्वाचविद्धूतांमायांकर्णेनभारतर्षभ घटोत्कचस्ततोमायांससर्जांतर्हितःपुनः सोभवद्गिरिरत्युच्चःशिखरैस्तरुसंकटैः शूल
प्रासासिमुशलप्रस्रवणोमहान् तमंजनचयप्रख्यंकर्णोदृष्ट्वामहीधरं प्रपातैरायुधान्युग्रान्मुंचमानंनचुक्षुभे स्मयन्निवततःकर्णोदिव्यम
स्त्रमुदैरयत ततःसोस्त्रेणशैलेंद्रोविक्षिप्तोवैव्यनश्यत ततःसतोयदोभूत्वानीलः सेंद्रायुधोदिवि अश्मवृष्टिभिरत्युग्रःसूतपुत्रमवाकिरत्
स्त्वथसंधायवायव्यमस्त्रमस्त्रविदांवरः व्यधमत्कालमेघंतंकर्णोवैकर्तनोवृषः समार्गणगणैःकर्णोदिशःप्रच्छाद्यसर्वशः जघानास्त्रंमहाराज
घटोत्कचसमीरितं ततःप्रहस्यसमरेभैमसेनिर्महावलः प्रादुश्चक्रेमहामायांकर्णंप्रतिमहारथे सदृष्ट्वापुनरायांतंरथेनरथिनांवरं घटोत्क
चमसंभ्रांतंराक्षसैर्वहुभिर्वृतं सिंहशार्दूलसदृशैर्मत्तमातंगविक्रमैः गजस्थैश्चरथस्थैश्चवाजिपृष्ठगतैस्तथा नानाशस्त्रधरैर्घोरैर्नानाकव
चभूषणैः वृतंघटोत्कचंक्रूरैर्मरुद्भिरिववासवं दृष्ट्वाकर्णोमहेष्वासोयोधयामासराक्षसं घटोत्कचस्ततःकर्णंविध्वापंचभिराशुगैः ननादभैरवं
नादंभीषयन्सर्वपार्थिवान् भूयश्चांजलिकेनाथसमार्गणगणंमहत् कर्णहस्तस्थितंचापंचिच्छेदाशुघटोत्कचः अथान्यद्धनुरादायदृढं
भारसहंमहत् विचकर्षवलात्कर्णोमिंद्रायुधमिवोच्छ्रितं ततःकर्णोमहाराजप्रेषयामाससायकान् सुवर्णपुंखाञ्छत्रुघ्नान्खचरान्राक्षसान्प्र
ति तद्बाणैरर्दितंयूथंरक्षसांपीनवक्षसां सिंहेनेवार्दितंवन्यंगजानामाकुलंबभौ विधम्यराक्षसान्बाणैःसाश्वसूतगजान्विभुः ददाहभगवान्व
ह्निर्भूतानीवयुगक्षये सहत्वाराक्षसींसेनांशुशुभेसूतनंदनः पुरेवत्रिपुरंदग्ध्वादिविदेवोमहेश्वरः तेषुराजसहस्रेषुपांडवेयेषुमारिष नैनं राम

क.१२

निःसितमपि कश्चिद्धक्ता निपार्थिव अस्तेन घटोत्कचाद्राजन्मायां विषाम्नेह दिव्यं च तस्मिंस्तत्तेन संहृत्य संदृश्यपाहृशनच्छेदं रथमास्थाय च पुन
र्मायया निर्मितं तत्र पुत्रको राजन्निर्मितैर्वाहैः पिशाचवदनैः खरैः स सूतमब्रवीत्क्रुद्धः सूतपुत्राय मां वह स ययौ घोररूपेण तेन रथेन रथिनां वरः हैर
थं सूतपुत्रेण पुनरेव विशीर्यते स चिक्षेप पुनः क्रुद्धः सूतपुत्राय राक्षसः अष्टचक्रां महाघोरामशनीं रुद्रनिर्मितां द्वियोजनसमुत्सेधां योज
नायामविस्तरां आयसीं निचितां शूलैः कदम्बमिव केसरैः तामवप्लुत्य जग्राह कर्णो न्यस्य महद्धनुः चिक्षेप चैनां तस्यैव स्यन्दनात्सोऽवपुप्लुवे
साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा विवेश वसुधां भित्त्वा सुरास्तत्र विसिस्मियुः कर्णं तु सर्वभूतानि पूजयामासुरञ्जसा यदवप्लुत्य जग्रा
ह देवसृष्टां महाशनीं एवं कृत्वा रणे कर्णस्तमारोह रथं पुनः ततो मुमोच नाराचान्सूतपुत्रः परन्तपः अशक्यं कर्तुमन्येन सर्वभूतेषु मानद
यदकार्षीत्तदा कर्णः संग्रामे भीमदर्शने स हन्यमानो नाराचैर्धाराभिरिव पर्वतः गन्धर्वनगराकारः पुनरन्तरधीयत एवं स वै महामायो मा
यया लाघवेन च अस्त्राणि तानि दिव्यानि जघानारिप्रसूदनः निहन्यमानेष्वस्त्रेषु मायया तेन रक्षसा असम्भ्रान्तस्तदा कर्णस्तद्रक्षः प्रत्य
युध्यत ततः क्रुद्धो महाराज भैमसेनिर्महाबलः चकार बहुधात्मानं भीषयाणो महारथान् ततो दिशः समापेतुः सिंहव्याघ्रतरक्षवः अग्नि
जिह्वाश्च भुजगा विहगाश्चाप्ययोमुखाः स कीर्यमाणो विशिखैः कर्णचापच्युतैः शरैः नागराडिव दुष्प्रेक्ष्यस्तत्रैवान्तरधीयत राक्षसाश्च पि
शाचाश्च यातुधानास्तथैव च शालावृकाश्च बहवो वृकाश्च विकृताननाः ते कर्णं भक्षयिष्यन्तः सर्वतः समुपाद्रवन् अथैनं वाग्भिरुग्राभिस्त्रा
सयाञ्चक्रिरे तदा उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः तेषामनेकैरेकैकं कर्णो विव्याध सायकैः प्रतिहत्य तु तां मायां दिव्येनास्त्रेण भारत
आजघान हयानस्य शरैः सन्नतपर्वभिः ते भग्ना विकृताङ्गाश्च भिन्नपृष्ठाश्च सायकैः वसुधामन्वपद्यन्त पश्यतस्तस्य रक्षसः स भग्नमायो हैडिम्बः

द्रो॰ कर्णं वैकर्त्तनं तदा एषते विवृधे यमस्य मिसुत्कां तायीयत द्रोणपर्व्वणि रात्रियुद्धे॥ संजय उवाच तस्मिंस्तथा वर्त्तमाने कर्णराक्षसयोर्मृधे अलायु
२१४ धो राक्षसेन्द्रो वीर्यवानभ्यवर्त्तत महत्या सेनया युक्तो दुर्योधनमुपागमत राक्षसानां विरूपाणां सहस्रैः परिवारितः नानारूपधरैर्वीरैः पूर्ववैरम
नुस्मरन तस्य ज्ञातिर्हि विक्रान्तो ब्राह्मणादो बको हतः किर्मीरश्च महातेजा हिडिम्बश्च सखा तदा सदीर्घकालाध्युषितं पूर्ववैरमनुस्मरन विज्ञा
यैतन्निशायुद्धं जिघांसुर्भीममाहवे समत्त इव मातंगः संक्रुद्ध इव चोरगः दुर्योधनमिदं वाक्यमब्रवीद्युद्धलालसः विदितं ते महाराज यथा भीमेन राक्ष
सः हिडिम्बबककिर्मीरा निहता मम बान्धवाः परामर्शश्च कन्याया हिडिम्बायाः कृतः पुरा किमन्यद्राक्षसानस्मान्समभिभूय परिभूय च तमहं सगणं
राजन्सवाजिरथकुञ्जरं हैडिम्बं च सहामात्यं हन्तुमभ्यागतः स्वयं अद्य कुन्तीसुतान्सर्वान्वासुदेवपुरोगमान हत्वा संभक्षयिष्यामि सर्वैरनुचरैः सह
निवारय बलं सर्वं वयं योत्स्याम पाण्डवान तस्य तद्वचनं श्रुत्वा हृष्टो दुर्योधनस्तदा प्रतिगृह्याब्रवीद्वाक्यं भ्रातृभिः परिवारितः त्वां पुरस्कृत्य सग
णं वयं योत्स्यामहे परान न हि वैरान्तमनसः स्थास्यन्ति मम सैनिकाः एवमस्त्विति राजानमुक्त्वा राक्षसपुंगवः अभ्ययात्त्वरितो भीमं सहितैः पु
रुषाशनैः दीप्यमानेन वपुषा रथेनादित्यवर्च्चसा तादृशेनैव राजेन्द्र यादृशेन घटोत्कचः तस्याप्यतुलनिर्घोषो बहुतोरणचित्रितः ऋक्षचर्मा
वनद्धांगो नल्वमात्रो महारथः तस्यापि तुरगाः शीघ्रा हस्तिकायाः खरस्वनाः शतं युक्ता महाकाया मांसशोणितभोजनाः तस्यापि रथ
निर्घोषो महामेघरवोपमः तस्यापि सुमहच्चापं दृढज्यं कनकोज्ज्वलं तस्याप्यक्षसमा बाणा रुक्मपुंखाः शिलाशिताः सोपि वीरो महाबा
हुर्यथैव स घटोत्कचः तस्यापि गोमायुबलाभिगुप्तो बभूव केतुर्ज्वलनार्कतुल्यः स चापि रूपेण घटोत्कचस्य श्रीमत्तमो व्याकुलदीपितास्यः
दीप्तांगदो दीप्तकिरीटमाली बद्धस्रगुष्णीषनिबद्धखड्गः गदी भुशुण्डी मुसली हली च शरासनी वारणतुल्यवर्ष्मा रथेन तेनानलवर्च्चसा च एम
२१४

द्रावयन्पांडववाहिनीं तां राजमंडलपरिवर्तमानो वि धुन्ते मेघइवांतरिक्षे तेचापिसैंधवबाणनिर्भिन्ना महावलावर्मिणाश्च मिणा
श्च हर्षान्विता युयुधुस्तस्यराजस्तमेततः पांडवयोधवीराः ॥ इतिद्रोणपर्वणि विपुद्ध संजयउवाच तमागतमभिप्रेक्ष्यभीम
कर्माणाममाहवे हर्षमाहारयांचक्रुः कुरवः सर्वएवते तथैवतनयश्चास्तिदुर्योधनपुरोगमाः श्वसंतः श्वसमासाद्यतत्तकामार
वार्णवं पुनर्जातमिवात्मानंमन्वानाः पुरुषर्षभाः श्रुत्वाग्रसैन्द्रवागतेनाभ्यपूजयन् तस्मिंस्तुमानुषेयुद्धे वर्तमाने
महाभये कर्णाद्वधमयोनेकं राहणाप्रतिदर्शितं उपप्रेक्षतपांचालाः स्मयमानाः सराजकाः तथैवतावकाराजन्नवीक्षमाणास्त
तस्ततः युक्ताश्चैनं हमस्तोपतिद्रोणद्रोणिकृपादयः तत्कर्महष्ट्वासंभ्रांताहेदिवंसराणाजिरे सर्वमाविग्रमभवद्रुहाम्भूतमचेतनं
तवसैन्यंमहाराजनिराशंकर्णजीविते दुर्योधनस्तुसंप्रेक्ष्यकर्णमार्त्तिपरागतं श्वलापुत्रोराससेइं समाहूयेदमब्रवीत एषवैक
र्णः कर्णहैडिंवेनसमागतः कुरुतेकर्मसुमहद्यदस्यौपयिकंमदे पश्यैतान्पार्थिवान्शूरान्निहतान्भैमसेनिना नाना
शास्त्राभिहतान्यथा रूपानिवर्हते तिना तवैष भागः समोराजनमध्येमयाकृतः तवैवानुमतेवीरत्वं विक्रम्य निवर्हय पुरावैकर्त्तनंक
र्णमिषपायोघटोत्कचः मायावलंसमाश्रित्यकर्षयत्परिकर्षणा एवमुक्तःसराज्ञानराक्षसोभीमविक्रमः तथेत्युक्त्वामहाबाहुर्घटोत्क

चमुपाद्रवत ततः कर्णात्मजस्तत्र भीमसेनं नराधिप प्रभो प्रसमिद्धमुपायांतमर्दयामास मार्गणैः तयोः समभवद्युद्धं क्रुद्धयोरुभयोर्द्वयोः मत्त
योर्वाशिताहेतोर्द्विपयोरिव कानने क्षेमाविप्रमुक्तास्ते कार्ष्णिर्विविशिखिनोवराः अभ्यद्रवद्भीमसेनं रथेनादित्यवर्चसा तमापांतमनारस
दृष्ट्वा ग्रस्तं घटोत्कचं अलायुधेन समरे सिंहेनेव गजांपतिं रथेनादित्यवपुषा भीमः प्रहरतांवरः किरन्नौघान्प्रययावलायुधरथं प्रति
तमायांतमभिप्रेक्ष्य स तदालायुधः प्रभो घटोत्कचं समुत्सृज्य भीमसेनं समाह्वयत् तं भीमः सहसाभ्येत्य राक्षसांतकरः प्रभो सगणं रा
क्षसेंद्रं तं शरवर्षैरवाकिरत् तथैवालायुधो राजन् शिलाधौतैरजिह्मगैः अभ्यवर्षत कौंतेयं पुनः पुनररिंदम तथा ते राक्षसाः सर्वे भीमसेन
मुपाद्रवन् नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः स ताड्यमानो बहुभिर्भीमसेनो महाबलः पंचभिः पंचभिः सर्वांस्तानविध्यच्छितैः श
रैः ते वध्यमाना भीमेन राक्षसाः क्रूरबुद्धयः विनेदुस्तुमुलान्नादान् दुद्रुवुश्च दिशो दश तांस्त्रास्यमानान्भीमेन दृष्ट्वा रक्षो महाबलं अभिदुद्राव वे
गेन शरैश्चैनमवाकिरत् तं भीमसेनः समरे तीक्ष्णाग्रैरक्षिणोच्छरैः अलायुधस्तु तान्क्षिप्तान्भीमेन विशिखान् रणे चिच्छेद कांश्चित्समरे त्वरया कां
श्चिदगृह्णत स तं दृष्ट्वा राक्षसेंद्रं भीमपराक्रमं गदां चिक्षेप वेगेन वज्रपातोपमां तदा तामापतंतीं वेगेन गदां ज्वालाकुलां ततः गदया ताडयामास
मासाद्भीमसमाव्रजत सा राक्षसेंद्रं कौंतेयः शरवर्षैरवाकिरत् तानप्यस्य करोन्मोघान्राक्षसो निशितैः शरैः ते चापि राक्षसाः सर्वे राजन्भीमा महारूपिणः
शासनाद्राक्षसेंद्रस्य निजघ्नुः स्यंदनान् पांचालाः सृंजयाश्चैव वाजिनः पारसिद्धिपाः न शांतिं लेभिरे तत्र राक्षसैर्भृशपीडिताः तं तु दृष्ट्वा महाघोरं वर्त

मानंमहाहवे स्वस्रीयांऽडीकाक्षोवचनंजयमिदंवचः पश्यभीमंमहाबाहुंराक्षसेंद्रवशंगतं परमस्यानुगछत्वंमाविचारयपांडव धृष्टद्युम्नःशिखंडी
चयुधामन्युरुत्तमौजसौ सहितौद्रौपदेयाश्चकर्णंयांतुमहारथाः नकुलःसहदेवश्चयुयुधानश्चवीर्यवान् हैडिंबाश्चसमानंघ्नंतुशासनात्तवपांडु
व त्वमपिभीमंमहाबाहोचमूंद्रोणपुरस्कृतां वारयस्वनरव्याघ्रमहद्धिभयमागतं एवमुक्तेतुकृष्णेनयथोद्दिष्टामहारथाः जग्मुर्वैकर्तनंकर्णं
राक्षसांश्चैवतान्रणे अथपूर्णायतोत्सृष्टैःशरैराशीविषोपमैः धनुश्छित्वेऽथभीमस्यराक्षसेंद्रःप्रतापवान् हयांश्चास्यशितैर्बाणैःसारथिंचम
हाबलः जघानमिषतःसंख्येभीमसेनस्यराक्षसः सोवतीर्यरथोपस्थाद्धताश्वोहतसारथिः तस्मैगुर्वीगदांघोरांविनदन्नुत्ससर्जह ततस्तांभी
मनिर्घोषामापतंतींमहागदां गदयाराक्षसोघोरोनिजघानननादच तद्दृष्ट्वाराक्षसेंद्रस्यघोरंकर्मभयावहं भीमसेनःप्रहृष्टात्मागदामाशु
पराम्रशत् तयोःसमभवद्युद्धंतुमुलंनरराक्षसोः गदानिपातसंह्रादैर्भुवंकंपयतोर्भृशं गदाविमुक्तौतौभूयःसमासाद्येतरेतरं मुष्टिभिर्वज्र
संह्रादैरन्योन्यमभिजघ्नतुः रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः यथासन्नमुपादायनिजघ्नतुरमर्षणौ तौविक्षरंतौरुधिरंसमासाद्येतरेतरं म
त्ताविवमहानागौचकर्षातेपुनःपुनः तदपश्यद्धृषीकेशःपांडवानांहितेरतः सभीमसेनरक्षार्थंहैडिंबंप्रत्यचोदयत् द्रोणपर्वणिघटोत्कच
वधे संजयउवाच संप्रेक्ष्यसमरेभीमंरक्षसाग्रस्तमंतिकात् वासुदेवोब्रवीद्राजन्घटोत्कचमिदंवचः पश्यभीमंमहाबाहोरक्षसाग्रस्तमा
हवे पश्यतांसर्वसैन्यानांतवचैवमहाद्युते सकर्णंत्वंसमुत्सृज्यराक्षसेंद्रमलायुधं जहिक्षिप्रंमहाबाहोपश्चात्कर्णंवधिष्यति सवार्ष्णेय

द्रो॰ वचः श्रुत्वा कर्णस्य सत्यवीर्यवान युयुधे राक्षसेन्द्रेण वकभ्राता घटोत्कचः ततः शतमुलेपुंखं वमूव निशिताश्मगोः अलायुधस्यैवेषाग्रं
२१६ हैडिंवस्य च भारत अलायुधस्सुयोधांश्च एवसमानमभिमहर्शनान वेगेनापततः शूलं स्याद्धीनशराणतनान् अलायुधः ससंक्रुद्धो युध
धानो महारथः नकुलः सहदेवश्च चित्रिकुर्निशितैः शरैः सर्वांश्च समरेण जनकिरीटी भ्रात्रिपर्षभान् परिक्षिप्य वीभत्सुः सर्वतः प्रकिरं
श्छरान् कर्णश्च समरे राजन्नवद्रावयत पार्थिवान् धृष्टद्युम्नशिखंड्याद्यान् पांचालानां महारथान् तान्वध्यमानान् दृष्ट्वाथ भीमो भीमपरा
क्रमः अभ्ययाल्लिनः कर्णं विशिखान्प्रकिरन्रणे ततस्तथायपुद्हत्वा राक्षसान्सवसूतजः नकुलः सहदेवश्च सात्यकिश्च महारथः ते
कर्णं योधयामासुः पांचालाद्रोणमेव च अलायुधस्तु संक्रुद्धो घटोत्कचमरिंदमं परिघेणातिकायेन ताडयामास मूर्द्धनि सतेन प्रहारे
णाभैमसेनिर्महाबलः ईषन्मूर्छितमात्मानमस्तंभयत वीर्यवान ततो दीप्ताग्निसंकाशां शतघंटामलंकृतां चिक्षेप तस्मै समरे गदां कांच
नभूषितां साहयांश्च रथं चास्य सारथिं च महास्वना चूर्णयामास वेगेन विसृष्टा भीमकर्मणा समयहयचक्राक्षान्विशीर्णध्वजकूवरान्
पा३ उत्पपात रथात्तूर्णं मायामास्थाय राक्षसीं स समास्थाय मायां तु ववर्ष रुधिरं बहु विद्युद्भ्राजितं चासीत्तिमिराभ्राकुलं नभः ततो वज्रनि
पाताश्च साशनिस्तनयित्नवः महांश्चटचटाशब्दस्तत्रासीद्धि महाहवे तां प्रेक्ष्य महतीं मायां राक्षसो राक्षसस्य तु ऊर्द्ध्वमुत्पत्य हैडिंविस्तां मायां मा
यथावधीत सोऽभिवीक्ष्य हतां मायां मायावी मायया बहिः अश्मवर्षं सुतुमुलं विससर्ज घटोत्कचे अश्मवर्षं स तं घोरं शरवर्षेण वीर्यवान दि सन
२१६

शोविध्वंसयामास तदद्भुतमिवाभवत् ततो नानाप्रहरणैर्भीमैः समभिवर्षतां आयसैः परिघैः शूलैर्गदामुशलमुद्गरैः पिनाकैः का
वालैश्च तोमरप्रासकंपनैः नाराचैर्निशितैर्भल्लैः शरैश्चक्रैः परश्वधैः अयोगुडैर्भिंदिपालैर्गोशीर्षोलूखलैरपि उत्पाटितैर्महाशा
खैर्विविधैर्नगतोरुहैः शमीपीलुकरीरैश्च चंपकैश्चैव भारत इंगुदैर्बदरीभिश्च कोविदारैश्च पुष्पितैः पलाशैश्चाम्रमैरैश्च प्लक्षन्य
ग्रोधपिप्पलैः महद्भिः समरे तौ तु समितिन्त्रसौ समभिजघ्नतुः विपुलैः पर्वताग्रैश्च नानाधातुभिराचितैः तेषां शब्दो महानासीद्वज्राणामि
द्यतामिव युद्धं तदभवद्घोरं भैमालायुधयोर्नृप हरीन्द्रयोर्यथा राजन्वालिसुग्रीवयोः पुरा तोयुध्यविविधैर्घोरैरायुधैर्विशिखैस्तया
मग्रस्तु चशितोभिद्रुत्य सौ समभिपेततुः तावन्योन्यमभिद्रुत्य केशेष्वग्रह्य महाबलौ भुजाभ्यां पर्यगृह्णीतां महाकायौ महाबलौ ततोऽस्वित्र
गात्रौ प्रस्वेदस्रुवाते जनाधिप हर्षितौ च महाकायावनिश्चेष्टौ विवावुदः अथाभिपत्य वेगेन समुद्भ्राम्य च राक्षसं बलेनाक्षिप्य हैडिंबस्तु
कर्त्ताम्यशितेमहत सोपवृत्तशिरास्तस्य कुंडलाभ्यां विभूषितं तदा हस्तमुत्तेनाहं न नाहत्समहाबलः हतं दृष्ट्वा महाकायं वकर्त्ताति
मीहमे पाञ्चालाः पाण्डवाश्चैव सिंहनादान्विनेदिरे ततो भेरीसहस्राणि शंखानामयुतानि च अवादयन्पाण्डवाः सैन्ये निहतेऽपुधि
स्तेनावसानिशा तेषां बभूव विजया वहा विघातमानाविवभौ समन्ताद्दीपमालिनी अलायुधस्तु हिडिम्बे भीमसेनेन महाबलः दुर्यो
धनस्य समं ते चित्तविषण्णगतचेतसः अथ दुर्योधनो राजा दृष्ट्वा हतमलायुधं बभूव परमोद्विग्नः सहसैन्येन भारत तेन ह्यस्य प्रतिज्ञातं भी

द्रो॰ प॰
२१०

सेनमहं युधि हंते तिष्ठपमानगम्यस्मान्नो वैमतम्मं क्रवंसनेन हंतव्यइस्समभ्यमन्यत पार्थिवः जीविते चिरकालाय भ्रातॄणां चाथमन्यत स
तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै प्रतिज्ञां भीमसेनस्य पूर्णामेवाभ्यमन्यत इति द्रोणपर्वणि अलायुधवधः ॥ ॥ संजय उवाच
निहतेऽलायुधे रक्षः प्रहृष्टात्मा घटोत्कचः ननाद विविधान्नादान्वाहिन्याः प्रमुखे तदा तस्य तं तुमुलं शब्दं श्रुत्वा कुंजरकंपनं तावकानां
महाराज भयमासीत्सुदारुणं अलायुधविसक्तं तं भैमसेनिं महाबलं दृष्ट्वा कर्णो महाबाहुः पांचालानभ्यपाद्रवत् दशभिर्दशभिर्बा
णैर्धृष्टद्युम्नशिखंडिनौ दृढैः पूर्णायतोत्सृष्टैः बिभेद नतपर्वभिः ततः परमनाराचैर्युधामन्यूत्तमौजसौ सात्यकिं च रथोदारं कंपयामास मा
र्गणैः तेषामप्यस्यतां संख्ये सर्वेषां सव्यदक्षिणं मंडलीकृतचापानि अदृश्यंत जनाधिप तेषां ज्यातलनिर्घोषो रथनेमिस्वनश्च ह मे
घानामिव घर्मांते तदाभूत्तुमुलो निशि ज्यानेमिघोषस्तनयित्नुमान्वै धनुस्तडिन्मंडलकेतुशृंगः शरौघवर्षाकुलवृष्टिमांश्च संग्राममेघः
समवर्धताजन् तमुद्यतं शैलमिवाप्रकंप्यो वर्षं महच्छैलसमानसारः विध्वंसयामास रणे नरेंद्र वैकर्तनः शत्रुगणावमर्दी ततोऽनलैर्वज्रनि
पातकल्पैः शितैः शरैः कांचनचित्रपुंखैः शत्रून्व्यपोहत्समरे महात्मा वैकर्तनः पुत्रहिते रतस्ते संछिन्नभिन्नध्वजिनश्च केचित्केचिच्च
रैर्दृढभिन्नदेहाः केचिद्विसूता विहयाश्च केचिद्वैकर्तनेनाशु कृता बभूवुः अविंदमानास्त्वथ शर्म संख्ये यौधिष्ठिरं ते बलमभ्यपद्यन्
तान्प्रेक्ष्य भग्नान्विमुखीकृतांश्च घटोत्कचो रोषमतीव चक्रे आस्थाय तं कांचनरत्नचित्रं रथं सिंहवत्संननाद वैकर्तनं कर्णमुपेत्य चा राम
२१०

नपोतमं१

२१८ परियाल्तोऽग्रवक्त्राः पट्टास्त्रिशूलाः शिलाघातास्त्रमूलाः गुर्व्यो गदा हेमपट्टावनद्धाः शतघ्न्यश्च प्रादुरासन्समन्तात् महाशिलाश्चापतंस्तत्र तत्र महाप्र
भाः सायकपत्रवज्राः चक्राणि चानेकशतक्षुराणि प्रादुर्बभूवुर्ज्वलनप्रभाणि तेषां निपातात्पतमानानां प्रासासिवज्राशनिमुद्गराणां ह
विर्विशानां ज्वलितानां पतंतां कर्णाः शीर्णास्त्रशशाकहेतुः शराहतानां पततां हयानां वज्राहतानां च तथा गजानां शिलाहतानां च महार
थानां महानिनादः पततां बभूव सभीमनानाविधशस्त्रपातैर्घोरैश्च नानाभिहतं समन्तात् हैरण्यं वैवलमार्तरूपमावर्तमानं रह
बभूव तत्र हाहाकृतं सैन्यपरिवर्तमानं संलीयमानं च विषण्णरूपं तेनार्यमायास्त्ररूपप्रवीणः पराङ्मुखो नो बभूव तत्रानो नांगस्ततो भीम
रूपं स्वघोररूपमहाशस्त्रमपीपतंतो दृष्ट्वा बलौघांश्च निपातयमानान्महद्रूपं तत्र पुत्रान्विवेश शिवाश्चैवेषु नादीप्तजिह्वाः सभीम
नादाः शतशोऽनदंतः रक्षोगणाश्च हृतमांसपिपीलेभ्यो नो द्युयोधाप्यथिताबभूवुः तेऽदीप्तजिह्वानलती भ्रान्ताः दृष्ट्वा विभीषणाः शैलनिका
शकायाः नभोगताः शक्तिविषक्तहस्ता मेघायमंचक्रिवर्षिषुः तेनाहताश्च शस्त्राणि शूलैर्गदाभिर्हतैः परिघैस्तरीसैः वज्रैः पिना
केः शनिप्रहारैः शतघ्नीचक्रैर्मथिताश्च पेतुः शूलामर्शैर्नाशपराङ्मुखाः शतघ्न्यः स्थूणाश्च कार्णायसपट्टनद्धाः अक्षाः किरंतः सरथाः समे
मंततोऽहं दृष्ट्वा कश्मलं प्रादुरासीत विकीर्णास्त्राणि विहितेहतमार्गैः संभग्नांगाः शिथिलाः नरश्रेष्ठाः छिन्नाह्वयाः कुंजराश्चाभिभग्नाः संचूर्णिता
श्च रथाः शिलाभिः एवं महद्युद्धमवर्तत सम्यक्तेनाप्यथानामपि विघोररूपाः मायाः सशस्त्रघोरोल्कैर्नानामुंचन्स्वैरं पाचमानं नभीने एम
२१८

तस्मिन्घोरे कुरुवीराणां विमर्द्दकालोत्सवे क्षत्रियाणामभावे तैर्वै भयार्त्ताः सहमाना युद्धं तत्प्राक्रोशंत कौरवाः सर्व एव पलायध्वं कुरवो नेन हलितैः
इत्येवाघ्नंति नः पांडवार्थे तथा तेषामज्ञातेभ्रान्तानां तस्मिन्द्वीपः सूतपुत्रो वभूव तस्मिन्नतंकेरेतस्मुले वर्तमाने सैन्ये भीमे गुप्तनीपमाने कुरूणां
स्वनीकानां प्रविभागे प्रकाशेन हापन्नेतु प्रयोजनेनो च निर्मर्यादे विद्रुते घोररूपे सर्वा दिशः प्रेक्ष्यमाणाः समन्ताः तां शान्त्युर्थं न समागताः समाने
कर्णोस्मेके तत्र्यान्न पश्यन्त ततो वाणे एकं कर्णो हंतीति हैडिम्बं मायायोधयन्त शान्तम् ह्रीमान कुर्वन्दुष्करं चाधिकर्म नैवाभ्युत्पतत् संयुगेन सू-
तपुत्रः ततो भीताः समुद्वेष्यंत कर्णे राजन्सर्वे सैन्ये यवा वाह्लिकाश्च स्वसैन्यो हंसजयंतो समहात्मेनापश्यन्वै विजयं राक्षसस्य तेनोत्सृष्टाचक्र
युक्ता शतघ्नी समं सर्वशस्त्रतोरण्यानं घान तेनानु भिर्ज्जोनीतो सन्त्वपघगतासवो निर्दृशतास्सिजिह्वः ततो हतात्स्मा द्वहत्यमानारं तं
सेनाः कुरुषु प्राद्रवन्त दिव्यैवास्त्रैमापयायध्यमाने नैवामुत्पचिंतयन्प्राप्तकालं ततोब्रुवन्कुरवः सर्व एव कर्णो दृष्ट्वा घोररूपां च मायां
शक्त्यास्तोऽन हि कर्णो घटोत्कचं नश्यंत्स्यैते कुरवो याभीताः कथ्यंत किंच न भीमपार्थौ तिपंतमेनं जहि पापं निशीथे यो नः संग्रामा
द्धोररूपाद्विमुंचेत्स नः पार्थान्सवलान्योधयेत तस्मादेनं राक्षसं घोररूपं जहि शक्त्या वैकर्त्तन वासवेन मा कौरवाः सर्व एवेंद्रकल्पा रात्रियु
द्धे कर्णोन स्युः सयोधाः स वध्यमानो रक्षसा वै निशीथे दृष्ट्वा राजन्वाध्यमानं वलं च महत्कुलान्निनदं कौरवाणां मतिं दध्रे शक्तिमोक्षाय कर्णः
स वै क्रुद्धः सिंह इवासमर्षी नामर्षयत्प्रतिघातेनात्मनः शक्तिं श्रेष्ठां वैजयंतीं मसह्यां समाददे तस्य वधं चिकीर्षयन् या सौ राजन्निहिता वर्षपूगा
जः६

द्रो २१५

स्वधायाजौमृत्युरक्तांफाल्गुनस्य यांवैप्रादात्सूतपुत्रायशक्रः शक्तिंश्रेष्ठांकुंडलाभ्यांनिनाय तांवैशक्तिंलेलिहानांप्रदीप्तांपाशैर्युक्तांमृ
त्योःस्वसारं मृत्योःस्वसारंज्वलितामिवोल्कांवैकर्तनःप्राहिणोद्राक्षसाय तामुत्तमांपरकायापहन्त्रींदृष्ट्वासौतेर्बाहुसंस्थांज्वलन्तीं
भीतंरक्षोविप्रदुद्रावराजन्कृत्वात्मानंविंध्यपादप्रमाणं दृष्ट्वाशक्तिंकर्णबाह्वन्तरस्थांनेदुर्भूतान्यंतरिक्षेनरेंद्र ववुर्वाताःसुमुला
श्चापिराजन्सनिर्घाताचाशनिर्गांजगाम सातांमायांभस्मकृत्वाज्वलन्तीभित्त्वागाढंहृदयंराक्षसस्य ऊर्द्ध्वंययौदीप्यमानानिशायां
नक्षत्राणामंतराण्याविशंती युद्ध्वाचित्रैर्विविधैःशस्त्रपूगैर्दिव्यैर्वीरोमानुषैराक्षसैश्च नदन्नादान्विविधान्भैरवांश्चप्राणानि
ष्टांस्त्याजितःशक्रशक्त्या इदंचान्यच्चित्रमाश्चर्यरूपंचकारासौकर्मशत्रुक्षयाय तस्मिन्कालेशक्तिनिर्भिन्नमर्म्मावभौराजन्मेघशै
लप्रकाशः ततोंतरिक्षादपतद्गतासुःसराक्षसेंद्रोभुविभिन्नदेहः अवाक्शिराःस्तब्धगात्रोविजिह्वोघटोत्कचोमहदास्थायरूपं
सतद्रूपंभैरवंभीमकर्म्माभीमंकृत्वाभैमसेनिःपपात ततोप्येवंतवसैन्यैकदेशमपोथयत्स्वेनदेहेनराजन् पतन्रक्षःस्वेनकाये
नतूर्णमतिप्रमाणेनविवर्द्धताच प्रियंकुर्वन्पांडवानांगतासुरक्षौहिणींतवतूर्णंजघान ततोमिश्राःप्राणदन्सिंहनादैर्भेर्यःशं
खामुरजाश्चानकाश्च दग्धांमायांनिहतंराक्षसंचदृष्ट्वाहृष्टाःप्राणदन्कौरवेयाः ततःकर्णःकुरुभिःपूज्यमानोयथाशक्रोवृत्रवधेमरु
द्भिः अन्वारूढस्तवपुत्रंरथस्थंहृष्टश्चापिप्राविशत्स्वंससैन्यं इतिश्रीद्रोणपर्वणिघटोत्कचवधःसमाप्तः संजयउवाच हैडिंबंनिहतंदृ राम २१५

वनर

शृंविशीर्णमिवपर्वतं बभूवुःपांडवाःसर्वेशोकबाष्पाकुलेक्षणाः वासुदेवस्तुहर्षेणमहताभिपरिप्लुतः ननादसिंहनादंवैपर्यष्वजत
फाल्गुनं सविनद्यमहानादमभीषूंसंनियम्यच ननर्त्तहर्षसंवीतोवातोद्धूतइवद्रुमः ततोविनिष्पीड्यपुनःपार्थमास्फोट्यचासकृत
रथोपस्थगतोधीमान्प्राणदत्पुनरच्युतः प्रहृष्टमनसंज्ञात्वावासुदेवंमहाबलः अर्जुनोथाब्रवीद्राजन्नातिहृष्टमनाइव अतिह
र्षोयमस्थानेतवाद्यमधुसूदन शोकस्थानेतुसंप्राप्तेहैडिंबस्यवधेनतु विमुखानिहिसैन्यानिहतंदृष्ट्वाघटोत्कचं वयंचभृशमुद्विग्ना
हैडिंबस्यनिपातनात नैतत्कारणमल्पंहिभविष्यतिजनार्दन तदर्थंशंसमेपृष्टःसत्यंसत्यवतांवर यद्येतन्नरहस्यंतेवक्तुमर्हस्यरिंदम
धैर्यस्यवैकृतंब्रूहित्वमद्यमधुसूदन समुद्रस्येवसंशोषंमेरोरिवविसर्पणं तथैतद्धर्षमन्येहंतवकर्म्मजनार्दन वासुदेवउवाच अति
हर्षमिमंप्राप्तंशृणुमेत्वंधनंजय अतीवमनसःसद्यःप्रसादकरमुत्तमं शक्तिंघटोत्कचेनेमांव्यंसयित्वामहाद्युते कर्णंनिहतमे
वाजौविद्धिसद्योधनंजय शक्तिहस्तंपुनःकर्णंनलोकेस्तिपुमानिह यएनमभितस्तिष्ठेत्कार्तिकेयमिवाहवे दिष्ट्यापनीतकवचो
दिष्ट्यापहृतकुंडलः दिष्ट्यावि[illegible]ध्वंसिताशक्तिरमोघास्यघटोत्कचे यदिहिस्यात्सकवचस्तथैवस्यात्सकुंडलः सामरानपिलोकां
स्त्रीनेकःकर्णोजयेत्प्रभुः वासवोवाकुबेरोवावरुणोवाजलेश्वरः यमोवानोत्सहेत्कर्णंरणेप्रतिसमासितुं गांडीवमुद्यम्यभवान् [illegible] च
क्रंचाहंसुदर्शनं नशक्तोस्वोरणेजेतुंतथायुक्तंनरर्षभं त्वद्धितार्थंतुशक्रेणमाययापहृतकुंडलः विहीनकवचश्चायंकृतःपरपुरंजयः

द्रो० प०
२२०

उत्कृत्य कवचं यस्मात् कुण्डले विमले च ते । प्रादाच्छक्राय कर्णो वै तस्माद्वैकर्तनः स्मृतः । आशीविष इव क्रुद्धस्तम्भितो मन्त्रतेजसा । तथा
यते भाति कर्णोऽद्य शान्तज्वाल इवानलः । यदाप्रभृति कर्णाय शक्तिर्दत्ता महात्मना । वासवेन महाबाहो शिक्षाया सा घटोत्कचे । कुण्डलाभ्यामुप
न्नेधा दिव्येन कवचेन च । सोऽप्राप्य मन्यत रुषः सततं त्वां रणे । एवं गते विशङ्कोऽयं हन्तुं तं नान्येन केनचित् । ऋते त्वां पुरुषव्याघ्र शपेयं सत्येन
चानघ । ब्रह्मण्यः सत्यवादी च तपस्वी नियतव्रतः । रिपुष्वपि दयावांश्च तस्मात्कर्णो वृषः स्मृतः । युद्धशौण्डो महाबाहुर्नित्योद्यतशरासनः ।
केसरीव वने नर्दन्मातङ्गरथयूथपः । विमर्दयन्नर्षभान् कुरूणां मध्यगतः शार्दूलो यो न शक्यो निरीक्षितुं । त्वदीयैः पुरुष
व्याघ्र योधमुख्यैर्महात्मभिः । शरजालसहस्रांशुः शारदीव दिवाकरः । तपान्ते जलदो यद्वच्छरधाराः सृजन्मुहुः । दिव्यास्त्रजलदः कर्णः पर्ज
न्य इव वृष्टिमान् । त्रिदशैरपि चाप्यद्य शरवर्षं समन्ततः । स्वशक्या स दयं जेतुं स्ववद्भिर्मांसशोणितैः । कवचेन विहीनश्च कुण्डलाभ्यां च पाण्ड
व सोऽद्य मानुषतां प्राप्तो विमुक्तः शक्रदत्तया । एको हि योगोऽस्य भवेद्वधाय छिद्रे ह्येनं स्वप्रमत्तः प्रमत्ते । कृच्छ्रं प्राप्तं रथचक्रे निमग्ने हन्याः पूर्व
त्वेतत्संज्ञां विचार्य । नस्युद्यतास्त्रं युधि हन्यादजय्यमिह सकवीरोऽपत्नमित्रघ्नः । जरासंधश्चेदिराजो महात्मा महाबाहुश्चैकलव्यश्च निषादः । एकैक
शो निहताः सर्व एते योगैस्तैस्तैस्त्वद्धितार्थं मयैव । अथापरे निहता राक्षसेन्द्रा हिडिम्बकिर्मीरबकप्रधानाः । अलायुधः परसैन्यावमर्दी घटोत्कच
श्चोग्रकर्मा तरस्वी ॥ द्रोणपर्वणि रात्रियुद्धे ॥ अर्जुन उवाच । कथमस्मद्धितार्थं ते कैश्च योगैर्जनार्दन । जरासंधप्रभृतयो घातिताः पृथिवीक्षिताः । राम
२२०

वासुदेव उवाच जरासंधश्चेदिराजो नैषादिश्च महाबलः यदि स्युर्न हताः पूर्वमिदानीं स्युर्भयंकराः दुर्योधनस्तानवरयेद्वरणाद्भूपसत्तमान् ते
स्मान्नित्यविद्विष्टाः संश्रयेयुस्तु कौरवान् ते हि वीरा महेष्वासाः कृतास्त्रा दृढयोधिनः धार्त्तराष्ट्रीं चमूं कृत्स्नां रक्षेयुरमरा इव सूतपुत्रो जरासंधश्चेदि
राजो निषादजः सुयोधनं समाश्रित्य जयेयुः पृथिवीमिमां योगैरपि हता यैस्ते तन्मे शृणु धनंजय अजय्या हि विना योगैर्मृधे ते दैवतैरपि एकैको
हि पृथक्तेषां समस्तां सुरवाहिनीं योधयेत्समरे पार्थ लोकपालाभिरक्षितां जरासंधो हि रुषितो रौहिणेयप्रधर्षितः अस्मद्वधार्थं चिक्षेप गदां
वै सर्वघातिनीं सीमन्तमिव कुर्वाणां नभसः पावकप्रभां अदृश्यतापतंती सा शक्रमुक्ता महाशनिः तामापतंतीं दृष्ट्वैव गदां रोहिणिनंदनः प्रति
घातार्थमस्त्रं वै स्थूणाकर्णमवासृजत् अस्त्रवेगप्रतिहता सा गदा प्रापतद्भुवि दारयंती धरां देवीं कंपयंतीव पर्वतान् तत्र स्म राक्षसी घोरा जरा
नामा सुविक्रमा संधयामास तं जातं जरासंधमरिंदमं द्वाभ्यां जातो हि मातृभ्यामर्द्धदेहः पृथक् पृथक् जरया संधितो यस्माज्जरासंधस्ततोऽभ
वत् सा च भूमिगता पार्थ हता सहसुतबांधवा गदया तेन चास्त्रेण स्थूणाकर्णेन राक्षसी विनाभूतः स गदया जरासंधो महामृधे निहतो भीम
सेनेन पश्यतस्ते धनंजय यदि हि स्यात्सगदापाणिर्जरासंधः प्रतापवान् सेंद्रा देवा न तं हंतुं रणे शक्ता नरोत्तम त्वद्धितार्थं हि नैषादिरंगुष्ठेन वि
योजितः द्रोणेनाचार्यकं कृत्वा छद्मना सत्यविक्रमः स तु बद्धांगुलित्राणो नैषादिर्दृढविक्रमः अस्यन्नेको वनचारी बभौ राम इवापरः ए
कलव्यं हि सांगुष्ठमशक्ता देवदानवाः सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित् किमु मानुषमात्रेण शक्यः स्यात्प्रतिवीक्षितुं दृढमुष्टिः कृती

न

२२१ निसमस्यमानोदिवानिशं त्वद्धितार्थं तु स मया हतः संग्राममूर्धनि चेदिराजश्च विक्रान्तः प्रत्यक्षं निहतस्तव स चाप्यशक्यः संग्रामे जेतुं सर्वैः सु
रासुरैः वधार्थं तस्य जातोहमन्येषां च सुरद्विषां त्वत्सहायेनाआम्रेलोकानां हितकाम्यया हिडिम्बबककिर्मीरा भीमसेनेन पातिताः
रावणेन समप्राणा ब्रह्मयज्ञविनाशनाः हतस्तथैव मायावी हैडिम्बेनाप्यलायुधः हैडिम्बश्चाप्युपायेन शक्त्या कर्णेन घातितः यदि ह्येनं ना
हनिष्यत्कर्णः शक्त्या महामृधे मया वध्योभविष्यत्स भैमसेनिर्घटोत्कचः मया न निहतः पूर्वमेव युष्मत्प्रियेप्सया एष हि ब्राह्मणद्वेषी य
ज्ञद्वेषी च राक्षसः धर्मस्य लोप्ता पापात्मा तस्मादेष निपातितः व्यंसिता चाप्युपायेन शक्रदत्ता मयानघ ये हि धर्मस्य लोप्तारो वध्यास्ते म
मपाण्डव धर्मसंस्थापनार्थं हि प्रतिज्ञैषा ममाव्यया ब्रह्म सत्यं दमः शौचं धर्मो ह्रीः श्रीर्धृतिः क्षमा यत्र तत्र रमे नित्यमहं सत्येन ते शपे न
विषादस्त्वया कार्यः कर्तुं वैकर्तनं प्रति उपदेक्ष्याम्युपायं ते येन तं प्रसहिष्यसि सुयोधनं चापि रणे हनिष्यति वृकोदरः तस्यापि च वधोपा
यं वक्ष्यामि तव पाण्डव वर्धते तुमुलस्त्वेष शब्दः परचमूं प्रति विद्रवन्ति च सैन्यानि त्वदीयानि दिशो दश लब्धलक्षा हि कौरव्या विधमन्ति च
मूं तव दहत्येष च वः सैन्यं द्रोणः प्रहरतां वरः द्रोणपर्वणि त्रिपुष्टे। धृतराष्ट्र उवाच एकवीरवधे मोघा शक्तिः सूतात्मजे यदा कस्मात्स
र्वान्समुत्सृज्य स तां पार्थे न मुक्तवान् तस्मिन्हते हता हि स्युः सर्वे पाण्डवसृञ्जयाः एकवीरवधे कस्मान्न युद्धे जयमादधे आहूतो न निवर्ते
यमिति तस्य महाव्रतं स्वयमाह्वयितव्यः स सूतपुत्रेण फाल्गुनः ततो हैडिम्बमानीय फाल्गुनं शक्रदत्तया जघान न वृषः कस्मात्तन्ममाचक्ष्व एम

२२१

कर्णो घ्यपाहत्वनतोह्रपेत्स्वतं यजीयसा तथाशक्तिरमोघा सामोघीकृता घटोत्कचे २

पे १

संजय नूनंबुद्धिविहीनस्त्वामात्याश्च महायशसः शत्रुभिर्व्यंसितेनापायः कथं न समग्रैरीन सात्यस्य यामाशक्तिर्जीयस्य च परायणा माश
क्तिर्वासवदत्तेन मुक्ता सा घटोत्कचे यया वध्यो हतस्त्वर्जुनस्य पुरस्ततो हतयोरनयोर्वापि च सर्वे लाभः मन्ये विद्वन्नास्त देवस्य दुर्बुद्धेर्नाम कर्णस्य हि दैव
योर्वै घटोत्कचाय रिहत्वा द्विकर्णपादोलाभः सम्भवे सोऽर्हवानां वैकर्तनो वा यस्मिन्निहन्यात्तथापि फल्गुनं शक्तिनाशात्ततस्तात इति प्रा
तः प्रत्येवतद्भविष्यं घटोत्कचं समरपुत्रमापदे अघातयद्यादवेन्द्रः प्रियं कुर्वन्पाण्डवानां हितं च संजय उवाच एतच्चिकीर्षितं ता
लाकर्णस्य मधुसूदनः नियोजयामास तदा द्वैरथे राक्षसेश्वरं घटोत्कचं महावीर्यं महाबुद्धिर्जनार्दनः अमोघाया विघातार्थं राजन्दुर्मन्त्रि
तेन च तदैव कृतकार्या हि वयं स्याम कुरूद्वह न रक्षेद्यदि कृष्णस्तं पार्थं कर्णान्महारथात् साश्वध्वजरथः संख्ये धृतराष्ट्र पतेद्भुवि विना जना
र्दनं पार्थो योगानामीश्वरं प्रभुं तैस्तैरुपायैर्बहुभी रक्ष्यमाणः स पार्थिवः जयत्यभिमुखः शत्रून् पार्थः कृष्णेन पालितः सविशेषं त्वमोघायाः
कृष्णो रक्षत पाण्डवं हन्यात्क्षिप्ता हि कौन्तेयं शक्तिर्वृक्षमिवाशनिः धृतराष्ट्र उवाच विरोधी च कुमन्त्री च प्राज्ञमानी ममात्मजः यस्यैष समति
क्रान्तो वधोपायो जयं प्रति स वा कर्णो महाबुद्धिः सर्वशस्त्रभृतांवरः न मुक्तवान्कथं सूत तामसमोघां धनंजये तं चापि समतिक्रान्तमेतदर्थं महा
बलाणोकथं एतमर्थं महाबुद्धे पत्यया नावबोधितः संजय उवाच दुर्योधनस्य शकुनेर्मम दुःशासनस्य च रात्रौ रात्रौ भवत्येषा नित्यमेव
समर्थना श्वः सर्वसैन्यान्युत्सृज्य जहि कर्ण धनंजयं प्रेष्यवत्पाण्डुपाञ्चालानुपभोक्ष्यामहे ततः अथवा निहते पार्थे पाण्डुष्वन्यतमं ततः स्था

२२२ पंचघटिवार्मेयस्तस्मात्कस्मोहिहन्यतां कृष्णोहिमन्येवाड्डुनापार्थः केशवेनाहूतः शान्तोदेवतोपार्थः पांचालाःपत्रसंस्थिताः कस्मात्र
याःकृष्णवत्साः कृष्णनाथाश्चपांडवाः कृष्णःपरायणंचैषांज्योतिषामिवचंद्रमाः तस्मात्सर्वाणिशास्त्राणिकृष्णंचोत्सृज्यसत्तम कृष्णंहिविद्धि
इत्तोमूलंसर्वेषांसर्वदा हन्याघटिहिहिशार्ङ्गंकर्णोपाण्डवनंदनं कृत्वाचकृष्णतीरणंतस्वशोतेम्यान्त्रसंशयः यदिसनिहतःशरैः तमसेपपुकुल
पांडुनंदनोमहात्मा ननुतववधानीद्रुमसर्वानिशितम्सुद्रवनावशांश्रजेन सत्यबुद्धिः कृतार्थ्यंजात्रानित्रिदशेश्वरो अप्रमेयेहृषीकेशेपुष्ट्का
लेप्यमुत्थन श्रज्जुनंचापिगांधपानसहायसंतिकेशवः नसेनमेवञ्चत्मसुखेसौने:स्तुपयितंरणे अमांस्तासेमायोदारानुपाश्वायपदुष्यतः
अपोषांनांकथ्यंशक्तिंमोधीकुर्यामितिप्रभो यस्त्वयारक्षितेपार्थंकर्णात्कृष्णोमहामनाः अज्ञानंसकथंरणेतत्रासेसुहृषोत्तमः यदिचैत
त्पश्यामिचक्रायुधंमहिमं नमोत्तिविपुलोके पुनोजयेतजनार्दनं द्रोणापर्व्वाणित्रिपुष्टे संजयउवाच ततःकृष्णंमहाबाहुंसात्यकिः
सत्यविक्रमः पप्रच्छार्थशार्ङ्गं त्वंकर्णोपतिमहामघः अयंचप्रत्ययःकर्णेशक्तिस्त्वामितविक्रम किमर्थंसूतपुत्रेणनमुक्ताफाल्गुनेतदा
वासुदेवउवाच दुःशासनश्चकर्णश्चशकुनिश्चससैंधवः सततंमंत्रयंतिस्मदुर्योधनपुरोगमाः कर्णकर्णमहेष्वासरणेमितपराक्रम
नान्यस्यशक्तिंरवादेमोक्षत्वाजयतांवर ऋतेमहारथात्कर्णकुंतीपुत्राद्धनंजयात सहितेषामतिपशादेवानामिववासवः तस्मिन्वि
निहतेपार्थेपांडवाःसृंजयैःसह भविष्यंतिगतात्मानःसाग्निकावनिरग्नयः तथेतिचप्रतिज्ञातंकर्णेनशिनिपुंगव हृदिनित्यंचकर्णस्यवधो एम

२२२

२३

गांडीवधन्वनः अहंमन्येतुराधेयंमोहयामियुधांवरं ततोनावासृजच्छक्तिंपार्थेवध्येनवाहने कालेनसहितामस्यमनिवार्याविपुत्रकः
ननिघ्नंनचहर्षोमेमनसोस्तियुधांवर घटोत्कचेमहितांतरहृष्ट्वानोशिनिपुंगव मन्योपास्यांनयम्नुक्तंपश्यमाप्ययधनंजयं नपिताना
चमेमाताननपूर्वभ्रातरस्तथा नचमात्मातथाकृष्णायथाबीभत्सुरएहवे त्रैलोक्यराज्यादपिकिंचिद्भवेस्यत्तदुर्लभं नेच्छेहंसात्वतांहं
ततविनापार्थंधनंजयं अतःप्रहर्षःस्यमहानपुत्युत्थानाचमेभवत मन्येप्रत्यागतमिवहृष्ट्वापार्थंधनंजयं अतस्युम्रहितोयुद्धे
मयाकर्णायराक्षसः नत्वमस्यम्योराक्षसोहत्कः कर्णोमवाधितं संजयउवाच इतिसात्यकयेप्राहतदाहेववकिनंदनः धनंजयहितेरक्त
स्तप्रियेसततंरतः इतिद्रोणपर्वणित्रिपुंडे धृतराष्ट्रउवाच कर्णदुर्योधनादीनांशकुनेःसौबलस्यच अपनीतंमहत्तातत्तववैचे
वविशेषतः परिजानीयतांशक्तिमेकघ्नींसततंराणो अनिवार्यामसंमत्याहंद्रेणापिसवासवैः साकिमर्थंतत्कर्णेनप्रवृत्तेसमरेतदा
नदेवकीसुतेमुक्ताफाल्गुनेवापिसंजय संजयउवाच संग्रामाद्विनिवृत्तानांसर्वेषांनोविशांपते रात्रौकुकुलश्रेष्ठमंत्रोयंसंप्रवर्तते
प्रभातमात्रेश्वोभूतेकेशवंवापार्जुनायवा शक्तिरेषाहिमोक्तव्याकर्णवैकर्तनिसशः ततःप्रभातसमयेराजनकर्णस्यदैवतैः
अन्येषांचैवयोधानांसाबुद्धिर्नश्यतेपुनः दैवमेवपरंमन्येयत्कर्णोहस्तसंस्थया नहतोनरणेपार्थःकृष्णोवादेवकीसुतः तस्यहस्त
स्थिताशक्तिःकालरात्रिरिवोद्यता दैवोपहतबुद्धित्वात्तांनांकर्णोविमुक्तवान् कृष्णेवादेवकीपुत्रेमोहितोदेवमायया पार्थेवा

२२३ शकुनेश्चैव वध्यार्थं वासवीमिव धृतराष्ट्र उवाच दैवेनोपहतान्पुंसः बुद्ध्या केशवस्य च गता हि वासवी हत्वा तं भूतं घटोत्कचं कर्णाश्च
मम पुत्राश्च सर्वे चान्ये च पार्थिवाः तेन वै दुष्प्रनीतेन गता वैवस्वतक्षयं भूय एव तु मे शंस यथा युद्धमवर्तत कुरूणां पाण्डवानां च हैडिम्बे नि
हते तदा ये च ते ऽभ्यद्रवन्द्रोणं व्यूढानीकाः प्रहारिणः संजयाः सहपाञ्चालैस्तेऽप्यकुर्वन्कथं रणं सोमदत्तेर्वधाद्द्रोणमायान्तं सैन्धवस्य च
अमर्षाज्जीवितं त्यक्त्वा गाहमानं वरूथिनीं जृम्भमाणमिव व्याघ्रं व्यात्ताननमिवान्तकं कथं प्रत्युद्ययुर्द्रोणमस्यन्तं पाण्डुसृञ्जयाः आचार्यं
ये च तेऽरक्षन्दुर्योधनपुरोगमाः द्रौणिकर्णकृपास्तात ते वाकुर्वन्किमाहवे भारद्वाजं जिघांसन्तौ सव्यसाचिवृकोदरौ समार्छन्मा म
कान्युद्धे कथं संजय शंस मे सिन्धुराजवधेनेमे घटोत्कचवधेन ते अमर्षिताः सुसंक्रुद्धाः चक्रुः कथं निशि संजय उवाच हते घटो
त्कचे राजन्कर्णेन निशि राक्षसे प्रणदत्सु च हृष्टेषु तावकेषु युयुत्सुषु आपतत्सु च वेगेन वध्यमाने बलेऽपि च विगाढायां रजन्यां च रा
जा दैन्यं परं गतः अब्रवीच्च महाबाहुर्भीमसेनमिदं वचः आवारय महाबाहो धार्तराष्ट्रस्य वाहिनीं हैडिम्बस्य घातेन मोहो मामावि
शन्महान् एवं भीमं समादिश्य स्वरथे समुपाविशत् अश्रुपूर्णमुखो राजा निःश्वसंश्च पुनः पुनः कश्मलं प्राविशद्घोरं दृष्ट्वा कर्णस्य वि
क्रमं तं तथा व्यथितं दृष्ट्वा कृष्णो वचनमब्रवीत् मा व्यथां कुरु कौन्तेय नैतत्त्वय्युपपद्यते वैक्लव्यं भारत श्रेष्ठ यथा प्राकृतपूरुषे उत्तिष्ठ रा
जन्युध्यस्व वह गुर्वीं धुरं विभो त्वयि वैक्लव्यमापन्ने संशयो विजये भवेत् श्रुत्वा कृष्णस्य वचनं धर्मराजो युधिष्ठिरः विमृज्य नेत्रे पाणि राम

२२३

भीमं कृष्णस्तं वचनमब्रवीत् विदितास्ते महाबाहो धर्मात्मनां परमा गतिः ऋस्यवध्यापकं तेन स्वपः कृतं नाथ बुध्यते अस्माकं हि वनस्थानां हि दि
वेन महात्मना बालेनापि सता तेन कृतं सत्यं जनार्दन अस्य हेतो र्गतं ज्ञात्वा पांडवं स्पेतवाहने अशोकं समहेष्वासः काम्यके मामुप
स्थितः उषितस्त्वं महात्मा मामिर्यावन्नामा सहूर्ते जयः गंधमादनयात्रायां दुर्गस्य स्त्वं समतां गतः पांचाली च यशस्विन्यो तापेनो ऽतिमहात्मना
अरण्ये स्वेवयुद्धानां पंचधा कृतवानसभो महस्थैर्दुष्करं कर्म्म कृतं तेन महाहवे सभावायाच मे प्रीतिः सहदेवे जनार्दने सेवमेषा मा प्रीती
राक्षसेन्द्र घटोत्कचे भक्तस्त्वं मे महाबाहुः प्रियो ऽस्याहं प्रियस्त्वं मे तेन विहीना मिवात्मै यकश्मलं शोकतापितः पश्यैतस्मा निवात्मैव द्राक्ष
माणा निकौरवैः द्रोणकर्णो तिसंयत्तो पश्य पुत्र महात्मनो निशीथे पांडवे सैन्य मास्यापश्य च मार्हितं गजाभ्या मिव मत्ताभ्यां यथा नलव
ने महत् स्वनादस्य कलं वा ह्यो भीमसेन समाधव चित्रास्त्रता च पार्थस्य विक्रमं ते जय एव च एष द्रोणास्त्र कर्तास्मि राजा चैव हतपोधनः नि
हतस्य एकस्य पुत्रे हृष्टान ईति मे यशः कथं चास्मात्कृतं नतपि चैव जनार्दन हैडिंबः प्राप्तवान्मृत्युं सतपुत्रेणागतः कस्यार्थे कृतं नः
सर्वान्पश्यतः समास्थितः निहतोऽसमः कृतं मे मनेनि महाबलः पराभिमन्युर्निहतो धार्तराष्ट्रैर्महात्मभिः नासीत्तत्राणोऽस्य सं
सव्यसाची महारथः निहतास्त्वयं मैवेसंधवेन दुरात्मना निमित्तमभवद्द्रोणः सपुत्रस्तत्र कर्म्मणि उपहितो वधे पापः कर्णस्य गृहता
स्वयं व्याघ्रतस्याविद्धे न हि धात्रीत्वं चकारह असने वर्तमानस्य हृतवर्मा न शोभवत् अश्वानजघान सहसा तथा भोपार्ष्णिसारथी

द्रो० २२४ तेऽप्यतेरमहेष्वासाः सौभद्रं पृथ्वपातयन् स चैककारणोकृष्ण हतोगांडीवधन्वना नैषवेदोपारवंश्चैष्ठतद्वनाति प्रियंमम परिशत्रुवधो
मानोभवेलक्षंतेह्रियांडवैः कृष्णात्रिगोणोपूर्वंहंतआज्ञितिमेमतिः एतोमूलंहि हुः त्वानामस्माकंपुरुषर्षभ एतोगोणमावायसमा
प्नुलः हयोसनः यत्रवश्नोभवेद्रोणः सूतपुत्रस्तुमानुगाः तत्रावधीन्महाबाहुः सैंधवंद्वाविनं श्रुयश्चेतमयाकार्यः सूतपुत्रस्य निग्र
हः ततोयास्याम्यहंवीरसवपेकर्णजिघांसया भीमसेनोमहाबाहुर्द्रोणानीकेनसंगतः एवमुक्त्वाययौतूर्णंत्वामाणोयुधिष्ठिरः सवि
स्फार्यमहच्चापंशंखंप्रध्माप्यभैरवं ततोरथसहस्रेणगजानांचशतैस्त्रिभिः वाजिभिः पंचसाहस्रैः पांचालैः सप्रभद्रकैः वृतः शिखंडी
लीरतोराजानंपृष्ठतोन्वयात् ततोभेरीः समाजघ्नुः शंखांश्च दध्मुर्हर्षिताः पांचालाः पांडवाश्चैव युधिष्ठिरपुरोगमाः ततोऽब्रवीन्महाबाहु
र्वासुदेवोधनंजयं एषप्रयातित्वरितः क्रोधाविष्टोयुधिष्ठिरः जिघांसुः सूतपुत्रस्यतस्योपेक्षानयुज्यते एवमुक्त्वाहृषीकेशः शीघ्रमश्वा
नचोदयन् दूरंप्रयातंराजानमन्वगच्छज्जनार्दनः तंदृष्ट्वासहसायांतं सूतपुत्रजिघांसया शोकोपहतसंकल्पंदह्यमानमिवाग्निना
अभिगम्याब्रवीद्व्यासो धर्मपुत्रंयुधिष्ठिरं व्यास उवाच कर्णमासाद्यसंग्रामे दिष्ट्याजीवतिफाल्गुनः सव्यसाचिवधाकांक्षी शक्तिं रक्षित
वान्हिसः नचागाद्द्वैरथंजिष्णुर्दिष्ट्यातेनमहात्मना सृजेतांस्पर्धिनावेतौ दिव्यान्यस्त्राणिसर्वशः वध्यमानेषुचास्त्रेषुपीडितः सूतनंदनः
वासवीं समरेशक्तिं ध्रुवंक्षेप्स्यति युधिष्ठिर ततोभवेत्तेव्यसनंघोरंभारतसत्तम दिष्ट्यारक्षोहतंयुद्धे सूतपुत्रेणमानद वासवीं कारणं कृत्वा काल राम २२४

भमलितो ३

तेनोपहतोत्स्वसौ तेचक्रकाण्णाद्रुक्षोनिहतेतानसंयुगे माकुंतीभवतेश्रेष्यमाचशोकेमनःकृथाः प्राणिनामिहसर्वेषामेषानिष्ठायुधि
र भ्रातृभिःसहितःसर्वैःपार्थिवैश्चमहात्मभिः कौरवान्समरेराजन्नप्रतियुध्यस्वभारत पंचमेदिवसेनातपृथिवीतेभविष्यति निसंचयुरुष
व्याघ्रधर्मेवानुचिंतय आनृशंस्यतपोदानंक्षमासत्यंचपांडव सेवेथाःपरमप्रीतोयतोधर्मस्ततोजयः इत्युक्त्वापांडवंव्यासस्तत्रैवांतरधीयत ॥
इतिद्रोणपर्वणिरात्रियुद्धे संजयउवाच व्यासेनैवमथोक्तस्तुधर्मराजोयुधिष्ठिरः स्वयंकर्णवधाद्वीरोनिवृत्तोभरतर्षभ घटोत्कचेतुनिहते
सूतपुत्रेणतांनिशां दुःखामर्षवशंप्राप्तोधर्मराजोयुधिष्ठिरः दृष्ट्वाभीमेनमहतींवार्यमाणांचमूंतव धृष्टद्युम्नमुवाचेदंकुंभयोनिंनिवारय
त्वंहिद्रोणविनाशायसमुत्पन्नोहुताशनात सशरःकवचीखड्गीधन्वीचपरतापनः अभिद्रवरणेहृष्टोनचतेभीःकथंचन जनमेजयः
शिखंडीचदौर्मुखिर्यशस्विनः अभिद्रवतसंहृष्टाःकुंभयोनिंसमंततः नकुलःसहदेवश्चद्रौपदेयाःप्रभद्रकाः द्रुपदश्चविराटश्चपुत्रभ्रातृ
समन्वितौ सात्यकिःकेकयाश्चैवपांडवश्चधनंजयः अभिद्रवंतवेगेनकुंभयोनिंवधेप्सया तथैवरथिनःसर्वेहस्त्यश्वंयच्चकिंचन पादाताश्चरणे
द्रोणंपातयंतमहारथं तथाज्ञप्तास्तुतेसर्वेपांडवेनमहात्मना अभ्यद्रवंतवेगेनकुंभयोनिंवधेप्सया आगच्छतस्तान्सहसासर्वोद्योगेनपां
डवान् प्रतिजग्राहसमरेद्रोणःशस्त्रभृतांवरः ततोदुर्योधनोराजासर्वोद्योगेनपांडवान अभ्यद्रवत्समंक्रुद्धइच्छन्द्रोणस्यजीवितं ततःप्रव
वृत्तेयुद्धंश्रांतवाहनसैनिकं पांचालानांकुरूणांचगर्जतामितरेतरं निद्रांधास्तेमहाराजपरिश्रांताश्चसंयुगे नाभ्यपद्यंतसमरेकांचिच्चेष्टांमहार

द्रो॰
२२५

ध्याः क्रियमाणा जनी चैषा घोररूपा भयानका सहस्वपामप्रतिमाम्बमवप्राणहारिणी वध्यतां च तथा तेषां सत्त्वानां च विशेषतः श्रुत्वैतद्वि
समाजे ते निद्रान्धानां विशेषतः सेर्वेस्यामविहन्तारः क्षत्रिया हीनचेतसः नवचैवपोषां चागता नाम्याविगतेषवः तेन तदा पारमतस्थुः शीघ्रं ते न स्व
विशेषतः स्वधर्ममनुपश्यन्तो न जहुः स्वामनीकिनीं शस्त्राण्यन्ये समुत्सृज्य निद्रान्धाः शेरते जनाः स्थिष्वन्ये गजेष्वन्ये हयेष्वन्ये च भारत निद्रा
धान्ते वुबुधिरे केचिच्चैषां नराधिपाः तानन्ये समरे योधाः प्रेषयन्तो यमक्षयं स्वप्नायमानाह्यपरे परानिति विचेतसः आत्मानं समरे जघ्नुः स्वा
नेव च परानपि नानावाचो विमुञ्चन्तो निद्रान्धास्ते महारणे अस्माकं च महाराज परेभ्यो बहवो जनाः नाम्यजानन्त समरे निद्रया मोहिता भृशं
तेषामेतादृशी चेष्टां विज्ञाय पुरुषर्षभः उवाच वाक्यं बीभत्सुरुच्चैः संनादयन्दिशः श्रान्ता भवन्तो निद्रान्धाः सर्व एव सवाहनाः तमसा चावृते
सैन्ये सा च बहुरजेन च ते यूयं परिमत्स्यध्वमुपारमत सैनिकाः निमीलयत चात्रैव रणभूमौ मुहूर्तकं ततो विनिद्रा विश्रान्ताश्चन्द्रमस्युदिते
पुनः संसाधयिष्यथान्योन्यं संग्रामे कुरुपाण्डवाः तद्वचः सर्वधर्मज्ञा धार्मिकस्य विशांपते अरोचयन्त सैन्यानि तथा चान्योन्यमब्रुवन् चुक्रु
शुः कर्ण कर्णेति तत्र पाण्डुर्योधनेति च उपारमत पाण्डूनां विरता हि वरूथिनी तथा विक्रोशमानस्य फाल्गुनस्य ततस्ततः उपारमत पाण्डु
नां सेना तव च भारत तामस्य वाचं देवाश्च ऋषयश्च महात्मनः सर्वसैन्यानि चाक्षुद्रां प्रहृष्टाः प्रत्यपूजयन् तत्संपूज्य वचोऽक्रूरं सर्वसैन्यानि भा
रत मुहूर्तमस्वपन्राजन्श्रान्तानि भरतर्षभ सा तु संप्राप्य विश्रामं ध्वजिनी तव भारत सुखमाप्तवती वीरमर्जुनं प्रत्यपूजयत् त्वयि वेदा

राम
२२५

३६

स्तथास्त्राणि त्वयि बुद्धिपराक्रमौ धर्मस्त्वयि महाबाहो दया भूतेषु चानघ यच्चाश्वस्तास्तवेच्छामः शर्म पार्थ तदस्तु ते मनसश्च प्रियानर्था
न्वीर क्षिप्रमवाप्नुहि इति ते तं नरव्याघ्रं प्रशंसंतो महारथाः निद्रया समवाक्षिप्तास्तूष्णीमासन्विशांपते अश्वपृष्ठेषु चाप्यन्ये रथ
नीडेषु चापरे गजस्कंधगताश्चान्ये शेरते चापरे क्षितौ सायुधाः सगदाश्चैव सखड्गाः सपरश्वधाः सप्रासकवचाश्चान्ये नराः सुप्ताः पृथ
क्पृथक् गजास्ते पन्नगाभोगैर्हस्तैर्भूरेणुगुण्ठितैः निद्रांधा वसुधां चक्रुर्घ्राणनिश्वासशीतलां गजाः प्रसुप्ता रेजुस्ते निःश्वसंतो महीत
ले विकीर्णा गिरयो यद्वन्निश्वसद्भिर्महोरगैः समां च विषमां चक्रुः खुराग्रैर्विक्षतां महीं हयाः कांचनयोक्त्रास्ते केसरालंबिभिर्युगैः ए
वं हयाश्च नागाश्च योधाश्च भरतर्षभ युद्धाद्विरम्य सुषुपुः श्रमेण महतान्विताः तत्तथा निद्रया मग्नमबोधं प्राप्तमद्भुतं कुशलैः शि
ल्पिभिर्न्यस्तं पटे चित्रमिवाद्भुतं ते क्षत्रियाः कुंडलिनो युवानः परस्परं सायकविक्षतांगाः कुंभेषु लीनाः सुषुपुर्गजानां कुचेषु लग्ना इव का
मिनीनां ततः कुमुदनाथेन कामिनीगंडपांडुना नेत्रानंदेन चंद्रेण माहेन्द्री दिगलंकृता दशशताक्षककुद्भिनिःसृतः किरणकेसर
भासुरपिंजरः तिमिरवारणयूथविदारणः समुदियादुदयाचलकेसरी हरवृषांगमगात्रसमद्युतिः स्मरशरासनपूर्णतमप्रभः नववधू
स्मितचारुमनोहरः प्रविसृतः कुमुदाकरबांधवः ततो मुहूर्ताद्भगवान्पुरस्ताच्छशलक्षणः अरुणं दर्शयामास ग्रसन् ज्योतिःप्रभां प्रभुः
अरुणस्य तु तस्यांशुजालतप्तपद्मप्रभं रश्मिजालं महच्चंद्रो मंदं मंदमवासृजत् उत्सारयंतः प्रभया तमस्ते चंद्ररश्मयः पर्यगच्छन् शनैः स

द्रो॰ १९६

वादिशःखंचसर्वशस्तिमिरंतथा ततोमुहूर्त्ताद्भुवनंज्योतिर्भूतमिवाभवत् अप्रख्यमप्रकाशंचजगामाशुतमस्तथा प्रतिप्रकाशितेलोकेदिवा
भूतेनिशाकरे विचेरुर्नविचेरुश्चराजन्नक्तंचरास्ततः बोध्यमानं तुतत्सैन्यंराजंश्चंद्रस्यरश्मिभिः बुबुधेशतपत्राणांवनंमहदिवांभसिर्यथा
यथाचंद्रोदयोद्धूतःक्षुभितःसागरोभवत् तथाचंद्रोदयोद्धूतःसबभूवबलार्णवः ततःप्रववृतेयुद्धंपुनरेवविशांपते लोकेलोकविनाशायप
रंलोकमभीप्सतां ॥ द्रोणपर्वणिरात्रियुद्धे संजयउवाच ततोदुर्योधनोद्रोणमभिगम्याब्रवीदिदं अमर्षवशमापन्नोजनयन्हर्षतेजसी
दुर्योधनउवाच नमर्षणीयाःसंग्रामेविश्राम्यंतःश्रमान्विताः सपत्नाग्लानमनसोलब्धलक्ष्याविशेषतः तत्तुमर्षितमस्माभिर्भवतःप्रि
यकाम्यया तएतेपरिविस्रब्धाःपांडवाबलवत्तराः सर्वथापरिहीणाःस्मतेजसाचबलेनच भवतापाल्यमानास्तेविवर्द्धंतेपुनःपुनः
दिव्यान्यस्त्राणिसर्वाणिब्रह्मास्त्रादीनियानिह तानिसर्वाणितिष्ठंतिभवत्येवविशेषतः नपांडवेयानवयंनान्येलोकेधनुर्द्धराः युध्यमान
स्यतेतुल्याःसत्यमेतद्ब्रवीमिते ससुरासुरगंधर्वानिमांल्लोकान्द्विजोत्तम सर्वास्त्रविद्भवान्हन्याद्दिव्यैरस्त्रैर्नसंशयः सभवान्मर्षयत्येतां
स्त्वत्तोभीतान्विशेषतः शिष्यत्वंवापुरस्कृत्यममवामंदभाग्यतां संजयउवाच एवमुत्तेजितोद्रोणःकोपितश्चसुतेनते समन्युरब्रवी
द्राजन्दुर्योधनमिदंवचः स्थविरःसन्परंशक्त्याघटेदुर्योधनाहवे अतःपरंमयाकार्यंक्षुद्रंविजयगृद्धिना अनस्त्रविदयंसर्वोहंतव्योस्त्र
विदाजनः यद्यत्करिष्येचाप्यस्मैतत्तत्पदिवाशुभं नहैककर्त्तास्मिकौरव्यवचनात्तवनान्यथा निहत्यसर्वपांचालान्युद्धेकृत्वापराक्रमं

राम २२६

विमोक्षेकवचेराजन्ममस्यसेनायुधमालये ममस्येयन्नकौंतेयमर्जुनंश्रांतमाहवे तस्यवीर्यंमहावाहोश्रुणुमसेनकौरव तेनदेवानगंधर्वा
नयक्षानवराक्षसाः उरस्तहूनेरणेजेतुंकुपितस्यसमाचिनं लोकरूपेनभगवानप्रसुह्यातः ह्यस्त्राःसायकैर्वारितस्तापिवर्षमाणेमहात्म
ना देवानागास्तथादैत्याःसायकास्वबलगर्विताः निहताःपुरुषेंद्रेणतस्मापिविरितेनव गंधर्वाघोषयात्रायांचित्रसेनादयोजिताः पुरे
तेह्रियमाणाच्चमोक्षिताह्यटधन्वना निवातकवचाश्चापिदेवानांशत्रवस्तथा सैरावध्याःसंग्रामेतेनवीरेणनिर्जिताः दानवानांसह
स्राणिहिरण्यपुरवासिनांविजिग्येपुरुषव्याघ्रःसशक्योमानुषैःकथं प्रत्यक्षंचैवतेसर्वंयथावलमिदंतवक्षपितंपांडुपुत्रेणचेष्टतोनोवि
शांपते संजयउवाच तंतहाभिप्रशंसंतंमतमर्जुनंकुपितस्तदा द्रोणंतवसुतोराजनपुनर्वैरमब्रवीत अहंदुःशासनःकर्णःशकुनिश्च
मातुलश्चमे हनिष्यामोर्जुनंसंख्येद्विधाकृत्वावभारतीं तस्यतद्वचनंश्रुत्वाभारद्वाजोहसन्निव अन्ववर्ततराजानंस्वस्तितेस्त्विति चाब्र
वीत कोहिगांडीवधन्वानंज्वलंतमिवतेजसा अक्षयंक्षपयेत्कश्चित्क्षत्रियःक्षत्रियर्षभं तंनकश्चिपतिर्नैद्राोनयमोनजलेश्वरः ना
सुरोरगरक्षांसिक्षपयेयुःसहायुधं मूढास्त्वेतानिभाषंतेयानीमान्याहभारत युद्धेह्यर्जुनमासाद्यस्वस्तिमानकोव्रजेद्गृहान त्वंतुस
र्वाभिशंकित्वान्निष्ठुरःपापनिश्चयः श्रेयसस्त्वद्धितेयुक्तंतनहंतुमिहेच्छसि गच्छत्वमपिकौंतेयमात्मार्थंजहिमाचिरं त्वमप्याशंससेयो
द्धुंकुलजःक्षत्रियोह्यसि इमानकिंसक्षत्रियानसर्वानघातयिष्यसिनागसः त्वमस्यमूलंवैरस्यतस्मादासादयार्जुनं एषतेमातुलःप्राज्ञः

द्रो°
२२७

क्षत्रधर्ममनुव्रतः दुर्यतिर्देवीगांधारीप्रपात्यार्जुनमाहवे एषोस्त्रकुशलोनित्योद्यूतकृत्कितवःशठः देविता निकृतिप्रज्ञो युधिजेष्यतिपां
डवान् त्वयाकथितमत्यर्थंकर्णेनसहहृष्टवत् अनकृच्छ्रत्वन्मोहात्तवतातदुःस्मरएवमः अहंचतातकर्णश्चभ्रातादुःशासनश्चमे पांडु
पुत्रान्हनिष्यामः सहिताःसमरेत्रयः इतितेकथ्यमानस्यश्रुतंसंसदिसंसदि अनुतिष्ठप्रतिज्ञांतांसत्याभवतुतैःसह एषतेपांडवःशत्रुरविशं
कोग्रतःस्थितः क्षत्रधर्ममवेक्षस्वश्लाघ्यस्तववधोजयात् दत्तंभुक्तमधीतंचप्राप्तमैश्वर्यमीप्सितं कृतकृत्योनृणश्चासिमाभैर्युध्यस्वपां
डवं इत्युक्त्वासमरेद्रोणोन्यवर्तत यतःपरैः द्वैधीकृत्यततःसेनांयुद्धंसमभवत्तदा द्रोणपर्वणित्रिपुष्टे संजयउवाच त्रिभागमात्रशेषा
यांरात्र्यांयुद्धमवर्ततकुरूणांपांडवानांचसंहृष्टानांविशांपते अथचंद्रप्रभांमुष्णन्नादित्यस्यपुरःसरः अरुणोभ्युदयांचक्रेताम्रीकुर्वन्दि
वाकरः प्राच्यांदिशिसहस्रांशोररुणेनारुणीकृता तापनीयंयथाचक्रंभ्राजतेरविमंडलं ततोरथाश्वान्मनुष्ययानान्युत्सृज्यसर्वेकु
रुपांडुयोधाः दिवाकरस्याभिमुखाजपंतः संध्यांगताःप्रांजलयोबभूवुः ततोद्वैधीकृतेसैन्येद्रोणःसोमकपांडवान् अभ्यद्रवत्सपांचालान्दु
र्योधनपुरोगमः द्वैधीकृतान्कुरून्दृष्ट्वामाधवोर्जुनमब्रवीत् सपत्नान्सव्यतःकृत्वासव्यसाचिन्नरमान्कुरून् समाधवमनुज्ञाप्यकुरू
ष्वतिधनंजयः द्रोणकर्णौमहेष्वासौसव्यतःपर्यवर्तत अभिप्रायंतुकृष्णस्यज्ञात्वापरपुरंजयः आजिशीर्षगतंपार्थंभीमसेनोभ्युवाचह
भीमसेनउवाच अर्जुनार्जुनबीभत्सोशृणुष्वैतद्वचोमम यदर्थंक्षत्रियासूतेतस्यकालोयमागतः अस्मिंश्चेदागतेकालेश्रेयोनप्रति रामः २२७

रि२

पन्नगे असंभावितरूपसत्त्वं त्वं संकरिष्यसि सत्यं क्रोधं धर्मं यशस्तां वीर्येणानृणतां प्राप्नुहि निघ्नन्नीकं पुत्रास्त्रेष्वस्त्रपन्नमभिमान
कुरु ॥ संजय उवाच सत्यसाची भीमेन चोदितः केशवेन च कर्णद्रोणावतिक्रम्य समंतात्पर्यवारयत् तमाजिशीर्षमायान्तं
हन्तं क्षत्रियर्षभान् पराक्रान्तं पराक्रम्य यतन्तं पुरुषर्षभाः नाशक्नुवन् वारयितुं वर्द्धमानमिवानलं अथ दुर्योधनः कर्णः शकुनिश्चा
पि सौबलः अभ्यवर्षञ्छरव्रातैः कुन्तीपुत्रं धनंजयं तेषामस्त्राणि सर्वेषामुत्तमास्त्रविदां वरः कदर्थीकृत्य राजेन्द्र शरवर्षैरवाकिरत्
अस्त्रैरस्त्राणि संवार्य लघुहस्तो धनंजयः सर्वानविध्यन्निशितैर्दशभिर्दशभिः शरैः उद्धूता रजसो वृष्टिः शरवृष्टिस्तथैव च तमश्च
घोरं शब्दश्च तदा समभवन्महान् न द्यौर्न भूमिर्न दिशः प्राज्ञायन्त तथागते सैन्येन रजसा मूढं सर्वमन्धमिवाभवत् नैव ते न वयं राजन्
न प्राज्ञासिष्म परस्परं उद्देशेन हि तेन स्म समयुध्यन्त पार्थिवाः विरथा रथिनो राजन् समासाद्य परस्परं केशेषु समसज्जन्त कवचेषु भु
जेषु च हताश्वा हतसूताश्च निश्चेष्टा रथिनो हताः जीवन्त इव तत्र स्म समदृश्यन्त भयार्दिताः हतान् गजान् समाश्लिष्य पर्वतानिव वा
जिनः गतसत्त्वा अदृश्यन्त तथैव सह सादिभिः ततस्त्वभ्यवसृत्यैव संग्रामादुत्तरां दिशं अतिष्ठदाहवे द्रोणो विधूमोऽग्निरिव ज्व

द्रो
२२८ त्वन् तमाविशीर्षरिकांतमपक्रांतं निशम्य तु समकंपंत सैन्यानि पांडवानां विशांपते धावमानं स्त्रिपादपूतं ज्वलंतमिव तेजसा
द्रोणं दृष्ट्वा रथेस्थं सैन्यमहाभवत् स्वभावत स्वाह्वयंतं परान्तौके प्रमित्रमिव बालाः नैतमाशंसिरे तेहन्तं वावासवं प्रथा केचिद्धास्तत्र
हस्तात्मानः केचित्क्रुद्धा मनस्विनः विस्मितास्त्वभवन् केचित्केचिदासन्नमर्षिताः हस्तैर्हस्ताग्रमपरे प्रसपिंषन्नराधिपाः अपरे
दशनैरोष्ठान् अदशन्क्रोधमूर्छिताः आक्षिपन्नायुधान्यन्ये समदुन्नापरे भुजान् अन्ये चान्वपतन् द्रोणं त्यक्तात्मानो महौजसः पांचा
लाः स्वविशेषेण द्रोणसायकपीडिताः समसज्जंत राजेंद्र समरे भृशवेदनाः ततो विराटद्रुपदौ द्रोणं प्रत्येतां रणे तथा चरंतं संग्रा प
मे शंसमरे दुर्जयं द्रुपदस्य ततः पौत्रास्त्रय एव विशांपते चेदयश्च महेष्वासा द्रोणमेवाभ्ययुर्युधि तेषां द्रुपदपौत्राणां त्रयाणां नि
शितैः शरैः त्रिभिर्द्रोणो हरत् प्राणांस्ते हता न्यपतन् भुवि ततो द्रोणो जयद्युद्धे चेदिकेकयसृंजयान् मत्स्यांश्चैवाजयत्सर्वान्
भारद्वाजो महारथः ततस्तु द्रुपदः क्रोधाच्छरवर्षमवासृजत् द्रोणं प्रति महाराज विराटश्चैव संयुगे तेनिहत्येषु वर्षं तद्द्रोणः क्षत्रियमर्
दनः तौ शरैश्छादयामास विराटद्रुपदावुभौ द्रोणोनुच्छाद्यमानो तौ क्रुद्धौ संग्राममूर्द्धनि द्रोणं शरैर्विव्यधतः परमं क्रोधमास्थि

राम
२२८

तै॥ ततो द्रोणो महाराज क्रोधामर्षसमन्वितः भल्लाभ्यां भृशतीक्ष्णाभ्यां चिच्छेद धनुषी तयोः ततो विराटः कुपितः समरे
तोमरान् दश चिक्षेप च शरान् द्रोणस्य वधकांक्षया शक्तिं च द्रुपदो घोरामायसीं स्वर्णभूषितां चिक्षेप भुजगेन्द्राभां
क्रुद्धो द्रोणरथं प्रति ततो भल्लैः सुनिशितैश्छित्वा तांस्तोमरान् दश शक्तिं कनकवैडूर्यां द्रोणश्चिच्छेद सायकैः ततो द्रो
णः सुपीताभ्यां भल्लाभ्यामरिमर्दनः द्रुपदं च विराटं च प्रेषयामास मृत्यवे हते विराटे द्रुपदे केकयेषु तथैव च
तथैव चेदिमत्स्येषु पांचालेषु तथैव च हतेषु त्रिषु वीरेषु द्रुपदस्य च नप्तृषु द्रोणस्य कर्म तद् दृष्ट्वा कोपदुःखसमन्वितः
शशाप रथिनां मध्ये धृष्टद्युम्नो महामनाः इष्टापूर्त्तात्तथा क्षात्राद् ब्राह्मण्याच्च स नश्यतु द्रोणो यस्याद्य मुच्येत यं वा द्रोणः
पराभवेत इति तेषां प्रतिश्रुत्य मध्ये सर्वधनुष्मतां आयाद् द्रोणं सहानीकः पांचाल्यः परवीरहा पांचालास्त्वेकतो
द्रोणमभ्यघ्नन् पाण्डवैः सह दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः सोदर्याश्च यथामुख्यास्तेऽरक्षन् द्रोणमाहवे रक्ष
माणं तथा द्रोणं समवेतैर्महारथैः यतमानास्तु पांचाला न शेकुः प्रतिवीक्षितुं तत्राक्रुध्यद् भीमसेनो धृष्टद्युम्नस्य

द्रो०
२२८

मारिष सप्तनं वाग्निहर्यामितंतस्य पुरुषर्षभः भीमसेन उवाच द्रुपदस्य कुले जातः सर्वास्त्रेषु च वित्तमः कः क्षत्रि
यो मन्यमानः प्रेक्षेतामवस्थितं पितृपुत्रवधं प्राप्य पुमान्कः परिहापयेत् विशेषतस्तु शपथं शपित्वा राजसंसदि
एष वैश्वानर इव समिद्धः स्वेन तेजसा शरचापेंधनो द्रोणः क्षत्रं दहति तेजसा पुरा करोति निःशेषां पांडवानामनीकि
नीं स्थिताः पश्यत मे कर्म द्रोणमेष व्रजाम्यहं इत्युक्त्वा प्राविशत्क्रुद्धो द्रोणानीकं वृकोदरः दृढैः पूर्णायतोत्सृष्टैर्द्राव
यंस्तव वाहिनीं धृष्टद्युम्नोपि पांचाल्यः प्रविश्य महतीं चमूं आससाद रणे द्रोणं तदासीत्तुमुलं महत् र नैव नस्तादृशं
युद्धं दृष्टपूर्वं न च श्रुतं यथा सूर्योदये राजन्समुत्पिंजोभवन्महान् संसक्तान्येव चादृश्यन्त रथवृंदानि मारिष हतानि
च विकीर्णानि शरीराणि शरीरिणां केचिदन्यत्र गच्छंतः पथि चान्यैरुपद्रुताः विमुखाः पृष्ठतश्चान्ये ताड्यंते पार्श्वतोपरे
तथा संसक्तयुद्धं तदभवद्भृशदारुणं अथ संध्यागतः सूर्यः क्षणेन समपद्यत ॥ इति द्रोणपर्वणि विराटद्रुपदवधो रा
त्रियुद्धं समाप्तं संजय उवाच ते तथैव महाराज दंशिता रणमूर्धनि संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे उदिते तु सह

द्रो
२२८

ह्योरेणतत्तकांचनसन्नभे प्रकाशितेपुलोकेषुपुनर्युद्धमवर्त्तत हृंहानितत्रयान्यासनसंसक्तानिपुरोदयात् तान्येवाभ्युदितेसूर्येसम
सज्जंतभारत रथैर्हयाहयैर्नागापादातैश्चापिकुंजराः हयैर्हयाःसमाजग्मुःपदाताश्चपदातिभिः संसक्ताश्चविषक्ताश्चयोधाःसंन्यप
तन्रणे तेरात्रौकृतकर्म्माणःश्रांताःसूर्यस्यतेजसा क्षुत्पिपासापरीतांगाःविसंज्ञाबहवोभवन् शंखभेरीमृदंगानांकुंजराणांचगर्ज्जतां
विस्फारितविकृष्टानांकार्मुकाणांचकूजतां शब्दःसमभवद्राजन्दिविस्पृग्भरतर्षभ द्रवतांचपदातीनांशस्त्राणांपततामपि हया
नांहेषतांचापिरथानांचनिवर्त्ततां क्रोशतांगर्ज्जतांचैवतदासीत्तुमुलोमहान् विवृद्धस्तुमुलःशब्दोद्यामगच्छन्महांस्तदानानायुधनिकृ
त्तानांचेष्टतामातुरःस्वनः भूमावश्रूयतमहांस्तदासीत्कृपणंमहत् पततांपात्यमानानांपत्त्यश्वरथदंतिनां तेषुसर्वेष्वनीकेषु
व्यतिषक्तेष्वनीकशः स्वेस्वान्जघ्नुःपरेस्वांश्चस्वान्परेचपरेपरान् वीरबाहुविसृष्टाश्चयोधेषुव्राजेषुच राशयःप्रसदृश्यंतवाससांनेज
नेष्विव उद्यतप्रतिपिष्टानांखड्गानांवीरबाहुभिः सखड्गशब्दस्तद्रूपोवाससांनिज्यतामिव अर्द्धासिभिस्तथाखड्गैस्तोमरैःसपरश्वधैः निकृ
ष्टयुद्धंसंसक्तंमहदासीत्सुदारुणं गजाश्वकायप्रभवानरदेहप्रवाहिनी शरशस्त्रार्द्दिताःक्लांताःरात्रिमूढाल्पचेतसः विष्टभ्यसर्वगात्रा
णिव्यतिष्ठन्गजवाजिनः बाहुभिःकवचैश्चित्रैःशिरोभिश्चारुकुंडलैः युद्धोपकरणैश्चान्यैस्तत्रतत्रप्रकाशितैः क्रव्यादसंघैराकीर्णम
र्द्धमृतैर् २ तैरपि नासीद्रथपथस्तत्रसर्वमायोधनंप्रति मज्जत्सुचक्रेषुरथात्सत्वमास्थायवाजिनः कथंचिद्वहन्श्रांतावेपमानाःशरार्द्दिताः
कुलसत्वबलोपेतावाजिनोवारणोपमाः विह्वलंतद्गणंसर्वंभ्रांतंभयमारतांतरं बलमासीत्तदासर्वमृतेद्रोणार्जुनावुभौ तावेवास्तां

द्रो० निलयनंतावान्नीयतनमेवच तावेवाभेसमासाद्यजग्मुर्वैवस्वतक्षयं आविग्नमभवत्सर्वे कौरवाणांमहद्बलं पांचालानांचसंसक्तानद्रोणानापत
१३० किंचन अंतकाक्रीडसदृशंभीरुणांभयवर्द्धनं रथिवांराजवंश्यानामुच्छ्रितेमहतिक्षये ततश्चकर्णोद्रोणश्चनार्ज्जुनं युधिष्ठिरं नभीमसे
नंनयमौनपांचाल्यंनसात्यकिं नचदुःशासनंद्रौणिंनदुर्योधनसौबलौ नकृपंमद्रराजंचकृतवर्माणमेवच नचान्यान्नैवचात्मानंनक्षितिंनदि
शस्तथा पश्यामराजन्संसक्तान्सैन्येनरजसावृतान् संभ्रांतेतुमुलेघोरेरजोमेघसमुच्छ्रिते द्वितीयामिवसंप्राप्तामन्यतनिशांतदा नज्ञा
यंतेकौरवेयानपांचालानपांडवाः नदिशोद्यौर्न्नचोर्वीचनसमंविषमंतथा हस्तसंस्पर्शमापन्नानपरानप्यथवास्वकान् न्यपातयंस्तदायुद्धे
नराःस्मविजयैषिणः उद्धतत्वात्तुरजसः प्रसेकाच्छोणितस्यच प्रासाद्यतरजोभौमंशीघ्रत्वादनिलस्यच तत्रनागाहयायोधारथिनोथ
पदातयः पारिजातवनानीवव्यरोचन्रुधिरोक्षिताः ततोदुर्योधनःकर्णोद्रोणोदुःशासनस्तथा पांडवैःसमसज्जंतचतुर्भिश्चतुरोरथाः
दुर्योधनःसहभ्रात्रायमाभ्यांसमसज्जत वृकोदरोराधेयोभारद्वाजेनचार्ज्जुनः तद्घोरंमहदाश्चर्यंसर्वेप्रैक्षन्समीपतः रथर्षभाणामु
ग्राणांसंनिपातममानुषं रथमार्गविचित्रैस्तैर्विचित्ररथसंकुलं अपश्यन्रथिनोयुद्धं विचित्रंचित्रयोधिनो यतमानाःपराक्रांताःप
रस्परजिगीषवः जीमूताइवघर्मांतेशरवर्षैरवाकिरन् तेरथान्सूर्यसंकाशानास्थिताःपुरुषर्षभाः अशोभंतयथामेघाःशारदाश्चलवि
द्युतः योधास्तेतुमहाराजक्रोधामर्षसमन्विताः स्पर्द्धिनश्चमहेष्वासाःकृतयत्नाधनुर्द्धराः अभ्यगच्छंस्तथान्योन्यंमत्तागजवृषाइव नवैदे द्रो०
हेष्वास्तिकालेराजन्ननागते यत्रसर्वेनयुगपद्व्यशीर्यंतमहारथाः बाहुभिश्चरणैश्छिन्नैःशिरोभिश्चसकुंडलैः कार्मुकैर्विशिखैःप्रासैःखड्गैः १३०

५१

परश्वपट्टिशैः नालीकैः क्षुद्रनाराचैर्नखरैः शक्तितोमरैः अन्यैश्च [redacted] विविधाकारैर्धौतैः प्रहरणोत्तमैः
विचित्रैर्विविधाकारैः शरीरावरणैरपि विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः शून्यैश्च नगराकारैर्हतयोधध्वजै रथैः अ
मनुष्यैर्हयैस्त्रस्तैः कृष्यमाणैस्ततस्ततः वातायमानैरसकृद्धतवीरैरलंकृतैः व्यजनैः कंकटैश्चैव ध्वजैश्च विनिपातितैः
छत्रैराभरणैर्वस्त्रैर्माल्यैश्च सुसुगंधिभिः हारैः किरीटैर्मुकुटैरुष्णीषैः किंकिणीगणैः उरस्थैर्मणिभिर्निष्कैश्चूडामणिभिरे
व च आसीदायोधनं तत्र नभस्तारागणैरिव ततो दुर्योधनस्यासीन्नकुलेन समागमः अमर्षितेन क्रुद्धस्य क्रुद्धेनामर्षि
तस्य च अपसव्यं चकाराथ माद्रीपुत्रस्तवात्मजः किरंछरशतैर्हृष्टस्तत्र नादो महानभूत् अपसव्यं कृतं संख्ये भ्रात्र
व्येनात्यमर्षिणा नामृष्यत तमप्याजौ प्रतिचक्रे पसव्यतः पुत्रस्तव महाराज राजा दुर्योधनो द्रुतं ततः प्रतिचिकीर्षितम
पसव्यं तु तेसुतं मवारयत तेजस्वी नकुलश्चित्रमार्गवित् समर्वतो निवार्यैनं शरजालेन पीडयन् विमुखं नकुलं चक्रे तत्सेना:
समपूजयन् तिष्ठ तिष्ठेति नकुलो बभाषे तनयं तव संस्मृत्य सर्वदुःखानि तव दुर्मंत्रितेन च इति द्रोणपर्वणि संजय उवाच
ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत् रथवेगेन तीव्रेण कंपयन्निव मेदिनीं तस्यापतत एवाशु भल्लेनामित्रकर्शनः माद्रीपुत्रः
शिरो यंतुः सशिरस्त्राणमच्छिनत् नैनं दुःशासनः सूतं नापि कश्चन सैनिकः कन्नोत्तमांगमाशुत्वात् सहदेवेन बुद्धवान् यदा तु
संगृहीतत्वात् प्रयान्त्यश्वा यथासुखं ततो दुःशासनः सूतं बुबुधे गतचेतनं स हयान् संनिगृह्याजौ स्वयं हयविशारदः युयुधे रथि

ववर्ष च भीमवत् स तदेव जितान स्वान्तरी द्रोणो वीरो रवाकिरत् पीड्यमानाः शरैस्ताभ्यां द्वयं तेन तत्स्ततः सर्वेभिमुखिविप्रतापुत्र स उदै

द्रो० २३१ नाम्ना घोलघुवित्रेच सम्पृच तदस्याप्रजयनकर्म्मेव परेचापि संयुगे हतस्ततेरथेनाजौ शरासनं धनुषाकर्म्मकुर्वीस्तुरश्मीन्सपुनह
स्ततत छिंद्ये तेषुतं वाणो भीमो पुत्रोभ्यवाकिरत् परोक्षं सप्ततं कर्णस्तिरनंतमापतत् शक्रोदरस्ततः कर्णं त्रिभिर्मल्लैः समाहि
तः श्वाकर्णो पूर्णोन्मग्नतवाक्ष्लोहरश्मिचानदत् सनिरूस्ततः कर्णः संबद्धितश्वोगः भीममावारयामास विकिरन्निशितान् छुमान्
तदस्तनुमुलंयुद्धं भीमराधेययोस्तदा तौ वृषाविवनर्द्दन्तौ विश्वनपनाजुमौ वेगेन महता न्योन्यं संरब्धावभिपेततुः अभिसंश्लिष्टयो
स्तत्रतयोराहवशौंडयोः विच्छिन्नशरपातत्वाद्गदायुद्धमवर्त्ततगदया भीमसेनस्तु कर्णस्यरथकूवरं विभेदशतधाराजंस्तदद्भुत
मिवाभवत ततो भीमस्यराधेयो गदामाविध्य वीर्यवान् अवासृजद्रथेतां तु विभेद गदया गदां भीमसेनस्तु गदया कर्णस्य रथकूवरं
विभेदशतधाराजंस्तदद्भुतमिवाभवत् ततो भीमस्यराधेयो गदामाविध्य वीर्यवान् अवासृजद्रथे तां तु विभेद गदया पातयन्ततो द३
भीमः पुनर्गुर्वीं चिक्षेपाधिरथिं गदां तां शरैर्दशभिः कर्णः सपुंखैः सप्रवेशितैः प्रत्यविध्यत्पुनस्तान्नेः सभीमंपुनराव्रजत् व्यालीवमंत्रा
भिहता कर्णवाणैरभिद्रुता तस्याः प्रतिनिपातेन भीमस्य विपुलो ध्वजः पपात सारथिश्चास्य समोहंचगदाहतः सकर्णोसायकानष्टौव्य
सृजन्क्रोधमूर्छितः ध्वजे शरासने चैव शरावापे च भारत तैः तस्य निशितैः पीतैर्भीमसेनो महाबलः चिच्छेद परवीरघ्नः प्रहसन्नि
वभारतः ध्वजं शरासनं चैव शरावापं च भारत कर्णोप्य मर्षितो न्यद्धे हेमपृष्ठं दुरासदं ततस्तु पुनराधेयो हयानस्य रथेषुभिः ऋक्ष शाम०
वर्णान्जघानाशु तयोभौ पार्ष्णिसारथी सविपन्नरथो भीमो नकुलस्याप्लुतो रथं हरिर्यथा गिरेः शृंगं समाक्रामदरिंदमः तथा द्रो २३१

णार्जुनौ नित्यमस्पृध्येतां महात्मानौ आचार्यशिष्यौ राजेन्द्र कृतप्रहरणौ युधि लघुसंधानयोगाभ्यां ज्यायोमोक्षरणेन च मोहयेतौ मनुष्या-
णां च चक्षूंषि च मनांसि च उपारमंत ते सर्वे यो भारतसत्तम अदृष्टपूर्वं पश्यन्तस्तद्युद्धं गुरुशिष्ययोः विचित्रान् पृतनामध्ये रथमार्गानुदी-
र्यतौ अन्योन्यमपसव्यं च कर्तुं वीरौ तदैषतुः पराक्रमं तयोर्योधा ददृशुस्ते सुविस्मिताः तयोः समभवद्युद्धं द्रोणपाण्डवयोर्महत् आ-
मिषार्थे महाराज गगने श्येनयोरिव यद्यच्चकार द्रोणस्तु कुन्तीपुत्रजिगीषया तत्तत्प्रतिजघानाशु प्रहसंस्तस्य पाण्डवः यदा द्रोणो न शक्नोति
पाण्डवस्य विशेषणे ततः प्रादुश्चकारास्त्रमस्त्रमार्गविशारदः ऐन्द्रं पाशुपतं त्वाष्ट्रं वायव्यमथ वारुणं मुक्तं मुक्तं द्रोणचापात्तज्जघान धनं-
जयः अस्त्राण्यस्त्रैर्यदा तस्य विधिवद्धन्ति पाण्डवः ततोऽस्त्रैः परमैर्दिव्यैर्द्रोणः पार्थमवाकिरत् यद्यदस्त्रं स पार्थाय प्रयुङ्क्ते विजिगीषया
तस्यास्त्रस्य विघातार्थं तत्तत्स कुरुतेऽर्जुनः स वध्यमानेष्वस्त्रेषु दिव्येष्वपि यथाविधि अर्जुनेनार्जुनं द्रोणो मनसैवाभ्यपूजयत् मे-
ने चात्मानमधिकं पृथिव्यामपि भारत तेन शिष्येण सर्वेभ्यः शस्त्रविद्भ्यः परंतप वार्यमाणः स पार्थेन तथा मध्ये महात्मनां यतमानो
धिकं प्रीत्या प्रीयते स्मार्जुनेन सः ततोऽन्तरिक्षे देवाश्च गन्धर्वाश्च सहस्रशः ऋषयः सिद्धसंघाश्च व्यतिष्ठन्त दिदृक्षया तदप्सरोभिराकीर्णं
यक्षगन्धर्वसंकुलं श्रीमदाकाशमभवद्भूयो मेघाकुलं यथा तत्र स्मान्तर्हिता वाचो व्यचरन्त पुनः पुनः द्रोणपार्थस्तवोपेता अग्र्यरूपं तन
णाविप विसृज्यमानेष्वस्त्रेषु ज्वलयत्सु दिशो दश अब्रुवंस्तत्र सिद्धाश्च ऋषयश्च समागताः नैवेदं मानुषं युद्धं नासुरं न च राक्षसं
न दैवं न च गान्धर्वं ब्राह्मं ध्रुवमिदं परं विचित्रमिदमाश्चर्यं न नो दृष्टं न च श्रुतं अति पाण्डवमाचार्यो द्रोणं चाप्यति पाण्डवः नान्तरं

द्रो० रंतरंशकंद्रष्टुमस्त्रेषुकेनचित् यदिस्थितोहिसंग्रामेनकश्चिदस्थितात्मानमात्मना तत्रशक्तोपमाकर्तुमस्त्रत्रतुनाविद्यते ज्ञानमेकस्थमा
२३२ चार्येज्ञानंयोगश्चपांडवे शौर्यमेकस्थमाचार्येबलंशौर्यंचपांडवे नेमौशक्योमहेष्वासौयुद्धेक्षपयितुंपरैः इच्छमानौपुनरिमौहन्येतांसा
मरंजगत् इत्यब्रुवन्महाराजदृष्ट्वातौपुरुषर्षभौ अंतर्हितानिभूतानिप्रकाशानिचसंघशः ततोद्रोणोब्राह्ममस्त्रंप्रादुश्चक्रेमहाम
तिः संतापयन्रणेपार्थंभूतान्यंतर्हितानिच ततश्चचालपृथिवीसपर्वतवनद्रुमा ववौचविषमोवायुःसागराश्चापिचुक्षुभुः
ततस्त्रासोमहानासीत्कुरुपांडवसेनयोः सर्वेषांचैवभूतानामुद्यतेस्त्रेमहात्मना ततःपार्थोप्यसंभ्रांतस्तदस्त्रंप्रतिजघ्निवान्
ब्रह्मास्त्रेणैवराजेंद्रततःसर्वमशीशमत् यदानगम्यतेपारंतयोरन्यतरस्यवा ततःसंकुलयुद्धेनतद्युद्धंव्याकुलीकृतं नाज्ञायततः
किंचित्तुनरेवविशांपते प्रवृत्तेतुमुलेयुद्धेद्रोणपांडवयोर्मृधे शरजालैःसमाकीर्णेमेघजालैरिवांबरे नस्मसंपततेकश्चिदंतरिक्षच
रस्तदा महाभारतेद्रोणपर्वणि संजयउवाच तस्मिंस्तथावर्त्तमानेनराश्वगजसंक्षये दुःशासनोमहाराजधृष्टद्युम्नमयोधयत् सतुरुक्म
रथासक्तोदुःशासनशरार्दितः अमर्षात्तवपुत्रस्यशरैर्वाहानवाकिरत् क्षणेनसरथस्तस्यसध्वजःससारथिः नादृश्यतमहाराजपार्षत
स्यशरैश्चितः दुःशासनस्तुराजेंद्रपांचाल्यस्यमहात्मनः नाशकत्प्रमुखेस्थातुंशरजालप्रपीडितः सतुदुःशासनंबाणैर्विमुखीकृत्यपार्षतः
किरन्शरसहस्राणिद्रोणमेवाभ्ययाद्रणे अभ्यपद्यतहार्दिक्यःकृतवर्मात्वनंतरं सोदर्याणांत्रयश्चैवतस्तंपर्यवारयन् तंयमौपृष्ठतोन्वैतांर एम०
क्षंतौपुरुषर्षभौ द्रोणायाभिमुखंयांतंदीप्यमानमिवानलं संप्रहारमकुर्वंस्तेसर्वेसप्तमहारथाः अमर्षिताःसत्त्ववंतःकृत्वामरणमग्रतः शु २३२

ह्यात्मानः सुहृदस्त्वा राजन्सर्गपुरस्कृताः आर्यवृत्तमकुर्वंत परस्परजिगीषवः शुक्लाभिजनकर्माणो मतिमंतो जनाधिप धर्मवृत्तमपृथं
तश्रेयस्तांगतिमुत्तमां नतत्रासीदधर्मिष्ठमशस्त्रंयुद्धमेवच नतत्रकर्णिनालीकोनतत्प्लेनचवस्तिकः नसूचीकपिशोनात्रनगवास्थिग
जस्थिकः इषुरासीन्नसंश्लिष्टोनपूतिर्नचजिह्मगः ऋजून्येवविशुद्धानिसर्वेशस्त्राण्यधारयन् सुयुद्धेनपराँल्लोकानीप्संतः कीर्तिमेवच तदासी
त्तुमुलंयुद्धंसर्वदोषविवर्जितं चतुर्णांतत्रयोधानांतैस्त्रिभिः पांडवैः सह धृष्टद्युम्नस्तुतान्दृष्ट्वातवराजन्नथर्षभान् यमाभ्यांवारितान्वीरान्
शीघ्रास्त्रोद्रोणमभ्ययात् निवारितास्तुतेवीरास्तयोःपुरुषसिंहयोः समसज्जंतचत्वारोवाताःपर्वतयोरिव द्वाभ्यांद्वाभ्यांयमौसार्द्धंरथाभ्यां
रथपुंगवौ समासक्तौततोद्रोणंधृष्टद्युम्नोभ्यवर्तत दृष्ट्वाद्रोणायपांचाल्यंव्रजंतंयुद्धदुर्मदं यमाभ्यांतांश्चसंसक्तांस्तदंतरमुपाद्रवत् दु
र्योधनोमहाराजकिरन्शोणितभोजनान् तंसात्यकिःशीघ्रतरंपुनरेवाभ्यवर्तत तौपरस्परमासाद्यसमीपेकुरुमाधवौ हसमानौनरशार्दू
लावभीतौसमसज्जतां बाल्येवृत्तानिसर्वाणिप्रीयमाणौविचिंत्यतौ अन्योन्यंप्रेक्षमाणौचस्मयमानौपुनः पुनः अथदुर्योधनोराजासात्यकिं
समभाषत प्रियंसखायंसततंगर्हयन्वृत्तमात्मनः धिक्क्रोधंधिक्सखेलोभंधिङ्मोहंधिगमर्षितं धिगस्तुक्षात्रमाचारंधिगस्तुबलमौर
सं यत्रमामभिसंधत्सेत्वांचाहंशिनिपुंगव त्वंहिप्राणैःप्रियतरोममाहंचसदातव स्मरामितानिसर्वाणिबाल्येवृत्तानियानिनौ तानिसर्वाणि
जीर्णानिसांप्रतंनौरणाजिरे किमन्यत्क्रोधलोभाभ्यांयुध्यामित्वाद्यसात्वत तंतथावादिनंतत्रसात्यकिःप्रत्यभाषत प्रहसन्विशिखांस्तीक्ष्णा
नुद्यम्यपरमास्त्रवित् नेयंसभाराजपुत्रनाचार्यस्यनिवेशनं यत्रक्रीडितमस्माभिस्तदाराजन्समागतैः दुर्योधनउवाच क्वसाक्रीडागतास्मा

द्रो० केवासैवैशिनिपुंगव क्वयुद्धमिदंभूय:कालोहिदुरतिक्रम: किंनुनोविद्यतेकृत्यंधनेनधनलिप्सया यत्रयुध्यामहेसर्वेधनलोभात्समा
२३४ गता: ॥ संजयउवाच तंतथावादिनंतत्रराजानंमाधवोब्रवीत् एवंक्षत्रंसदाचारंयद्युध्यंतीहगुरूनपि यदितेहंप्रियोराजन्जहिमांमाचिरंकृ
था: त्वत्कृतेसुकृतांल्लोकान्गच्छेयंभरतर्षभ यातेशक्तिर्बलंयच्चतत्क्षिप्रंमयिदर्शय नेच्छाम्येतदहंद्रष्टुंमित्राणांव्यसनंमहत्
इत्येवंव्यक्तमाभाष्यप्रतिभाष्यचसात्यकि: प्रत्ययात्तूर्णमव्यग्रोदर्पान्नाकुरुतात्मनि तमापतंतंमहाबाहुंप्रत्यगृह्णात्तवात्मज:
शरैश्चावाकिरद्राजन्शैनेयंतनयस्तव तत:प्रववृतेयुद्धंकुरुमाधवसिंहयो: अन्योन्यंक्रुद्धयोर्घोरंयथाद्विरदसिंहयो: तत:पूर्णायतो
त्सृष्टै:सात्वतंयुद्धदुर्मदं दुर्योधन:प्रत्यविध्यत्कुपितोदशभि:शरै: तंसात्यकि:प्रत्यविध्यत्तथैवावाकिरच्छरै: पंचाशतापुनश्चाजौत्रिंश
तादशभिश्चह सात्यकिंतुरणेराजन्प्रहसंस्तनयस्तव आकर्णपूर्णैर्निशितैर्विव्याधत्रिंशताशरै: ततोस्यसशरंचापंक्षुरप्रेणद्विधाछिनत्
सोन्यत्कार्मुकमादायलघुहस्तस्ततोदृढं सात्यकोव्यसृजच्चापिशरश्रेणींसुतस्यते तामापतंतींसहसाशरश्रेणींजिघांसया चिच्छेदबहु
धाराजातनयस्तुजनाधिपा: सात्यकिश्चविसन्नत्यापीडयामासवेगित: स्वर्णपुंखै:शिलाधौतैराकर्णोत्सृष्टैर्निशितै: तस्यसंदधतश्चे
षुंसंहितेषुंचकार्मुकं अछिनत्सात्यकिस्तूर्णंशरैश्चैवाभ्यविध्यत सगाढविद्धोव्यथित:प्रत्यपायाद्रथांतरं दुर्योधनोमहाराजदाशार्हशरपीडित:
समाश्वस्यतत:पुत्रस्तेसात्यकिंपुनरभ्ययात् विसृजन्निषुजालानियुयुधानरथंप्रति तथैवसात्यकिर्बाणान्दुर्योधनरथंप्रति प्रततंविसृज रामः
न्राजंस्तत्संकुलमवर्तत तत्रेषुभि:क्षिप्यमाणै:पतद्भिश्चशरीरिषु अग्नेरिवमहाकक्षेशब्द:समभवन्महान् तयो:शरसहस्रैश्चसंछन्नंवसुधातलं २३३

अगमत्पंचशैराकाशंसमपद्यत तत्राधिकमालक्ष्माधर्वंरथसत्तमं क्षिप्रमभ्यपतत्कर्णोऽपीसंततनपंतव ततस्तंमर्षयामासभीम
सेनोमहाबलः सोभ्यधावत्त्वरितः कर्णोविसृजन्सायकान्बहून् तस्यकर्णःशितान्बाणान्प्रतिहत्यहसन्निव धनुःशरांश्चचिच्छेद
सूतंचास्यहनच्छरैः भीमसेनस्तुसंक्रुद्धोगदामादायपांडवः छजेथनुश्चसतंचसममर्दीहवैरियोः रथचक्रंचकर्णस्यबभंजस
महाबलः भग्नचक्रोरथेतिष्ठदकंपःशैलराडिव एकचक्रंरथंतस्यतमूहुःसुचिरंहयाः एकचक्रमिवार्कस्यरथंसप्तहयायथा
अमृष्यमाणःकर्णस्तुभीमसेनमयुध्यत विविधैरिषुजालैश्चनानाशस्त्रैश्चसंयुगे भीमसेनस्तुसंक्रुद्धःसूतपुत्रमयो
धयत् तस्मिंस्तथावर्तमानेयुद्धेधर्मसुतोब्रवीत् पांचालान्नरव्याघ्रान्मत्स्यांश्चपुरुषर्षभान् येनःप्राणाःशिरोये
नोयेनोयोधामहारथाः तएतेधार्तराष्ट्रेषुविसक्ताःपुरुषर्षभाः किंतिष्ठतयथामूढाः सर्वेविगतचेतसः तत्रगच्छत
यत्रैतेयुध्यंतेमामकारथाः क्षत्रधर्मंपुरस्कृत्यसर्वएवगतज्वराः जयंतोवध्यमानाश्चगतिमिष्टांगमिष्यथ जित्वावा
ऽभिर्यत्तैर्यजध्वंभूरिदक्षिणैः हतावास्वर्गताभूत्वालोकान्प्राप्स्यथपुष्कलान् तेराज्ञाचोदितावीरायोत्स्यमानामहारथाः
क्षत्रधर्मंपुरस्कृत्यत्वरिताद्रोणमभ्ययुः पांचालास्त्वेकतोद्रोणमभ्यघ्नन्निशितैःशरैः भीमसेनपुरोगाश्चाप्येकतःपर्यवा
रयन् आसंस्तुपांडुपुत्राणांत्रयोजिह्मामहारथाः यमौचभीमसेनश्चप्राक्रोशंस्तेधनंजयं अभिद्रवार्जुनक्षिप्रंकु
रून्द्रोणादपानुद ततएनंहनिष्यंतिपांचालाहतरक्षिणं कौरवेयांस्ततःपार्थःसहसासमुपाद्रवत् पांचालानेवतु
द्रोणोधृष्टद्युम्नपुरोगमान् ननर्दुस्तरसावीराःपंचमेऽहनिभारत इतिद्रोणपर्वणि॥ संजयउवाच पंचालानांततो

द्रोणोप्यकरोत्कदनंमहत् पश्चात्क्रुद्धोरणेशत्रुकोटानगणानांहयपेषु द्रोणास्तेणामहाराजवध्यमानाःपरेयुधि नात्रसंत
द्रोः रणोद्रोणात्सत्ववंतोमहारथाः वध्यमानामहाराजपांचालाःसंजयास्तथा द्रोणमेवाभ्ययुर्युद्धेयोधयंतोमहारथं तेषां
२३८ तच्छाद्यमानानांपांचालानांसमंततः अभवद्भैरवोनादोवध्यतांशरवृष्टिभिः वध्यमानेषुसंग्रामे पांचालेषुरणे पांचा
लेषुमहात्मना उदीर्यमाणेद्रोणास्त्रेपांडवान्भयमाविशत् दृष्ट्वाश्वरथसंघानांविपुलंचक्षयंयुधि पांडवेयामहाराज
नाशशंसुर्जयंतदा कच्चिद्द्रोणोननःसर्वान्क्षपयेत्परमास्त्रवित् समिद्धःशिशिरापायेदहन्कक्षमिवानलः नचैनंसं
युगेकश्चित्समर्थःप्रतिवीक्षितुं नचैनमर्जुनोजातुप्रतियुध्येतधर्मवित् त्रस्तान्कुंतीसुतान्दृष्ट्वाद्रोणसायकपीडि
तान् मतिमान्श्रेयसेयुक्तःकेशवोर्जुनमब्रवीत् नैषयुद्धेनसंग्रामेजेतुंशक्यःकथंचन सधनुर्धन्विनांश्रेष्ठोदेवैरपि
सवासवैः न्यस्तशस्त्रस्तुसंग्रामेशक्योहंतुंभवेन्नृभिः आस्थीयतांजयेयोगोधर्ममुत्सृज्यपांडवाः यथावःसंयुगेसर्वा
न्हन्याद्रुक्मवाहनः अश्वत्थाम्निहतेनैषयुध्येदितिमतिर्मम तंहतंसंयुगेकश्चिदस्मैशंसतुमानवः एतन्नारोचयद्राजन्
कुंतीपुत्रोधनंजयः अन्येत्वरोचयन्सर्वेकृच्छ्रेणतुयुधिष्ठिरः ततोभीमोमहाबाहुरनीके तंमहागजं जघानगदयारा
जन्नश्वत्थामानमित्युत परप्रमथनंघोरंमालवस्येंद्रवर्मणः भीमसेनस्तुसव्रीडमुपेत्यद्रोणमाहवे अश्वत्थामाहतइति राम०
शब्दमुच्चैश्चकारह अश्वत्थामेतिहिगजःख्यातोनाम्नाहतोभवत् कृत्वामनसितंभीमोमिथ्याव्याहृतवांस्तदा भीमसेनवचः २३८
श्रुत्वाद्रोणस्तत्परमाप्रियं मनसासन्नगात्रोभूद्यथासैकतमंभसि शंकमानःसतन्मिथ्यावीर्यज्ञःस्वसुतस्यवै हतःसइति

वध्यत्वानैवधैर्याद्दकंपत सलब्ध्वाचेतनांद्रोणः शराणैर्वसमाश्रमत अनुचिंत्यात्मनः पुत्रमविषह्यमरातिभिः सपार्षतमभि
द्रुत्यजिघांसुर्मृत्युमात्मनः अवाकिरन्महेष्वासस्तीक्ष्णानाकर्कपत्रिणः सपश्चात्समादायदिव्यमाग्नेयंधनुः शरांश्च
ब्रह्मदंडाभानधृष्टद्युम्नमयोधयत ततस्तंशरवर्षेणमहतासमवाकिरत अशातयच्चसंक्रुद्धोधृष्टद्युम्नममर्षणः शरांश्चशत
धातसद्द्रोणश्छित्वैरसायकैः ध्वजंधनुश्चनिशितैःसारथिंचाप्यपातयत धृष्टद्युम्नःप्रहस्यान्यत्पुनरादायकार्मुकं शितेनचै
नंबाणेनप्रत्यविध्यत्स्तनांतरे सोतिविद्धोमहेष्वासःसंभ्रांतइवसंयुगे भल्लेनशितधारेणचिछेदास्यपुनर्धनुः यच्चास्यबा
णंविकृतंधनूंषिचविशांपते सर्वेचिछेदद्दुर्धर्षोगदांखड्गंचवर्जयत् धृष्टद्युम्नंचविव्याधनवभिर्निशितैःशरैः जीवितांतक
रैःक्रुद्धःक्रुद्धरूपःपरंतप धृष्टद्युम्नोरथस्याश्वान्स्वरथ्यैर्महारथः व्यामिश्रयदमेयात्मानंतोजलदागमे तयोरंजुर्महाराजमि
श्रितारणमद्ध्नि ईषाबंधा ~~[illegible]~~
~~[illegible]~~ युगबंधंचक्रबंधंतथैवच प्राणाशपरमेयात्माधृष्टद्युम्नस्यसद्द्विजः सछिन्नधन्वापांचाल्योतिकृ
त्तध्वजसारथिः उत्तमामापदंप्राप्यगदांवीरःपरामृशत तामस्यविशिखैस्तीक्ष्णैःक्षिप्यमाणांमहारथः निजघानशरैर्द्रो
णःक्रुद्धःसत्यपराक्रमः तांतुदृष्ट्वानरव्याघ्रोद्रोणेननिहतांशरैः विमलंखड्गमादत्तशतचंद्रंचभानुमत् चर्मंशापंतथाभूते
पांचाल्यःसाध्वमन्यत वधमाचार्यमुख्यस्यप्राप्तकालंमहात्मनः ततःसरथनीडस्थःस्वरथस्यरथेषया अगच्छदसिमुद्य
म्यशतचंद्रंचभानुमत् चिकीर्षुर्दुष्करंकर्म्मधृष्टद्युम्नोमहारथः इयेषवक्षोभेत्तुंसभारद्वाजस्यसंयुगे सोतिष्ठद्युगमध्येवैयु

पांचाल्यःखड्गमस्त्रमुदीरयन् तेभिरश्चावद्ध्योमनजवनावातरंहसः पारावतसवर्णाश्चशोणाश्वाभरतर्षभ पथ्यासविद्युतोमे ९४

२

गमन्नहनेषु च जघनार्द्धेषु वाजिनां तत्सैन्याः समपूजयन् तिष्ठतो युगपालीषु श्रोणीष्वधितिष्ठतः नापश्यदंतरं द्रोणस्तदद्भु
तमिवाभवत् क्षिप्रं श्येनस्य चरतो यद्वदामिषगृद्धिना तद्वदासीदभीसारो द्रोणं प्रार्थयतो रणे तस्य पारावतानश्वान्रथशक्त्या
द्रो० २३४ पराभिनत् सर्वानेकैकशो द्रोणो रुक्मशोणान्विवर्जयन् ते हता न्यपतन्भूमौ धृष्टद्युम्नस्य वाजिनः शोणास्तु पर्यमुच्यंत रथबंधा
द्विशांपते तान्हयान्निहतान्दृष्ट्वा द्विजाग्र्येण सपार्षतः नामृष्यत युधां श्रेष्ठो याज्ञसेनिर्महारथः विरथः स गृहीत्वा तु खड्गं खड्ग
भृतां वरः द्रोणमभ्यपतद्राजन्वैनतेय इवोरगं तस्य रूपं बभौ राजन्भारद्वाजं जिघांसतः यथा रूपं पुरा विष्णोर्हिरण्यकशिपोर्वधे
स तदा विविधान्मार्गान्प्रवरांश्चैकविंशतिं दर्शयामास कौरव्य पार्षतो विचरन्रणे भ्रांतमुद्भ्रांतमाविद्धमाप्लुतं प्रसृतं सृतं परिवृत्तं
निवृत्तं च खड्गचर्म च धारयन् संपातं समुदीर्णं च दर्शयामास पार्षतः भारतं कौशिकं चैव सात्वतं चैव शिक्षया दर्शयन्व्यचरद्यु
द्धे द्रोणस्यांतचिकीर्षया चरतस्तस्य तान्मार्गान्विचित्रान्खड्गचर्मिणः व्यस्मयंत रणे योधा देवताश्च समागताः ततः शरसहस्रे
णाशतचंद्रमपातयत् चर्म खड्गं च संबाध्य धृष्टद्युम्नस्य स द्विजः ये तु वैतस्तिका नाम शरा ह्यासन्नयोधिनः निकृष्टयुद्धे द्रोणस्य ना
न्येषां संति ते शराः ऋते शारद्वतात्पार्थाद्द्रौणाद्वैकर्तनात्तथा प्रद्युम्नयुयुधानाभ्यामभिमन्योश्च भारत अथास्येषुं समाधत्त दृढं
परमसंमतं अंतेवासिनमाचार्यो जिघांसुः पुत्रसंमितं तं शरैर्दशभिस्तीक्ष्णैश्चिच्छेद शिनिपुंगवः पश्यतस्तव पुत्रस्य कर्णस्य च म राम० २३५
हात्मनः ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नममोचयत् चरंतं रथमार्गेषु सात्यकिं सत्यविक्रमं द्रोणकर्णांतरगतं कृपस्यापि च भारत
अपश्येतां महात्मानौ विष्वक्सेनधनंजयौ अपूजयेतां वार्ष्णेयं ब्रुवाणौ साधु साध्विति दिव्यान्यस्त्राणि सर्वेषां युधि निघ्नंतमच्युतं

अभिपद्यत तत्तेषां विष्वक्सेनधनंजयौ धनंजयस्ततः कृष्णमब्रवीत्पश्य केशव आचार्यप्रमुखानां मध्ये क्रीडन्मधूद्वहः आनं
दयति मां भूयः सात्यकिः परवीरहा माद्रीपुत्रौ च भीमं च राजानं च युधिष्ठिरं यच्छिक्षयानुद्रुतः सन्रणे चरति सात्यकिः महा
रथानुपक्रीडन्वृष्णीनां कीर्त्तिवर्द्धनः तमेते प्रतिनंदंति सिद्धाः सैन्याश्च विस्मिताः अजय्यं समरे दृष्ट्वा साधु साध्विति सात्य
किं योधाश्चाभ्यपतन् सर्वे कर्मभिः समपूजयन् इति द्रोणपर्वणि संजय उवाच सात्वतस्य तु तत्कर्म दृष्ट्वा दुर्योधनादयः शै
नेयं सर्वतः क्रुद्धा वारयामासुरंजसा कृपकर्णौ च समरे पुत्राश्च तव मारिष शैनेयं त्वरिताभ्येत्य विनिघ्नंति शितैः शरैः युधिष्ठिरस्त
तो राजा माद्रीपुत्रौ च पांडवौ भीमसेनश्च बलवान्सात्यकिं पर्यवारयन् कर्णश्च शरवर्षेण गौतमश्च महारथः दुर्योधनादय
स्तु शैनेयं पर्यवारयन् तां वृष्टिं सहसा राजञ्छिनत्तां घोररूपिणीं वारयामास शैनेयो योधांस्तान्महारथान् तेषामस्त्राणि
दिव्यानि संहितानि महात्मनां वारयामास विधिवद्दिव्यैरस्त्रैर्महामृधे क्रूरमायोधनं जज्ञे तस्मिन्राजन्समागमे रुद्रस्येव हि
क्रुद्धस्य निघ्नतस्तान्पशून्पुरा हस्तानामुत्तमांगानां कार्मुकाणां च भारत छत्राणां चापविद्धानां चामराणां च संचयैः भग्नैश्च
क्रैरथैश्चापि पातितैश्च महाध्वजैः सादिभिश्च हतैः शूरैः संकीर्णा वसुधाभवत् बाणपातनिकृत्तास्तु योधास्ते कुरुसत्तम चे
ष्टंतो विविधाश्चेष्टा व्यदृश्यंत महाहवे वर्त्तमाने तथा युद्धे घोरे देवासुरोपमे अब्रवीत्क्षत्रियांस्तत्र धर्मराजो युधिष्ठिरः अभिद्रवत
संपन्नाः कुंभयोनिं महारथाः एष हि पार्षतो वीरो भारद्वाजेन संगतः घटते च यथाशक्ति भारद्वाजस्य नाशने यादृशानि हि रूपा

द्रो० १३८ णिदृश्यतेस्यमहात्मनो ऽथद्रोणंशोककृद्धोघातयिष्यतिपार्षतः तेषुपंसहितामश्चायुधंखंकुंभसंभवं धृष्टद्युम्नस्यमाहात्म्य
गत्वाकुरुतमाधिपं युधिष्ठिरसमानत्माः सृंजयानांमहात्मनाः अभ्यद्रवंतसंपन्नाभारद्वाजंजिघांसवः तान्समापततःसर्वान्
भारद्वाजोमहारथः अभ्यवर्त्ततवेगेनमर्त्यमितितिनिश्चितः प्रयांतेसत्यसंधेतसमकंपतमेदिनी ववुर्वाताःसनिर्घाताखा
सयानांवसुंधिनी पपातमहतीचोल्काआदित्यात्रिस्फुरंस्तत दीपयंतीउभेसेनेशंसंतीवमहद्भयं जज्वलुश्चैवशस्त्राणिभारद्वा
जस्यमारिष रथाःस्वनंतिचात्यर्थंहयाश्चाश्रुण्यपातयन् हतौजाइवचाप्यासीद्भारद्वाजोमहारथः प्रास्फुरत्रयनंवामस्यवामव
ऊस्तथैवच विमनाश्चाभवद्युद्धेदृष्ट्वापार्षतमग्रतः ऋषीणांब्रह्मवादीनांस्वर्गस्यगमनंप्रति सुयुद्धेनततःप्राणानुत्स्रष्टुमुपच
क्रमे ततश्चतुर्दिशंसैन्यैर्द्रुपदस्याभिसंवृतः निर्दहन्क्षत्रियव्रातान्द्रोणःपर्यचरद्रणे हत्वाविंशतिसाहस्रान्क्षत्रियानरिमर्द
नः दशायुतानितीक्ष्णाग्रैरवधीद्विशिखैःशितैः सोतिष्ठदाहवेयत्तोविधूमोग्निरिवज्वलन् क्षत्रियाणामभावायब्राह्ममस्त्रम
मास्थितः पांचाल्यंविरथंभीमोहतसर्वायुधंबली सविषण्णंमहात्मानंत्वरमाणःसमभ्ययात् ततःस्वरथमारोप्यपांचाल्य
मरिमर्दनः अब्रवीदभिसंप्रेक्ष्यद्रोणमस्यंतमंतिकात् नत्वदन्यइहाचार्यंयोद्धुमुत्सहतेपुमान् त्वरस्वप्रागवधायस्यलविभोः
समाहितः सतथोक्तोमहाबाहुःसर्वभारसहंधनुः प्रतिपद्यदृढंक्षिप्रमायुधप्रवरंदृढं संरब्धश्चशरानस्यन्द्रोणंदुर्वारणंरणे राम०
विवारयिषुराचार्यंशरवर्षैरवाकिरत् तौन्यवारयतांश्रेष्ठौसंरब्धौरणशोभिनौ उदीरयेतांब्राह्माणिदिव्यान्यस्त्राण्यनेकशः १३८

सुमार

समहास्त्रैर्महाराज द्रोणमाछादयच्छरो निहत्यसर्वाण्यस्त्राणि भारद्वाजस्य पार्षतः सचसातीन् शिबींश्चैव वाह्लीका
न्कौरवानपि रक्षिष्यमाणान्संग्रामे द्रोणोवधमदच्युतं धृष्टद्युम्नस्तथाराजन् गभस्तिमिरिवांशु[redacted] वभौप्र
छादयन्नाशाः शरजालैः समंततः तस्यद्रोणोधनुश्छित्वा विध्वाचैनंशिलीमुखैः मर्माण्यभ्यहनद्भूयः सव्यथां
परमामगात् तंविंशतिसहस्राणि पांचालानां नरर्षभाः तथाचरंतं संग्रामे सर्वतोवाकिरंछरैः शरैस्तैराचितंद्रो
णंनापश्याम महारथं भास्करंजलदैरुद्धं वर्षास्विव विशांपते विधूयतान्वाणगणान् पंचालानां महारथः
ततः प्रादुश्चकरोद्द्रोणोब्राह्ममस्त्रं परंतपः वधायतेषांशूराणां पांचालानाममर्षितः ततोव्यमोचयद्द्रोणोवि
निघ्नन्सर्वसोमकान् शिरांस्यपातयच्चापि पांचालानां महामृधे तथैवपरिघाकारान्वाहून्कनकभूषणा
न् तेवध्यमानाः समरे भारद्वाजेनपार्थिवाः मेदिन्यामन्वकीर्यंत वातनुन्नाइवद्रुमाः कुंजराणांचपततांहयौ
घानांचभारत अगम्यरूपापृथिवी मांसशोणितकर्दमा हत्वाविंशतिसाहस्रान्पांचालानां रथव्रजान्
अतिष्ठदाहवेद्रोणोविधूमोग्निरिवज्वलन् तथैवचपुनः क्रुद्धोभारद्वाजः प्रतापवान् वसुदानस्यभल्लेन शिरः
कायादपाहरत् पुनः पंचशतान्मत्स्यान्षट्सहस्रांश्चसृंजयान् हस्तिनामयुतं हत्वाजघानाश्वायुतं पुनः क्षत्रि
याणामभावाय दृष्ट्वाद्रोणमवस्थितं ऋषयोभ्यागमंस्तूर्णं हव्यवाहपुरोगमाः विश्वामित्रोजमदग्निर्भरद्वाजो
थगौतमः वसिष्ठः काश्यपोत्रिर्ब्रह्मलोकंनिनीषवः सिकताः पृश्नयोगर्गावालिखिल्यामरीचिपाः [redacted]

भृगवोंगिरसश्चैव सूक्ष्माश्चान्ये महर्षयः त एनमब्रुवन्सर्वे द्रोणमाहवशोभिनं अधर्म्मतः कृतं युद्धं समयो निधनस्य ते
न्यस्यायुधं रणे द्रोण समीक्ष्यास्मान वस्थितान् नातः क्रूरतरं कर्म्म पुनः कर्त्तुमिहार्हसि वेदवेदांगविदुषः सत्य
धर्म्मरतस्य ते ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते न्यस्यायुधममोघेषो तिष्ठ वर्त्मनि शाश्वते परिपूर्णश्च कालस्ते
वस्तुं लोकेद्य मानुषे ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा भुवि यदेतदीदृशं विप्र कृतं कर्म्म न साधु तत् न्यस्यायु
धं रणे विप्र द्रोण मा त्वं चिरं कृथाः मा पापिष्ठतरं कर्म्म करिष्यसि पुनर्द्विज इति तेषां वचः श्रुत्वा भीमसेन वचश्च तत्
धृष्टद्युम्नं च संप्रेक्ष्य रणे स विमनाभवत् संदिह्यमानो व्यथितः कुंतीपुत्रं युधिष्ठिरं अहतं वा हतं वापि पप्रच्छ सुत
मात्मनः स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यतेनृतं त्रयाणामपि लोकानामैश्वर्यार्थे कथंचन तस्मात्तं परिपप्र
च्छ नान्यं कंचिद्द्विजर्षभः तस्मिंस्तस्य हि सत्याशा बाल्यात्प्रभृति पांडवे ततो निष्पांडवामुर्वीं करिष्यंतं युधां पतिं द्रो
णं ज्ञात्वा धर्मराजं गोविंदो व्यथितोब्रवीत् यद्यर्द्धदिवसं द्रोणो युध्यते मन्युमास्थितः सत्यं ब्रवीमि ते सेना विना
शं समुपैष्यति स भवांस्त्रातु नो द्रोणात्सत्याज्ज्यायोनृतं वदेत् अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेनृतैः तयोः संवद
तोरेवं भीमसेनोब्रवीदिदं श्रुत्वैवं तं महाराज वधोपायं महात्मनः गाहमानस्य ते सेनां मालवस्येंद्रवर्म्मणः अश्व
त्थामेति विख्यातो गजः शक्रगजोपमः निहतो युधि विक्रम्य ततोहं द्रोणमब्रुवं अश्वत्थामा हतो ब्रह्मन्निवर्त्तस्वाहवा
दिति नूनं नाश्रद्दधद्वाक्यं एष मे पुरुषर्षभः स त्वं गोविंदवाक्यानि मानयस्व जयैषिणः द्रोणाय निहतं शंस राजन् शार
द्वतीसुतं त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः सत्यवान्हि त्रिलोकेस्मिन् भवान्ख्यातो जनाधिप तस्य तद्वचनं श्रु श्रीराम०
२३७

त्वाकृष्णवा प्रचोदितः मा विलम्बस्व महाराज वक्तुं समुपचक्रमे तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः अव्यक्तमब्र
वीद्राजन् हतः कुंजर इत्युत तस्य पूर्वं रथः पृथ्व्याश्चतुरंगुलमुच्छ्रितः बभूवैवं च तेनोक्ते तस्य वाहाः स्पृशन्महीं यु
धिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः पुत्रव्यसनसंतप्तो निराशो जीविते भवत् आगस्कृतमिवात्मानं पांडवा
नां महात्म हात्मनां ऋषिवाक्येन मन्वानः श्रुत्वा च निहतं सुतं विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च योद्धुं नाशक्नु
वद्राजन् यथापूर्वमरिंदम महाभारते द्रोणपर्वणि संजय उवाच तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसं पांचाल
राजस्य सुतो धृष्टद्युम्नः समाद्रवत् य इष्ट्वा मनुजेंद्रेण द्रुपदेन महामखे लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहना
त् स धनुर्जैत्रमादाय घोरं जलदनिस्वनं दृढज्यमजरं दिव्यं शरं चाशीविषोपमं संदधे कार्मुके तस्मिंस्ततस्तम
नलोपमं द्रोणं जिघांसुः पांचाल्यो महाज्वालमिवानलं तस्य रूपं शरस्यासीद्धनुर्ज्यामंडलांतरे द्योततो भास्करस्ये
व घनांते परिवेषिणः पार्षतेन परामृष्टं ज्वलंतमिव तद्धनुः अंतकालमनुप्राप्तं मेनिरे वीक्ष्य सैनिकाः तमिषुं
संहितं तेन भारद्वाजः प्रतापवान् दृष्ट्वामन्यत देहस्य कालपर्यायमागतं ततः प्रयत्नमातिष्ठदाचार्यस्तस्य वारणे
न चास्यास्त्राणि राजेंद्र प्रादुरासन्महात्मनः तस्य त्वहानि चत्वारि क्षपा चैका स्यतो गता तस्य चाह्नस्त्रिभागे न क्षयं ज
ग्मुः पतत्रिणः स शरक्षयमासाद्य पुत्रशोकेन चार्दितः विविधानां च दिव्यानामस्त्राणामप्रसादितः उत्स्रष्टुकामः
शस्त्राणि ऋषिवाक्यप्रचोदितः तेजसा प्रपूर्यमाणश्च युयुधे न यथा पुरा ततो भीमो दृढं क्रोधात् द्रोणस्याश्लिष्य तं र
थं शनकैरिव राजेंद्र द्रोणं वचनमब्रवीत् यदि नाम न युध्येरन् शिक्षिता ब्रह्मबंधवः स्वकर्मभिरसंतुष्टा न स्म क्षत्रं क्ष

द्रो० २३८ पंचजेत अहिंसा सर्वभूतेषु धर्मस्याधिस्तरं विदुः तस्माच्च ब्राह्मणो नित्यं भवांश्च ब्रह्मवित्तमः श्वपाकवन्म्लेच्छगणान् हत्वा चा
न्यान् पृथग्विधान् अज्ञानान्मूढवद्ब्रह्मन् पुत्रदारधनेप्सया एकस्यार्थे बहून् हत्वा पुत्रस्याधर्मविद्यथा स्वकर्मस्थान्
विकर्मस्थो न व्यपत्रपसे कथं यस्यार्थे शस्त्रमादाय यमपेक्ष्य च जीवसि सुचाद्यपतितं शेते पृष्ठेनावेदितस्तव धर्मेण
जेनतदुक्तं नाभिशंकितुमर्हसि एवमुक्तस्ततो द्रोणो भीमेनोत्सृज्य तद्धनुः सर्वाण्यस्त्राणि धर्मात्मा हातुकामोऽभ्यभाष स्ना४
त कर्ण कर्ण महेष्वास कृप दुर्योधनेति च संग्रामे क्रियतां यत्नो ब्रवीम्येष पुनः पुनः पांडवेभ्यः शिवं वोऽस्तु शस्त्रम पुन८५
भ्युत्सृजाम्यहं इति तत्र महाराज प्राक्रोशत् द्रौणिमेव च उत्सृज्य च रणे शस्त्रं रथोपस्थे निवेश्य च अभयं स
र्वभूतानां प्रददौ योगयुक्तवान् तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान् सशरं तद्धनुर्घोरं संन्यस्याथ रथात्त
तः खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् हाहाकृतानि भूतानि मानुषाणीतराणि च द्रोणं तथागतं दृष्ट्वा
धृष्टद्युम्नवशंगतं हाहाकारं भृशं चक्रुः अहो धिगिति चाब्रुवन् द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थि
तः तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः पुराणं पुरुषं विष्णुं जगाम मनसा परं मुखं किंचित्समुन्नाम्य विष्ट
भ्योरमग्रतः निमीलिताक्षः सत्त्वस्थो निक्षिप्य हृदि धारणां ओमित्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपाः स्मरित्वा
देवदेवेशमक्षरं परमं प्रभुं दिवमाक्रामदाचार्यः सद्भिः सह दुराक्रमं द्वौ सूर्याविति नो बुद्धिरासीत्तस्मिंस्तथा गते
एकाग्रमिव चाभूद्धि ज्योतिर्भिः पूरितं नभः समपद्यथार्काभं द्रोणस्य निधने तथा निमेषमात्रेण च तज्ज्योतिरं श्रीराम०
तरधीयत आसीत्किलकिलाशब्दः प्रहृष्टानां दिवौकसां ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते वयमेव तदाद्राक्ष्म पं २३८

चमानुषयोनयः योगयुक्तं महात्मानं गच्छंतं परमां गतिं अदृश्यं धनंजयः पार्थो भारद्वाजस्य चात्मजः वासुदेवश्च वार्ष्णेयो धर्मपु
त्रश्च पाण्डवः अन्ये तु सर्वे नापश्यन् भारद्वाजस्य धीमतः महिमानं महाराज योगयुक्तस्य गच्छतः ब्रह्मलोकं महद्दिव्यं देव
गुह्यं हि तत्परं गतिं परमिकां प्राप्तमजानंतो नृयोनयः नापश्यन् गच्छमानं हि तं सार्द्धमृषिपुंगवैः आचार्यं योगमास्था
य ब्रह्मलोकमरिंदमं विनुन्नांगं शरव्रातैर्न्यस्तायुधमसृक्क्षरं धिक्कृतः पार्षतस्तं तु सर्वभूतैः परामृशत् तस्य मूर्द्धा
नमालंब्य गतसत्वस्य देहिनः किंचिदब्रुवतः कायाद्विचकर्त्तासिना शिरः हर्षेण महता युक्तो भारद्वाजे निपातिते सिं
हनादरवं चक्रे भ्रामयन् खड्गमाहवे आकर्णपलितः श्यामो वयसाशीतिपंचकः त्वत्कृते व्यचरत्संख्ये स तु षोडशवर्ष
वत् उक्तवांश्च महाबाहुः कुंतीपुत्रो धनंजयः जीवंतमानयाचार्यं मा वधीर्द्रुपदात्मज न हंतव्यो न हंतव्य इति ते सैनि
काश्च ह उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्तमाव्रजत् क्रोशमानेर्जुने चैव पार्थिवेषु च सर्वशः धृष्टद्युम्नोवधीद्द्रोणं
रथतल्पे नरर्षभं शोणितेन परिक्लिन्नो रथाद्भूमिमरिंदमः लोहितांगइवादित्यो दुर्द्दर्शः समपद्यत एवं तं निह
तं संख्ये ददृशे सैनिको जनः धृष्टद्युम्नस्तु तस्य तद्राजन् भारद्वाजशिरो हरत् तावकानां महेष्वासः प्रमुखे तत्समाक्षिप
त् ते तु दृष्ट्वा शिरो राजन् भारद्वाजस्य तावकाः पलायनकृतोत्साहा दुद्रुवुः सर्वतोदिशं द्रोणस्तु दिवमास्थाय नक्षत्रप
थमाविशत् अहमेव तदाद्राक्षं द्रोणस्य निधनं नृप ऋषेः प्रसादात्कृष्णस्य सत्यवत्याः सुतस्य च विधूमामिव संपातामु
ल्कां प्रज्वलितामिव अपश्याम दिवं स्तब्ध्वा गच्छंतं तं महाद्युतिं हते द्रोणे निरुत्साहान् कुरून् पांडवसृंजयाः
अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्यत निहता हतभूयिष्ठाः संग्रामे निहतैः शरैः तावका निहते द्रोणे गतासव इवा

द्रो० भवन् पराजयमथावाप्य परं तत्र महद्भयं अर्येनैव ततो हीनानाविंदन्त धृतिमात्मनः अविच्छिन्नं शरीरं तु भारद्वाजस्य पार्थिवा
२३५ ः नान्वगच्छन्महाराज कबंधायुतसंकुले पांडवास्तु जयं लब्ध्वा परत्र च महद्यशः बाणशंखरवांश्चक्रुः सिंहनादांश्च पुष्कलान्
भीमसेनस्ततो राजन् धृष्टद्युम्नश्च पार्षतः व[illegible]थिन्यां महृष्टौ तां परिष्वज्य परस्परं अब्रवीत्तु तदा भीमः पार्षतं शत्रुतापनं
भूयो हं त्वा विजयिनं परिष्वज्यामि पार्षत सूतपुत्रे हते पापे धार्तराष्ट्रे च संयुगे एतावदुक्त्वा भीमस्तु हर्षेण महता युतः बाहु
शब्देन पृथिवीं कंपयामास पांडवः तस्य शब्देन वित्रस्ताः प्राद्रवंस्तावकायुधि क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः पांड
वास्तु जयं लब्ध्वा हृष्टा ह्यासन् विशांपते अरिक्षयं च संग्रामे तेन ते सुखमाप्नुवन् ॥ ॥इति महाभारते द्रोणपर्वणि द्रोणव
धः समाप्तः संजय उवाच ततो द्रोणे हते राजन् कुरवः शस्त्रपीडिताः हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः उदीर्णांश्च प
रान् दृष्ट्वा ह्यकंपमानान्मुनः पुनः अश्रुपूर्णेक्षणास्त्रस्ता दीनास्त्वाम् न्विशांपते विचेतसो हतोत्साहाः कश्मलाभिहतौज
सः आर्तस्वरेण महता पुत्रं ते पर्यवारयन् रजस्वला वेपमाना वीक्षमाणा दिशो दश अश्रुकंठा यथा दैत्या हिरण्या
क्षे पुरा हते स तैः परिवृतो राजन् त्रस्तैः क्षुद्रमृगैरिव अशक्नुवंस्त्ववस्थातुमपायात्तनयस्तव क्षुत्पिपासापरिश्रान्तास्ते यो
धास्तव भारत आदित्येनेव संतप्ता भृशं विमनसोऽभवन् भास्करस्येव पतनं समुद्रस्येव शोषणं विपर्यासं यथा मेरोर्वास
वस्येव निर्जयं अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनं त्रस्तरूपतरा राजन् कौरवाः प्राद्रवन्भयात् गांधारराजः शकु
निस्त्रस्तस्त्रस्ततरैः सह हतं रुक्मरथं श्रुत्वा प्राद्रवत् सहितो रथैः वरूथिनीं वेगवतीं विद्रुतां सपताकिनीं परिगृह्य
महासेनां सूतपुत्रोऽपयाद्भयात् रथनागाश्वकलिलां पुरस्कृत्य तु वाहिनीं मद्राणामीश्वरः शल्यो वीक्षमाणोऽपया श्रीराम०
२३५

द्रयात् हितप्रवीरैर्भृशं ध्वजेनैव कृपादिभिः कृतः शारद्वतो गच्छन् कष्टं कष्टमिति ब्रुवन् भोजानीकेन शिष्टेन कलिंगार
ट्टवाह्लिकैः कृतवर्मा वृतो राजन् प्रायात्सुजवनैर्हयैः पदातिगणसंयुक्तस्त्रस्तो राजन् भयार्दितः उलूकः प्राद्र
वत्तत्र दृष्ट्वा द्रोणं निपातितं दर्शनीयो युवा चैव शौर्ये कृतलक्षणः दुःशासनो भृशोद्विग्नः प्राद्रवद्गजसंवृतः
रथानामयुतं गृह्य त्रिसाहस्रं च दंतिनां वृषसेनो ययौ तूर्णं दृष्ट्वा द्रोणं निपातितं गजाश्वरथसंयुक्तो वृतश्चैव
पदातिभिः दुर्योधनो महाराज प्रायात्तत्र महारथः संशप्तकगणान् गृह्य हतशेषान् किरीटिना सुशर्मा
प्राद्रवद्राजन् दृष्ट्वा द्रोणं निपातितं गजान् रथान् समारुह्य मुच्य चापि हयान् जनाः प्राद्रवन्सर्वतः संख्ये दृष्ट्वा रुक्मरथं
हतं त्वरयंतः पितॄनन्ये भ्रातॄनन्येथ मातुलान् पुत्रानन्ये वयस्यांश्च प्राद्रवन्कुरवस्तथा चोदयंतश्च अन्यानिस्व
स्रीयांश्च तथापरे संबंधिनस्तथान्ये च प्राद्रवंत दिशो दश प्रकीर्णकेशा विध्वस्ता न द्वावेकत्र धावतः नेदमस्तीति
मन्वाना हतोत्साहा हतौजसः उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो अन्योन्यं ते समाक्रोशन् सैनिका भरत
र्षभ तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे धुर्यानुन्मुच्य च रथाद्धतसूतान्स्वलंकृतान् अधिरुह्य हयान्योधाः क्षि
प्रं पद्भिरचोदयन् द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि प्रतिस्रोत इवग्राहो द्रोणपुत्रः परानियात् तस्यासीत्सु
महद्युद्धं शिखंडिप्रमुखैर्गणैः। प्रभद्रकैश्च पांचालैश्चेदिभिश्च सकेकयैः हत्वा बहुविधाः सेनाः पांडूनां युद्धदुर्म
दः कथंचित्संकटान्मुक्तो मत्तद्विरदविक्रमः द्रवमाणं बलं दृष्ट्वा पलायनकृतक्षणं दुर्योधनं समासाद्य द्रोणपुत्रो
ऽब्रवीदिदं किमियं द्रवते सेना त्रस्तरूपेव भारत द्रवमाणां च राजेंद्र नावस्थापयसे रणे त्वं चापि न यथापूर्वं प्रकृतिस्थो

द्रो नराधिपकर्णेऽभ्रमत्तयन्धेमेनावातिष्ठंतिपार्थिव अन्येष्वपिचयुद्धेषु एवंसेनाद्रुतातदा कच्चित्क्षेमंमहाबाहोतवसैन्यस्यभार
२४० त कस्मिन्निदंहतेराजन्नश्वत्थाम्निहवतंतव एतामवस्थांसंप्राप्तंतन्ममाचक्ष्वकौरव ननुदुर्योधनःश्रुत्वा द्रोणपुत्रस्यभाषितं
घोरमप्रियमाख्यातुंनाशक्नोत्पार्थिवर्षभ भिन्नानौरिवतेपुत्रोमग्नःशोकमहार्णवे बाष्पेणापिहितोदृष्ट्वा द्रोणपु
त्रंरथेस्थितं ततःशारद्वतंराजासव्रीडमिदमब्रवीत् शंसात्रभद्रंतेसर्वंयथासैन्यमिदंद्रुतं अथशारद्वतोराजन्ना
र्त्तेमार्त्तःपुनःपुनः शशंसद्रोणपुत्रायपथाद्रोणोनिपातितः कृपाचार्यउवाच वयंद्रोणंपुरस्कृत्यपृथिव्यां
प्रवरंरथं प्रावर्त्तयामसंग्रामंपांचालैरेवकेवलैः ततःप्रवृत्तेसंग्रामेविमिश्राःकुरुसोमकाः अन्योन्यमभिग
र्जंतःशस्त्रैर्देहानपातयन् वर्त्तमानेतथायुद्धेक्षीयमानेषुसंयुगे धार्त्तराष्ट्रेषुसंक्रुद्धःपितातेस्त्रमुदैरयत् ततो
द्रोणोब्राह्ममस्त्रंविकुर्वाणोनरर्षभः व्यहनच्छात्रवानभल्लैःशतशोथसहस्रशः पांडवाःकेकयामत्स्याःपांचाला
श्चविशेषतः संख्येद्रोणरथंप्राप्य व्यनशन्कालचोदिताः सहस्रंनरसिंहानांद्विसाहस्रंचदंतिनां द्रोणोब्रह्मास्त्रयोगेन
प्रेषयामासमृत्यवे आकर्णपलितःश्यामोवयसाशीतिपंचकः रणेपर्यचरद्द्रोणोवृद्धःषोडशवर्षवत् क्लिश्यमा
नेषुसैन्येषुवध्यमानेषुराजसु अमर्षवशमापन्नाःपांचालाविमुखाभवन् तेषुकिंचित्प्रभग्नेषुविमुखेषुसपत्नजित् दि
व्यमस्त्रंविकुर्वाणोबभूवार्कइवोदितः समध्यंप्राप्यपांडूनांशररश्मिःप्रतापवान् मध्यंगतइवादित्योदुष्प्रेक्षस्तेपिताभव
त् तेदह्यमानाद्रोणेनसूर्येणेवविराजता दग्धवीर्यानिरुत्साहाबभूवुर्हतचेतसः तान्दृष्ट्वापीडितान्बाणैर्द्रोणेनमधु
सूदनः जयैषीपांडुपुत्राणामिदंवचनमब्रवीत् नैषजातुनरैःशक्योजेतुंशस्त्रभृतांवरः अपिवृत्रहणासंख्येरथयू
थपयूथपः तेयूयंधर्ममुत्सृज्यजयंरक्षतपांडवाः यथावःसंयुगेसर्वान्नहन्याद्रुक्मवाहनः अश्वत्थाम्निहतेनैषयुद्धे श्रीराम०
२४०

दितिमतिर्मम हतं तं संयुगे कश्चिद्दाप्यान्वसेम मृषा नरः एतन्नारोचयद्वाक्यं कुंतीपुत्रो धनंजयः अरोचयंस्तु सर्वेन्ये कृच्छ्रेण
तु युधिष्ठिरः भीमसेनस्तु सव्रीडमब्रवीत्पितरं तव अश्वत्थामा हत इति तच्छ्रुत्वा नाबुध्यत ते पिता सशंकमानस्तन्मिथ्या धर्म
राजमपृच्छत हतं वाप्यहतं वाजौ त्वां पिता पुत्रवत्सलः तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः अश्वत्थामानमायोधे
हतं दृष्ट्वा महागजं भीमेन गिरिवर्ष्माणं मालवस्येन्द्रवर्म्मणः उपसृत्य तदा द्रोणमुच्चैरिदमुवाच ह यस्यार्थे शस्त्रमाध
त्से यमवेक्ष्य च जीवसि [illegible]मवेक्ष्य च जीवसि पुत्रस्ते दयितो नित्यं सोऽश्वत्थामा निपातितः शेते विनिहतो भूमौ व
ने सिंहशिशुर्यथा जानन्नप्यनृतस्याथ दोषान्स द्विजसत्तम अव्यक्तमब्रवीद्राजा हतः कुंजर इत्युत सत्वां निहतमाक्रंदे
श्रुत्वा संतापतापितः नियम्य दिव्यान्यस्त्राणि नायुध्यत यथा पुरं तं दृष्ट्वा परमोद्विग्नं शोकातुरमचेतसं पांचालराजस्य सु
तः क्रूरकर्मा समाद्रवत् तं दृष्ट्वा विहितं मृत्युं लोकतत्त्वविचक्षणः दिव्यान्यस्त्राण्यथोत्सृज्य रणे प्रायमुपाविशत् त
तोस्य केशान्सव्येन गृहीत्वा पाणिना तदा पार्षतः क्रोशमानानां वीराणामभिच्छिनच्छिरः न हंतव्यो न हंतव्य इति ते सर्वतो
ब्रुवन् तथैव चार्जुनो वाहादवरुह्यैनमाद्रवत् उद्यम्य त्वरितो बाहू ब्रुवाणश्च पुनः पुनः जीवंतमानयाचार्यं मा वधी
रपि धर्मवित् तथापि वार्यमाणेन कौरवैरर्जुनेन च हत एव नृशंसेन पिता तव नरर्षभ सैनिकाश्च ततः सर्वे प्राद्र
वंत भयार्दिताः वयं चापि निरुत्साहा हते पितरि तेनघ संजय उवाच तच्छ्रुत्वा द्रोणपुत्रस्तु निधनं पितुराहवे
क्रोधमाहारयत्तीव्रं पदाहत इवोरगः ततः क्रुद्धो रणे द्रौणिर्भृशं जज्वाल मारिष यथेंधनं महत्प्राप्य प्राज्वलद्धव्य
वाहनः तलं तलेन निष्पिष्य दंतैर्दंतानुपस्पृशन् निःश्वसन्नुरगो यद्वल्लोहिताक्षोऽभवत्तदा महाभारते द्रोणपर्वणि

धृतराष्ट्र उवाच अधर्मेण हतं श्रुत्वा धृष्टद्युम्नेन संजय ब्राह्मणं पितरं वृद्धमश्वत्थामा किमब्रवीत् मानुषं वारुणाग्नेयं ब्राह्म
मस्त्रं च वीर्यवान् ऐंद्रं नारायणं चैव यस्मिन्नित्यं प्रतिष्ठितं तमधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे श्रुत्वा निहतमाचार्यम
श्वत्थामा किमब्रवीत् येन रामादवाप्येह धनुर्वेदं महात्मना प्रोक्तान्यस्त्राणि दिव्यानि पुत्राय गुणकांक्षिणा एकमेव
हि लोकेस्मिन्नात्मनो गुणवत्तरं इच्छंति पुरुषाः पुत्रं लोकेनान्यं कथं चन आचार्याणां भवंत्येव रहस्यानि महात्मनां ता
नि पुत्राय वा दद्युः शिष्यायानुगताय वा सशिष्यः प्राप्य तत्सर्वं सविशेषं च संजय शूरः शारद्वतीपुत्रः संख्ये द्रोणादनंत
रः रामस्य तु समः शास्त्रे पुरंदरसमो युधि कार्त्तवीर्यसमो वीर्ये बृहस्पतिसमो मतौ महीधरसमः स्थैर्ये तेजसाग्निसमो युवा
समुद्र इव गांभीर्ये क्रोधे नाशीविषोपमः स रथी प्रथमो लोके दृढधन्वा जितक्लमः शीघ्रोनिल इवाक्रंदेव दनक्रुद्ध इवां
तकः अस्यता येन संग्रामे धरण्यभिविपीडिता यो न व्यथति संग्रामे वीरः सत्यपराक्रमः वेदस्नातो व्रतस्नातो धनुर्वेदे च
पारगः महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा तमधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे श्रुत्वा निहतमाचार्यमश्वत्थामा किम
ब्रवीत् धृष्टद्युम्नस्य यो मृत्युः सृष्टस्तेन महात्मना यथा द्रोणस्य पांचाल्यो यज्ञसेनसुतोभवत् तं नृशंसेन पापेन क्रूरेणादीर्घ
दर्शिना श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत् द्रोणपर्वणि संजय उवाच छद्मना निहतं श्रुत्वा पितरं पापकर्मणा बा
ष्पेणापूर्यत द्रौणी रोषेण च नरर्षभ तस्य क्रुद्धस्य राजेंद्र वपुर्दिव्यमदृश्यत अंतकस्येव भूतानि जिहीर्षोः कालपर्यये
तोयपूर्णे ततो नेत्रे व्यपमृज्य पुनः पुनः उवाच कोपान्निःश्वस्य दुर्योधनमिदं वचः पिता मम यथा क्षुद्रैर्न्यस्तशस्त्रो निपाति
तः धर्मध्वजवता पापं कृतं तद्विदितं मम अनार्यस्य नृशंसस्य धर्मपुत्रस्य मे श्रुतं युद्धेष्वपि प्रवृत्तानां ध्रुवौ जयपराजयौ

इयमेतस्त्वदृहज्जनवधस्तत्र प्रशस्यते न्यायवृत्तो वधो यस्तु संग्रामे युध्यतो भवेत् न मे दुःखाय भवति तथा दृष्टो हि स द्विजैः गतः
स वीरलोकाय पिता मम न संशयः न शोच्यः पुरुषव्याघ्रस्तदा निधनं गतः यत्तु धर्म्मप्रवृत्तः सन् केशग्रहम
वाप्तवान् पश्यतां सर्वसैन्यानां तन्मे मर्म्माणि कृंतति मयि जीवति पित्रा मे केशग्रहमवाप्तवान् कथमन्ये करिष्यंति
पुत्रेभ्यः पुत्रिणः स्पृहां कामात्क्रोधादविज्ञानाद्दर्पाद्बाल्येन वा पुनः वैधर्म्मिकाणि कुर्वंति तथा परिभवंति च तदिदं
पार्षतेनेह महदाधर्मिकं कृतं अवज्ञाय च मां नूनं नृशंसेन दुरात्मना तस्यानुबंधं द्रष्टा स धृष्टद्युम्नः सुदारुणं अकार्यं
परमं कृत्वा मिथ्यावादी च पांडवः यो ह्यसौ छद्मनाचार्यं शस्त्रं मत्याजयत्तदा तस्याद्य धर्म्मराजस्य भूमिः पास्यति शो
णितं शपे सत्येन कौरव्य इष्टापूर्त्तेन चैव हि अहत्वा सर्वपांचालान्नजीवेयं न कथंचन सर्वोपायैर्यतिष्यामि पांचा
लानामहं वधे धृष्टद्युम्नं च समरे हंताहं पापकारिणं कर्म्मणा येन तेनेह मृदुना दारुणेन च पांचालानां वधं कृत्वा शां
तिं लब्धास्मि कौरव यदर्थं पुरुषव्याघ्र पुत्रानिच्छंति मानवाः प्रेत्य चेह च संप्राप्तास्त्राणायेति महतो भयात् पित्रा तु मम
सावस्था प्राप्ता निर्वेधनाय यथा मयि शैलप्रतीकाशे पुत्रे शिष्ये च जीवति धिङ्मामास्त्राणि दिव्यानि धिग्बाहू धिक्परा
क्रमं यन्मा द्रोणः सुतं प्राप्य केशग्रहमवाप्तवान् स तथाहं करिष्यामि यथा भरतसत्तम परलोकगतस्यापि भविष्या
म्यनृणः पितुः आर्येण हि न वक्तव्या कदाचित्स्तुतिरात्मनः पितुर्वधममृष्यंस्तु वक्ष्याम्यद्येह पौरुषं अद्य प
श्यंतु मे वीर्यं पांडवाः सजनार्दनाः मृद्नतः सर्वसैन्यानि युगांतमिव कुर्वतः नहि देवा न गंधर्वा नासुरा न च राक्षसाः
अद्य शक्ता रणे जेतुं रथस्थं मां नरर्षभ मदन्यो नास्ति लोकेस्मिन्नर्जुनाद्वास्त्रवित्क्वचित् अहं हि ज्वलतां मध्ये मयूखा
नामिवांशुमान् प्रयोक्ता देवसृष्टानामस्त्राणां पृतनागतः मच्छरासनादद्य मया प्रयुक्ता महाहवे दर्शयंतः शरा वीर्यं

द्रो० प्रमाथिष्यंतिपांडवान् अधर्मवादिशोराजन्नधारामिरिवमंकुतोः आहूताःपत्रिभिर्लोक्ष्णैर्द्रष्टारोमामकैरिह विकिरन्शरजा
२४२ लानिसर्वतोमेरवस्तुनान् शत्रून्निपातयिष्यामिमहावातद्रवद्रुमान् नहिजानातिबिभत्सुस्तदस्त्रंनजनार्दनः नभीमसेनो
नयमौनचराजायुधिष्ठिरः नपार्षतोदुरात्मासौनशिखंडीनसात्यकिः यदिदंमयिकौरव्यसंकल्पंसनिवर्त्तनं नारायणाय
मेपित्राप्रणम्यविधिपूर्वकं उपहारःपुरादत्तोब्रह्मरूपमुपस्थितः तंस्वयंप्रतिगृह्याथभगवान्सवरंददौ वव्रेपितामेप
रमंमस्त्रंनारायणंततः अथैनमब्रवीद्राजन्भगवान्देवसत्तमः भवितात्वत्समोनान्यःकश्चिद्युधिनरःक्वचित् नत्वि
दंसहसाब्रह्मन्प्रयोक्तव्यंकथंचन नह्येतदस्त्रमन्यत्रवधाच्छत्रोर्निवर्त्तते नचैतच्छक्यतेज्ञातुंकोनवध्येदितिप्रभो अ
वध्यमपिहन्याद्धितस्मान्नैतत्प्रयोजयेत् अथसंख्येरथस्यैवशस्त्राणांचविसर्जनं प्रयाचतांचशत्रूणांगमनंशरणस्यच
एतेप्रशमनेयोगामहास्त्रस्यपरंतप सर्वथापीडितोहिंस्यादवध्यानपीडयन्रणे तच्चग्राहपितामह्यमब्रवीच्चैवमप्रभुः त्वं
वर्षिष्यसिसर्वाणिशस्त्रवर्षाण्यनेकशः अनेनास्त्रेणसंग्रामेतेजसाचज्वलिष्यसि एवमुक्त्वासभगवान्दिवमाचक्रमेप्रभुः
एतन्नारायणादस्त्रंतत्प्राप्तंममबंधुना तेनाहंपांडवांश्चैवपांचालान्मत्स्यकेकयान् विद्रावयिष्यामिरणेशचीपतिरिवासु
रान् यथायथाहमिच्छेयंतथाभूत्वाशरामम निपतेयुःसपत्नेषुविक्रमत्स्वपिभारत यथेष्टमश्मवर्षेणप्रवर्षिष्येपुनःपुनः
अयोमुखैश्चविहगैर्द्रावयिष्येमहारथान् परस्वधांश्चनिशितानुत्स्रक्ष्येहमसंशयं सोहंनारायणास्त्रेणमहताशत्रुतापन
शत्रून्विध्वंसयिष्यामिकदर्थीकृत्यपांडवान् मित्रब्रह्मगुरुद्वेषीजाल्मकःसुविगर्हितः पंचालापसदश्चाद्यनमेजीवन्विमो
क्ष्यते तच्छ्रुत्वाद्रोणपुत्रस्यपर्यवर्त्ततवाहिनी ततःसर्वेमहाशंखान्दध्मुःपुरुषसत्तमाः भेरीश्चाभ्यहनन्हृष्टाडिंडिमांश्चसह
सु२ स्रशः तथाननादवसुधाखुरनेमिप्रपीडिता सशब्दःसुमहांस्तूर्णंदिवंखंपृथिवींचयन्नादयत् तंशब्दंपांडवाःश्रुत्वापर्जन्यनिनदोपमं स
मेत्यरथिनांश्रेष्ठाःसहिताह्यथमंत्रयन् तथोक्त्वाद्रोणपुत्रस्तुवार्युपस्पृश्यभारत प्रादुश्चकारतद्दिव्यमस्त्रंनारायणंतदामहा श्रीराम०
भारतेद्रोणपर्वणि ॥ ॥ २४२

संजयउवाच प्रादुर्भूतेततस्तस्मिन्नस्त्रेनारायणेप्रभो प्रावात्सपृषतोवायुरनभ्रेस्तनयित्नुमान् चचालपृथिवीचापिचु
क्षुभेचमहोदधिः प्रतिस्रोतःप्रवृत्ताश्चगंतुंतत्रसमुद्रगाः शिखराणिव्यशीर्यंतगिरीणांतत्रभारत अपसव्यंमृगाश्चैव
पांडुसेनांप्रचक्रिरे तमसाचावकीर्यंतसूर्यश्चकलुषोभवत् संपतंतिचभूतानिक्रव्यादानिप्रहृष्टवत् देवदानवगं
धर्वास्त्रस्तास्त्वासन्विशांपते कथंकथाभवत्तीव्रादृष्ट्वातद्व्याकुलंमहत् व्यथिताःसर्वराजानस्त्रस्ताश्चासन्विशांपते त
दृष्ट्वाघोररूपंवैद्रौणेरस्त्रंभयावहं धृतराष्ट्रउवाच निवर्तितेषुसैन्येषुद्रोणपुत्रेणसंयुगे भृशंशोकाभितप्तेनपितु
र्वधममृष्यता कुरूनापततोदृष्ट्वाधृष्टद्युम्नस्यरक्षणे कोमंत्रःपांडवेष्वासीत्तन्ममाचक्ष्वसंजय संजयउवाच प्राग
वविद्रुतान्दृष्ट्वाधार्तराष्ट्रान्युधिष्ठिरः पुनश्चतुमुलंशब्दंश्रुत्वार्जुनमथाब्रवीत् युधिष्ठिरउवाच आचार्ये
निहतेद्रोणेधृष्टद्युम्नेनसंयुगे निहतेवज्रहस्तेनयथावृत्रेमहासुरे नाशंशंतोजयंयुद्धेदीनात्मानोधनंजय
आत्मत्राणेमतिंकृत्वाप्राद्रवन्कुरवोरणात् केचिद्भ्रांतैरथैस्तूर्णंनिहतैःपार्ष्णियंतृभिः विपताकध्वजच्छ
त्रैःपार्थिवाःशीर्णकूबरैः भग्ननीडैराकुलाश्चैःप्राकृष्टानोविचेतसः भग्नाक्षयुगचक्रैश्चआकृष्यंतसमंततः रथा
न्विशीर्णानुत्सृज्यपद्भिः केचिच्चविद्रुताः हयपृष्ठगताश्चान्येकृष्यंतेर्द्धच्युतासनाः गजस्कंधेषुसंसूतानाराचै
श्चलितासनाः शरार्त्तैर्विद्रुतैर्नागैःकृताःकेचिद्दिशोदश विशस्त्रकवचाश्चान्येवाहनेभ्यःक्षितिंगताः संछिन्नाने
मिभिश्चैवमर्दिताश्चहयद्विपैः क्रोशंतस्तातपुत्रेतिपलायंतेपरेभयात् नाभ्यजानंतचान्योन्यंकश्मलाभिहतौजसः
पुत्रानपितॄन्सखीन्भ्रातॄन्समारोप्यदृढक्षतान् जलेनक्लेदयंत्य[illegible]न्येविमुच्यकवचान्यपि अवस्थांतादृशींप्राप्यहृ

द्रो० तेद्रोणोपरतं चैवं पुनरावर्तितं केन यद्द्विजानामिहं सम्मे हयानां हेषतां शब्दः कुंजराणां च बृंहतां रथनेमिस्वनै
२४३ श्चात्र विमिश्रः श्रूयते महान् एतशब्दाम्महांतीव्राः प्रवृत्ताः कुरुसागरे मुहुर्मुहुरुदीर्णेते कंपयंत्यपि मामकान्
य एष तुमुलः शब्दः श्रूयते लोमहर्षणः सेंद्रानप्येष लोकांस्त्रीन् ग्रसेदिति मतिर्मम मन्ये वज्र[धरस्]येष निना
दो भैरवः स्वनः द्रोणे हते कौरवार्थं व्यक्तमभ्येति वासवः प्रहृष्टरोमकूपाः स्म संविग्नाः रथपुंगवाः धनंजय गुरं श्रु
त्वा तत्र नादं सुभीषणं क एष कौरवान्दीर्णानवस्थाप्य महारथः निवर्तयति युद्धार्थं मृधे देवेश्वरो यथा अर्जु
न उवाच उद्यम्यात्मानमुग्राय कर्मणे वीर्यमास्थितः धमंति कौरवाः शंखान्यस्य वीर्यमुपाश्रिताः यत्र ते संशयो रा
२७ जन्न्यस्तशस्त्रे गुरौ हते धार्तराष्ट्रानवस्थाप्य क एष नदतीति ह श्रीमंतं तं महाबाहुं मत्तद्विरदगामिनं व्याघ्रास्यमु
रामन ग्रकर्माणं कुरूणामभयंकरं यस्मिन्जाते ददौ द्रोणो गवां दशशतं धनं ब्राह्मणेभ्यो महार्हेभ्यः सोऽश्वत्थामैष गर्जति
जातमात्रेण वीरेण येनोच्चैः श्रवसा यथा हेषता कंपिता भूमिर्लोकाश्च सकलास्त्रयः तच्छ्रुत्वांतर्हितं भूतं नामतस्या
करोत्तदा अश्वत्थामेति सोऽद्यैष शूरो नदति पांडव योऽनाथवदाक्रम्य पार्षतेन हतस्तथा कर्मणा सुनृशंसेन त
स्य नाथो व्यवस्थितः गुरुं मे यत्र पांचाल्यः केशपक्षे परामृशत् तत्र जातु क्षमेद्द्रौणिर्जानन्पौरुषमात्मनः उ
पचीर्णो गुरुर्मिथ्या भवता राज्यकारणात् धर्मज्ञेन सता नाम सोऽधर्मः सुमहान्कृतः चिरं स्थास्यति वाकीर्त्ति
स्त्रैलोक्ये सचराचरे एमेवालिवधाद्यद्वदेवं द्रोणे निपातिते सर्वधर्मोपपन्नोऽयं सम शिष्यश्च पांडवः नायं श्रीरामं०
वक्ष्यति मिथ्येति प्रत्ययं कृतवांस्त्वयि समत्यकंचुकं नामप्रविष्टेन ततोऽनृतं ॥ २ २ ४ २४३

आचार्यउक्तोभवताहतः कुंजरइत्युत ततः शस्त्रंसमुत्सृज्यनिर्म्ममोगतचेतनः आसीत्सविह्वलोराजन्यथादृष्टस्त्वयाविभुः सतु
शोकसमाविष्टोविमुखः पुत्रवत्सलः शाश्वतंधर्ममुत्सृज्य गुरुः शिष्येणघातितः न्यस्तशस्त्रमधर्मेणघातयित्वागुरुंभवान् रक्षत्वि
दानींसामात्योयदिशक्तोसिपार्षतं सौहार्दंसर्वभूतेषुयः करोत्यतिमानुषः सोद्यकेशग्रहंश्रुत्वापितुर्दुःख्यतिनोरणे विक्रोशमानेहि
मयिभृशमाचार्यगृद्धिनि अपाकीर्यस्वयंधर्मंशिष्येणानिहतोगुरुः यद्गतंवयोभूयः शिष्टमल्पतरंचनः तस्येदानींविकारोयमधर्मोयं
कृतोमहान् पितेवनित्यंसौहार्दात्पितेवहिचधर्मतः सोल्पकालस्यराज्यस्यकारणाद्घातितोगुरुः धृतराष्ट्रेणभीष्मायद्रोणायचवि
शांपते विसृष्टापृथिवीसर्वासहपुत्रैश्चतत्परैः संप्राप्यतादृशींवृत्तिंसत्कृतः सततंपरैः वृणीतेसततंपुत्रान्मामेवाभ्यधिकंगुरुः अवेक्ष्यमा
णस्त्वांमांचन्यस्तास्त्रश्चाहवेहतः नत्वेनंयुध्यमानंवैहन्यादपिशतक्रतुः तस्याचार्यस्यवृद्धस्यद्रोहोनित्योपकारिणः कृतोह्यनार्यैरस्मा
भीराज्यार्थेलघुबुद्धिभिः अहोबतमहत्पापंकृतंकर्मसुदारुणं यद्राज्यसुखलोभेनद्रोणोयंसाधुघातितः पुत्रान्भ्रातॄन्पितॄन्दारान्जी
वितंचैववासविः त्यजेत्सर्वंममप्रेम्णाजानात्येवहिमेगुरुः समयाराज्यकामेनहन्यमानोह्युपेक्षितः तस्मादवाक्शिराराजन्प्राप्तोस्मिनरकं
प्रभो ब्राह्मणंवृद्धमाचार्यंन्यस्तशस्त्रंयथामुनिं घातयित्वाद्यराज्यार्थंमृतंश्रेयोनजीवितं॥ ॥महाभारतेद्रोणपर्वणि संजयउ०
अर्जुनस्यवचः श्रुत्वानोचुस्तत्रमहारथाः अप्रियंवाप्रियंवापिमहाराजधनंजयं ततः क्रुद्धोमहाबाहुर्भीमसेनोभ्यभाषत कुन्तीपुत्रमिवकौं

द्रो० तेयमर्जुनंभरतर्षभ मुनिर्यथारण्यगतोभाषसेधर्मसंहितं मत्तरंरोपथापार्थब्राह्मणः संशितव्रतः क्षतत्राणात्क्षताज्जीवनक्षंता स्त्रीष्वपि
साधुषु क्षत्रियः क्षितिमाप्नोतिक्षत्रंधर्मयशः श्रियः सभवानक्षत्रियगुणैर्युक्तः सर्वैकुलोद्वहः अविपश्चिद्यथावाचंव्याहरन्नाद्यशोभसे
पराक्रमस्तेकौंतेयशक्रस्येवशचीपतेः नचातिवर्त्तसेधर्मंवेलामिवमहोदधिः [redacted] नवैस्मरसितद्गुः खंत्रयोदशवार्षिकं अमर्षं
२४८ पृष्ठतः कृत्वाधर्ममेवाभिकांक्षसे दिष्ट्यातातमनस्तेद्यत्वधर्ममनुवर्त्तते आनृशंस्यंचतेदिष्ट्याबुद्धिः सततमच्युत यत्रधर्मेपहृत्तस्पष्टंतेरा
ज्यमधर्मतः द्रौपदीचपरामृष्टासभामानीयशत्रुभिः वनंप्रव्राजिताश्चस्मवल्कलाजिनवाससः अनर्हमाणास्तभावंत्रयोदशसमाः परैः
एतान्यमर्षस्थानानिमर्षितानिमयानघक्षत्रधर्मप्रसक्तेनसर्वमेतदनुष्ठितं तमधर्ममपाकृष्टुंस्मृत्वाद्यसहितस्त्वया सानुबंधाहनिष्यामि
क्षुद्रान्नाम्यहरानहं त्वयाहिकथितंपूर्वंयुद्धायाभ्यागतावयं घटामहेयथाशक्तितत्वनोद्यत्वगुश्शसे धर्ममेवेच्छसिज्ञातंमिथ्यावचनमे
वते भयार्दितानामस्माकंवाचामर्माणिकृन्तसि वपन्व्रणेक्षारमिवक्षतानांशत्रुकर्शन विदीर्यतेमेहृदयंत्वयावाक्छल्यपीडितं अ
धर्ममेनंविपुलंधार्मिकः सन्नबुध्यसे यत्त्वमात्मानमस्मांश्चप्रशंस्यान्प्रशंससि वासुदेवेस्थितेचापिद्रोणपुत्रंप्रशंससि यः कलांषोड
शींपूर्णांधनंजयनतेर्हति स्वयमेवात्मनोदोषानब्रुवाणः किंनलज्जसे दारयेयंमहींक्रोधाद्विकिरेयंचपर्वतान् आविध्यतांगदांगुर्वींभीमा २४४
कांचनमालिनीं गिरिप्रकाशान्क्षितिजानभंजेयमनिलोयथा [redacted] पेयंशरांश्चापिसेंद्रान्देवान्समागतान स ए०

२१ नवमी

राज्ञः सगरास्यार्थ्यमानस्तरोगमौन सत्वमेवं विधं जानन्भ्रातरं मां नरर्षभ द्रोणा[illegible]पुत्रा[illegible]इयं कर्णेनाहं स्मि मितविक्रम अथवातिष्ठ बीभत्सो
सहसर्वैः सहोदरैः अहमेनं गदापाणिर्जेष्याम्येको महाहवे ततः पांचालराजस्य पुत्रः पार्थमथाब्रवीत् संक्रुद्ध मिव हुंकृत्वं हिरण्यकशिपुर्हरिं
धृष्ट[illegible]द्युम्न उवाच बीभत्सो विप्रकर्माणि विदितानि मनीषिणां याजनाध्यापने दानं तथा यज्ञप्रतिग्रहौ षष्ठमध्ययनं नाम तेषां कस्मिन्प्रति रा॰७
ष्ठितः हतो द्रोणो मया यद्येवं किं मां पार्थ विगर्हसे अपक्रांतः स्वधर्मश्च क्षात्रं धर्ममपाश्रितः अमानुषेण हंत्यस्मान स्त्रेण क्रूरकर्मकृत् तथा
मायां प्रयुंजानमसह्यं ब्राह्मणाब्रुवं[illegible]मायथैव निहन्याद्यो न युक्तं पार्थ तत्र किं तस्मिंस्तथा मया शस्ते यदि द्रौणायनी रुषा कुरुते भैरवं नादं तत्र किं ६५
महीयते नचाद्भुत मिदं मन्ये यद्द्रौणिर्युद्धगर्जया घातयिष्यति कौरव्यान परित्रातु[illegible]मशक्नुवन् यच्च मां धार्मिको भूत्वा ब्रवीषि गुरुघातिने तदर्थ
महमुत्पन्नः पांचाल्यस्य सुतोनलात् यस्य कार्यमकार्यं वा युध्यतः स्यात्समं रणे तं कथं ब्राह्मणं ब्रूयाः क्षत्रियं वा धनंजय यो ह्यनस्त्रविदो
हन्याद्ब्रह्मास्त्रैः क्रोधमूर्छितः सर्वोपायैर्न्न स कथं वध्यः पुरुषसत्तमः विधर्मिणां धर्मविद्भिः प्रोक्तं तेषां विषोपमां जानन्धर्मार्थतत्वज्ञ किं मा
मर्जुनगर्हसे नृशंसः स पापाक्रम्य रथ एव निपातितः तन्मामभिनिंद्यं बीभत्सो किमर्थं नाभिनंदसि कालानलसमं पार्थ ज्वलनार्कविषोप
मं भीमं द्रोणशिरश्छिन्नं न प्रशंससि मे कथं योसौ ममैव नान्यस्य बांधवानयुधि जघ्निवान् छित्वापि तस्य मूर्द्धानं नैवास्मि विगतज्वरः तच्च मे कं
तते मर्म यन्न तस्य शिरो मया निषाद विषये क्षिप्तं जयद्रथशिरो यथा अवधश्चापि शत्रूणामधर्मः श्रूयतेर्जुन क्षत्रियस्य हि धर्मोयं हन्याद्धन्येत वा

२

द्रो०

पुनः सशत्रुर्निहतः संख्येमयाधर्मेणपांडव यथात्वयाहतः शूरोभगदत्तः पितुः सखा पितामहंरणेहत्वामन्यसेधर्ममात्मनः मयाशत्रौहते
२४५ कस्मात्पापेधर्मेनमन्यसे संबंधावनतंपार्थनमांत्वंवक्तुमर्हसि स्वगात्रकृतसोपानंविषमस्थमिवदंतिनं क्षमामितेसर्वमेववाग्व्यतिक्रममर्जुन द्रौ
पद्याद्रौपदेयानांकृतेनान्येनहेतुना कुलक्रमागतंवैरमाचार्येणविश्रुतं तथाज्ञानात्ययंलोकोनपूर्यंपांडुनंदनाः नानृतीपांडवोज्येष्ठोना
हंवाधार्मिकोर्जुन शिष्यद्रोहीहतःपापोयुध्यस्वविजयंतव महाभारतेद्रोणपर्वणि॥ ॥धृतराष्ट्रउवाच सांगावेदायथान्यायंयेनाधीता
महात्मना यस्मिन्साक्षाद्धनुर्वेदोहीनिषेवेप्रतिष्ठितः तस्मिन्नाक्रुश्यतिद्रोणेमहर्षितनयेतदा नीचमनानृशंसेनक्षुद्रेणगुरुघातिना यस्य
प्रसादात्कुर्वंतिकर्माणिपुरुषर्षभाः अमानुषाणिसंग्रामेदेवैरसुकराणिच तस्मिन्नाक्रुश्यतिद्रोणेसमक्षेपापकर्मणा नामर्षंतत्रकु
र्वंतिधिक्क्षात्रंधिगमर्षितां पार्थाः सर्वेचराजानः पृथिव्यांयेधनुर्धराः श्रुत्वाकिमाहुःपांचाल्यंतन्ममाचक्ष्वसंजय संज उ० श्रुत्वाद्रुपदपुत्र
स्यतावाचः क्रूरकर्मणः तूष्णींबभूवूराजानः सर्वएवविशांपते अर्जुनस्तुकटाक्षेणजिह्मंविप्रेक्ष्यपार्षतं सबाष्पमभिनिःश्वस्यधिग्धि
गित्येवचाब्रवीत् युधिष्ठिरश्चभीमश्चयमौकृष्णस्तथापरे आसन्सुव्रीडिताराजन्पार्थःकिरीटीत्वब्रवीदिदं नेहास्तिपुरुषःकश्चिद्यइमंपापपूरु
षं भाषमाणमकल्याणंशीघ्रंहन्यान्नराधमं एतेत्वांपांडवाःसर्वेकुत्सयंतिविविन्सया कर्मणानेनपापेनश्वपाकमिवब्राह्मणाः एतत्कृत्वा २४५
महत्पापंनिंदितंसर्वसाधुभिः नलज्जसेकथंवक्तुंसमितिश्लाघ्यशोभनं कथंचशतधाजिह्वानतेमूर्द्धाविदीर्यते गुरुमाक्रोशतःक्षुद्रनचाधर्मेणपा प्म०

त्वमसि वाच्यस्त्वमसि पार्थैश्च सर्वैश्चांधककर्षिभिः यत्कर्म कलुषं कृत्वा श्लाघसे जनसंसदि एकाकिनैतादृशं कृत्वा पुनरेव गुरुं क्षिपन् व
ध्यस्त्वं न त्वयार्थोस्ति मुहूर्तमपि जीवता कस्त्वेतद्व्यवसेदार्यस्त्वदन्यः पुरुषाधम निगृह्य केशेषु वधं गुरोर्धर्मात्मनः सतः सप्तावरेस्तथा
धृष्टवांश्चधवास्त निमज्जिताः यशसा च परित्यक्तास्त्वां प्राप्य कुलपांसन उक्तवांश्चाप्रियं पार्थं भीष्मं प्रति नरर्षभ तथांतो विहितस्तेन स्व
यमेव महात्मना तस्यापि त्वं वसोर्दृष्टो निहन्ता पापकृत्तमः नान्यः पांचालपुत्रेभ्यो विघ्नेऽभुवि पापकृत्तसच्चापि सृष्टः पितामहो भीष्मस्यां
तकरः किल शिखंडी रक्षितो तेन स च मृत्युर्महात्मनः पांचालाश्चलिता धर्मात् क्षुद्रा मित्रगुरुद्रुहः त्वया प्यसह मोहयो धिक्कृतं सर्वे
साधुभिः पुनश्चेदीदृशीं वाचं मत्समीपे वदिष्यति शिरस्ते पातयिष्यामि गदया वज्रकल्पया त्वां च ब्रह्मघ्नं संहृष्टा जनः सूर्यमवेक्ष्यते ब्र
म हत्याहि ते पापप्रायश्चित्तार्थमात्मनः पांचालकेश दुर्वृत्त मामेव गुरुमन्यतः गुरोर्गुरुं च भूयोपि क्षिपन्नैव हलज्जसे तिष्ठ तिष्ठ सहस्वै
कां गदापातमिमं मम तव चापि हनिष्येहं गदापातानने कशः सात्वतेनैवमाक्षिप्तः पार्षतः परुषाक्षरं संरब्धं सात्यकिं प्राह संक्रुद्धः
प्रहसन्निव धृष्टद्युम्न उवाच श्रूयते श्रूयते चेति क्षम्यते चेति माधव सदानार्यो शुभः साधुं पुरुषं क्षेप्तुमिच्छति क्षमा प्रशस्यते लोके न
तु पापोर्हति क्षमां क्षमावंतं हि पापात्मा जितोयमिति मन्यते स त्वं क्षुद्रसमाचारो नीचात्मा पापनिश्चयः आकेशाग्रान्नखाग्राच्च व
क्तव्यो वक्तुमिच्छसि यत्स भूरिश्रवाश्छिन्नभुजः प्रायगतस्त्वया वार्यमाणेन हि हतस्ततः पापतरं नु किं गाहमानो मया द्रोणो दिव्ये

द्रो० नास्त्रेणासंयुगे विसृष्टशस्त्रः निहतः किंतत्रक्रूरदुष्कृतं अयुध्यमानंयस्त्वाजौ तथाप्रायगतंमुनिं छिन्नबाहुंपरैर्हीमान्नात्मानंकेस
कथंवदेत निहत्यत्वांपदाभूमौसविकर्षंतिवीर्यवान किंतदान निहंस्येनंभूत्वापुरुषसत्तमः त्वयापुनरनार्येणपूर्वंपार्थेननिर्जि
२८६ तः यदातदाहतः शूरः सौमदत्तिः प्रतापवान यत्रतत्रतुपांडूनांद्रोणोद्रावयतेचमूं किरंच्छरसहस्राणितत्रतत्रप्रयाम्यहं सत्व
मेवंविधंकृत्वाकर्मचांडालवत्स्वयं वक्तुमर्हसिवक्तव्यः कस्मान्मांपरुषाण्यथ कर्तात्वंकर्मणोस्यस्यनाहंवृष्णिकुलाधम पापानां
चत्वमावासः कर्मणांमापुनर्वद जोषय स्त्वनमांभूयोवक्तुमर्हस्यतः परं अधरोत्तरमेतद्धियन्मांत्वंवक्तुमर्हसि अथवक्ष्यसिमां
मौर्ख्याद्भूयः परुषमीदृशं गमयिष्यामिवाणैस्त्वांयुधिवैवस्वतक्षयं नचैवंमूर्खधर्मेणकेवलेनैवशक्यते तेषामपित्वधर्मेण
चेष्टितंशृणुयादृशं वंचितः पांडवः पूर्वमधर्मेणयुधिष्ठिरः द्रौपदीचपरिक्लिष्टातथाधर्मेणमात्सके प्रव्राजिताःवनेसर्वेपांडवाः सह
कृष्णया सर्वस्वमपकृष्टंचतथाधर्मेणबालिशः अधर्मेणापकृष्टश्चमद्रराजः परैरितः अधर्मेणतथाबालः सौभद्रोविनिपातितः
इतोप्यधर्मेणहतोभीष्मः परपुरंजयः भूरिश्रवास्त्वधर्मेणत्वयाधर्मविदाहतः एवंपरैराचरितंपांडवेयैश्चसंयुगे रक्षमाणैर्जयंवीरैर्ध २८६
र्मज्ञैरपिसात्वत दुर्ज्ञेयः परमोधर्मस्तथाधर्मः सुदुर्विदः युध्यस्वकौरवैः सार्द्धंमागाः पितृनिवेशनं संजयउवाच एवमादीनिवाक्यानिक्रूरा
णिपरुषाणिच श्रावितः सात्यकिः श्रीमानकंपितइवाभवत तच्छ्रुत्वाक्रोधताम्राक्षः सात्यकिस्त्वाददेगदां विनिःश्वस्ययथासर्पः प्राणि राम०

पद९

परवन्धपतक्लिमाः पांचाल्पेभ्पश्च मारिष तथैवांधकवृष्णिभ्पः तथैव च विशेषतः कृतसस्य च पार्थस्य मित्रमन्यन्न विद्यते ८

धायरथे श्वनुः ततोभिपतत्पांचाल्पंसंरंभरोदमब्रवीत् नत्वावक्ष्पामिपरुषंहनिष्पेत्वांवधक्रमं नमापतंतंसहसामहावलममर्षणं
पांचाल्पोयाभिसंक्रुद्धमेनकायांतकोपमं चोदितोवासुदेवेनभीमसेनोमहावलः अवगुत्परथात्तूर्णंवाहुभ्पांसमवारयत् द्रवमाणंतथा
क्रुद्धंसात्पकिंपांडवोवली प्रस्यंदमानमादायजगामवलिनंवलात् स्थित्वाविष्टभ्पचरणौभीमेनशिनिपुंगवः निगृहीतः पदेषष्ठेवलेन
वलिनांवरः अवरुत्यरथात्तूर्णंध्रियमाणंवलीयसा उवाचश्लक्ष्णयावाचासहदेवोविशांपते अस्माकंपुरुषव्याघ्रमित्रमन्यंनविद्यते
पांचालानांववाह्मेयसमुद्रांतांविचिन्वतां नान्यदस्तिपरंमित्रंयथापांडववृष्णयः सभवानीदृशंमित्रंमन्यस्वेषुवत्तथातव भवंतश्चतथास्माकं
भवतांचतथावयं समवंसर्वधर्मज्ञमित्रधर्ममनुस्मरन् नियच्छमन्युंपांचाल्पात्प्रशाम्पशिनिपुंगव पार्षतस्यक्षमस्वत्वंक्षमतांपार्षतश्च
ते वयंक्षमपितारश्चकिमन्यत्रशमाद्भवेत् प्रशाम्यमानेशैनेयेसहदेवेनमारिष पांचालराजस्यसुतः प्रहसन्निदमब्रवीत् मुंचमुंचशिनेःपौ
त्रंभीमयुद्धमदान्वितं आसादयतुमामेषधराधरमिवानिलः यावदस्पशितैर्वाणैः संरंभंविनयाम्यहं युद्धश्रद्धांचकौंतेयजीवितंचास्पसंयुगे
किंनुशक्यंमयाकर्त्तुंकार्यंयदिदमुद्यतं सुमहत्पांडुपुत्राणामायातेवहिकौरवाः अथवाफाल्गुनः सर्वान्वारयिष्यतिसंयुगे अहमप्यस्यमूर्द्धानं
पातयिष्याम्पिसायकैः मन्यतेछिन्नवाहुंमांभूरिश्रवसमैव उत्क्रम्यैनमहंचैनमेषवामांहनिष्यति श्रृणवन्पांचालवाक्यानिसात्यकिः स
र्पवच्छ्वसन् भीमवाह्वंतरेसक्तोविस्फुरत्यनिशंवली तौवृषाविवनर्दंतौवलिनौवाहुशालिनौ त्वरयावासुदेवश्चधर्मराजश्चमारिष यत्नेनमह

१

द्रो॰ तावीरौवारया मासतुस्ततः निवार्यपरमेष्वासौकोपसंरक्तलोचनौ युयुत्सुनपरानसंरब्धप्रतियुःक्षत्रियर्षभाः॥ ॥इतिद्रोणपर्वणि
२८७ संजयउवाच ततः सकर्णेनचक्रेकिरीटीणांद्रोणनंदनः युगांतेसर्वभूतानांकालसृष्टइवांतकः ध्वजद्रुमंशस्त्रशृंगंहतनागमहाशिलं श्व
श्वकिंपुरुषाकीर्णंशिरामनतलाहतं क्रव्यादपक्षिसंघुष्टंभूतयक्षगणाकुलं निहत्यशात्रवानभद्रैः सोविनोदिहपर्वतं ततोवेगेनम
हताविनद्यसनरर्षभ प्रतिज्ञांश्रावयामासपुनरेवनवात्मजे यस्मायुद्धंतमाचार्य्यंधर्मकंचुकमास्थितः मुचशस्त्रमितिप्राहकुंती पुत्रो
युधिष्ठिरः तस्मात्संपश्यतस्तस्यद्रावयिष्यामिवाहिनीं विद्राव्यसर्वानहंतास्मिंजाल्मंपांचाल्यमेवत सर्वानेमानहंनिष्यामिययदियो
त्स्यंतिमांरणे सत्यंतेप्रतिजानामिपरिवर्त्तयवाहिनीं तच्छ्रुत्वपुत्रस्तवाहिनींपर्यवर्त्तयत सिंहनादेनमहताव्यपोह्यसमहद्भयं त
तः समागमोराजन्कुरुपांडवसेनयोः पुनरेवाभवत्तीव्रः पूर्णसागरयोरिव संरब्धाहिस्थिरीभूताद्रोणपुत्रेणकौरवाः उदग्राःपांडु २८८
पांचालाद्रोणस्यनिधनेनच तेषांपरमहृष्टानांजयमात्मनिपश्यतां संरब्धानांमहावेगः प्रादुरासीद्विशांपते यथाशिलोच्चयेशै
लः सागरः सागरेयथा प्रतिहन्यतराजेंद्रतथासन्कुरुपांडवाः ततः शंखसहस्राणिभेरीणामयुतानिच अवादयंतसंहृष्टाः कुरु २८७
पांडवसैनिकाः ततोनिर्मथ्यमानस्यसागरस्येवनिःस्वनः अभवत्तवसैन्यस्यसुमहानद्भुतोपमः प्रादुश्चक्रेततोद्रोणिरस्त्रंनारायणं
तदा अभिसंधायपांडूनांपांचालानांचवाहिनीं प्रादुरासंस्ततोबाणादीप्ताग्राःखेसहस्रशः पांडवानक्षपयिष्यंतोदीप्तास्याः पन्नगाइवते ॥म॰

दिशः त्वंवैसैन्यंवसमाहरावन्महाहवे मुहूर्त्तादिद्रथकारसेवलोकेराजन्नगमस्तयः तथापरेघ्नोनमानास्पोनीथीवामलेवरे प्रादुरासन्महाराज
कान्मीयसमयागुराः चनस्त्रकाडिवकास्वशतघ्नोयहुराराराः वक्राणिवत्तुरं नानिमंडलानीवभास्वतः शङ्खाकृतिभिराकीर्णमिती
व युरुषर्षभ हृष्टांतरिक्षमाविग्नाः पांडुपांचालसृंजयाः यथापथास्युध्यंतेपांडवानांमहारथाः तथातथानरव्याघ्रवैन्यंवर्द्धतजनाधिप व
ध्यमानास्तथाद्वैराातेननारायणेनवै दृश्यमानानलेनैवसर्वतोभ्यर्दितारणे यथाहिशिशिरापायेदहेत्कक्षंहुताशनः तथानरव्याघ्रपांडुनां
दसाहस्त्राजितेप्रभो व्यापूर्यमाणेनास्त्ररामैमेक्षीयतिवप्रभो जगामपरमंत्रासंधर्मपुत्रोयुधिष्ठिरः द्रवमाणंततस्तैन्यंदृष्ट्वाविगतचेत
नं मध्यस्थतांचपार्थस्यधर्मपुत्रोब्रवीदिदं धृष्टद्युम्नपलायस्वसह पांचालसेनया सात्यकेत्वंचगच्छस्ववृष्ण्यंधकवृतोमहान् वासुदे
वोपिधर्मात्माकरिष्यत्यात्मनः क्षमं श्रेयोस्युपदिशत्येवलोकस्यकिमुतात्मनः संग्रामस्तुनकर्त्तव्यः सर्वसैन्यान्ब्रवीम्यहं अहंहिसहसोद
र्य्यैः प्रवेक्ष्येहव्यवाहनं भीष्मद्रोणार्णवंतीर्त्वासंग्रामेभीरुदुस्तरं विमज्जिष्यामिसलिलेसगणोद्रौणिगोष्पदे कामः संपद्यतामस्यवीभ
त्सोराशुमांप्रति कल्याणाचरणोत्याचार्यमयायुधिनिपातितः येनबालःसमोभद्रप्रहाणामविशारदः समर्थैर्बहुभिः क्रूरैर्घातितोनाभिपालि
तः येनविब्रुवतीप्रश्नंतथाकृष्णासभागता उपेक्षितापुत्रैराद्यासभावंनिगच्छती जिघांसुद्रौणिरश्वस्याच्चतेषुस्त्रेषुफाल्गुनः कवचेनत
थागुप्तोरक्षार्थंसैंधवस्यच येनब्रह्मास्त्रविदुषापांचालाः सत्यजित्मुखाः कुर्वाणामज्जयेयत्नंसमूला विनिपातिताः येनप्रव्राजमा

स२

द्रो०
२४८

नाश्वत्थाम्ना ह्ययमधर्मितः निवार्यमाणानवधेनानुपातात्तैर्द्विषिणाः सोमावधंमेतस्मात्सकुवीराः सौत्वहं परं हतस्तदस्त्रमरणां गमिष्या
मि सबांधवः एवं ब्रुवति कौंतेये दाशार्हस्त्वरितस्ततः निवार्य सैन्यं बाहुभ्यामिदं वचनमब्रवीत् शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत २
एषो योगोऽत्र विहितः प्रतिघाते महात्मना द्विपाश्वस्यंदनेभ्यश्च क्षितिं सर्वेऽवरोहत एवमेतन्न वो हन्यादस्त्रं भूमौ निरायुधान् यथायथा हि युध्यंते
योधा ह्यस्त्रमिदं प्रति तथातथा भवंत्येते कौरवा बलवत्तराः निक्षेप्स्यंति च शस्त्राणि वाहनेभ्योऽवरुह्य ये तान्नैतदस्त्रं संग्रामे निहनिष्य
ति मानवान् ये त्वेतत्प्रतियोत्स्यंति मनसापीह केचन निहनिष्यति तान्सर्वान्रसातलगतानपि ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भार
त इष्टन्सर्वे समुत्स्रष्टुं मनोभिः करणेन च ततउत्स्रष्टुकामांस्तानस्त्राणपालक्ष्य पांडवः भीमसेनोऽब्रवीद्राजन्निदं संहर्षयन्वचः न कथंच
न शस्त्राणि मोक्तव्यानीह केनचित् अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः अथवाप्यनया गुर्व्या हेमविग्रहया रणे कालवत्प्रहरिष्या
मि द्रौणेरस्त्रं विशातयन् नहि मे विक्रमे तुल्यः कश्चिदस्तीह मानिह यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते पश्यतेमौ हि मे बाहू ना
गराजकरोपमौ समर्थौ पर्वतस्यापि शैशिरस्य निपातने नागायुतसमप्राणो ह्यहमेको नरेष्विह यथा प्रतीतो द्युदिवि देवेषु विश्रुतः अ
द्य पश्यत मे वीर्यं बाह्वोः पीनांसयोर्युधि ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रस्य वारणे यदि नारायणास्त्रस्य प्रतियोद्धा न विद्यते अद्यैतत्प्रति
योत्स्यामि पश्यत्सु कुरुपांडुषु अर्जुनार्जुन बीभत्सो न न्यस्यं गांडिवं त्वया शशांकस्येव ते कोऽपि नैर्मल्यं पातयिष्यति अर्जुन उवाच॥ राम

पपा ३

नपा ५

भीमनारायणास्त्रेमेगोषुचब्राह्मणेषुच एतेयुगांतविंवंस्यमेतद्विद्विनसुत्तमं एवंमुक्तस्ततोभीमोद्रोणपुत्रमरिंदमं अभ्ययान्मेघ
घोषेणरथेनादित्यवर्चसा सएनमिषुजालेनलघुत्वाच्छीघ्रविक्रमः निमेषमात्रेणासाद्यकुंतीपुत्रोभ्यवाकिरत् ततोद्रौणिः प्र
हस्यैनंद्रवंतमभिभाष्यच अवाकिरत्प्रदीप्ताग्रैः शरैस्तैरभिमंत्रितैः पन्नगैरिवदीप्तास्यैर्वमद्भिर्ज्वलनंरणे अवकीर्णोभवत्पार्थः
स्फुलिंगैरिवकांचनैः तस्यरूपमभूद्राजन्भीमसेनस्यसंयुगे खद्योतैरावृतस्येवपर्वतस्यदिनक्षये तदस्त्रंद्रोणपुत्रस्यतस्मिन्प्रति
समस्यति अवर्द्धतमहाराजयथाग्निरनिलोद्धतः विवर्द्धमानमालक्ष्यतदस्त्रंभीमविक्रमं पांडुसैन्यमृतेभीमंसुमहद्भयमाविशत्
ततःशस्त्राणितेसर्वेसमुत्सृज्यमहीतले अवारोहन्रथेभ्यश्चहस्त्यश्वेभ्यश्चसर्वशः तेषुनिक्षिप्तशस्त्रेषुवाहनेभ्यश्च्युतेषुच तदस्त्रंवी
र्यविपुलंभीममूर्द्धन्यथापतत् हाहाकृतानिभूतानिपांडवाश्चविशेषतः भीमसेनमपश्यंततेजसासंवृतंतथा॥ ॥इतिमहा
भारतेद्रोणपर्वणि संजयउवाच भीमसेनंसमाकीर्णंदृष्ट्वास्त्रेणधनंजयः तेजसःप्रतिघातार्थंवारुणेनसमावृणोत् नाल
क्ष्यतंतंकश्चिद्वारुणास्त्रेणसंवृतं अर्जुनस्यलघुत्वाच्चसंवृतत्वाच्चतेजसः साश्वसूतरथोभीमोद्रोणपुत्रास्त्रसंवृतः अग्ना[illegible]व
ग्निरिवसंस्तोज्वालामालीसुदुर्दृशः यथारात्रिक्षयेराजञ्ज्योतींष्यस्तगिरिंप्रति समापेतुस्तथाबाणा भीमसेनरथंप्रति सद्रि

द्रो० २४९

भीमोरथश्चास्यहयाःसूतश्चमारिष संहृतोद्रोणपुत्रेणपावकांतर्गतोभवत् यथाजगद्वाजगत्कृत्स्नंशमयेत्सचराचरं यथावह्निर्विभो
रास्येनयास्त्वंभीममावृणोत् सूर्यमग्निंप्रविष्टः स्याद्यथाचाग्निंदिवाकरः तथाप्रविष्टंतत्तेजो नप्राज्ञायतपांडवं विकीर्णमस्त्रंत
दृष्ट्वा तथाभीमरथंप्रति उदीर्यमाणंद्रौणिंचनिष्प्रतिद्वंद्वमाहवे सर्वसैन्यंचपांडूनांन्यस्तशस्त्रमचेतनं युधिष्ठिरपुरोगांश्चविमु
खांस्तान्महारथान् अर्जुनोवासुदेवश्चत्वरमाणौमहाद्युती अवप्लुत्यरथाद्वीरौभीममाद्रवतांततः ततस्तद्द्रोणपुत्रस्यतेजोस्त्रबल
संभवं विगाह्यतौसुबलिनौमाययाम्याविशतांतथा न्यस्तशस्त्रौततस्तौतुनादहत्सोस्त्रजोनलः वारुणास्त्रप्रयोगाच्चवीर्यवत्वाच्चकृष्ण
योः ततश्चकर्षतुर्भीमंसर्वशस्त्रायुधानिच नारायणास्त्रशांत्यर्थंनरनारायणौबलात् आकृष्यमाणःकौंतेयोनदत्येवमहारवं वर्द्धते
चैवतद्घोरंद्रौणेरस्त्रंसुदुर्जयं तमब्रवीद्वासुदेवः किमिदंपांडुनंदन वार्यमाणोपिकौंतेययद्युद्धान्ननिवर्त्तसे यदियुद्धेनजेयाःस्युरिमे
कौरवनंदनाः वयमप्यत्रयुद्ध्यामतथाचेमेनरर्षभाः रथेभ्यस्त्ववतीर्णाःस्मसर्वएवहितावकाः तस्मात्त्वमपिकौंतेयरथात्तूर्णमपाक्रम एवमुक्त्वाततःकृष्णोरथात् ते
भूमिमवर्त्तयत् निःश्वसंतंयथानागंक्रोधसंरक्तलोचनं यदापकृष्टःसरथान्न्यासितश्चायुधंभुवि ततोनारायणास्त्रंतत्प्रशांतंशत्रुतापनं तस्मिन्प्रशांतेविधिना तेनतेजसिदुःसहे ब
भूवुर्विमलाःसर्वादिशःप्रदिशएवच प्रववुश्चशिवावाताःप्रशांतामृगपक्षिणः वाहनानिचहृष्टानिप्रशांतेस्त्रेसुदुर्जये व्यपोढेचततोघो
रेतस्मिंस्तेजसिभारत बभौभीमोनिशापायेधीमान्सूर्यइवोदितः हतशेषंबलंतत्तुपांडवानाम ॥ ॥ ॥ रा० २४९

तिष्ठन अहंसुपरमाहृष्टंतवपुत्रजिघांसया अवस्थितेबलेतस्मिन्नस्त्रेप्रतिहतेतथा दुर्योधनोमहाराजद्रोणपुत्रमथाब्रवीत् अश्वत्थाम
न्पुनः शीघ्रमस्त्रमेतत्प्रयोजय अवस्थिताहिपांचालाःपुनरेतेजयैषिणः अश्वत्थामातथोक्तस्तुतवपुत्रेणमारिष सुदीनमभिनिश्वस्य
राजानमिदमब्रवीत् नैतदावर्ततेराजन्नस्त्रंद्विर्नोपपद्यते आवृत्तंहिनिहन्त्येतत्प्रयोक्तारंनसंशयः एषचास्त्रप्रतीघातंवासुदेवःप्रयुक्तवान् अन्य
थाविहितः संख्येवधः शत्रोर्जनाधिप पराजयोवामृत्युर्वाश्रेयान्मृत्युर्ननिर्जयः विजिताश्चारयोह्येतेशस्त्रोत्सर्गान्मृतोपमाः दुर्योधनउवाच आचार्य
पुत्रयद्येतन्नह्यस्त्रंनप्रयुज्यते अन्यैर्गुरुघ्नावध्यन्तामस्त्रैरस्त्रविदांवर त्वयिह्यस्त्राणिदिव्यानित्र्यंबकेयथामनोजगति इच्छतोनहितेमुच्येत्क्रुद्धस्यापिपु
रंदरः धृतराष्ट्रउवाच तस्मिन्नस्त्रेप्रतिहतेद्रोणेचोपधिनाहते तथादुर्योधनेनोक्तेद्रौणिः किमकरोत्पुनः दृष्ट्वापार्थांश्चसंग्रामेयुद्धा
यसमुपस्थितान् नारायणास्त्रनिर्मुक्तांश्चरतःपृतनामुखे संजयउवाच जानन्पितुःसनिधनंसिंहलांगूलकेतनः सक्रोधो
भयमुत्सृज्यसोऽभिदुद्रावपार्षतं अभिद्रुत्यचविंशत्याक्षुद्रकाणांनरर्षभ पंचभिश्चातिवेगेनविव्याधपुरुषर्षभः धृष्टद्युम्नस्ततोरा
जन्ज्वलन्तमिवपावकं द्रोणपुत्रंत्रिषष्ट्यातुराजन्विव्याधपत्रिणां सारथिंचास्यविंशत्यास्वर्णपुंखैःशिलाशितैः हयांश्चचतुरोविव्याधचतु
र्भिर्निशितैःशरैः विद्ध्वाविद्ध्वाननर्दोच्चैःकंपयन्निवमेदिनीं आददेसर्वलोकस्यप्राणानिवमहारणे पार्षतस्तुबलीराजन्कृतास्त्रःकृत ९३
निश्रमः द्रौणिमेवाभिदुद्रावमृत्युंकृत्वानिवर्तनं ततोबाणमयंवर्षंद्रोणपुत्रस्यमूर्द्धनि अवासृजदमेयात्मापांचाल्योरथिनांवरः तं
द्रौणिःसमरेक्रुद्धंछादयामासपत्रिभिः विव्याधचैनंदशभिःपितुर्वधमनुस्मरन् द्वाभ्यांचसुविसृष्टाभ्यांक्षुराभ्यांध्वजकार्मुके छि

द्रो० २५०

लाभं चालराजस्स द्रौणिरस्त्रैः समाद्रवत् अथ सूतरथैनैव द्रौणिश्चक्रे महाहवे तस्य चानुचरान्सर्वान्क्रुद्धः प्राद्रावयच्छरैः ततः प्रदुद्रुवे सर्वं पां
चालानां विशांपते संभ्रान्तरथमातङ्गं चन्द्ररश्मरमेकृत दृष्ट्वा तु विमुखान्योधान्धृष्टद्युम्नं च पीडितं शैनेयो चोदयन्तूर्णं रथं द्रौणिरथं
प्रति अष्टभिर्निशितैर्बाणैरश्वत्थामानमार्दयत् विंशत्या पुनराहत्य नानारूपैरमर्षणः विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान् धनु
र्ध्वजं च संयत्तैश्चिच्छेद कृतहस्तवत् सतान्वंश्च ममवापि रथं हेमपरिष्कृतं हृदि विव्याध समरे त्रिंशता सायकैर्भृशं एवं संपीडितो राजन्नश्वत्था
मा महाबलः शरजालैः परिवृतः कर्तव्यं नान्वपद्यत एवं गते गुरोः पुत्रे तव पुत्रो महारथः कृपकर्णादिभिः सार्धं शरैः सात्वतमावृणोत् दु
र्योधनस्तु विंशत्या कृपः शारद्वतस्त्रिभिः कृतवर्मा च दशभिः कर्णः पञ्चाशता शरैः दुःशासनः शतेनैव वृषसेनश्च सप्तभिः सात्यकिं विव्यधुस्तू
र्णं समन्तान्निशितैः शरैः ततः स सात्यकी राजन्सर्वानेव महारथान् विरथान्विमुखांश्चैव क्षणेनैवाकरोन्नृप अश्वत्थामानु संप्राप्य चेतना
म् आर्तरूपं चिन्तयामास दुःखान्निःश्वस्य पुनः पुनः ततो रथान्तरं द्रौणिः समारुह्य परंतपः सात्यकिं वारयामास किरन्शरशतान्बहून् तमा
पतन्तं संप्रेक्ष्य भारद्वाजसुतं रणे विरथं विमुखं चैव पुनश्चक्रे महारथः ततस्ते पाण्डवा राजन्दृष्ट्वा सात्यकि विक्रमं शंखशब्दान्भृशं चक्रुः सिं
हनादांश्च नेदिरे एवं तं विरथं कृत्वा सात्यकिः सत्यविक्रमः जघान वृषसेनस्य त्रिसाहस्रान्महारथान् अयुतं दन्तिनां सार्धं कृपस्य निजघान सः
पञ्च चायुतान्यश्वानां शकुनेर्निजघान सः ततो द्रौणिर्महाराज रथमारुह्य वीर्यवान् सात्यकिं प्रति संक्रुद्धः प्रययौ तद्वधेप्सया पुनस्तमागतं दृ
ष्ट्वा शैनेयो निशितैः शरैः अदारयत्क्रूरतरैः पुनः पुनररिंदम सोऽतिविद्धो महेष्वासो नानालिङ्गैरमर्षणः युयुधानेन वै द्रौणिः प्रहसन्वाक्य राम० २५०
मब्रवीत् शैनेय अभ्युपपत्तिं ते जानाम्याचार्यघातिनि न त्वेनं त्रास्यसि मया ग्रस्तमात्मानमेव च शपेऽहं सत्येन शैनेय सत्येन तपसा

८२

तथा चाहत्वा सर्वपांचालान्नहि शान्तिमहं लभे यद्बलं पाण्डवेयानां ह्यस्मीनामपि यद्बलं क्षिपत्वां सर्वमेवेह निहनिष्यामि सोमकान् एवमु
क्त्वा कर्णस्तमाभं सुतो भ्रान्तेशरेणतमं यतज्जहास कौन्तेयो गाण्डीवं जगृहे पथाहरिः ससर्ज निशितान्बाणान् सायकाः सशरावरं विवेशवसु
धां भित्वा सविलमिवोरगः सभिन्नकवचः श्रान्तो नाहितश्च विह्वलः विमुच्य सशरं चापं भूरिश्रवणपरिप्लवः सोऽद धिसिक्तश्चाप्युपस्थ
प्राविशत् सुतेनापहृतस्तूर्णं द्रोणपुत्रान्तथान्तरं अथानेनसुपुंखेन शरेणानतपर्वणा आजघान प्रभुचामेधोऽपृष्ठद्युम्नं परंतपः सप
वेमतिविद्धश्च महेशं पश्चाद्वपीडितः समाद्रायथवयांवालोयपाश्रयतवक्षजं तं नागमिव सिंहेन हृष्टाराजन् शराहितं जवेनाभ्यद्रवंश्च शूराः
पंचपाण्डवतो रथाः किरीटी भीमसेनश्च धृष्टद्युम्नश्च पौरवः युवराजश्च चेदीनां मालवश्च सुदर्शनः एते हाहाकृताः सर्वे प्रगृहीतशरासनाः वी
रं द्रोणायनिं वीराः सर्वतः पर्यवारयन् ते विंशतिपदे यत्ता गुरुपुत्रममर्षणं पंचभिः पंचभिर्बाणैः पौरवं द्रोणिरर्दयत् मालवं त्रिभिरेकेन पा
र्थं षड्भिर्वृकोदरं ततस्ते विव्यधुः सर्वे द्रोणिं राजन्महारथाः युगपच्च पृथक्चैव रुक्मपुंखैः शिलाशितैः युवराजस्तु विंशत्या द्रोणिं विव्याध पं
चभिः पार्थश्च पुनरष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः ततोऽर्जुनं षड्भिरथाजघान द्रौणायनिर्दशभिर्वासुदेवं भीमं दशार्द्धैर्युवराजं चतुर्भिर्द्वा
भ्यां द्वाभ्यां मालवपौरवौ च सूतं विद्ध्वा भीमसेनस्य षड्भिर्द्वाभ्यां छित्वा कार्मुकं च ध्वजं च पुनः पार्थं शरवर्षेण विद्ध्वा द्रौणिर्घोरं सिंहनादं ननाद
तस्यास्यतस्तान्निशितान्पीतधारान्द्रौणेः शरान्पृष्ठतश्चाग्रतश्च धरा वियद्द्यौः प्रदिशो दिशश्च छन्ना बाणैरभवन्घोररूपैः आसन्नस्य
रथं तीव्रतेजाः सुदर्शनस्येन्द्रकेतुप्रकाशौ भुजौ शिरश्चेन्द्रसमानवीर्यस्त्रिभिः शरैर्युगपत्संचकर्त्त स पौरवं रथशक्त्या निहत्य छित्वा रथं तिलश
श्चासिबाणैः छित्वा च बाहू वरचन्दनाक्तौ भल्लेन कायाच्छिरश्चकर्त्त युवानमिन्दीवरदामवर्णं चेदिप्रभुं युवराजं प्रसह्य बाणैस्त्वरावान्प्रज्व

द्रो० लिताग्निकल्पैर्विशिखाशरान्मृत्सवेगमभ्यहनत् मालवं पौरवं चैव पुत्रराजं च वेदिपं हत्वा समरे संनिहतं द्रोणपुत्रेण पांडवः भीमसेनो महाबाहुः क्रो
२५१ धमाहारयत्परं ततः शरशतैस्तीक्ष्णैः संक्रुद्धाशीविषोपमैः छादयामास समरे द्रोणपुत्रं परंतपः ततो द्रौणिर्महातेजाः शरवर्षं निहत्य तं
विव्याध निशितैर्बाणैर्भीमसेनममर्षणः ततो भीमो महाबाहुर्द्रौणेर्युधि महाबलः क्षुरप्रेण धनुश्छित्वा द्रौणिं विव्याध पत्रिणा तस्य
स धनुश्छिन्नं द्रोणपुत्रो महामनाः अन्यत्कार्मुकमादाय भीमं विव्याध पत्रिभिः तौ द्रौणिभीमौ समरे पराक्रान्तौ महाबलौ अवर्षतां श
रवर्षं वृष्टिमन्ताविवाम्बुदौ भीमनामांकिता बाणाः स्वर्णपुंखाः शिलाशिताः द्रौणिं संछादयामासुर्घनौघा इव भास्करं तथैव द्रौणिनि
र्मुक्तैर्भीमः सन्नतपर्वभिः अवाकीर्यत समरे शरैः शतसहस्रशः स छाद्यमानः समरे द्रौणिना रणशालिना न विव्यथे महाराज तदद्भु
तमिवाभवत् ततो भीमो महाबाहुः कार्तस्वरविभूषितान् नाराचान्दश संप्रैषीद्यमदण्डनिभान्शितान् ते जत्रुदेशमासाद्य द्रोणपुत्रस्य मा
रिष निर्भिद्य विविशुस्तूर्णं वल्मीकमिव पन्नगाः सोऽतिविद्धो भृशं द्रौणिः पांडवेन महात्मना ध्वजयष्टिं समाश्रित्य न्यमीलयत लोचने स
मुहूर्तात्पुनः संज्ञां लब्ध्वा द्रौणिर्नराधिप क्रोधं परममातस्थौ समरे रुधिरोक्षितः दृढं सोऽभिहतस्तेन पांडवेन महात्मना वेगं चक्रे महाबाहुर्भी
मसेनरथं प्रति ततश्चाकर्णपूर्णानां शराणां तिग्मतेजसां शतमाशीविषाभाणां प्रेषयामास भारत भीमोऽपि समरश्लाघी तस्य वीर्यमचिन्तयत्
तूर्णं प्रासृजद्घोराणि शरवर्षाणि पांडवः ततो द्रौणिर्महाराज छित्वास्य विशिखैर्धनुः आजघानोरसि क्रुद्धः पांडवं निशितैः शरैः ततोऽन्यद्धनु
रादाय भीमसेनोऽत्यमर्षणः विव्याध निशितैर्बाणैर्द्रौणिं पंचभिराहवे जीमूताविव घर्मान्ते तौ शरौघप्रवर्षिणौ अन्योन्यं क्रोधताम्राक्षौ छा द्रो०
दयामासतुर्युधि तलशब्दैस्ततो घोरैस्त्रासयन्तौ परस्परं अयुध्येतां सुसंरब्धौ कृतप्रतिकृतैषिणौ ततो विस्फार्य सुमहच्चापं रुक्मविभूषितं २५१

भीमं प्रेषयत सद्रौणिः शरान्संनतपर्विकान् शरघर्म्मिधगतो द्रौमाचिरिव भास्करः आददानस्य विशिखान्संदधानस्य चाशुगान् विकर्ष
तो मुंचतश्चनांतरं ददृशुर्जनाः अलातचक्रप्रतिमं तस्य मंडलमायुधे द्रौणेरासीन्महाराज बाणान्विसृजतस्तदा धनुश्च्युताः शरास्तस्य शतशोथ
सहस्रशः आकाशे प्रत्यदृश्यंत शलभानामिवायतीः ते तु द्रौणिविनिर्मुक्ताः शरा हेमविभूषिताः अजस्रमनुकीर्यंत घोरा भीमरथं प्रति
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमं बलं वीर्यं प्रभावं च व्यवसायं च भारत तां समेघादिवोद्भूतां बाणवृष्टिं समंततः जलवृष्टिं महाघोरां
तपांतइव चिंतयन् द्रोणपुत्रवधप्रेप्सुर्भीमो भीमपराक्रमः अमुंचच्छरवर्षाणि प्रावृषीव बलाहकः ततस्तद्रुक्मपृष्ठं भीमस्य धनुर्घोरं महा
रोषविकृष्यमाणं विबभौ शक्रचापमिवापरं तस्माच्छराः प्रादुरासन् शतशोथ सहस्रशः संछादयंतः समरे द्रौणिमाहवशोभिनं
तयोर्विसृजतोरेवं शरजालानि मारिष वायुरप्यंतरा राजन्नाशक्नोत्प्रतिसर्पितुं तथा द्रौणिर्महाराज शरान्हेमविभूषितान् तैलधौतान्
प्रसन्नाग्रान्प्राहिणोद्वधकांक्षया तानंतरिक्षे विशिखैस्त्रिधैकैकमशातयत् विशेषयन्द्रोणसुतं तिष्ठ तिष्ठेति चाब्रवीत् पुनश्च शरवर्षा
णि घोराण्युग्राणि पांडवः असृजद्बलवान्क्रुद्धो द्रोणपुत्रवधेप्सया ततोस्त्रमायया तान्वै शरवृष्टिं निवार्य तां धनुश्चिच्छेद भीमस्य द्रोणपु
त्रो महास्त्रवित् शरैश्चैनं सुबहुभिः क्रुद्धः संख्ये पराभिनत् सच्छिन्नधन्वा बलवान्रथशक्तिं सुदारुणां वेगेनाविध्य चिक्षेप द्रोणपुत्ररथं प्र
ति तामापतंतीं सहसा महोल्काभां शितैः शरैः चिच्छेद समरे द्रौणिर्दर्शयन्पाणिलाघवं एतस्मिन्नंतरे भीमो दृढमादाय कार्मुकं द्रौणिं
विव्याध विशिखैः स्मयमानो वृकोदरः ततो द्रौणिर्महाराज भीमसेनस्य सारथिं ललाटे दारयामास शरेणानतपर्वणा सोतिविद्धो व

द्रो० त्यक्ता द्रोणपुत्रेण सारथिः व्यामोहमगमद्राजन्रश्मीनुत्सृज्य वाजिनां ततोऽश्वाः प्राद्रवंस्त्रस्ता मोहिते रथसारथौ भीमसेनस्य राजेन्द्र पश्यतां स
२५२ र्वधन्विनां तं दृष्ट्वा प्रद्रुतैरश्वैरपकृष्टं रणाजिरात् दध्मौ प्रमुदितः शंखं बृहन्तमपराजितः ततः सर्वे च पाञ्चाला भीमसेनश्च पाण्डवः धृष्टद्युम्न
रथं त्यक्त्वा भीताः संप्राद्रवन्दिशः तान्प्रभग्नांस्ततो द्रौणिः पृष्ठतो विकिरञ्छरान् अभ्यवर्तत वेगेन कालयन्पाण्डुवाहिनीं ते वध्यमानाः
समरे द्रोणपुत्रेण पार्थिवाः द्रोणपुत्रभयाद्राजन्दिक्षु सर्वासु मेनिरे इति महाभारते द्रोणपर्वणि संजय उवाच ततः प्रभग्नं तद्बलं दृष्ट्वा कुन्ती
पुत्रो धनंजयः न्यवारयदमेयात्मा द्रोणपुत्रजयेप्सया ततस्ते सैनिका राजन्नैव तत्रावतस्थिरे संस्थाप्यमाना यत्नेन गोविन्देनार्जुनेन च
एकस्तु च बीभत्सुः सोमकावयवैः सह मत्स्यैरन्यैश्च संधाय पौरवैः समवर्तत ततोऽद्भुतमतिक्रम्य सिंहलांगूलकेतनं सव्यसाची महे
ष्वासमश्वत्थामानमब्रवीत् या शक्तिर्यच्च विज्ञानं यद्वीर्यं यच्च पौरुषं धार्तराष्ट्रेषु या प्रीतिर्द्वेषोऽस्मासु च यश्च ते यच्च भूयोऽस्ति ते तेजस्त
त्सर्वं मयि दर्शय स एव द्रोणहन्ता ते दर्पं छेत्स्यति पार्षतः कालानलसमप्रख्यं द्विषतामन्तकं युधि समासादय पाञ्चाल्यं मां चापि सहके
शवं दर्पं नाशयितास्म्यद्य तवोद्वृत्तस्य संयुगे धृतराष्ट्र उवाच आचार्यपुत्रो मानार्हो बलवांश्चापि संजय प्रीतिर्धनंजये चास्य प्रियश्चा
पि महात्मनः न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशं अथ कस्मात्स कौन्तेयः सखायं रूक्षमुक्तवान् संजय उवाच युवराजे हते चैव वृद्धक्ष
त्रे च पौरवे इष्वस्त्रविधिसंपन्ने मालवे च सुदर्शने धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते युधिष्ठिरस्य तैर्वाक्यैर्मर्मण्यपि च घट्टिते अन्तर्भे द्रोण०
दे च संजाते दुःखं संस्मृत्य च प्रभो अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजायत तस्मादनर्हमश्लीलमप्रियं द्रौणिमुक्तवान् मान्यमाचा २५२

यत्तन्न युध्यसे कापुरुषो यथा एवमुक्तस्ततः क्रोधान्महेष्वासतमो नृप पार्थेन परुषं वाक्यं सर्वमर्मभिदा गिरा द्रौणिरासीत्सुसंक्रुद्धः पार्थाय कृष्णाय च वि
शेषतः स तु यत्तो रथे स्थित्वा वार्युपस्पृश्य वीर्यवान् देवैरपि सुदुर्धर्षमस्त्रमाग्नेयमाददे दृश्यादृश्यानरिगणानुद्दिश्याचार्यनन्दनः सोभिमन्त्र्य
शरं दीप्तं विधूममिव पावकं सर्वतः क्रोधमाविश्य विक्षेप परवीरहा ततस्तुमुलमाकाशे शरवर्षमजायत पावकार्चिःपरीतं तत्पार्थमेवाभि
पुप्लुवे उल्काश्च गगनात्पेतुर्दिशश्च न चकाशिरे तमश्च सहसा रौद्रं चमूमवततार तां रक्षांसि च पिशाचाश्च विनेदुरभिसंगताः ववुश्चाप्यशि
वा वाताः सूर्यो नैव ततापच वायसाश्चापि चाक्रन्दन्दिक्षु सर्वासु भैरवं रुधिरं चापि वर्षन्तो विनेदुस्तोयदाम्बरे पक्षिणः पशवो गावो मुनयश्चा
पि सुव्रताः परमं प्रयतात्मानो न शान्तिमुपलेभिरे भ्रान्तसर्वमहाभूतं आवर्तितदिवाकरं त्रैलोक्यमभितप्तं तज्ज्वराविष्टमिवाभवत् स्व
स्त्रतेजोभिसंतप्ता नागा भूमिशयास्तथा निःश्वसन्तः समुत्पेतुस्तेजो घोरं मुमुक्षवः जलजानि च सत्त्वानि दह्यमानानि भारत न शां
तिमुपजग्मुर्हि तप्यमानैर्जलाशयैः दिशः प्रदिशः खं भूमिः सर्वतः शरवृष्टयः उच्चावचा निपेतुर्वै गरुडानिलरंहसः तैः शरैर्द्रोणपुत्र
स्य वज्रवेगैः समाहताः प्रदग्धाः शत्रवः पेतुरग्निदग्धा इव द्रुमाः दह्यमाना महानागाः पेतुरुर्व्यां समन्ततः नदन्तो भैरवान्नादान्जलदोपम
निस्वनान् अपरे प्रद्रुता नागा भयत्रस्ता विशांपते भ्रेमुर्दिशो यथा पूर्वं वने दावाग्निसंवृताः द्रुमाणां शिखराणीव दावदग्धानि मारिष
अश्ववृन्दान्यदृश्यन्त रथवृन्दानि भारत अपतन्त रथौघाश्च तत्र तत्र सहस्रशः तत्सैन्यं भयसंविग्नं ददाह युधि भारत युगान्ते सर्वभूतानि संवर्त
क इवानलः दृष्ट्वा तु पाण्डवीं सेनां दह्यमानां महाहवे प्रहृष्टास्तावकाः राजन्सिंहनादान्विनेदिरे ततस्तूर्यसहस्राणि नानालिङ्गानि भारत

द्रो०
२५३

तूष्णीमाजघ्निरेहृष्टास्तावकाजितकाशिनः कृत्स्नाह्यक्षौहिणीराजन्सव्यसाचीचपांडवः तमसासंवृतेलोकेनादृश्यंतमहाहवेनैवनःप्रादृश्यं
राजन्नदृष्टपूर्वंनचश्रुतं यादृशंद्रोणपुत्रेणसृष्टमस्त्रममर्षिणा अर्जुनस्तुमहाराजब्राह्ममस्त्रमुदैरयत् सर्वास्त्रप्रतिघातार्थंविहितं
पद्मयोनिना ततोमुहूर्तादिवतत्तमोव्युपशशामह प्रववौचानिलः शीतोदिशश्चविमलाबभुः तत्राद्भुतमपश्यामकृत्स्नामक्षौ
हिणींहतां अनभिज्ञेयरूपांचप्रदग्धामस्त्रतेजसा ततोवीरौमहेष्वासौविमुक्तौकेशवार्जुनौ सहितौप्रत्यदृश्येतांनभसीवतमो
नुदौ ततोगांडीवधन्वाचकेशवश्चाक्षतावुभौ सपताकध्वजहयःसानुकर्षवरायुधः प्रबभौसरथोमुक्तस्तावकानांभयंकरः ततः
किलकिलाशब्दःशंखभेरीस्वनैःसह पांडवानांप्रहृष्टानांक्षणेनसमजायत हताविनिहतत्रासीत्सेनयोरुभयोर्मतिः तमसासंवृतौ
दृष्ट्वासहितौकेशवार्जुनौ तावक्षतौप्रमुदितौदध्मतुर्वारिजोत्तमौ दृष्ट्वाप्रमुदितान्पार्थांस्त्वदीयाव्यथिताभवन् विमुक्तौचमहात्मानौ
दृष्ट्वाद्रौणिःसुदुःखितः मुहूर्त्तंचिंतयामासकिंत्वेतदितिमारिष चिंतयित्वाचराजेंद्रध्यानशोकपरायणः निःश्वसन्दीर्घमुष्णंचदुःखा
नैश्चाभवत्तदा ततोद्रौणिर्धनुस्त्यक्त्वारथात्प्रस्कंद्यवेगितः धिग्धिक्सर्वमिदंमिथ्येत्युक्त्वासंप्राद्रवद्रणात् ततः स्निग्धांबुदाभासं
वेदव्यासमकल्मषं आसन्नंददर्शपुरतः साक्षाद्धर्ममिवावस्थितं तंद्रौणिरग्रतोदृष्ट्वास्थितंकुरुकुलोद्वह सन्नकंठोऽब्रवीद्वाक्यमभिवाद्य
सुदीनवत् भोभोमायायदृच्छावानविद्मःकिमिदंभवेत् अस्त्रंत्विदंकथंमिथ्याममकश्चव्यतिक्रमः अधरोत्तरमेतद्वालोकानांवा राम०
पराभवः यदिमौजीवतःकृष्णौकालोहिदुरतिक्रमः नासुरानचगंधर्वानपिशाचानराक्षसाः नसर्पयक्षपतगानमनुष्याःकथंच २५३

न तत्सहं तेन मया कर्तुं मे न द्रष्टुं मयेरितं न दिदृक्षे वलं हत्वा शांतमस्तौ हिरण्योज्ज्वलत् सर्वं ध्यानमया भक्त्या महत्त्वं परमदारुणं केनमौ मत्तो धर्मी रणो नावधी
त्केशवार्जुनौ एतत्सर्वं ब्रूहि भगवान् मया पृष्टो यथातथं श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने व्यास उवाच महान्तमेवमर्थं मां यत्त्वं पृच्छसि
विस्मयात् तं शृणुष्वाभिनिवेशं समाधाय मनः शृणु यो सौ नारायणो नाम सर्वेषामपि पूर्वजः अजायत च कार्यार्थे पुत्रो धर्मस्य विश्वकृत्
स तपस्तीव्रमास्थाय मैनाकं गिरिमास्थितः ऊर्द्ध्वबाहुर्महातेजा ज्वलनादित्यसंनिभः षष्टिं वर्षसहस्राणि तावंति च शतानि च अशोषय
त्तदात्मानं वायुभक्षोम्बुजेक्षणः अथापरं तपस्तप्त्वा द्विस्ततोऽमनुरमहत् द्यावापृथिव्योर्विवरं तेजसा सममपूरयत् स तेन तपसा तात ब्रह्मभूतो य
दाभवत् ततो विश्वेश्वरं योनिं विश्वस्य जगतः १४ ददर्श भूरिदुर्दर्शं सर्वदेवैरभिष्टुतं अणीयसामणीयांसं बृहद्भ्यश्च बृहत्तमं रुद्रमीशानमृषभं हरं शं
भुं कपर्दिनं चेकितानं परं योनिं तिष्ठन्तं गच्छतं च ह दुर्वारणं दुर्दृषं तिग्ममन्युं महात्मानं सर्वहरं प्रचेतसं दिव्यं चापमिषुधी चादधानं हिरण्य
वर्माणमनंतवीर्यं पिनाकिनं वज्रिणं दीप्तशूलं परश्वधिनं गदिनं चायतासिं सुभ्रुं जटिलं मुशलिनं चंद्रमौलिं व्याघ्राजिनं परिघिणं दंड
पाणिं शुभांगदिनं नागयज्ञोपवीतिनं विश्वैर्गणैः शोभितं भूतसंघैः एकीभूतं तपसां संनिधानं वयोतिगैः सुष्टुतमिष्टवाग्भिः
जलं दिशं खं क्षितिं चंद्रसूर्यौ तथा वाय्वग्नी प्रतिमानं जगच्च नालं द्रष्टुं यमजं भिन्नवृत्ता ब्रह्मद्विषघ्नममृतस्य योनिं यं पश्यंति ब्राह्मणाः
साधुवृत्ताः क्षीणपापा मनसा वीतशोकाः तं निष्ठपंतं तपसा धर्ममीड्यं तद्भक्तो वै विश्वरूपं ददर्श दृष्ट्वा चैनं वाङ्मनोबुद्धिदेहैः संहृष्टात्मा

नी० २५५ सुसुरेशासुरेश्वः अक्षमालापरीक्षिप्तंजोतिषांपरमंनिधिं नतोनारायणोहृष्टाववंदेविश्वसंभवं वरदंपृथुचार्वंगपार्श्वेतामसहितंप्रभुं कोट
मानंमहात्मानंभूतसंघगणैर्वृतं अजमीशानमव्यक्तंकारणात्मानमच्युतं अभिवाद्यअथरुद्रायसद्योधोक्षजनिपातितेन पद्माक्षस्तंविरूपाक्ष
मभितुष्टावभक्तिमान् नारायणउवाच त्वत्संभूताभूतकृतोवरेण्यगोप्तारोयभुवनपूर्वदेवाः आविश्यमांधरणींयेभ्यरक्षन्पुराणीं पुरा०
तवदेवसृष्टीं सुरासुरान्नागरक्षःपिशाचान्नरान्सुपर्णान्अथगंधर्वयक्षान् पृथग्विधान्भूतसंघांश्चविश्वांस्तत्सभूतांन्विद्मसर्वांस्त्वयेव
ऐंद्रंयाम्यंवारुणंवैत्तपालंपैत्रंत्वाष्ट्रंकर्मसौम्यंचतुभ्यं रूपंज्योतिःशब्दआकाशवायुःस्पर्शःस्वाद्यंसलिलंगंधऊर्वी कालोब्रह्माब्रह्मच
ब्राह्मणाश्चत्वत्संभूतंस्थास्नुचरिष्णुचेदं अप्सुलोकायांतियथापृथक्त्वेताभिसृष्टांसंक्षयेयांतिभूयः एवंविद्वान्प्रभवंचाव्ययंचमत्तोभू
तानांतवसायुज्यमेति दिव्यावृतौमानसौद्वौसुपर्णौवृक्षशाखाःपिप्पलाःसप्तगोप्ताः दशाप्यन्येयपुरंधारयंतित्वयासृष्टास्त्वंहितेभ्यः
परोहि भूतंभव्यंभविताचाप्यधृष्यंत्वत्संभूताभुवनानीहविश्वा भक्तंचमांभजमानंभजस्वमारीरिषोमामपित्तैर्हितैरुक्ष्व आत्मा
नंत्वामात्मनानान्यबोधंविद्वान्एवंगतिब्रह्मसंशुक्रं अस्तौषंत्वांतवसंमानमिच्छन्विदितैर्वेवंयंदृष्टदेववर्यं सुदुर्लभान्देवेहिरान्ममेष्टान राम०
भिष्टुतःप्रविकार्यीप्रमायायाप्यसत्रवाच तस्मैवरान्अचिंत्यात्मानीलकंठःपिनाकधृक् अर्हितेदेवमुख्यायप्रायच्छदृषिसंस्तुतः भ २५५

गवानुवाच मत्प्रसादान्मनुष्येषु देवगंधर्वयोनिषु अप्रमेयबलात्मा त्वं नारायणपरो भविष्यसि न च त्वां प्रसहिष्यन्ति देवासुरमहोरगाः न पिशा
चा न गंधर्वा न पक्षा न च राक्षसाः न सुपर्णास्तथा नागा न च वीर्या विषयोनिजाः न कश्चित्त्वां च देवोऽपि समरेषु विजेष्यति न शस्त्रेण न वज्रे
ण नाग्निना न च वायुना नार्द्रेण न च शुष्केण त्रसेन स्थावरेण च कश्चित्तव रुजं कर्त्ता मत्प्रसादात्कथंचन अपि चैव समरं गत्वा भविष्य
सि ममाधिकः एवमेतान्वरान्लब्ध्वा पुरस्ताद्धि हृषीकेशात् स एष देवश्चरति मायया मोहयञ्जगत् तस्यैव तपसो जातं नरं नाम मह
हामुनिं तुल्यमेतेन देवेन तं जानीह्यर्जुनं सदा तावेतौ पूर्वदेवानां परमोपचितावृषी लोकयात्राविधानार्थं संजायेते युगे युगे
तथैव कर्म्मणः कृत्स्नं महतस्तपसोऽपि च तेजोमन्युश्च विप्रस्त्वं जातो रौद्रो महामते स भवान्देववत्प्राज्ञो ज्ञात्वा भवमयं ज
गत् अवाकर्षत वात्मानं नियतैस्तैर्व्रतैः सदा शुभ्रं सत्तु भवान्कृत्वा महापुरुषविग्रहं ईजिवांस्त्वं जपैर्होमैरुपहारैश्च मानद स
तथा पूज्यमानस्ते पूर्वदेहे त्वमतुतुषत् पुष्कलांश्च वरान्प्रादात्स विद्वन्हृदि स्थितान् जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः
ताभ्यां लिंगार्चितो देवस्त्वयार्चायां युगे युगे स एवं रुद्रभक्तश्च केशवो रुद्रसंभवः सर्वरूपं भवं ज्ञात्वा लिंगे योऽर्चयति प्रभुं आत्मयो
गाश्च तस्मिन्वै शास्त्रयोगाश्च शाश्वताः एवं देवा यजन्तो हि सिद्धाश्च परमर्षयः प्रार्थयन्ते परं लोके स्थानमेकं सनातनं कृष्ण एव हि

द्रो० २५५

यष्टव्यो यज्ञैः स्वयं सनातनः सर्वभूतभवं ज्ञात्वा लिंगमर्चति यः प्रभुं तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः संजय उवाच तस्य तद्वचनं श्रुत्वा
द्रोणपुत्रो महारथः नमश्चकार रुद्राय बहु मेने च केशवं हृष्टरोमा च वश्यात्मा सोभिवाद्य महर्षये वरूथिनीमभिप्रेक्ष्य अवहारमकार
यत् ततः प्रत्यवहारोभूत् पांडवानां विशांपते कौरवाणां च दीनानां द्रोणे युधि निपातिते युद्धं कृत्वा दिनान् पंच द्रोणो हत्वा वरूथिनीं
ब्रह्मलोकं गतो राजन् ब्राह्मणो वेदपारगः महाभारते द्रोणपर्वणि धृतराष्ट्र उवाच तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै
मामकाः पांडवाश्चैव किमकुर्वन्नतः परं संजय उवाच तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै कौरवेषु च भग्नेषु कुंतीपुत्रो धनंजयः
दृष्ट्वा सुमहदाश्चर्यमात्मनो विजयावहं यदृच्छयागतं व्यासं पप्रच्छ भरतर्षभः अर्जुन उवाच संग्रामे न्यहनं शत्रून् शरौघैर्विमलै
रहं अग्रतो लक्षये यांतं पुरुषं पावकप्रभं ज्वलंतं शूलमुद्यम्य यां दिशं प्रतिपद्यते तस्यां दिशि विदीर्यंते शत्रवो मे महामुने तेन भग्ना
न्नरान् सर्वान् मद्बाणान् मन्यते जनः तेन भग्नानि सैन्यानि पृष्ठतोनुदहाम्यहं भगवंस्तन्ममाचक्ष्व को वै स पुरुषोत्तमः शूलपाणिर्महा
न्कृशस्तेजसा सूर्यसंनिभः न पद्भ्यां स्पृशते भूमिं न च शूलं विमुंचति शूलाच्छूलसहस्राणि निष्पेतुस्तस्य तेजसा व्यास उवाच प्र
जापतीनां प्रथमं तैजसं पुरुषं प्रभुं भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुं ईशानं वरदं पार्थ दृष्टवानसि शंकरं तं गच्छ शरणं देवं वरदं भु राम० २५५
वनेश्वरं महादेवं महात्मानमीशानं जटिलं शिवं त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससं महादेवं हरं स्थाणुं वरदं भुवनेश्वरं जग
त्प्रधानमजितं जगत्प्रीतिमधीश्वरं जगद्योनिं जगद्बीजं

जपतिं जगत्तोगतिं विश्वात्मानं विश्वसृजं विश्वमूर्त्तिं यशस्विनं विश्वेश्वरं विश्वकर्त्तारं कर्मणामीश्वरं प्रभुं शंभुं स्वयंभुं भूतेशं भूतभव्यभवोद्भवं यो
गं योगेश्वरं सर्वं सर्वलोकेश्वरेश्वरं सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनं लोकत्रयविधातारमेकं लोकत्रयाश्रयं सुदुर्ज्जयं जगन्नाथं जन्म
मृत्युजरातिगं ज्ञानात्मानं ज्ञानगम्यं ज्ञानश्रेष्ठं सुदुर्विदं दातारं चैव भक्तानां प्रसादविहितान्वरान् तस्य पारिषदान्दिव्यान् रूपैर्नानाविधैर्वि
भोः वामनाञ्जटिलान्मुंडान्ह्रस्वग्रीवान्महोदरान् महाकायान्महोत्साहान्महाकर्णांस्तथापरे आननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः
ईदृशैः स महादेवः पूज्यमानो महेश्वरः स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः तस्मिन्घोरे सदा पार्थ संग्रामे लोमहर्षणे द्रौणिक
र्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत् ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् स्थातुमुत्सह
ते कश्चिन्न तस्मिन्नग्रतः स्थिते नहि भूतं समं तेन त्रिषु लोकेषु विद्यते गंधेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः विसंज्ञा हतभूयिष्ठा
वेपंति च पतंति च तस्मिन्नमस्तु कुर्वंतो देवास्तिष्ठंति वै दिवि ये चान्ये मानवा लोके ये च स्वर्गजितो नराः ये भक्ता वरदं देवं शिवं रुद्रमु
मापतिं इह लोके सुखं प्राप्य ते यांति परमां गतिं नमस्कुरुष्व कौंतेय तस्मै शांताय वै सदा रुद्राय शितिकंठाय कनिष्ठाय सुवर्चसे क
पर्द्दिने करालाय हर्यक्षवरदाय च याम्यायाव्यक्तकेशाय सद्वृत्ते शंकराय च काम्याय हरिनेत्राय स्थाणवे पुरुषाय च हरिकेशा
य मुंडाय कृशायोत्तारणाय च भास्कराय सुतीर्थाय देवदेवाय रंहसे बहुरूपाय सर्वाय प्रियाय प्रियवाससे उष्णीषिणे सुवक्त्राय स
हस्राक्षाय मीढुषे गिरिशाय प्रशांताय पतये चीरवाससे कपर्द्दिने करालाय ऽध्यापपतये दिशां पर्जन्यपतये चैव भूतानां पतये नमः

द्रो०
२५६

वृक्षाणांपतयेचैवगवांचपतयेनमः वृक्षैरावृतकायायसेनान्येमध्यमायच स्रुवहस्तायदेवायधन्विनेभार्गवायच बहुरूपायविश्व
स्यपतयेमुंजवाससे सहस्रशिरसेचैवसहस्रनयनायच सहस्रबाहवेचैवसहस्रचरणायचशरणंगच्छकौंतेयवरदंभुवनेश्वरं उमा
पतिंविरूपाक्षंदक्षयज्ञनिबर्हणं प्रजानांपतिमव्यग्रंभूतानांपतिमव्ययं कपर्दिनंवृषावर्त्तंवृषनाभंवृषध्वजं वृषदर्पंवृषपतिंवृषशृ
ंगंवृषर्षभं वृषांकंवृषभोदारंवृषभंवृषभेक्षणं वृषायुधंवृषशरंवृषभूतंमहेश्वरं महोदरंमहाकायंद्वीपिचर्मनिवासिनं लोकेशंव
रदंमुंडंब्रह्मण्यंब्राह्मणप्रियं त्रिशूलपाणिंवरदंखड्गचर्मधरंप्रभुं पिनाकिनंखड्गधरंलोकानांपतिमीश्वरं प्रपद्येशरणंदेवंश
रण्यंचीरवाससं नमस्तस्मैसुरेशाययस्यवैश्रवणःसखा सुवाससेनमस्तुभ्यंसुव्रतायसुधन्विने धनुर्धरायदेवायप्रियधन्वाय
धन्विने धन्वंतरायधनुषेधन्वाचार्यायतेनमः उग्रायुधायदेवायनमः सुरवरायच नमोस्तुबहुरूपायनमोस्तुबहुधन्विने नमो
स्तुस्थाणवेनित्यंनमस्तस्मैसुधन्विने नमोस्तुस्थाणवेनित्यंनमस्तस्मैसुधन्विने नमोस्तुत्रिपुरघ्नायभग घ्नायचैवनमः वनस्पती
नांपतयेनराणांपतयेनमः मातृणांपतयेचैवगणानांपतयेनमः गवांचपतयेनित्यंय ज्ञानांपतयेनमः अपांचपतयेनित्यं
देवानांपतयेनराणांपतयेनमः [illegible] पूष्णोदंतविनाशायत्र्यक्षायवरदाय
च नीलकंठायपिंगायस्वर्णकेशायवैनमः कर्म्माणियानिदिव्यानिमहादेवस्यधीमतः तानितेकीर्त्तयिष्यामियथाप्रज्ञंयथा
श्रुतं नसुरानासुरालोकेनगंधर्वानराक्षसाः सुख मेधंतिकुपितेतस्मिन्नपिगुहागताः दक्षस्ययजमानस्यविधिवत्संभृतंपुरा

राम०
२५६

विव्याधकुपितोपञ्चनिर्भयः समर्थयन्नरः। धनुषावाणमुत्सृज्यसघोषंविननादच तेनशर्मकृतः शान्तिंलेभिरेस्मसुरासुराः। विज्ञातंसाहसायेन्द्रकु
पितेनचमहेश्वरे तेनज्यातलघोषेणसर्वेलोकाः समाकुलाः बभूवुर्वशगाः पार्थनिपेतुश्चसुरासुराः आपश्चुक्षुभिरेसर्वाश्चकंपेचवसुंधरा
पर्वताश्चव्यशीर्यन्तदिशोनागाश्चमोहिताः अंधेनतमसालोकानप्रकाशेनसंवृताः जज्ञिवान्सहस्रसूर्येणासर्वेषांज्योतिषांप्रभाः चुक्षुभु
र्भयभीताश्चशांतिंचक्रुस्तथैवच ऋषयः सर्वभूतानामात्मनश्चसुरैर्विषिणः शूषाणामप्यद्भुतवृत्तशीकरैः प्रहसन्निव पुरोगशंभक्ष्यपत्तोरश
नान्व्यशान्तयत ततोनिश्चक्रमुर्देवाविषमाननाःस्मत पुनश्चसंदधेदीप्तानदेवानांनिशितानुशरान सधूमान्सस्फुलिंगांश्चविद्युत्ता
पदसंनिभान् तेदृष्ट्वातुसुराः सर्वेप्रणिपत्यमहेश्वरं रुद्रस्ययज्ञभागंचविशिष्टंतेचकल्पयन् भयेनत्रिदशाराजन् शरणंचप्रपेदिरे तेन
वेवातिकोपेनसंपन्नः संधितस्तदा यज्ञाश्चापिसुराश्चासनभीताश्चापिपितृमति असुराणांपुराण्यासन्स्त्रीणिवीर्यवन्तिदिवि आयसं
राजतंचैवसौवर्णंपरमंमहत् सौवर्णंकमलाक्षस्यतारकाक्षस्यराजतं तृतीयंतुपुरंतेषांविद्युन्मालिनआयसं नशक्तस्तानिमघवा
न्भेत्तुंसर्वायुधैरपि अथसर्वेसुरारुद्रंजग्मुः शरणमर्दिताः तेतमूचुर्महात्मानंसर्वेदेवाः सवासवाः ब्रह्मदत्तवराह्येतेघोरास्त्रिपुरवा
सिनः पीडयन्त्यधिकंलोकंयस्मात्तेवरदर्पिताः त्वदृतेदेवदेवेशनान्यः शक्तः कथंचन हंतुंदैत्यान्महादेवजहितांस्त्वसुरद्विषः रुद्रोद्य
भविष्यंतिपशवः सर्वकर्मसु निपातयिष्यसेचेतानसुरान्भुवनेश्वरः सतथोक्तस्तथेत्युक्त्वादेवानांहितकाम्यया गंधमादनविंध्यौच
कृत्वावंशध्वजौहरः पृथ्वींससागरवनांरथंकृत्वातुशंकरः अक्षंकृत्वातुनागेन्द्रंशेषंकृत्वात्रिलोचनः चक्रेकृत्वातुचन्द्रार्कौदेवदेवः पिना

कश्चकं अरणीं कृत्वेलपत्रं च पुष्पदन्तं च अम्बकः पृथ्वीं कृत्वा तु मलयम् अवनाहं च नस्यकं योक्त्राङ्गानि च सत्त्वानि कृत्वा शर्वः प्रतापवा
न् वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान्महेश्वरः उपवेदान् खलीनांश्च कृत्वा लोकांश्चैवेश्वरः गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः कृत्वों
कारं प्रतोदं च ब्रह्माणं चैव सारथिं गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा तु वासुकिं विष्णुं शरोत्तमं कृत्वा शल्यम् अग्निं तथैव च वायुं कृत्वाथ वाजाभ्यां पुं
खे वैवस्वतं यमं विद्युत्कृत्वाथ निश्रेणीं मेरुं कृत्वाथ वै ध्वजं आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां
वरः असुराणाम् अन्तकरः श्रीमान् अतुलविक्रमः स्तूयमानः सुरैः पार्थ ऋषिभिश्च तपोधनैः स्थानं माहेश्वरं कृत्वा दिव्यम् अप्रतिमं प्र
भुः अतिष्ठत् स्थाणुभूतः सहस्रं परिवत्सरान् यदा त्रीणि समेतानि अन्तरिक्षे पुराणि च त्रिपर्वणा त्रिशल्येन तदा तानि बिभेद सः
पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुं शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतं पुराणि दग्धवन्तं तं देवी याता प्रवीक्षितुं बालमङ्क ९५
गतं कृत्वा स्वयं पञ्चशिखं पुनः उमा जिज्ञासमाना वै कोऽयम् इत्य् अब्रवीत् सुरान् असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः बाहुं सवज्रं तं तस्य
क्रुद्धस्यास्तम्भयत् प्रभुः प्रहस्य भगवांस्तूर्णं सर्वलोकेश्वरो विभुः ततः संस्तम्भितभुजः शक्रो देवगणैर्वृतः जगाम ससुरस्तूर्णं ब्रह्माणं
प्रभुम् अव्ययं ते तं प्रणम्य शिरसा प्रोचुः प्राञ्जलयस्तदा किम् अप्य् अङ्कगतं ब्रह्मन् पार्वत्या भूतम् अद्भुतं बालरूपधरं दृष्ट्वा नास्माभिर् अभिल राम०
क्षितः तस्मात् त्वां प्रष्टुम् इच्छामो निर्जिता येन वै वयं अयुध्यता हि बालेन लीलया सपुरंदराः तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदां वरः
ध्यात्वा स्वयं स भगवान् स्तान् चेमिततेजसः चराचरस्य जगतः प्रभुः स भगवान् हरः तस्मात् परतरं नान्यल्लोकेष्व् इह ह्य् अस्ति महेश्वरात् योऽद्

हीत्युमयासार्द्धंयुष्माभिरमितद्युतिः सपार्वेसाकृतेशर्वेः कृतवान्बालरूपतां तेमयासहितायूयंप्रपद्यध्वंतमेवहि सएषभगवा
न्देवः सर्वलोकेश्वरःप्रभुः नसंबुबुधिरेचैवदेवास्तंभुवनेश्वरं सप्रजापतयः सर्वेबालार्कसदृशप्रभं अथाभ्येत्यततोब्रह्मादृष्ट्वाच
समहेश्वरं स्वयंश्रेष्ठइतिज्ञात्वाववंदेतंपितामहः ब्रह्मोवाच त्वंयज्ञोभुवनस्यास्यत्वंगतिस्त्वंपरायणः त्वंभवस्त्वंमहादेवस्त्वंधा
मपरमंपदं त्वयासर्वमिदंव्याप्तंजगत्स्थावरजंगमं भगवन्भूतभव्येशलोकनाथजगत्पते प्रसादंकुरुशक्रस्यत्वयाक्रोधाहितस्य
वै व्यासउवाच पद्मयोनिवचःश्रुत्वाततःप्रीतोमहेश्वरः प्रसादाभिमुखोभूत्वाअट्टहासमथाकरोत् ततःप्रसादयामासुरुमांरु
द्रंचतेसुराः अभवच्चपुनर्वायुर्यथाप्रकृतिवज्रिणः तेषांप्रसन्नोभगवान्सपत्नीकोवृषध्वजः देवानांत्रिदशश्रेष्ठोदक्षयज्ञविनाश
नः सवैरुद्रःसचशिवःसोग्निःसर्वश्चसर्ववित् सचेंद्रश्चैववायुश्चसोश्विनौचसविद्युतः सभवःसचपर्जन्योमहादेवःसनातनः स
चंद्रमाःसचेशानःससूर्योवरुणश्चसः सकालःसोंतकोमृत्युःसयमोरात्र्यहानितु मासार्द्धमासाऋतवःसंध्येसंवत्सरश्चसः धाता
चसविधाताचविश्वात्माविश्वकर्मकृत् सर्वासांदेवतानांचधारयत्यवपुर्वपुः सर्वैर्देवैःस्तुतोदेवःसैकधाबहुधाचसः शतधासहस्र
धाचैवभूयःशतसहस्रधा द्वेतनूतस्यदेवस्यवेदज्ञाब्राह्मणाविदुः घोराचान्याशिवाचान्यातेतनूबहुधापुनः घोरातुयातनुस्तस्यसो
ग्निर्विष्णुःसभास्करः सौम्यातुपुनरेवास्यआपोज्योतींषिचंद्रमाः वेदांगाःसोपनिषदःपुराणाध्यात्मनिश्चयाः यदत्रपरमंगुह्यं

सैवदेवोमहेश्वरः ईदृशः समहादेवोभूयांश्चभगवानजः नहिसर्वेमयाशक्यावक्तुंभगवतोगुणाः अपिवर्षसहस्रेणसततंपां
डुनंदन सर्वग्रहैर्गृहीतांश्चसर्वपापसमन्वितान समोचयतिसुप्रीतः शरण्यः शरणागतान आयुरारोग्यमैश्वर्यंवित्तंकामांश्च
पुष्कलान सददातिमनुष्येभ्यः सचैवाक्षिपतेपुनः सेंद्रादिषुचदेवेषुतस्यैश्वर्यमुच्यते सचैवव्यापृतोलोकेमनुष्याणांशुभाशु
भे ऐश्वर्याच्चैवकामानामीश्वरश्चसउच्यते महेश्वरश्चभूतानांमहतामीश्वरश्चसः बहुभिर्बहुधारूपैर्विश्वंव्याप्नोतिवैजगत त
स्यदेवस्ययद्वक्त्रंसमुद्रेतदधिष्ठितं वडवामुखेतिविख्यातंपिबत्तोयमयंहविः एषचैवश्मशानेषुदेवोवसतिनित्यशः यजंत्ये
नंजनास्तत्रवीरस्थान ईश्वरं अस्यदीप्तानिरूपाणिघोराणिचबहूनिच लोकेयान्यस्यपूज्यंतेमनुष्याःप्रवदंतिच नामधे
यानिलोकेषुबहून्यस्ययथार्थवत निरुच्यंतेमहत्वाच्चविभुत्वात्कर्मभिस्तथा वेदेचास्यसमाम्नातंशतरुद्रियमुत्तमं नाम्नाचा
नंतरुद्रेतिउपस्थानंमहात्मनः सकामानांप्रभुर्देवोयेदिव्यायेचमानुषाः सविभुः सप्रभुर्देवोविश्वंव्याप्नोतिवैमहत ज्येष्ठंभूतंव
दंत्येनंब्राह्मणामुनयस्तथा प्रथमोह्येषदेवानांमुखादस्यानलोभवत सर्वथायत्पशून्पातितैश्चयद्रमतेपुनः तेषामधिपति
र्यच्चतस्मात्पशुपतिःस्मृतः नित्येनब्रह्मचर्येणलिंगमस्ययदास्थितं महयत्यस्यलोकाश्चमहेश्वरइतिस्मृतः ऋषयश्चैवदेवा
श्चगंधर्वाप्सरसस्तथा लिंगमस्यार्चयंतिस्मतच्चाप्यूर्ध्वंसमास्थितं पूज्यमानेततस्तस्मिन्मोदतेसमहेश्वरः सुखीप्रीतश्चभवति
प्रहृष्टश्चैवशंकरः यदस्यबहुधारूपंभूतभव्यभवत्स्थितं स्थावरंजंगमंचैवबहुरूपस्ततःस्मृतः एकाक्षोजाज्वलन्नास्तेसर्वतोक्षिम

योपिवा क्रोधाघचाविशंल्लोकास्तस्मात्सर्वइतिस्मृतः धूम्ररूपंचयत्तस्यधूर्जटिस्तेनचोच्यते विश्वेदेवाश्चयत्तस्मिन्विश्वरूपस्ततः स्मृतः
तिस्रोदेव्योयदाचैनंभजंतेभुवनेश्वरं द्यौरपः पृथिवीचैवत्र्यंबकश्चततः स्मृतः समेधयतियन्नित्यंसर्वार्थान्सर्वकर्मसु शिवमिछ
न्मनुष्याणांतस्मादेषशिवः स्मृतः सहस्राक्षोयुताक्षोवासर्वतोक्षिमयोपिवा यच्चविश्वंमहत्पातिमहादेवस्ततः स्मृतः महत्पूर्वंस्थि
तोयच्चप्राणोत्पत्तिस्थितेश्चयत् स्थितलिंगश्चयन्नित्यंतस्मात्स्थाणुरितिस्मृतः भूतंभव्यंभविष्यंचसर्वंसर्वमशेषतः भवएषततोय
स्माद्भूतभव्यभवोद्भवः विषमस्थः शरीरेषुसमश्चप्राणिनामिह सवायुर्विषमस्थेषुप्राणापानः शरीरिषु पूजयेद्विग्रहंयस्तुलिंगंचापि
महात्मनः लिंगंपूजयितानित्यंमहतींश्रियमश्नुते ऊरुभ्यामर्द्धमाग्नेयंसोमार्द्धंचशिवातनुः आत्मनोर्द्धंतथाचाग्निःसोमार्द्धंपुनरु
च्यते तैजसीमहतीदीप्तादेवेभ्योस्यशिवातनुः भास्वतीमानुषेष्वस्यतनुर्घोराग्निरुच्यते ब्रह्मचर्यंचरत्येषशिवायास्यतनुस्तथा
यास्यघोरतमामूर्तिःसर्वानत्तितयेश्वरः यन्निर्दहतियत्तीक्ष्णोयदुग्रोयत्प्रतापवान् मांसशोणितमज्जादोयत्ततोरुद्रउच्यते सूर्या
चंद्रमसोर्लोकेप्रकाशंतेरुचश्चयाः तेकेशसंज्ञितास्त्र्यक्षेव्योमकेशस्ततः स्मृतः कपिःश्रेष्ठइतिप्रोक्तोधर्मश्चवृषउच्यते सदेवदेवोभगवा
न्कीर्त्यतेतोवृषाकपिः ब्रह्माणमिंद्रंवरुणंयमंधनदमेवच निगृह्यहरतेयस्मात्तस्माद्धरइतिस्मृतः उन्मीलिताभ्यांनेत्राभ्यांबला
द्देवोमहेश्वरः ललाटेनेत्रमसृजत्तेनत्र्यक्षः सउच्यते एषदेवोमहादेवोयोसौपार्थतवाग्रतः संग्रामेशात्रवान्निघ्नंस्त्वयादृष्टःपिनाक
धृक् सिंधुराजवधार्थायप्रतिज्ञापालयानघ कृष्णेनदर्शितः स्वप्नेयस्तुशैलेंद्रमूर्द्धनि एषवैभगवान्देवः संग्रामेपातितेग्रतः येनदत्तानि

द्रो० नेत्स्वाणिये त्वयादानवाहताः धन्यंयशस्यमायुष्यंपुण्यंवेदैश्चसंमितं देवदेवस्यतेपार्थआख्यातंशतरुद्रियं सर्वार्थसाधनंपुण्यंसर्वकिल्वि
२५९ षनाशनंसर्वपापप्रशमनंसर्वदुःखभयापहं धन्यंयशस्यमायुष्यंपुण्यंवेदैश्चसंमितं देवदेवस्यतेपार्थव्याख्यातंशतरुद्रियं सर्वा
र्थसाधनंपुण्यंसर्वकिल्विषनाशनं सर्वपापप्रशमनंसर्वदुःखभयापहं चतुर्विधमिदंस्तोत्रंयः शृणोतिनरःसदा विजित्यशत्रू
न्सर्वान्सरुद्रलोकेमहीयते चरितंमहात्मनोनित्यंसांग्रामिकमिदंस्मृतं पठन्वैशतरुद्रीयंशृण्वंश्चसततोत्थितः भक्तोविश्वेश्वरंदेवंमा
नुषेषुतुयःसदा वरान्कामान्सलभतेप्रसन्नेत्र्यंबकेनरः गच्छयुध्यस्वकौंतेयनतवास्तिपराजयः यस्यमंत्रीचगोप्ताचपार्श्वतस्तेज
नार्दनः संजयउवाच एवमुक्त्वार्जुनंसंख्येपराशरसुतस्तदा जगामभरतश्रेष्ठयथागतमरिंदम इतिश्रीमहाभारतेद्रोणपर्व
णिशतरुद्रीये संजयउवाच युद्धंकृत्वामहद्घोरंपंचाहानिमहाबलः ब्रा ह्मणोनिहतोराजन्ब्रह्मलोकमवाप्तवान् स्वधीतेयत्फ
लंवेदेतदस्मिन्नपिपर्वणि क्षत्रियाणामभीरूणांयुक्तमत्रमहद्यशः यइदंपठतेपर्वशृणुयाद्वापिनित्यशः समुच्यतेमहापापैः कृ
तैर्घोरैश्चकर्मभिः यज्ञावाप्तिर्ब्राह्मणस्यहनित्यंघोरेयुद्धेक्षत्रियाणांयशश्च शेषौवर्णौकाममिष्टंलभेतेपुत्रान्पौत्रान्नित्यमि
ष्टांस्तथैव॥ ॥इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांद्रोणपर्वसमाप्तं अस्यानंतरंकर्णपर्वभविष्यति यस्यायमाद्यश्लो राम०
कः वैशंपायनउवाच ततोद्रोणेहतेराजन्दुर्योधनमुखानृपाः भृशमुद्विग्नमनसोद्रोणपुत्रमुपाद्रवन् अथद्रोणपर्वणिवृत्तांताः २५९
आदौद्रोणस्याभिषेकः संशप्तकवधस्ततः अभिमन्योर्वधोजिष्णोःप्रतिज्ञासैंधवंप्रति बृहस्पत्यवनाजान्प्रवेशः सव्यसाचिनः सात्यके

द्रो०

२६०

युद्धे द्रोणस्य प्रवेशो मारुतेस्तथा जयद्रथस्य वधः पार्थेन वह्निविस्तरः एतत्युद्धं च तत्रापि राक्षसानां बुधक्षयः घटोत्कचस्य च वधो मतस्य
पाञ्चालयोरपि आचार्यस्य च विप्रस्य द्रोणस्य निधनं तथा द्रौणेर्नारायणास्त्रस्य मोक्षणं तत्प्रतिक्रिया आग्नेयास्त्रस्य विन्यासस्तस्मा
त्तोघातस्य च वेदव्यासेन पार्थाय कथितं शतरुद्रियं सर्वपापप्रशमनं सर्वेषामंततस्ततः अस्मिन्पर्वणि संख्यानं कथितं त
त्त्वबुद्धिना अत्राध्यायशतं प्रोक्तं अध्यायाः सप्ततिस्तथा नवश्लोकसहस्राणि तथा नवशतानि च श्लोकानवतथाशीतिः संख्या
तानि तत्त्वदर्शिना द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितं शरण्यं देयानि इह चापानि सिवराणि तथा अश्वान्रथान्गजांश्चैव वस्त्राणि
स्याभरणानि च इति द्रोणः ॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥४४४४४४४॥ ॥४

राम०

२६०

ॐ

द्रोणपर्वपत्र २६० [illegible]

[illegible]

द्रोणपर्वपत्र
२६०

पत्रे २५८

[illegible] २६०

पर्वडोर

वतरे होदे कलापंडु ते की दिता

बाब्रमणे बाका हे मर र १ ८१८

पेतप्रा० पू४ १६० कुलते

दितेसादोरल

